वक्तव्यमभिमन्स्येति । तदिदमध्यायादौ प्रतिज्ञायते । अथ विशेषलक्षणमिति । अथेदानीं कृत्स्नसामान्यातिदेशलक्षणादनन्तरं विशेषलक्षणं वक्ष्यामः । तदुच्यमानं यथाकालं बोद्धव्यमिति ॥ १ ॥

(सादृश्यविशेषेण नियतप्रकृतितो धर्मातिदेशाधिकरणम् ॥ २ ॥)

तदेतत्संक्षेपेणैवोच्यते—

[२] यस्य लिङ्गमर्थसंयोगादभिधानवत् ॥ २ ॥ सि०

यस्य वैदिकस्य विध्यन्तस्य लिङ्गं किंचित्, शब्दगतमर्थगतं वा वैकृत्या कर्मचोदनाया, तद्गुणवाक्ये वा दृश्यते । तत्र स विध्यन्तः स्यात् । कुतः । अर्थसंयोगात् । तस्यार्थस्य लिङ्गस्य तेन विध्यन्तविशेषणेन संयोगोऽनुभूतपूर्वः । संयोगिनोश्चान्यतरो दृश्यमान इतरमदृश्यमानमप्यनुमानाद्बुद्धौ संनिधापयति । अभिधानवत् । यथा, अग्निहोत्रमित्यभिधानं कौण्डपायिनामयने श्रूयमाणं नैयमिकाग्निहोत्रधर्मान् बुद्धौ संनिधापयति । किमतोऽत्र । एतदतो भवति । अपूर्वं यद्वाक्यं तत्पूरणसमर्थेनानयनेन बुद्धौ संनिहितेनैकवाक्यतां याति । यथा दर्शपूर्णमासाभ्यां

इति पूर्व. पक्ष । उत्तरस्तु नियमेनैव प्रवर्तते 'अथ विशेषलक्षणम्' इति—एकस्माच्चिषेमेन प्रवर्तन इत्यर्थः । विशेष इत्यसाधारण्यमुच्यते । यदि वाऽनियमेन, ततोऽसाधारण्य न स्यात् । असाधारण्याभावाच्च विशेषो न स्यात् ।

अथवाऽन्य. सूत्रार्थ. । विशेषाद्विशेषस्य धर्माः प्रवर्तन्ते । कतरस्मात्कतरस्येत्यत आह—' यस्य लिङ्गमर्थसंयोगात् ' इति । संशयस्तु नैव कार्योऽस्मिन् पक्षे ॥ १ ॥

तस्यार्थस्य लिङ्गस्य तेन विध्यन्तविशेषेण संयोगोऽनुभूतपूर्वः । संयोगिनोश्चान्यतरो दृश्यमान इतरमदृश्यमानमनुमानाद्बुद्धौ संनिधापयतीति—अयुक्तोऽयं ग्रन्थ । कथम् । यथाऽग्निधूमयो. संबन्धेऽवगते धूमो दृश्यमानोऽग्निमवगमयति, एवं निर्वापादयो न शक्नुवन्त्यनुमापयितुम् । न चापीषां प्रयाजादीनां च संबन्धोऽस्ति । प्रधानेनैव सहामीषां संबन्धः । परस्परसंबन्धे नास्ति तेषां प्रमाणम् । यत्र निर्वापादयो न श्रूयेरन्, तत्रान्यत्रासंनिधानादीनामवबोधो न स्यात् । यथा धूमाभावेऽग्न्यवबोधाभाव, एवमिहापि ।

अथोच्येत, धर्मास्माभिरिति निर्देशनापूर्व फलसाधनं दृष्टम् । इदमपि कर्म । तस्यापि तेनैव यथा भवितव्यम् । (एवं सति दर्विहोमानामपीतिकर्तव्यता । अथोच्येत,

---

१ निरन्तरं प्रवर्तते— पु० १ २ ( ) एतचिह्नान्तर्गतः पाठः ग० पुस्तके ।

यजेतेति विध्यादिः, कथमिति विध्यन्तापेक्षः, अग्न्यन्वाधानादिविधानकाण्डेन पाठाद्बुद्धौ संनिहितेनैकवाक्यतां याति । दर्शपूर्णमासाभ्यां यजेतेत्थमिति । एवं विध्यन्तापेक्षो यो वैकृतो विध्यादिः, सोऽपि वैदिकेन विध्यन्तेनानुमानाद्बुद्धौ संनिहितेनैकवाक्यतां यास्यति । यथा, सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति । तत्र कथमिति विध्यन्तापेक्षायामनेकविध्यन्तसंनिपातेऽसाधारणेन निर्वपतिशब्देन दार्शपौर्णमासिकविध्यन्तसंयोगिना लिङ्गेन तदीयो विध्यन्तः प्रसज्यते । तत्राप्याग्नेयाद्यनेकापूर्वविध्यन्तप्रसङ्गे, एकदेवतात्वेन चौषधिना वाऽसाधारणेन लिङ्गेनाऽऽग्नेयविध्यन्तो नियम्यते । तदेतदेवं विज्ञायते, सौर्यं चरुं निर्वपेद्यदाग्नेयवत् । आग्नावैष्णवमेकादशकपालं निर्वपेदग्नीषोमीयवत् । सर्वत्रैवम् । प्रतिपदाख्याने तु गौरवं परिहरद्भिर्वार्त्तिककारैः सर्वसामान्यः शब्दः परिगृहीतः प्रकृतिवदिति । एवं यत्र सूक्ष्ममपि किंचित्सामान्यं, शब्दो वाऽर्थो वा, हविर्देवतादि तद्गुणा वा रूपादय उपलभ्येरन्, तत्र तदीयो विध्यन्तः कल्प्यः । तदेतत्संक्षेपेणात्रैव सर्वमुक्तम् । शिष्य-

---

यदेकदेवतं स्वफलसाधनं पुरोडाशद्रव्यकं वा तदितिकर्तव्यतया युक्तं दृष्टम् । इहाप्येकदेवतत्वात्पुरोडाशद्रव्यकत्वाच्चेतिकर्तव्यतया भवितव्यम्) । उच्यते । अनुमानादितिकर्तव्यतासद्भाव उक्तः । स चाऽऽग्नेयात्प्रवर्तत इति नैतद्विषयमनुमानम् । अपोच्यते, येनैकदेवत्यस्य फलं साधयतोऽग्न्यन्वाधानादि दृष्टमयमपि चैकदेवत्यः, तस्मादस्य भवितव्यमग्न्यन्वाधानादिभिरिति । तत्र । देवदत्तस्य प्रयोजनं साधयतः (शुक्ले वाससी ज्ञाते, यदन्यस्यापि प्रयोजनं साधयतः) ते एव प्राप्नुतस्तदीयेन । किंच फलवतोऽङ्गं प्रयाजा दृष्टा अग्निहोत्रस्यापि फलवत्त्वात्तस्य स्युः । तस्मादनुमानेनेतिकर्तव्यताया बहुसमञ्जसम् । अत उपमानेन धर्मप्राप्तिः । यजेतेत्युक्ते—किं, केन, कथमित्याकाङ्क्षात्रयं भवति । तत्र किं, केनेति फलकरणाभ्यां निराकाङ्क्षीकृते । कथमिति, अव्यावृत्तायामाकाङ्क्षायां संनिधानेऽनाम्नानादितिकर्तव्यतायास्तुल्यं वाक्यं बुद्धौ संनिधीयते । तत्संनिधापितमात्मीयमर्थं संनिधापयति । अनेन द्वारेणाऽग्न्यन्वाधानादिकेतिकर्तव्यताऽनुपज्यते । एवं चेयत्र सादृश्यं तत्र धर्माः प्राप्यन्ते । असति सादृश्ये नास्ति धर्मप्राप्तिः ।

हितार्थमुत्तरः प्रपञ्चः। श्लोकमप्युदाहरन्ति—

विस्तीर्य हि महज्ज्ञानमृषिः संक्षिप्य चाब्रवीत्।
इष्टं हि विदुषां लोके समासव्यासधारणम्॥ इति॥ २॥

(सोमे, ऐष्टिकधर्मानतिदेशाधिकरणम्॥ ३॥)

[३] प्रवृत्तत्वादिष्टेः सोमे प्रवृत्तिः स्यात्॥ ३॥ पू०

ज्योतिष्टोमेन स्वर्गकामो यजेतेति श्रूयते। तत्र विध्यन्तं प्रति चिन्ता। कुतोऽस्मिन् विध्यन्तः स्यादिति। तदुच्यते। प्रवृत्तत्वादिष्टेः सोमे प्रवृत्तिः स्यात्। दार्शपौर्णमासिको विध्यन्तः सोमे स्यात्। कुतः। प्रवृत्तत्वात्। दीक्षणीयादिष्विष्टिषु दार्शपौर्णमासिको विध्यन्तः प्रवृत्तः। दीक्षणीयायाम्, आतिथ्यायां, प्रायणीयायां, पशौ च। तदनन्तरं सोमः। तत्रापि स एव प्रवृत्त्या विज्ञायते। यथा, देवदत्तो भोजयितव्यः, विष्णुमित्रो भोजयितव्यः, माठरः कौण्डिन्यो भारद्वाज इत्युत्तरेष्वपि भोजयितव्य इति प्रवृत्त्याऽनुबध्यते। तस्मादैष्टिकः सोमे विध्यन्तः॥ ३॥

लिङ्गदर्शनाच्च॥ ४॥

तस्यैकशतं प्रयाजानुयाजाः, इति च ऐष्टिका धर्माः सोमे दृश्यन्ते। तस्माच्चास्मिन् ऐष्टिको विध्यन्तः॥ ४॥

कृत्स्नविधानाद्वाऽपूर्वत्वम्॥ ५॥ सि०

अपूर्वत्वमेव हि सोमे। स न कुतश्चिद्धर्मान् गृह्णाति। कुतः। कृत्स्न-

---

ननु चैवमाकाङ्क्षायामुत्पन्नायामितिकर्तव्यतासंनिधाने नास्ति। तस्माद्भ्रान्तिराकाङ्क्षेति। तदाऽसौ भ्रान्तो भवति। प्रकृतावप्याकाङ्क्षासद्भावे, इतिकर्तव्यतासंबन्धः। एवं चेत्प्रकृतिविकृत्योर्न कश्चिद्विशेषः॥ २॥ [॥ ३॥ ४॥]

अत्र सूत्रं भाष्यं चोभयमप्ययुक्तम्। न ज्ञायते कियत्येतिकर्तव्यतया निराकाङ्क्षीकृतो[३] भवतीति। अथोच्यते, यस्य संनिधान एको द्वौ बहवो वा पदार्थाः समाम्नायन्ते, तावत्या निराकाङ्क्षी भवति। एवं सत्युपहोमादिभिर्निराकाङ्क्षीकृतत्वादतिदेशो न प्राप्नोति। तत्रैवं वर्णयन्ति—उपहोमाः प्रयाजानुयाजमध्ये श्रुतान्तरसंब-

---

१ प्रकृतित्वात्—पा०। २ प्रकृतित्वात्—पा०। ३ निराकाङ्क्षीकृता—पा०। ४ उपहोमादिति निरा—पा०।

विधानात् । इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वमुक्तम् । विहितेतिकर्तव्यताकश्चापम् । तस्मादपूर्वः ॥ ५ ॥

स्रुगभिघारणाभावस्य च नित्यानुवादात् ॥ ६ ॥

द्धपदव्यवायेऽपि कथंभावनियन्त्रिता एव गृह्यन्ते । एवं वर्ण्यमाने यत्रापूर्वमङ्गं प्राकृतेनासंबद्धं श्रूयते तत्र तेनैव निराकाङ्क्षी भवति । कृत्स्नविधानताकृतत्वादतिदेशो न प्राप्नोति । न चेष्यते ।

तस्मादन्यथा वर्ण्यते । कथमित्याकाङ्क्षायां यत्र संनिधावाम्नानं निराकाङ्क्षीकरणक्षमं, तत्र तेनैव निराकाङ्क्षत्वाद्भवति कृत्स्नविधानता । इह च संनिपत्योपकारकाः सर्वे आम्नायमाना निराकाङ्क्षीकरणसमर्थाः । उपहोमादिषु[2], संनिपत्योपकारकाभावात्कृत्स्नविधानता नास्ति । तस्मात्तत्राऽऽकाङ्क्षा संनिवर्तते । अथवा सादृश्येन विध्यन्तो नियम्यते । न च सोमस्य दर्शपूर्णमासाभ्यां सादृश्यम् । अव्यक्तचोदनत्वात् । ननूत्पत्तिवाक्ये[3] 'सोमेन यजेत' इत्यव्यक्तचोदनः । प्रयोगवाक्ये तु देवतानां विद्यमानत्वाद्व्यक्तचोदनः ।

उच्यते । ग्रहणे देवताश्रवणं, न यागे । प्रसङ्गात्तु यागं निर्वर्तयन्ति, न तु तासां यागं प्रति तादर्थ्ये प्रमाणमस्ति । कथम् । क्रत्वर्थेन[4] ग्रहणेन देवताः संयुक्ताः, ता यागमभिलषन्ति । यागोऽपि देवताभिलाषी । तयोः संबन्धोऽर्थाद्भविष्यति । यागोऽपि द्रव्यं गृह्णन्, तदाश्रितां देवतां गृह्णाति । यथा प्रणयनं क्रत्वर्थमात्मनिर्वर्तकं साधनमपेक्षमाणं गोदोहनं पुरुषार्थं गृह्णाति । गोदोहनमपि पुरुषार्थं सदाश्रयमपेक्षमाणं प्रणयनं प्रसक्तं गृह्णाति । यथा तत्संबन्ध एवमिहापि । तस्मात्तादर्थ्या[5]द्देवताभावः । एवं चेदव्यक्तचोदनः । अत आह सूत्रकारः, 'अव्यक्तासु[6] तु सोमस्य' इति ।

ननूपांशुयाजस्योत्पत्तिवाक्ये देवताभावादव्यक्तता । उच्यते । मन्त्रवर्णात्तत्र देवतायास्तादर्थ्याद्व्यक्तचोदनः । अतः सादृश्याभावादपूर्वे, कृत्स्नविधानादिति—यदाम्नायते धर्मजातं तेन निराकाङ्क्षत्वादर्थप्राप्तं न गृह्णाति ॥ ६ ॥

---

१ (अ० ७ पा० ४ अ० १ सू० १) । २ उपहोमादिषु—यत्र नक्षत्रेष्ट्यादिसंनिधावुपहोमा आम्नायन्ते, तत्र निराकाङ्क्षीकरणसमर्थसंनिपत्योपकारकाङ्गानाम्नानात्कृत्स्नविधानाभावेनापूर्वेष्वाद्दोमादिभिराकाङ्क्षा न निवर्तत इत्याशयः । ३ अनुत्पत्तिवाक्ये इति सर्वत्र पाठः । ४ क्रत्वर्थत्वात्—पा० । ५ तादर्थ्यादिति—ग्रहणद्रव्याद्देवतानां यागाङ्गतया देवताभाव इत्यर्थः । ६ (अ० ८ पा० १ अ० ९ सू० १६) ।

स्रुगभिघारणस्य चाभावानुवादः सोमे भवति । घृतं वै देवा वज्रं कृत्वा सोममघ्नन्, स्रुचौ बाहू । तस्मात्स्रुचि सोमहविर्नाऽऽसाद्यते । न सोममाज्येनाभिघारयतीति । तदुपपद्यते, यद्यपूर्वः सोमः । अथ दर्शपूर्णमासप्रकृतिः स्यात्, आज्येनाभिघार्य स्रुग्भ्यां हूयेत । तत्रैतद्दर्शनं नोपपद्यते । तस्मादपूर्वः ॥ ६ ॥

विधिरिति चेत् ॥ ७ ॥

इति चेत्पश्यसि, स्रुगभिघारणाभावानुवाददर्शनादपूर्वः सोम इति । अथ कस्माद्दर्शपूर्णमासप्रकृतित्वेन प्राप्तस्य स्रुगभिघारणस्य प्रतिषेधकोऽयं विधिर्न भवतीति, स्थिताया प्रतिज्ञायां सूत्रेण परिचोद्यते ॥ ७ ॥

न वाक्यशेषत्वात् ॥ ८ ॥

नायं विधिः । कस्मात् । वाक्यशेषत्वात् । अन्योऽत्र विधिराम्नातः । यदाह, अंशुरंशुस्ते देव सोमाऽऽप्यायतामिति । तस्य वाक्यशेषोऽयम् । कथं ज्ञायते । तेनाऽऽकाङ्क्षितत्वात् । अवधिषुर्वा एतत्सोमं यदभिषुण्वन्ति । यदस्य स्रुचौ बाहू कुर्वन्ति । यद्याऽऽज्यमन्तिकमकार्षुः । यदाह, अंशुरंशुस्ते देव सोमाऽऽप्यायतामिति । यदेवास्यांघ्नन्तं क्षुरमकुर्वंस्तदाप्याययन्तीति । यद्ययमपि विधिः स्याद्वाक्यं भिद्येत । तस्मान्न विधिः ॥ ८ ॥

शङ्कते चानुपोषणात् ॥ ९ ॥

सोमे शङ्कते, यदनुपोष्य प्रयायाद्ग्रीववद्धमेनममुष्मिँल्लोके नेनीयेरन्निति । दार्शपौर्णमासिके विकृन्ते सति नियतमुपोषणं स्यात् । तदाऽनुपोषणाशङ्का न युज्यते । अपूर्वत्वे तु प्रागुपोषणविधानादुपोष्यानुपोष्य वा प्रयायात् । तत्रानुपोषणशङ्का युज्यते । तस्मादपूर्वः ॥ ९ ॥

दर्शनमैष्टिकानां स्यात् ॥ १० ॥

यच्च प्रयाजानुयाजानां दर्शनं लिङ्गत्वेनापदिष्टं, तस्यैकशतं प्रया-

[६ ॥ ७ ॥ ८ ॥ ९ ॥

१ यदेवास्याऽऽदानु क्षुरमक्षुरस्तदाप्याययन्तीति पा० । २ यदिदमथानुपोषणात्सोमे—पा० । ३ अपूर्वत्वे नित्यारम्भ—युज्यते इत्यन्तो ग्रन्थः क्वचिन्नास्ति । ४ लिङ्गत्वेनोपदिष्टम्—पा० ।

जानुयाजा इति । तदीक्षणीयादीनां सोमाङ्गभूतानां कर्मणा ये प्रयाजानुयाजास्तेषां समुच्चयवचनम् । किं कारणम् । सोमस्यापूर्वत्वात् । तेषां च तावतां तत्राभावात् । अङ्गाङ्गमपि च तस्येति शक्यते वक्तुम् । यथा वाजपेयस्य यूप इति । तस्मादपूर्वः सोमः ॥ १० ॥

(ऐन्द्राग्नादिषु दार्शपूर्णमासिकधर्मातिदेशाधिकरणम् ॥ ४ ॥)

[४] इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात् ॥११॥ सि०

इष्टय उदाहरणम्, ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इत्येवमाद्याः । तत्र संदेहः । किं दार्शपौर्णमासिको वा, सौमिको वा विध्यन्त उत दार्शपौर्णमासिक एवेति । किं प्राप्तम् । अनियमः । दर्शपूर्णमासयोरपि विध्यन्तोऽस्ति सोमेऽपि । इमाश्चेष्टयो विध्यन्तापेक्षाः । एकेन च विध्यन्तेन भवितव्यमित्युक्तम् । न च गृह्यतेऽन्यतरनियमे विशेषः । तस्मादनियमः ।

एवं प्राप्त उच्यते । इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः । हेतुर्नोक्तः प्रज्ञात इति । कः पुनरसौ । चोदनायां प्रकृतिलिङ्गसंयोगः । किं पुनस्तत्प्रकृतिलिङ्गम् । तद्धितेन देवतोपदेशः, कपालवत्ता, निर्वपतिशब्दश्च, ऐन्द्राग्नमेकादशकपालं निर्वपेदिति । इतरत्रापि तथैव, ऐन्द्राग्नो द्वादशकपाल इति । निर्वपतिरपि, अग्निहोत्रहवण्या हवींषि निर्वपतीति । प्रकृतिलिङ्गेन च विध्यन्तविशेष उक्तः, यस्य लिङ्गमर्थसंयोगादिति । तस्माद्दार्शपौर्णमासिकस्त्वासु विध्यन्तः । तच्च दर्शयति, प्रयाजे प्रयाजे कृष्णलं जुहोतीति । अलिङ्गास्वपि स्थालीपुलाकवत्सिद्धिः ॥ ११ ॥

(अग्नीषोमीये पशौ दार्शपूर्णमासिकधर्मातिदेशाधिकरणम् ॥ ५ ॥)

[५] पशौ च लिङ्गदर्शनात् ॥ १२ ॥ सि०

पशावग्नीषोमीये चिन्त्यते । किं दार्शपौर्णमासिको विध्यन्त उत सौमिक इति । किं प्राप्तम् । तथैव पूर्वपक्षः । तत्रोत्तरमभिधीयते । पशौ च लिङ्गदर्शनात् । पशौ च दार्शपौर्णमासिक एव विध्यन्तः । कुतः । लिङ्गदर्शनात् । एकादश प्रयाजान्यजति, एकादशानुयाजानिति । तथा, सौचमाग्नारमाघार्य जुह्वा पशुमनक्तीति । ननु लिङ्गमपदिष्टं, कुतः

॥ १० ॥ ११ ॥

१ तत्रभावात्—पा० । २ (अ० ८ पा० १ अ० ३ सू० २) । ३ पूर्वः पक्षः—पा० ।
४ स्रौचमिति मुद्रितपुस्तके पाठः ।

प्राप्तिः । चोदनासामान्यात् । किं सामान्यम् । व्यक्त[1]चोदनात्वम् । का व्यक्तिः । द्रव्यदेवतावत्ता, अग्नीषोमीयं पशुमिति । इतरत्, ऐन्द्रं पय इति । अव्यक्तचोदनस्तु सोमः ॥ १२ ॥

(सवनीयादिपशुष्वग्नीषोमीयधर्मातिदेशाधिकरणम् ॥ ६ ॥)

[६] दैक्षस्य चेतरेषु ॥ १३ ॥ सि०

इह पशुबन्धा उदाहरणम् । सवनीयो, निरूढः पशुः, सौम्यादयश्च । तेषु किं दार्शपौर्णमासिको विध्यन्त, उत दैक्षस्येति । दैक्ष इत्यग्नीषोमीय उच्यते । दीक्षासंबन्धात् । किं प्राप्तम् । यथोक्तेन न्यायेन दार्शपौर्णमासिक इति । तथा प्राप्ते, उच्यते । दैक्षस्य चेतरेषु पशुषु सवनीयादिष्वग्नीषोमीयस्य विध्यन्तः । आलभतिचोदनासामान्यात्, पशुत्वचोदनासामान्याच्च । तच्च दर्शयति, वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यंदिने, अङ्गैस्तृतीयसवने, इति वपापुरोडाशाङ्गप्रचारं दर्शयति । भेदेन च तथा क्वचित्, औदुम्बरो यूपो भवतीति यूपं दर्शयति । तस्मादग्नीषोमीयः पशूनां प्रकृतिः ॥ १२ ॥

(ऐकादशिनेषु पशुषु सवनीयपशुधर्मातिदेशाधिकरणम् ॥ ७ ॥)

[७] ऐकादशिनेषु सौत्यस्य द्वैरशन्यस्य दर्शनात् ॥ १४ ॥ सि०

ऐकादशिनाः पशव उदाहरणम् । कृष्णग्रीव आग्नेय इत्यारभ्याऽऽम्नाताः । अन्येषां च[2], आग्नेयेन वापयति, मिथुनं सारस्वत्या करोति, प्रजनयति सौम्येनेति । तेषु संदेहः । किमग्नीषोमीयविध्यन्त उत सवनीयविध्यन्त इति । किं प्राप्तम् । पूर्वोक्तेन न्यायेनाग्नीषोमीयस्येति प्राप्ते ।

उच्यते । ऐकादशिनेषु सौत्यस्य । सौत्य इति सुत्याकालत्वात्सवनीयमाहुः । तदीयो विध्यन्त ऐकादशिनेषु । कुतः । द्वैरशन्यस्य दर्शनात् । अग्निष्ठाद्द्वे द्वे रशने आदाय द्वाभ्यां रशनाभ्यामेकैकं यूपं परिव्ययतीति । अग्नीषोमीयप्रकृतित्वे एकरशन्यं स्यात् । अथ वचनमिदं कस्मान्न भवति । अग्निष्ठाद् द्वे द्वे रशने आदायेत्येतदत्र विधीयते । यदि रशनाद्वित्वमपि विधीयते तदा वाक्यं भिद्यते । तस्मात्तदनूद्यते ।

॥ १२ ॥ १३ ॥

१ व्यक्तचोदनत्वं—ग० । २ चैवम्—ग० ।

ननु लिङ्गमपदिष्टं, कुतः प्राप्तिः । उच्यते । समाने पशुत्वे सुत्याकालता वैशेषिकं लिङ्गम् । ततः प्राप्तिः ॥ १४ ॥

(पशुगणेष्वैकादशिनधर्मातिदेशाधिकरणम् ॥ ८ ॥)

[८] तत्प्रवृत्तिर्गणेषु स्यात्प्रतिपशु यूपदर्शनात् ॥ १५ ॥ सि०

इह पशुगणा उदाहरणम् । वसन्ते ललामांस्त्रीन् वृषभानालभते । तथा, मैत्रं श्वेतमालभेत, वारुणं कृष्णमपा चौषधीनां च संधावन्नकाम इति । तत्र विचार्यते । किमग्नीषोमीयस्य विध्यन्त उतैकादशिनानामिति । यथोक्तेन न्यायेनाग्नीषोमीयस्य ।

एवं प्राप्त उच्यते । तत्प्रवृत्तिर्गणेषु स्यात् । तेषामैकादशिनानां प्रवृत्तिः पशुगणेषु स्यात् । कुतः । प्रतिपशु यूपदर्शनात् । यत्त्रिषु यूपेष्वालभेत बहिर्धाऽस्मादिन्द्रियं वीर्यं दध्यात्, भ्रातृव्यमस्य जनयेदेकयूप आलभेतेति यूपत्रित्व प्रतिषिध्यैकं यूपं सौत्रामण्या विदधाति । तदुपपद्यते, यदि ऐकादशिनविध्यन्तः । तत्र हि प्रतिपशु यूपाः । अग्नीषोमीयप्रकृतित्व एक एव यूपः स्यात् । तत्रैतन्नोपपद्यते । तस्मादैकादशिनानां विध्यन्तः पशुगणेषु ॥ १५ ॥

(अव्यक्तयागेषूद्भिदादिषु सौमिकधर्मातिदेशाधिकरणम् ॥ ९ ॥)

[९] अव्यक्तासु तु सोमस्य ॥ १६ ॥ सि०

इदं श्रूयते, अभिजिता यजेत, विश्वजिता यजेत, इत्येवंजातीयका यजतयः । तेषु विध्यन्तचिन्ता । किमेषु सौमिको विध्यन्त उत दार्शपौर्णमासिक इति । अविशेषादनियमे प्राप्ते । उच्यते । अव्यक्तासु तु सोमस्य । काऽव्यक्तता । द्रव्यदेवतस्याभावः । द्रव्यदेवतेन हि यागोऽभिव्यज्यते । एताश्चाद्रव्यदेवताश्चोदनाः, अभिजिता यजेतेति । एतास्वव्यक्तासु सौमिको विध्यन्तः स्यात् । कुतः । अव्यक्तसामान्यात् । सोमोऽप्यव्यक्तचोदनः । ज्योतिष्टोमेन यजेतेति । ननु, सोमेन यजेतेत्येषा व्यक्तचोदना । तथाऽपि देवताया अभावादव्यक्तता । तथा च, श्येनेन यजेतेत्यव्यक्तचोदिते, दीक्षणीयादीनि सोपाङ्गानि दर्श-

। १४ ॥ १५ ॥

१ दृगालेन—इति पाठो लिखिते मुद्रिते च दृश्यते ।

याति, दीक्षणीयायां द्वादशमानं हिरण्यं दक्षिणा । चतुर्विंशतिमानं प्राय-णीयायामिति । तस्मात्तासु सौमिको विध्यन्तः ॥ १६ ॥

(अहर्गणेषु द्वादशाहिकधर्मातिदेशाधिकरणम् ॥ १० ॥)

[१०] गणेषु द्वादशाहस्य ॥ १७ ॥ सि०

इह, अहर्गणा उदाहरणम्, द्विरात्रादयः शतरात्रपर्यन्ताः । तेषु संदेहः । किं ज्यौतिष्टोमिको विध्यन्त उत द्वादशाहिक इति । पूर्वेण न्यायेन सौमिके प्राप्ते, उच्यते । गणेषु द्वादशाहिको विध्यन्त इति । कुतः । चोदनासामान्यात् । द्वादशाहेन यजेत, द्विरात्रेण यजेतेति । अहःशब्दोऽप्यहोरात्रवचनः । रात्रिशब्दोऽपि । एतच्छब्दगतं लिङ्गम् । अर्थगतमपि गणत्वम् । गण एव संघातधर्मैर्गणमनुग्रहीतुं समर्थो, नैकाहः । द्वाभ्यां लोमावद्यति, द्वाभ्यां मांसमित्येवदारभ्य द्वादशोप-सत्त्वं द्वादशाहिकं धर्मं गवामयने दर्शयति । तस्मादहर्गणानां द्वादशाहः प्रकृतिः ॥ १७ ॥

(संवत्सरसत्रेषु गावामयनिकधर्मातिदेशाधिकरणम् ॥ ११ ॥)

[११] गव्यस्य च तदादिषु ॥ १८ ॥ सि०

इह संवत्सरसत्राण्युदाहरणम्, आदित्यानामयनप्रभृतीनि । तेषु चिन्ता, किं द्वादशाहिको विध्यन्त उत गवामयनिक इति । पूर्वोक्तेन न्यायेन द्वादशाहिके प्राप्तेऽभिधीयते । गव्यस्य च तदादिषु । गव्यमि-ति, गवामयनं ब्रूमः । गोसंबन्धात् । गावो वा एतत्सत्रमासत, इति । तस्य विध्यन्तस्तदादिषु संवत्सरसत्रेषु स्यात् । कुतः । संवत्सरसा-मान्यात् । परस्य उपगायन्तीति च माहाव्रतिकं धर्मं संवत्सरसत्रे दर्श-यति । ऋत्विज उपगायन्तीति च सहस्रसंवत्सरे ॥ १८ ॥

(निकायिनामुत्तरेषु पूर्वनिकायिधर्मातिदेशाधिकरणम् ॥ १२ ॥)

[१२] निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् ॥ १९ ॥ सि०

निकाय इति संघात औचारागैर्णावस्थित उच्यते । स येषां ते निकायिनः । यथा, साद्यस्काः, सांवत्सरिकाः । तेषां पूर्वस्य केचिद्धर्मा आ-

---

॥ १६ ॥ १७ ॥ १८ ॥

---

१ मार्तिमांडं चैत्रमादिना—...—पा० ।

म्नाताः । उत्तरे त्वधर्मकाः । तत्र चिन्त्यते । किं ज्योतिष्टोमस्य विध्यन्त उत प्रथमस्य निकायिन इति । अव्यक्तचोदनत्वाज्ज्योतिष्टोमस्य । इति प्राप्ते, उच्यते । निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् । कुतः । निकायित्वसामान्यात् । साहस्राणां साहस्रसामान्यात् । मात्रस्काणां साद्यस्क्रसामान्यात् । एवं सर्वत्र । पूर्वस्मिंश्च साहस्रे सहस्रं दक्षिणामाम्नायोत्तरस्मिन् दर्शयति । यावदस्य साहस्रस्योत्तरा गौः समाहिता भवति, तावदस्माल्लोकादसौ लोक इति । तथा पूर्वस्मिन् साद्यस्क्रे, साण्डास्त्रिसंवत्सरः सोमक्रयणः । स्पर्धमानानामित्याम्नायोत्तरस्मिन्नपि तमेव दर्शयति । स्त्री गौः सोमक्रयणी व्यावृत्ता येषां स्पर्धिता, इति । तस्मात्पूर्वस्योत्तरेषु धर्माः ॥ १९ ॥

(फलादीनामनतिदेशाधिकरणम् ॥ १३ ॥)

[१३] कर्मणस्त्वप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्याननन्वयस्तद्बन्धनत्वात् ॥ २० ॥ सि०

इह फलनियमकर्तृसमुदाया उदाहरणम् । फलं स्वर्गः, नियमो यावज्जीविकोऽभ्यासः, कर्ता स्वर्गकामः, समुदायो दर्शपूर्णमासाविति । तत्र चिन्त्यते । किं फलनियमकर्तृसमुदायानां सौर्यादिषु प्रवृत्तिः, नेति । किं प्राप्तम् । इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः, इत्यनेन न्यायेन प्रवृत्तिरिति प्राप्तम् । तथा प्राप्त उच्यते । फलनियमकर्तृसमुदायस्याप्रवृत्तिः । कुतः । कर्मणोऽप्रवृत्तित्वात् । तद्बन्धनत्वाच्च फलादीनाम् ।

कर्म तावन्न प्रवर्तते । किं कारणम् । विध्यन्तेन धर्माः प्रवर्तन्ते । न च कर्म विध्यन्तविहितम् । विध्यादिविहितं तत् । तस्मान्न प्रवर्तते । तस्याप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्याननन्वयः, अप्रवृत्तिरित्यर्थः । कुतः । तद्बन्धनत्वात् । फलं तावत्, दर्शपूर्णमासाभ्यां यजेतेति दर्शपूर्णमाससंयुक्तं श्रुतम् । यत्र च दर्शपूर्णमासौ, तत्र भवितुमर्हति । न च सौर्यादिषु तौ स्तः । अतः स्वर्गस्यापि तत्राभावः । एवं नियमोऽपि

॥ १९ ॥]

सौर्ये करणस्य प्रत्यक्षत्वात्करणान्तरस्याप्रवृत्तिः, आनुमानिकत्वात् । इतिकर्तव्यताकाङ्क्षायामितिकर्तव्यताऽतिदिश्यते । न च फलमितिकर्तव्यता । यावज्जीविको नियम कर्तृधर्मः, स पुरुषार्थत्वान्नातिदिश्यते । फलेन व्याप्यमाने यः कर्ता स

१ साद्यस्कधर्मसामान्यात्—पा० । २ (अ० ८ पा० १ अ० ४ सू० ११) । ३ सौर्येकरणस्य–पा० ।

कर्मबन्धनः । यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति । स दर्शपूर्णमासाभावे कथं स्यात् । तथा कर्ता कर्मबन्धनः । दर्शपूर्णमासाभ्यां स्वर्गकाम इति । सोऽपि कथं तयोरसतोः स्यात् । समुदायोऽप्याग्नेयादीनाम् । तानि सौर्यादिषु न सन्तीति तत्समुदायः कथं तत्र भवेत् । तस्मादेषामप्रवृत्तिः ॥ २० ॥

प्रवृत्तौ चापि तादर्थ्यात् ॥ २१ ॥

अपि च धर्माणां प्रवृत्तिः कर्मार्था, कर्मण उपकर्तुम् । न च फलादीनि कर्मण उपकुर्वन्ति । फलं तावत्पुरुषस्योपकरोति, न कर्मणः । उक्तं हि, फलं च पुरुषार्थत्वादिति । नियमोऽपि न कर्मधर्मः । कर्तृधर्मोऽसावित्युक्तम् । कर्तुर्वा श्रुतिसंयोगादिति । तथा, कर्ता स्वर्गकामो न कर्मार्थः । कर्म स्वर्गकामार्थम् । न हि स्वर्गकामः कर्मण उपदिश्यते, स्वर्गकामो यजेतेति । किं तर्हि । कर्म स्वर्गकामस्योपदिश्यते । स्वर्गकामो यजेत, नान्यत्कुर्यादिति । तथा, समुदायो न कर्मार्थः । फलार्थोऽसौ, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । एवमेतेषां कर्मणोऽनुपकारकत्वात्प्रवृत्तिरनर्थिका स्यात् । तस्मान्न प्रवर्तेरन् ॥ २१ ॥

नातिदिश्यते । तेनांशेनान्यत्र प्रधानत्वान्न कत्वर्थः । यः पुनर्यजेतेत्यत्र कर्ता स फलं निर्वर्तयतीति क्रत्वर्थं, सोऽतिदेशात्प्राप्नोति । किंतु यत्र बहवः कर्तारः श्रूयन्ते, तत्र तावदानुमानिको नातिदिश्यते । यत्राप्येकसंख्यस्तत्राप्यनुवादोऽतिदेशः । तस्मादर्थाज्ञमात्कर्तुरनतिदेशो गुणभूतस्यापि ।

समुदाय. करणपरिच्छेदेनोपकृतवान् । स इह परिच्छेद्याभावान्नातिदिश्यः । समुदायं च गृह्णताऽऽग्नेयादयः कार्याः । ते तु क्रियमाणाः स्वर्गं साधयेयुः । तथा सति यथाश्रुतफलव्याघातः । अथोच्येत, समुदायं गृह्णन्नान्तरीयकतयाऽऽग्नेयादीन्करिष्यति न फलसाधनत्वेन । उच्यते । समुदाय एषां गुणभूतः । न च गुण आकृष्यमाणो गुणिनमाकर्षति । अतादर्थ्यात् ॥ २० ॥ [२१ ॥

---

१ तस्मादेषामप्रवृत्ति — पा० । २ (अ० ३ पा० १ अ० ३ सू० ५) । ३ (अ० २ पा० ४ अ० १ सू० २) । ४ तेनांशेनेति—फलांशेनेत्यर्थः । ५ आनुमानिक इति—एकदेशस्य कर्ता प्राकृत इति पूर्वं देय । ६ यद्येक—पा० । ७ परिच्छेद्याभावादिति—विकृती सौर्यादि. करणत्वेनात्वादित्यर्थः । यद्यप्यत्रापूर्वादौ करणत्वेन परिच्छेदत्वम् इति मन्यते तदाऽपि प्रत्यक्षसमुदायसद्भावे नाऽऽनुमानिकस्य प्राकृतसमुदायस्यातिदेशधर्मत इत्यूह्यम् ।

अश्रुतित्वाच्च ॥ २२ ॥

अत्राऽऽह । यदि दर्शपूर्णमाससंयोगात्फलादीनामप्रवृत्तिः, प्रयाजादीनामपि तत्संबन्धादप्रवृत्तिः प्राप्ता । तान्यपि हि तत्संयुक्तानीति । उच्यते । यद्यपि तानि दर्शपूर्णमासयोः श्रुतानि । विध्यन्तेन तु सौर्यादिष्वप्यतिदिष्टानि । फलादीनि तु न विध्यन्तेनातिदिश्यन्ते । तेषां यदि प्रत्यक्षा प्रवर्तिका श्रुतिः स्यात्, ततः प्रवर्तेरन् । न चासावस्ति । तस्मादश्रुतित्वान्न प्रवर्तन्ते ॥ २२ ॥

(काम्यगुणानां विकृतावनतिदेशाधिकरणम् ॥ १४ ॥)

[१४] गुणकामेष्वाश्रितत्वात्प्रवृतिः स्यात् ॥ २३ ॥ पू०

इह गुणकामा उदाहरणं, गोदोहनेन प्रणयेत्पशुकामस्य, उपास्मै गायता नर इति ग्रामकामाय प्रतिपदं कुर्यादित्येवमादयः । तत्र विचार्यते । किं गुणकामानां वैकृतेषु प्रवृत्तिः, उत नेति । ततः सूत्रेणोपक्रमः । गुणकामेष्वाश्रितत्वात्प्रवृत्तिः स्यात् । प्रवृत्तिर्गुणकामानाम् । कुतः । आश्रितत्वात् । गोदोहनं प्रणयनाश्रितं गोदोहनेन प्रणयेदिति । तच्च प्रणयनं प्रवर्तते । आश्रये च प्रवर्तमाने तदाश्रितमपि प्रवर्तते । यथा पट आकृष्यमाणे तदाश्रितं चित्रमप्याकृष्यते । यथा च चमसः प्रवर्तते । यथा च, खादिरं वीर्यकामाय यूपं कुर्यादिति । एवं गोदोहनमपि प्रवर्तते । गोदोहने च प्रवर्तमाने तदाश्रितः कामोऽपि प्रवर्तितुमर्हति । तस्माद्गुणकामानां प्रवृत्तिः ॥ २३ ॥

निवृत्तिर्वा कर्मभेदात् ॥ २४ ॥ सि०

निवृत्तिर्वा गुणकामानामप्रवृत्तिः । कुतः । कर्मभेदात् । कार्यभेदादित्यर्थः । अन्यत्कार्यं गोदोहनस्य, अन्यच्चमसस्य । चमसः क्रत्वर्थो, गोदोहनं तु पुरुषार्थः । तदुक्तं, *यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्साऽर्थलक्षणाऽविभक्तत्वादित्यत्र* । अक्रत्वर्थः किमर्थं प्रवर्तेत । क्रतूपकाराय हि तस्य प्रवृत्तिः । एवं प्रतिपदः । तस्मान्न प्रवर्तेरन् गुणकामाः ॥२४॥

यत्तूपन्यस्तं, यथा खादिरं वीर्यकामाय यूपं कुर्यादित्यत्र प्रवृत्तिरेवमत्रापीति । तत्र ब्रूमः—

॥ २२ ॥ २३ ॥]

यत्क्रत्वर्थं तदतिदिश्यते । न च गोदोहनादीनां क्रत्वर्थता ॥ २४ ॥

---

१ तत्र-पा० । २ (अ० ४ पा० १ अ० २ सू० २) ।

अपि वाऽतद्विकारत्वात्क्रत्वर्थत्वात्प्रवृत्तिः स्यात् ॥ २५ ॥

अपि वा, एवंविधेषु प्रवृत्तिः स्यात्। कुतः। अतद्विकारत्वात्। न खादिरः क्रत्वर्थविकारः। अथ चापि क्रत्वर्थ एव। तदुक्तम्, एकस्य तूभयत्वे संयोगपृथक्त्वमिति। स क्रत्वर्थश्चेत्पलाशवत्प्रवर्तेत। तस्मिंश्च प्रवर्तमाने तदाश्रितः कामोऽपि प्रवर्तते। खादिरेण हि स सिध्यति। स च खादिरोऽस्ति। तस्मात्कामं साधयिष्यति ॥ २५ ॥

(सौर्ययागे विकल्पेनाऽऽग्नेयधर्मातिदेशाधिकरणम् ॥ १९ ॥)

[१५] एककर्मणि विकल्पोऽविभागो हि चोदनैकत्वात् ॥ २६ ॥ सि०

सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति श्रूयते। अस्ति तु प्रकृतावभिमर्शनद्वयं, चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्राऽमावास्यामिति। तदिह चोदकेन प्राप्यते। तत्र संशयः। किं सौर्यो यदा पौर्णमास्यां प्रयुज्यते तदा चतुर्होत्राऽभिमृष्टव्यः, यदाऽमावास्यायां तदा पञ्चहोत्रा, उतोभयत्र विकल्पः, चतुर्होत्रा वा पञ्चहोत्रा वेति। किं प्राप्तम्। व्यवस्थेति। कुतः। चोदकानुग्रहात्। प्रकृतौ व्यवस्था कृता। इहापि चोदको व्यवस्थां प्रापयति।

गोदोहनादि पुरुषार्थत्वाच्चमसं विहृत्य निविशते। खादिरस्तु क्रत्वर्थत्वान्न किंचिद्विकरोति। एवं चेत्खादिरः प्रवर्तत एव। तस्मिन्प्रवर्तमाने तदाश्रितः कामोऽपि प्रवर्तेत इत्येतदयुक्तम्। यत्क्रत्वर्थं तदतिदिश्यते। वीर्यकामो यदि खादिरार्थस्ततः खादिरे प्रवर्तमाने तदाश्रितत्वात्प्रवर्तेत। स च विपरीतः, खादिरस्तदर्थः। खादिरः पुरुषार्थत्वान्न प्रवर्तत इति चेत्। उच्यते। येन रूपेण क्रत्वर्थस्तेन प्रवृत्तिरिष्यते, न द्वितीयेन ॥ २५ ॥

सौर्ये आग्नेयादुपमितब्रह्मवर्चसप्रापणेनेतिकर्तव्यता गृह्णाति। आग्नेयस्य च पौर्णमास्याममावास्यायां च विद्यमानत्वादुत्पादकमवधारयितुं, किं पौर्णमास्येतिकर्तव्यता

---

१ (अ० ४ पा० ३ अ० ३ सू० ५)। २ स च विपरीत इति— खादिरार्थो वीर्यकामो विपरीत इत्यर्थः। ३ द्वितीयेन— पुरुषार्थत्वेन। ४ पौर्णमास्येति— पौर्णमास्याद्यधिकारनियतेतिकर्तव्यतेत्यर्थः।

एवं प्राप्ते उच्यते। एकस्मिन् कर्मण्यत्र सौर्ये विकल्पः। कुतः। अविभागो हि चोदनैकत्वात्। एकैषा चोदना, सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति। तत्राविभागो भवति। उभावप्यभिमर्शने प्राप्येते। तयोरेकार्थत्वात्समुच्चयो न संभवति। तस्माद्विकल्पः। यत्तु, प्रकृतौ व्यवस्थेति। नासौ कालकृता। किं तर्हि। समुदायकृता। न च सौर्ये तौ समुदायौ स्तः। यद्येवमभिमर्शनमेव तर्हि न प्राप्नोति, तयोः समुदाययोरभावादिति। अत्रोच्यते। न प्राप्नोति, यदि समुदाययोरभिमर्शनमुच्येत। तयोस्त्वनभिप्रहव्यत्वात्समुदायिनां तदुच्यते लक्षणया। समुदायिविकारश्च सौर्यः। तस्मात्तत्रापि चोदकः प्रापयति तत् ॥२६॥

(सौर्ये चरावाग्नेयधर्मातिदेशाधिकरणम् ॥ १६ ॥)

[१६] लिङ्गसाधारण्याद्विकल्पः स्यात् ॥ २७ ॥ पू०

सौर्ये कर्मणि दार्शपौर्णमासिको विध्यन्त इत्युक्तम्, इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिरिति। सन्ति तु तत्र कर्माण्याग्नेयादीनि। तत्र विचारः। किं यस्य कस्यचिद्दार्शपौर्णमासिकस्य कर्मणः सौर्ये विध्यन्त उताऽऽग्नेयस्येति। किं प्राप्तम्। विकल्पः। कुतः। लिङ्गसाधारण्यात्। सौर्ये दार्शपौर्णमासिकविध्यन्तमात्रो यल्लिङ्गमुपदिष्टं, प्रयाजे प्रयाजे कृष्णलं जुहोतीति, तत्साधारणं सर्वेषां विध्यन्ते संभवति। न च समुच्चयः। तस्माद्विकल्पः ॥ २७ ॥

ऐकार्थ्याद्वा नियम्येत पूर्ववत्त्वाद्विकारो हि ॥ २८ ॥ सि०

आग्नेयस्य विध्यन्तो नियम्येत। कुतः। ऐकार्थ्यात्। एकदेवतत्वादित्यर्थः। आग्नेय एकदेवत्यः। सौर्योऽपि। तेनैकदेवतत्वेन

प्रवर्तेत उतामावास्यायाः। तस्मादगृह्यमाणविशेषत्वाद्विकल्पः। 'आसन्नानि हवींष्यभिमृशति' इति हविरभिमर्शने मन्त्रस्य करणत्वाद्विकल्पः प्राप्तः। यद्यपि कालकृता व्यवस्था हविरन्तरवशेन प्रकृतौ जाता तथाऽपि विकृतावशक्यतया व्यवस्था कर्तुम्। नैतज्ज्ञायते सौर्ये चरावाग्नेयस्य धर्माः प्रवर्तेरन् इति। तस्मादाग्नेयाविशेषाद्विकल्पः ॥ २६ ॥ [२७ ॥

१ (अ० ८ पा०१ अ०४ सू० ११)। २ अपदिष्टम्-पा०। ३ अमावास्यायां इति-अमा०पौर्णमास्यामिति चाग्नेयसंबन्धिनी निवर्त्येते इत्यर्थः।

लिङ्गेनाऽऽग्नेयविध्यन्तो नियम्येत । पूर्ववत्त्वात् । पूर्ववानयं सौर्यः । पूर्वेणाभिहितं विध्यन्तमपेक्षते । विकारो हि । विकृतिरेषा । सर्वाश्च विकृतयः पूर्ववत्यः । चोदनावाक्यानामसमाप्तत्वात् । तत्र लिङ्गेन विध्यन्तनियमो भवतीत्युक्तम् । अस्ति चैकदेवतत्वं लिङ्गम् । तेनाऽऽग्नेयविध्यन्तः ॥ २८ ॥

अश्रुतत्वान्नेति चेत् ॥ २९ ॥

अत्राऽऽह । स्यादेतदेवं, यद्यत्रैकत्वं श्रूयेत । न तु श्रूयते । कथम् । तद्धितेनायं निर्देशः, सौर्यमिति । तथा, आग्नेयमिति । तत्र वचनव्यक्तिर्न ज्ञायते, किं सूर्यो देवताऽस्य, उत सूर्यौ च सूर्याश्चेति । तथा, आग्नेयेऽपि ॥ २९ ॥

स्याल्लिङ्गभावात् ॥ ३० ॥

स्याद्व्यवस्थितिरेकत्वस्य । कुतः । लिङ्गभावात् । लिङ्गमत्रास्ति । किम् । वाक्यशेष एकत्वं श्रूयते, सौर्ये तावत्, अमुमेवाऽऽदित्यं स्वेन भागधेयेनोपधावति, स एवैनं ब्रह्मवर्चसं गमयतीति । आग्नेयेऽपि, अङ्गिरसो वा इत उत्तमाः स्वर्गं लोकमायंस्ते यज्ञवास्त्वभ्यायंस्ते पुरोडाशं कूर्मं भूत्वा प्रसर्पन्तमपश्यंस्तमब्रुवन्, इन्द्राय भ्रियस्व बृहस्पतये भ्रियस्व विश्वेभ्यो देवेभ्यो भ्रियस्वेति । स तानाह न भ्रिये । तमब्रुवन्, अग्नये भ्रियस्वेति । सोऽब्रवीत, भ्रियेऽहम् । यदाग्नेयोऽष्टाकपालोऽमावास्यायां पूर्णमास्यां चाच्युतो भवति । अग्निमेव स्वेन भागधेयेन समर्धयतीति ॥ ३० ॥

तथा चान्यार्थदर्शनम् ॥ ३१ ॥

अनुवाक्यायामेकत्वश्रवणम्, अग्निर्मूर्धा[1] दिव इत्याग्नेये, उदुत्यं जातवेदसमिति सौर्ये । ननु पुनरुक्तमेतल्लिङ्गद्वयोपदर्शनमिति । तदुच्यते । नैतत्पुनरुक्तम् । एकमत्र चोदनागतम्, एकं मन्त्रगतम् । चोदनागतं साधकं, मन्त्रगतं साधकस्य द्योतकमिति ॥ ३१ ॥

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

---

१ अग्निर्मूर्धा दिवः ककुत्-पा० ।

(देवताघटितसादृश्यापेक्षया द्रव्यघटितसादृश्यस्य बलीयस्त्वाधिकरणम् ॥ १७ ॥)

[१७] विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात् ॥ ३२ ॥ सि०

इदं श्रूयते, ऐन्द्रमेकादशकपालं निर्वपेदिति । तथा, आग्नेयं पय इति । तत्र संदेहः । किं देवतासामान्यादैन्द्रपुरोडाशे सांनाय्यस्य विधयन्तः, आग्नेये च पयस्यौषधस्य, देवतासामान्यं बलवत्तरम् । अथ हविःसामान्यादुत्तरत्र सांनाय्यस्य, पूर्वत्रौषधस्य, हविःसामान्यं बलीय इति । किं प्राप्तम् । उच्यते । देवतासामान्यं बलीय इति । कुतः । मुख्यत्वात् । मुख्यनियमन्विता देवता । ऐन्द्रमाग्नेयमिति । जघन्यनियन्त्रितं हविः । तयोर्विरोधे मुख्यानुग्रहो न्याय्यः । मुख्यस्याविरुद्धप्रवृत्तित्वात् । जघन्यस्य तु मुख्येन विरुद्धा प्रवृत्तिः । तस्माद्देवतासामान्यं बलीय इति प्राप्ते, ब्रूमः ।

विप्रतिपत्तौ हविषा नियम्येत । विप्रतिपत्तावेतस्यां हविर्देवतयोः, हविषा विधयन्तो नियम्येत । कुतः । कर्मणस्तदुपाख्यत्वात् । कर्म देवतां प्रति द्रव्यस्योत्सर्गः । स च हविःपूपाख्यायते, उपलभ्यत इत्यर्थः । हविस्त्यज्यमानं दृश्यते । किमतः । अतो हविः कर्मणः प्रत्यासन्नम् । प्रत्यासत्तिश्च लिङ्गम् । ननु देवताऽपि यागेन संबद्धा । न तया विना यागो भवति । उच्यते । सत्यं संबद्धा । आरादुपकारिणी तु सा । नासौ त्यज्यते । तस्माद्धविरङ्गम् । अतो हविःसामान्यं बलीयः ॥ ३२ ॥

तेन च कर्मसंयोगात् ॥ ३३ ॥

तेन च हविषा संयुज्य कर्म चोद्यते, ऐन्द्रम्, आग्नेयमिति । हविःप्रधानः शब्दः । किमतः । अतो हविरत्र बुद्धौ संनिहितं, तल्लिङ्गं भवति । यथा धूमो बुद्धिविषयतामापन्नोऽग्नेर्लिङ्गं, न विद्यमानः ॥३३॥

ननु देवताऽप्यत्र श्रूयते, ऐन्द्रमाग्नेयमिति । उच्यते—

---

३२ ॥ ३३ ॥

---

१ तयोर्नि क्वचिन्नास्ति । २ सांनाय्यस्य विधयन्तः—पा० । ३ नाविद्यमान.—पा० ।

गुणत्वेन-देवताश्रुतिः ॥ ३४ ॥

विशेषणत्वेन देवता श्रूयते, हविर्विशेष्यत्वेन । विशेष्यं च बुद्धौ संनिहितं भवति, न विशेषणम् । तद्विशेष्यं विशेष्य निवर्तते । कथं ज्ञायते । विशेष्यानुष-धसंयोगात् । यथा राजपुरुषः पूज्य इत्युक्ते पुरुषः पूज्यो गम्यते, न राजा । एवमिहापि, ऐन्द्रं पय इत्युक्ते हविर्बुद्धौ संनिधीयते, न देवता । यच्च बुद्धौ संनिहितं, तल्लिङ्गमित्युक्तम् । तस्माद्धविःसामान्यं बलीयः । अत ऐन्द्रे पुरोडाश आग्नेयस्य विध्यन्तः । आग्नेये च पयसि सांनाय्यस्येति ।

गुणत्वेन देवताश्रुतिः—इत्येतस्य सूत्रस्यापरा व्याख्या । इदं पद्रोत्तरं सूत्रम् । यदुक्तं हविःसामान्यं बलीय इति, नैतद्युक्तम् । देवतासामान्यं बलीय इति । कुतः । सर्वोऽयं प्रयासो देवताराधनार्थ एव । साऽस्य प्रसन्ना फलं ददाति । एवं श्रूयते । तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीति । यथेन्द्रस्य प्रसादनोपाय इति ज्ञातः, पुनरपीन्द्रे प्रसादयितव्ये स एवाऽऽस्थेयो भवति । तस्माद्देवतासामान्यं बलीय इति ।

अत्र ब्रूमः । स्यादेतदेवं, यदि देवतातः फलं स्यात् । यागात्तु फलं, स्वर्गकामो यजेतेति श्रूयते । यत्तु, तृप्त एवैनमिन्द्र इति । तत्रेदमुच्यते । गुणत्वेन देवताश्रुतिः । यागे गुणभूता देवता । तस्या दातृत्वं स्तुत्योच्यते । यथा, अमात्येन मे ग्रामो दत्तः, सेनापतिना मे ग्रामो दत्त इति । न चामात्यः सेनापतिर्वा ग्रामस्य प्रभवति । राजैव प्रभवति । इतरस्मिन् गुणभूते स्तुत्या दातृत्ववादः । तस्माद्यथोक्तेनैव न्यायेन हविःसामान्यमेव बलीय इति ॥ ३४ ॥

(कृष्णलचरावाग्नेयधर्मातिदेशाधिकरणम् ॥ १८ ॥)

[१८] हिरण्यमाज्यधर्मस्तेजस्त्वात् ॥ ३५ ॥ पू०

प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्काम इति श्रूयते । तद्धिरण्यमाज्यधर्मः स्यात् । उपांशुयाजविध्यन्तस्तत्र भवेत् । कुतः । तेज-

---

॥ ३४ ॥

१ तद्विशेष्य विशेष्यं—पा० । २ धर्मो स्यात्—पा० ।

स्वत्वसामान्यात् । तेजस्त्वं सामान्यम् । हिरण्यमश्मनो तेजः । आज्ये-
मपि गवां सार इत्यर्थः । अथवा हिरण्यमपि तेजस्वित्वादुज्ज्वलम्,
आज्यमपि स्निग्धत्वादुज्ज्वलमेव । तस्मात्सामान्यादुपांशुयाजधर्मा घृत
कृष्णलचरुः ॥ ३५ ॥

धर्मानुग्रहाच्च ॥ ३६ ॥

हिरण्ये च चरुत्व आज्यधर्मा अनुगृह्यन्ते, अवेक्षणादयः । औषधधर्मा-
स्तु हीयेरन्, अवहन्त्यादयः । तस्मादप्याज्यधर्माः ॥ ३६ ॥

औषधं वा विशदत्वात् ॥ ३७ ॥ सि०

अथवा, औषधस्य हिरण्ये विध्यन्तः । कुतः । विशदत्वात् । हिर-
ण्यमपि विशदम्, औषधमपि विशदम् । कः पुनरनयोः सामान्ययोर्वि-
शेषः । न खलु कश्चित् । किंतु विशदत्वस्य कारणद्वयमुपोद्बलकम् ।
तेजस्वितायास्तद्धर्मानुग्रह एकः ॥ ३७ ॥

चरुशब्दाच्च ॥ ३८ ॥

चरुशब्दश्चात्र भवति, प्राजापत्यं चरुमिति । चरुशब्दश्चौषधस्य वक्ता,
तद्बलवदौषधस्य लिङ्गम् ॥ ३८ ॥

तस्मिंश्च श्रपणश्रुतेः ॥ ३९ ॥

तस्मिंश्चाऽऽज्ये श्रपणं श्रूयते, घृते श्रपयतीति । किमतः । अत
एतद्भवति । औषधविध्यन्तेन श्रपणं प्राप्यते । तत्र केवलमाज्यं विधा-
स्यते । आज्यविध्यन्ते तु श्रपणमाज्यं च विधीयेयाताम् । तथा
वाक्यं भिद्येत ।

तस्मिंश्च श्रपणश्रुतेः—इत्येतस्यापरा व्याख्या । आह । साक्षादेवे-
हाऽऽज्यं श्रूयते । तस्मात्तस्य विध्यन्त इति । तत उत्तरमिदम् । तस्मिंश्च
श्रपणश्रुतेः । दार्शपौर्णमासिकं श्रपणं तस्मिंश्चाऽऽज्ये श्रूयते । गुणगतं
तत्सामान्यम् । हविर्गतं तु वैशद्यं, चरुशब्दश्च । तस्मात्ते बलवती ॥ ३९ ॥

(मधूदकयोरुपांशुयाजधर्मातिदेशाधिकरणम् ॥ १९ ॥)

१९] मधूदके द्रवसामान्यात्पयोविकारः स्यात् ॥ ४० ॥ पू०

चित्रायामिष्टौ श्रूयते, दधि मधु घृतं पयो धाना उदकं तण्डुलास्त-

३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥]

१ सारमित्यर्थं —ग० ।

संसृष्टं प्राजापत्यं भवतीति। तत्र, मधूदके पयोविकारः स्यात्। कुतः। द्रवसामान्यात्। द्रवे च मधूदके, पयोऽपि द्रवम् ॥ ४० ॥

प्रथमपादान्ते—मधूदके द्रवसामान्यात्पयोविकारः स्यात्।

तदिति[1] सर्वनाम्निैकवचनान्तेन यत्परामृश्यते तद्देवतासंबन्धि। न च धानादीनि परामृश्यन्ते। यदि च परामृश्येरंस्तानीति बहुवचनं स्यात्। यदि वा तत्तदिति वीप्सानिर्देशः। तस्माद्धानादीनां परामर्शः। यदि वा, एतानि परामृश्य देवतायां संबध्येरन् प्राजापत्यानीति बहुवचनमभविष्यत्। अतः सर्वनाम्नैकवचनान्तेन संसृष्टमिति[2] (संसृज्य) परामृश्य देवतासंबन्धः।

तत्रैवं[3] वर्णयन्ति। सर्वनाम निर्दिष्टस्य प्रतिनिर्देशकम्। द्रव्याणि च निर्दिष्टानि, न संसर्गः। बहुवचनाभावः कथम्। प्रातिपदिकविरोधादविवक्षितं पात्रवत्। अथवा—गुणत्वाद्[4]यत्परामृशति तदीयं लिङ्गं संख्यां च भजते। तस्य चैकैकस्य परामर्शादेकवचनमविरुद्धम्। असत्यामपि वीप्सायां वीप्साकार्ये वर्तते। संसृष्टमित्येकप्रधानत्वादनूद्यते। प्राजापत्यमित्येकदेवताभिप्रायेणैकवचनम्।

इदमपि[5] दर्शनमशोभनम्। सन्निहितस्य प्रातिपदिकार्थस्य वाचकम्। अतो यत्र नपुंसकलिङ्गं विद्यते तदनेन परामृष्टव्यम्। धाना तण्डुला न नपुंसकपरामर्शनिर्देशः[6]। अतो न तेन परामर्शः। अयं च न्यायोऽन्यत्राप्यभिहितः, 'लिङ्गविशेषनिर्देशात्समानेष्वपाठा सारस्वती स्त्रीत्वात्'[7] इति पुंलिङ्गं न मेषेण संबध्यते, स्त्रीत्वात्। एवमिहापि। संसृष्टशब्देन[8] नपुंसकलिङ्गेनास्य संबन्धः। तस्य चैकत्वादेकदेवतासंबन्धे, एकवचनं न विरुध्यते। अत एको याग[9]। 'मधूदके द्रवसामान्यात्' इति। विरोधे धर्माणां भूयस्त्वेन धर्मनियमं वेदयति। तेन सिद्धेनेदमधिकरणमारभ्यते, विभाज्याद्धर्मप्राप्तिरनित्यत्वादिति[10] ॥ ४० ॥

---

१ तदिति—'दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम्' इति प्रकृतविषयवाक्यस्थतच्छब्देनेत्यर्थः। २ संसृष्टमिति—भ क्तपुस्तकेन संसृष्टपदेनोपात्तं दध्यादिसमुदायं परामृश्येत्यर्थः। एवं च द्रव्यदेवतासंबन्धे स्य द्वयो यागोऽनेन वाक्येन विधीयत इत्याशयः। ३ अस्मिन्नथ वाक्ये यागभेदं वदतां परेषां मतमाह—तत्रैवमित्यादिना। ४ गुणत्वात्—गुणवचनवदित्यर्थः। ५ इदमपि न शोभनम्-पा०। ६ नपुंसकेति—नपुंसकेन सर्वनाम्ना तच्छब्देन परामर्शयोग्यो निर्देशो न भवतीत्यर्थः। ७ (अ० ९ पा० १ अ० १६ सू० ४५)। ८ संसृष्टशब्देनेति—अत इति पूर्वं शेषः। ९ एको याग इति—एतावता प्राजापत्यवाक्येऽविशेषेण मतद्वयमात्रं प्रदर्शितम्। वार्त्तिककृन्मतेऽपि पक्षद्वयमप्यदोषं दर्शितम्। परंतु यागभेदपक्ष एव व्याख्यानिकानुमतेयम्। १० (अ० १२ पा० २ अ० ४ सू० ०८) इत्यनेनेति शेषः।

आज्यं वा वर्णसामान्यात् ॥ ४१ ॥

आज्यं वा, इमे विकुर्वाताम्, उपांशुयाजस्य तयोर्विधयन्तः स्यात् । कुतः । वर्णसामान्यात् । समानवर्णे मधूदके आज्येन ॥ ४१ ॥

धर्मानुग्रहाच्च ॥ ४२ ॥

आज्यधर्माश्च बहवो मधूदकयोः शक्याः कर्तुमुत्पवनादयो, न तु पयोधर्मा दोहनादयः ॥ ४२ ॥

पूर्वस्य चाविशिष्टत्वात् ॥ ४३ ॥

यत्तु पूर्वं कारणमुक्तं द्रवत्वसामान्यं, तदविशिष्टम् । आज्यमप्यग्निसंयोगाद्द्रवी भवति । तस्मादुपांशुयाजविधयन्तो मधूदकयोरिति॥४३॥

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्येऽष्टमस्याध्यायस्य प्रथमः पादः ॥

अथाष्टमस्याध्यायस्य द्वितीयः पादः ॥

(वाजिनयागसुराग्रहयोरैष्टिकधर्मातिदेशाधिकरणम् ॥ १ ॥)

[१] वाजिने सोमपूर्वत्वं सौत्रामण्यां च ग्रहेषु ताच्छब्द्यात् ॥ १ ॥ पू०

चातुर्मास्येषु वाजिनेज्या श्रुता, वाजिभ्यो वाजिनमिति । सौत्रामण्यां च सुराग्रहाः, आश्विनं ग्रहं गृह्णाति, सारस्वतमैन्द्रमिति । तत्र संशयः । किमुभयोः सौमिको विधयन्त उत दार्शपौर्णमासिक इति । तदुच्यते । वाजिने, सौत्रामण्यां च ग्रहेषु सोमपूर्वत्वम् । सौमिको विधयन्तः । कुतः । ताच्छब्द्यात्, सोमशब्दत्वात् । सोमशब्दस्तत्र श्रूयते, सोमो वै वाजिनं, सुरा सोम इति । न तावद्वाजिनं सोमो, न सुरा । न च तयोः सोमेन सादृश्यमस्ति । सादृश्याच्च परशब्दः परत्र भवर्तते । तस्मात्सादृश्यमत्र विधीयते । सादृश्यं चात्र सोमधर्मकत्वं शक्यं विधातुं,

[४१ ॥ ४२ ॥ ४३ ॥]

इति श्रीभट्टकुमारिलविरचितायां मीमांसाभाष्यव्याख्यायां टुप्टीकायामष्टमाध्यायस्य प्रथमः पादः ॥

---

१ आज्यं वा विकुर्वातां ते-पा० । २ सोमवर्गत्वं-पा० ।

नान्यत् । स एष नाम्ना धर्मातिदेशो, न विध्यन्तेन । यथा, कौण्डपायिनामयनेऽग्निहोत्रे ॥ १ ॥

अनुवषट्काराच्च ॥ २ ॥

अनुवषट्कारं च सोमधर्मं दर्शयति, वाजिनस्याग्ने वीहीत्यनुवषट्करोति, सुराया वीहीत्यनुवषट्करोतीति ॥ २ ॥

समुपहूय भक्षणाच्च ॥ ३ ॥

समुपहूय भक्षणं च सोमधर्मः, तत्र दृश्यते । शेषं सर्वं विभज्य समुपहूय भक्षयन्तीति ॥ ३ ॥

क्रयणश्रयणपुरोरुगुपयामग्रहणासादनवासोपनहनं च तद्वत् ॥ ४ ॥

क्रयणादींश्च सोमधर्मान् सुरायां दर्शयति, सीसेन क्रीणात्यन्या, कुवलसक्तुभिराश्विनं श्रीणातीति । एका पुरोरुक्, एका याज्या । उपयामगृहीतोऽस्यच्छिद्राय त्वाऽच्छिद्रेणाऽऽश्विनं ग्रहं गृह्णाति । गृहीत्वाऽऽसादयति । त्रिरात्रं संहता वसन्ति । सौमे वासस्युपनद्धानि नोवमानि शष्पाणि भवन्तीति । विधौ सति, अनेकार्थानि वाक्यानि स्युः । क्रयादीन् सीसकादींश्च विदधाति । तस्मादुभयोः सौमिको विध्यन्तः ॥ ४ ॥

हविषा वा नियम्येत तद्विकारत्वात् ॥ ५ ॥ सि०

हविःसामान्येन वाऽत्र दार्शपौर्णमासिको विध्यन्तो नियम्येत । कुतः । तद्विकारत्वात् । दार्शपौर्णमासिकस्य हविषो विकारः सुरावाजिने । औषधविकृतिः सुरा, सांनाय्यविकृतं वाजिनम् ॥ ५ ॥

प्रशंसा सोमशब्दः ॥ ६ ॥

अथ यदुक्तं, वाचनिकादिति । तत्र ब्रूमः । प्रशंसार्थोऽयं सोमशब्दो, न विध्यर्थः । विधायकस्याभावात् । सोमो वै वाजिनं, सुरा सोम इति । प्रकृष्टफलवत्त्वात्सोमस्य । तद्भावेन सुरावाजिनयोः प्रशंसा । यथा, सिंहो देवदत्त इति पुरुषस्य । तस्मान्नायं नाम्ना धर्मातिदेशः ॥ ६ ॥

[॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

१ मतधा—पा० ।

वचनानीतराणि ॥ ७ ॥

इतराणि तु सौराक्रयादीनि वाचनिकानि। प्राप्तेरभावात्। अगत्या च वाक्यानामनेकार्थता, सगुणकर्मविधानेन ॥ ७ ॥

व्यपदेशश्च तद्वत् ॥ ८ ॥

शष्पैरेव दीक्षणीयामाप्नोति, तोक्मभिः प्रायणीयां, सिंहलोमभिरातिथ्यामिति। सोमविकारत्वे प्रत्यक्षमेव दीक्षणीयादीनि प्राप्नुयुः। प्राप्तानां शष्पादिभिस्तदाप्तिवचनं नोपपद्यते ॥ ८ ॥

पशुपुरोडाशस्य च लिङ्गदर्शनम् ॥ ९ ॥

पशुपुरोडाशता च ग्रहाणां श्रूयते, नैतेषां पशूनां पुरोडाशा विद्यन्ते। ग्रहपुरोडाशा ह्येते पशव इति। तत्र तावदत्र ग्रहाः पुरोडाशाः। ग्रहा एव ते। यदि तु पुरोडाशधर्मकास्तत एतदुपपद्यते। तस्मात्पौरोडाशिकस्तेषु विध्यन्तः ॥ ९ ॥

(अग्नीषोमीयपशोः सांनाय्यविकारत्वाधिकरणम् ॥ २ ॥)

[२]. पशुः पुरोडाशविकारः स्याद्देवतासामान्यात् ॥ १० ॥ पू०

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः। यो दीक्षितो यदग्नीषोमीयं पशुमालभत इति। तत्र संदेहः। किं पशुः पुरोडाशविकार उत सांनाय्यविकार इति। किं प्राप्तम्। पशुः पुरोडाशविकारः स्यात्। कुतः। देवतासामान्यात्। अग्नीषोमीयः पशुः। पुरोडाशोऽपि तद्देवत्य एव ॥ १० ॥

प्रोक्षणाच्च ॥ ११ ॥

प्रोक्षणं पुरोडाशधर्मः पशौ दर्शयति। अद्भ्यस्त्वौषधीभ्यो जुष्टं प्रोक्षामीति पशुं प्रोक्षतीति ॥ ११ ॥

पर्यग्निकरणाच्च ॥ १२ ॥

पर्यग्निकरणमपि पुरोडाशधर्मः। तदपि पशौ दृश्यते। आहवनीयादुल्मुकेन पशुं पर्यग्निकरोतीति। तस्मात्पुरोडाशविकारः ॥ १२ ॥

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

सांनाय्यं वा तत्प्रभवत्वात् ॥ १३ ॥ सि०

सानाय्यं वा पशुर्विकुर्यान्न पुरोडाशम् । कुतः । तत्प्रभवत्वात् । पशुतः सांनाय्यं प्रभवति, पशुश्च । तन्मियः प्रत्यासन्नम् । प्रत्यासत्तिश्च लिङ्गम् । हविःसामान्यं च देवतासामान्याद्बलीय इत्युक्तम् ॥ १३ ॥

तस्य च पात्रदर्शनात् ॥ १४ ॥

तस्य च सांनाय्यस्य पात्रप्रमुखा, सा पशौ दृश्यते । यदि पशुरुखायां पचेदिति ॥ १४ ॥

(अग्नीषोमीयस्य पशो. पयोविकारत्वाधिकरणम् ॥ ३ ॥)

[३] दध्नः स्यान्मूर्तिसामान्यात् ॥ १५ ॥ पू०

सानाय्यविकारोऽपि दध्नो विकारः स्यात्पशुः, न पयसः । कुतः । मूर्तिसामान्यात् । घनत्वं मूर्तिः ॥ १५ ॥

पयो वा कालसामान्यात् ॥ १६ ॥ सि०

पयो वा पशुर्विकुर्यान्न दधि । सद्यःकालः पशुः, पयोऽपि सद्यःकालम् । दधि तु द्व्यहकालम् । (पयोऽन्तरितं, तद्बहिरङ्गम्) ॥१६॥

पश्वानन्तर्यात् ॥ १७ ॥

पशोश्च पयोऽनन्तरं, तदनन्तरप्रत्यासन्नं, न दधि ॥ १७ ॥

द्रवत्वं चाविशिष्टम् ॥ १८ ॥

द्रवत्वं पशुपयसोः समानम् । पशुरपि द्रवति, पयोऽपि । तस्मात्पयोविकारः पशुः ॥ १८ ॥

(आमिक्षायागे पयोयागधर्मातिदेशाधिकरणम् ॥ ४ ॥)

[४] आमिक्षोभयभाव्यत्वादुभयविकारः स्यात् ॥ १९ ॥ पू०

वैश्वदेव्यामिक्षा, उभयोर्दधिपयसोर्विकारः स्यात् । उभयभाव्यत्वात् । उभाभ्यां हि सा भाव्यते । तत्र न शक्यते विशेषोऽस्यैव, नेतरस्येति । तस्मादुभयोः ॥ १९ ॥

एकं वा चोदनैकत्वात् ॥ २० ॥

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ । १९ ॥

---

१ ( ) इत्यन्तर्गत. पुस्त. नास्ति । २ तुल्यत्व—पा० ।

एकं वा विकुर्यात्, दधि पयो वा, नोभे । चोदनैकत्वात् । एकैषा चोदना, वैश्वदेव्यामिक्षा, इति । सैकेन विध्यन्तेन निराकाङ्क्षी क्रियते । तस्मादेकं विकुर्यात् ॥ ॥ २० ॥

यत्तु न गृह्यते विशेष इति । तत्रोच्यते—

दधि संघातसामान्यात् ॥ २१ ॥

संहतं दधि, आमिक्षाऽपि संहता । पयो द्रवम् । एष विशेषः । तस्माद्दध्नो विकार इति ॥ २१ ॥

पयो वा तत्प्रधानत्वाल्लोकवद्दध्नस्तदर्थत्वात् ॥ २२ ॥ सि०

पयो वाऽऽमिक्षया विक्रियते, न दधि । पयःप्रधानत्वादस्य संसर्गस्य । किं प्राधान्यं पयसः । भूयस्त्वम् । प्रभूतं तत्र पयः, अल्पं दधि । दध्नश्च तदर्थत्वात् । दधि च तत्र पयो घनीभावयितुमुपादीयते । लोकवत् । लोकेऽपि पय एव घनीभावयितुं दध्युपादीयते । कथम् । दध्यभावेऽन्येनाम्लेनापि काञ्जिकादिना क्रियते । तत्रापि चाऽऽमिक्षाशब्दो भवति । दधिनियमोऽम्ले त्वदृष्टार्थः । तस्मात्पय एवाम्लसंयोगेन घनीभूतमामिक्षेत्युच्यते । पयश्चेदामिक्षा, पयस एव विकारो न्याय्यः ॥२२॥

धर्मानुग्रहाच्च ॥ २३ ॥

सद्यःकालता धर्मः पयोविकारत्वेनानुगृह्यते । वैश्वदेवस्य सद्यःकालत्वात् । दधिविकारत्वे बाध्येत । वैश्वदेवोऽपि द्व्यहकालः क्रियेत । तथा तस्य धर्मो बाध्येत । सद्योभावं च दर्शयति । जुषन्तां युज्यं पय इति । यदि दध्नो विकारः स्यात् । तथा द्व्यहकालभावे दातव्यं, न कथंचन पयः स्यात् । तत्रैतद्दर्शनं नोपपद्यते । तस्मात्पयोविकार-आमिक्षा, दध्नस्त्वाधर्मकत्वम् ॥ २३ ॥

(सत्राहीनयोः सत्राहीनोभयात्मकद्वादशाहधर्मणा व्यवस्थयाऽतिदेशाधिकरणम् ॥ ५ ॥)

[५] सत्रमहीनश्च द्वादशाहस्तस्योभयथा प्रवृत्तिरैककर्म्यात् ॥ २४ ॥ पू०

द्वादशाहोऽहर्गणः, प्रायणीयोऽतिरात्रः, पृष्ठ्यः षडहः, प्रयदछन्दो-

॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

१ युज्यते-पा० । २ पयोविकारश्चाऽऽमिक्षा—पा० ।

मा । अविवाक्यमहः, उदयनीयोऽतिरात्र इति । स उभयसञ्ज्ञकः, सत्र-महीनश्च । कथं ज्ञायते । अभियुक्तानामुपदेशात् । एवं ह्युपदिशन्ति, सत्र-महीनश्च द्वादशाह इति । शब्दार्थाधिगमे चाभियुक्तोपदेशः प्रमाणम् । सञ्ज्ञाऽव्यवस्थया च तस्य धर्मा आम्नाताः । एको द्वौ [1]बहवोऽपि वाऽऽदीनेन यजेरन् । तान् दीक्षिता याजयेयुः । गृहपतिसप्तदशाः सत्रमृत्विजो ब्राह्मणाः सत्रमुपेयुरित्येवमादयः । धर्मभेदाच्च सञ्ज्ञाव्यवस्था । यथा, ब्राह्मणः, परिव्राट्, वानप्रस्थ इति । तद्दशमेऽध्याये वक्ष्यते—द्वादशाहस्य सत्रत्वमासनोपायिचोदनेन यजमानबहुत्वेन च सत्रशब्दाभिसंयोगात् । [3]यजतिचोदनादहीनत्वं स्वामिना चास्थितपरिमाणत्वादिति । स द्विरात्रादिष्वहर्गणेषु प्रवर्तेत इत्युक्तम्—गणेषु द्वादशाहस्येति । तत्र सन्दिह्यते । किमुभयप्रकारोऽसौ विकृतौ प्रवर्तते, उत व्यवस्थया, क्वचिदहीनभूतः, क्वचित्सत्रभूत इति । किं प्राप्तम् । तस्योभयथा प्रवृत्तिः स्यात् । ऐककर्म्यात् । उभयविधस्तत्र प्रवर्तेत । कुतः । ऐककर्म्यात् । एकमिदं कर्मोभयविधमित्युक्तम् । न तस्य प्रवृत्तौ विशेषो गृह्यते, इत्थं विध इह नेति । तस्मादुभयविधः प्रवर्तेत । नन्वेकश्चेद्द्विधा प्रवृत्तः, द्वितीयया [4]र्थो नास्ति । ऐककर्म्याद्विकल्पो भविष्यति । यथा, आग्नेयविकारेष्वभिमर्शनस्य ॥ २४ ॥

अपि वा यजतिश्रुतेरहीनभूतप्रवृत्तिः स्या-
त्प्रकृत्या तुल्यशब्दत्वात् ॥ २५ ॥ सि०

अपि वा—नैतदेवं, सर्वत्रोभयथा प्रवृत्तिरिति । यत्र यजतिः श्रूयते, तत्राहीनभूतस्य प्रवृत्तिः । पारिशेष्याद्यत्राऽऽसनोपायिचोदना, तत्र सत्रभूतस्य । कस्मात् । प्रकृत्या तुल्यशब्दत्वात् । प्रकृत्या हि विकृतिस्तुल्यशब्दा भवति । तस्माच्चोदनासामान्यात्प्रवृत्तिनियमः । अहीनभूतश्च यजतिचोदनः । द्वादशाहेन प्रजाकामो यजेतेति । सत्रभूत आसनोपायिचोदनः । द्वादशाहमृद्धिकामा उपेयुः, द्वादशाहमृद्धिकामा उपासीरन्निति ॥ २५ ॥

॥ २४ ॥ २५ ॥

---

१ सदृशा भा-पा० । २ (अ० ५ पा० ६ अ० १६ सू० ५५) । ३ (अ० १० पा० ६ अ० १६ सू० ६०) । ४ (अ० ८ पा० १ अ० १० सू० १२)

द्विरात्रादीनामैकादशरात्रादहीनत्वं यजति-
चोदनात् ॥ २६ ॥

अत्राऽऽह । के पुनस्तेऽहर्गणा यजतिचोदनाः, येष्वहीनभूतः प्रवर्तते । के वाऽऽसनोपायिचोदनाः, येषु सत्रभूत इति । तदुच्यते । द्विरात्रादीनामैकादशरात्रादहीनत्वम् । तत्राहीनभूतः प्रवर्तते । तेषां यजतिशब्देन चोदनात् । द्विरात्रेण यजेतेति ॥ २६ ॥

त्रयोदशरात्रादिषु सत्रभूतस्तेष्वासनोपायिचोदनात् ॥ २७ ॥

त्रयोदशरात्रमृद्धिकामा उपेयुः, चतुर्दशरात्रं प्रतिष्ठाकामा उपासीरन्निति सुहृद्भूत्वाऽऽचष्टे ।

एवं वा । यस्माद्यजतिचोदनोऽहीनस्तस्माद्द्विरात्रादीनामप्यहीनत्वम् । तेऽपि हि यजतिचोदनाः । यस्मादासनोपायिचोदनं सत्रं, तस्मात्त्रयोदशरात्रादीनि सत्राणि । तान्यपि तच्चोदनानीति ॥ २७ ॥

लिङ्गाच्च ॥ २८ ॥

अग्निष्टोमो वै प्रजापतिः, स उत्तरानेकाहानसृजत । तमेतं द्विरात्राद्योऽहर्गणा ऊचुस्त्वमस्मान् मा हासीरिति । तदेषामहीनत्वमिति द्विरात्रादीनामहीनत्वं दर्शयति ॥ २८ ॥

(पञ्चदशरात्रकुण्डपायिनामयनयोः सत्रत्वात्सत्रात्मकद्वादशाहधर्मातिदेशाधिकरणम् ॥ ६ ॥)

[६] अन्यतरतोऽतिरात्रत्वात्पञ्चदशरात्रस्याहीनत्वं कुण्डपायिनामयनस्य च तद्भूतेष्वहीनत्वस्य दर्शनात् ॥ २९ ॥ पू०

पञ्चदशरात्रं, कुण्डपायिनामयनं चोभावप्यहीनौ[1] । कस्मात् । अन्यतरतोऽतिरात्रत्वात् । उभावप्येतावन्यतरतोऽतिरात्रौ, तेनाहीनाविति । पञ्चदशरात्रस्तावत्, त्रिवृदग्निष्टुदग्निष्टोमस्त्रिरात्रो दशरात्र उदयनीयोऽतिरात्र इति । कुण्डपायिनामयनमपि, मासमग्निहोत्रं जुह्वतीत्यारभ्य, याव-

॥ २६ ॥ २७ ॥ २८ ॥]

यत्रातिरात्रोऽन्ते दृश्यते सोऽहीनः । अत्रान्तेऽतिरात्रः । तस्मादहीनत्वम् । एवं

१ तेनाहीनाविति क्वचिन्नास्ति । २ अर-पञ्चदशरात्रे कुण्डपायिनामयने चेत्यर्थः ।

दशरात्रो महाव्रतमुदयनीयोऽतिरात्र इति। यश्चान्यतरतोऽतिरात्रः, सोऽहीनः। कथं ज्ञायते। तद्भूतेष्वहीनत्वस्य दर्शनात्। तद्भूतेषु—अन्यतरतोऽतिरात्रभूतेष्वहीनत्वं श्रूयते, यदन्यतरतोऽतिरात्रस्तेनाहीन इति॥२९॥

अहीनवचनाच्च ॥ ३० ॥

अहीन इति चायं पञ्चदशरात्रः प्रत्यक्षमुक्तः। यदन्यतरतोऽतिरात्रस्तेनाहीन इति। तस्मादप्यहीन इति ॥ ३० ॥

सत्रे वोपायिचोदनात् ॥ ३१ ॥ सि०

सत्रे वैते, नाहीनाः। कुतः। उपायिचोदनात्। य एव भूतिकामाः स्युस्त एतं पञ्चदशरात्रमुपेयुः। कुण्डपायिनामयनेऽपि, भूतिकामा उपेयुरिति। कः पुनरेतयोर्लिङ्गयोर्विशेषः। चोदनागतमेकं, वाक्यान्तरगतमन्यच्च। चोदनागतं यत्तदन्तरङ्गं भवति, बहिरङ्गमितरत्। अयं चापरो विशेषः। अहीनलिङ्गेन च नित्येनाहीनस्य संस्तुतिर्नोपपद्यते। उपपत्त्यैतदहीनत्वमुच्यते, यदन्यतरतोऽतिरात्रस्तेनाहीन इति। सा यदि तावदुपपत्तिः साधिका, ततोऽन्तरेणापि वचनं, सिद्धमहीनत्वम्। अथ न साधिका, उच्यमानमपि न सिध्यति। तस्मान्नैतद्वचनम्। किं तर्हि। अनुवादोऽयं स्तुत्यर्थः। स्तुतिश्च नित्येनाहीनलिङ्गेनान्यतरतोऽतिरात्रत्वेनाहीनस्य नोपपद्यते। यत्कारणं, सर्व एवाहीनोऽन्यतरतोऽतिरात्रः। सत्रस्य तूपपद्यते, येन तावदयमन्यतरतोऽतिरात्रः, तेनाहीनः। आत्मना च सत्रम्। अत उभयात्मा विशिष्टोऽयमन्येभ्यः सत्रेभ्य इति ॥ ३१ ॥

सत्रलिङ्गं च दर्शयति ॥ ३२ ॥

सत्रलिङ्गं च कुण्डपायिनामयने दर्शयति। गृहपतिर्गृहपते, सुब्रह्मण्यः सुब्रह्मण्य इति। गृहपतिर्हि सत्र आम्नातः। गृहपतिसप्तदशाः सत्रमुपेयुरिति। सत्रे च तेनार्थः प्रत्वर्यान् याजमानान् कर्तुम्। अन्ये-

---

ष्वहीनविधयन्तोऽत्र ॥ २९ ॥ [३० ॥]

न चैतावत् सत्रमिदं स्मरन्ति। न चेदवचनमस्ति, योऽन्यतरतोऽतिरात्रः सोऽहीन इति। यदन्येनातोऽहीनं इति। उपायिचोदनेन सत्रलिङ्गेन सत्रत्वम् ॥ ३१ ॥

---

१ यत्कारणम्। सर्व एवाहीनोऽन्यतरतोऽतिरात्रादुपपन्नात। तदहीनत्वमुच्यते—पा०।
२ अहीन इतीति—इति स्मरन्ति सोऽहीन इत्यर्थ।

षां यजमानानां व्याप्तत्वात् । तस्मात्सत्रे पूर्वेले इति ॥ ३२ ॥

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्येऽष्टमस्याध्यायस्य द्वितीयः पादः ॥

अथाष्टमस्याध्यायस्य तृतीयः पादः ॥

(आग्नावैष्णवादौ देवतासामान्यादग्नीषोमीयादिधर्मातिदेशाधिकरणम् ॥ १ ॥)

[१] हविर्गणे परमुत्तरस्य देशसामान्यात् ॥ १ ॥ पू०

इह हविर्गण उदाहरणम् । आग्नावैष्णवमेकादशकपालं निर्वपेत्, सारस्वतं चरुम्, बार्हस्पत्यं चरुम्, अग्नये पावकाय, अग्नये शुचये, इत्येवमादयः । तत्र चिन्त्यते । किं शुचिदेवतस्याग्नीषोमीयविध्यन्तः, आग्नावैष्णवस्याग्नेयविध्यन्त उत विपर्यय इति । किं प्राप्तम् । हविर्गणे परं शुचिदेवतम्, उत्तरस्याग्नीषोमीयस्य विकारः । पूर्वमप्याग्नावैष्णवं, पूर्वस्याऽऽग्नेयस्य विकारः । कुतः । देशसामान्यात् । क्रमसामान्यादित्यर्थः । इह शुचिदेवतो द्वितीयः । प्रकृतावप्यग्नीषोमीयो द्वितीयः । इतरत्राप्याग्नावैष्णवः प्रथमः । प्रकृतावप्याग्नेयः प्रथमः । देशसामान्येन लिङ्गेन परमुत्तरस्य, पूर्वं पूर्वस्य विकारः ॥ १ ॥

देवतया वा नियम्येत शब्दवत्त्वादितरस्या-श्रुतित्वात् ॥ २ ॥ सि०

न वा देशेन नियमः स्यात् । किं तर्हि । देवतया । देवतासामान्यात् । कुतः । शब्दवती देवता । आग्नावैष्णवमग्नये शुचये, इति । इतरस्य देशस्य, अश्रुतित्वात् । देशो न श्रूयते । किं तर्हि । प्रचयाद्गम्यते । किमतः । एवदतो भवति । देवताप्रत्ययः कर्मचोदनायामनन्तरत्वान्मुख्यः । इतरस्तु पौर्वापर्यापेक्षयोत्पद्यते । तस्माज्जघन्यः ।

[॥ ३२॥]

इति श्रीभट्टकुमारिलविरचितायां मीमांसाभाष्यव्याख्यायां टुप्टीकायामष्टमाध्यायस्य द्वितीयः पादः ॥

[॥ १ ॥

---

१ हविर्गण्यः-पा० । २ प्रत्ययादुत्पन्ने-पा० ।

मुख्यानुग्रहश्च न्याय्यः। अतः शुचिदेवत्य आग्नेयस्य विदधन्तः। आग्नावैष्णवे चाग्नीषोमीयस्य ॥ २ ॥

(जनकसप्तरात्रे द्वादशाहिकानां सप्तानामह्नां क्रमेण धर्मातिदेशाधिकरणम् ॥ २ ॥)

[१] गणचोदनायां यस्य लिङ्गं तदावृत्तिः प्रतीयेताऽऽग्नेयवत् ॥ ३ ॥ पू०

जनकसप्तरात्रे श्रूयते, चत्वारि त्रिवृन्त्यहानि भवन्तीति। तथाऽन्यत्र श्रूयते, नव त्रिवृन्त्यहानि भवन्तीति। तत्र संदेहः। किं पार्ष्ठिकस्य प्रथमस्यायमभ्यास उत नानाह्नां द्वादशाहिकानां स्तोमविधिरिति। किं प्राप्तम्। गणचोदनायां यस्य लिङ्गं तदावृत्तिः प्रतीयेताऽऽग्नेयवत्। गणचोदनायामेवंविधायां यस्य लिङ्गं पार्ष्ठिकस्य प्रथमस्याह्नस्त्रिवृत्त्वं, तस्यैवाऽऽवृत्तिः प्रतीयेत। चोदनासामान्यात्। आग्नेयवत्। तद्यथा, अग्नये पावकाय, अग्नये शुचये, इति देवतैकत्वचोदनासामान्यादाग्नेयस्य विधन्ताभ्यासः। एवमिहापि ॥ ३ ॥

नानाहानि वा संघातत्वात्प्रवृत्तलिङ्गेन चोदनात् ॥ ४ ॥ सि०

नानाहानि वा द्वादशाहिकानि प्रवर्तेरन्, न पार्ष्ठिकं प्रथममहः। कस्मात्। संघातत्वात्। संघात एष उच्यते, चत्वारि त्रिवृन्त्यहानीति। पृथक्त्वनिवेशिनी हि चत्वारीति संख्या, पृथक्त्वेनाह्नां भवतीति। सन्ति च तत्र सप्तरात्रे चोदनया प्रवृत्तानि नानाहानि द्वादशाहिकानि चत्वारि। तान्यनूद्य त्रिवृत्त्वं विधातुं शक्यते।

॥ २ ॥ ३ ॥]

— सन्ति तत्र चोदनया प्रवृत्तानि नानाहानि द्वादशाहिकानि चत्वारि।— तान्यनूद्य त्रिवृत्त्वं विधातुं शक्यत इत्येतदयुक्तम्। 'जनकसप्तरात्रेण यजेत' इति प्रयोगचोदनेयम्। प्रयोगश्चोत्पत्तिं न त्यजति। अहः शब्दो यागविशेषवचनोऽश्रुतमपि विशेष्यमनुभापयति। नेदं विशेषणं यागमन्तरेण संभवति। यथा, वज्रीतीन्द्र-

१ 'प्रयोगश्चोत्पत्तिं न त्यजते' इति यथाश्रुत पाठ उपलभ्यते। २ सत्यानि न इत्युपति-उपपत्तिम-पेयत इत्यर्थः। ३ प्रयोगचोदनयाऽपेक्षितायाः अपि कर्मोत्पत्तेरन्यतोऽप्राप्तत्वादनेनैवोत्पत्तिमपि चोदयतीति शङ्कायामाह-अह शब्द इत। 'चत्वारि त्रिवृन्त्यहानि' इति वाक्यस्थाहःशब्द इत्यर्थः।

न तु त्रिवृन्ति बहून्यहान्यनूद्य तत्र चतुःसंख्या विधीयते ॥ ४ ॥

तथा चान्यार्थदर्शनम् ॥ ५ ॥

चत्वारि त्रिवृन्त्यहान्यग्निष्टोममुखानीति । येषामग्निष्टोमः प्रथमः, इतरेऽनग्निष्टोमाः, त एवमुक्ते प्रतीयन्ते, न ये सर्वेऽग्निष्टोमाः । यथा, अयोमुखं पिण्डच्छेदनमित्युक्ते न सर्वायसं प्रतीयते । यदि च त्रिवृतोऽभ्यासः स्यात्, सर्वेऽग्निष्टोमा भवेयुः । अग्निष्टोमो ह्यसौ । तस्माद्द्वादशाहिकानां चोदकप्राप्तानामह्नां त्रिवृत्ता विधीयते । एवं नव त्रिवृन्त्यहानि भवन्तीति ॥ ५ ॥

(षट्त्रिंशद्रात्रे षडहधर्मातिदेशाधिकरणम् ॥ ३ ॥)

[३] कालाभ्यासेऽपि बादरिः कर्मभेदात् ॥ ६ ॥ पू०

क्वचित्कर्मविशेषे श्रूयते । षडहा भवन्ति, चत्वारो भवन्ति, पञ्चाहा भवन्ति । तत्र संदेहः । किं द्वादशाहिकानामह्नां प्रवृत्तिः, उत षडहस्येति । किं प्राप्तम् । कालाभ्यासेऽपि बादरिः । षडहकालाभ्यासेऽप्येतस्मिन् श्रूयमाणे बादरिराचार्यो द्वादशाहिकानामह्नां प्रवृत्तिं मन्यते

मनुमापयति । बहुवचनादनिश्चनबहुत्वेषु चत्वारीति नियम्यते । तेषां त्रिवृत्त्वमग्निष्टोममुखत्वं च विधीयते । ननु 'चत्वारि त्रिवृन्त्यहानि भवन्ति' अतं उत्पन्नानि 'जनकसप्तरात्रेण यजेत' इति फले विधीयन्ते । पर्वपक्षे, त्रिवृत्त्वेन लिङ्गेन प्रथमस्याह्नो विध्यन्तद्धष्टुर्व्यपि ।

सिद्धान्ते, यागानां गुणः संघातः । तद्धीयेन गुणेन नानाह्ना यो धर्मः सोऽतिदिश्यते, संघातसामान्यात् । त्रिवृत्त्वं पुनरङ्गावस्थितं, तद्बहिरङ्गत्वाद्दुर्बलम् । एवं वर्णयितव्यमधिकरणम् । यथा भाष्यकारेण वर्णितं तथा बहवो दोषाः । कथं । चत्वारीत्यनूद्य त्रिवृत्त्वं विधीयते । न च सप्तरात्रे चत्वारि सन्ति । अविधीयमानत्वाच्चतुर्णां, यान्यनूद्येरन् । अभ्युच्चय भूनः । तन्नु वा चत्वारि । तत्राग्निष्टोममुखानीति द्वितीयो गुणो विधेयः । तत्र वाक्यं भिद्येतेति सिद्धम् ॥ ४ ॥ [५ ॥

---

१ नानाह्ना—पा० । २ चतुरे—पा० । ३ एवं चेत्वर्थः । ४ अत उत्पन्नानीति—इत्यनेन वाक्येनोत्पन्नानि कर्माण्यनूद्य जनकसप्तरात्रेणेति वाक्येन फले विधीयन्त इत्यर्थः । ५ तद्धीयेन गुणेन—प्रधानसंबन्धिना संघातेन बलवता गुणेनेत्यर्थः । ६ वर्णितव्यं—पा० । ७ विधीयते—इत्युत्तरं भाष्यकारेणेति शेषः । ८ अष्टानुष्टितचत्वारो वाक्यिद्वृत्ता न स्याक्नात् ।

स्म । कुतः । कर्मभेदात् । षडहशब्देनात्राहर्मितानि षट् सौत्यानि कर्माण्युच्यन्ते । तेषां च षट्कानां भेदो गम्यते । चत्वारः षडहा इति पृथक्त्वनिवेशात्संख्यायाः । यद्येकस्यैव कर्मषट्कस्य पाष्ठिकस्याऽऽभिप्लविकस्य वाऽभ्यासः कल्प्येत, ततश्चतुःषडहा इति स्यात् । अथ पुनः, चत्वारः षडहा इत्युक्ते चतुर्विंशत्यहानि प्रतीयन्ते, साऽहःसंघातचोदना प्रकृतिलिङ्गत्वाद्द्वादशाहिकीमहःप्रवृत्तिं गृह्णाति । तस्मान्नानाह्नां द्वादशाहिकानां प्रवृत्तिः ॥ ६ ॥

तदावृत्तिं तु जैमिनिरह्नामप्रत्यक्षसंख्यत्वात् ॥ ७ ॥ सि०

तदावृत्तिं, पाष्ठिकस्यैव प्रज्ञातस्य षडहस्याऽऽवृत्तिं जैमिनिराचार्यो मेने । कुतः । अह्नामप्रत्यक्षसंख्यत्वात् । चतुर्विंशतिरह्नामप्रत्यक्षा संख्याऽनुमानाद्गम्यते । तस्याश्च षडहचतुष्टयेनैवानुमानम् । तेन पूर्वं तावत्षडहचतुष्टयमेव प्रत्येति । ततसमाहृत्य चतुर्विंशतिसंख्याम् । यथा, पूर्वं धूमं प्रतिपद्यते, पश्चादग्निम् । यश्च धूमप्रत्ययेनैव कृतार्थो भवति नासावग्निप्रत्ययमाद्रियते । इहापि षडहप्रत्ययादेव तत्प्रवृत्तिः प्रसज्यते । तथा च कृतार्थः, किं चतुर्विंशतिसंख्यया प्रतीतया करिष्यति । तस्मात्षडहाभ्यासः ।

अथ यदुक्तं, पृथक्त्वनिवेशिनी संख्याऽऽवृत्तौ बाध्येतेति । तत्र ब्रूमः । षडह इति प्रज्ञातः षडहः संनिहितो गृह्यते । तस्य चतुःसंख्यासंबन्धः साक्षान्नास्तीत्यावृत्त्या भविष्यति । यथा, उपसदां प्रयाजानुयाजानां च । यस्यापि, चतुर्विंशतिरात्रश्चत्वारः षडहा इत्येवं चोद्यते, तस्यापि दशरात्रे प्रवर्तमान आवृत्त्यैव संख्यापूरणम् । भिन्नानां षडहानामभावात् । यश्चोभयोर्दोषो नासावेकं पक्षं निवर्तयति ॥ ७ ॥

(अनेकत्र्यादिसंस्थागणेषु द्वादशाहिकधर्मातिदेशाधिकरणम् ॥ ४ ॥)

[५] संस्थागणेषु तदभ्यासः प्रतीयेत कृतलक्षणग्रहणात् ॥ ८ ॥ पू०

इह संस्थागणा उदाहरणम् । अग्निष्टोमः पूर्वोक्थ्यः, अथाग्निष्टोमं भवति, अथातिरात्रं भवतीत्येवमादयः । अत्र चिन्त्यते । किं ज्योति-

ष्टोमस्यायमभ्यास एतेषां संस्थानां संस्थाविशिष्टानामह्नां वाद इति । किं प्राप्तम्, संस्थागणेषु तदभ्यासः प्रतीयेत । तस्यैव प्राकृतस्य ज्योतिष्टोमस्यायमभ्यासः । कुतः । कृतलक्षणग्रहणात् । तस्यैतत्कृतं लक्षणम् । अग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्र इति । तत्संयोगेनैताः संस्था उत्पन्नाः । स ताभिः शक्यते लक्षयितुम् । तं च लक्षयित्वा संख्यां केवलां विधास्यति । नानाह्नां तु वादे संस्था संख्या चोभयं विधीयते । उक्थ्यसंस्था भवन्ति, ते च पञ्च भवन्तीति । तथा वाक्यं भिद्यते । तस्माज्ज्योतिष्टोमाभ्यासः ॥ ८ ॥

अधिकाराद्वा प्रकृतिस्तद्विशिष्टा स्यादभिधानस्य तन्निमित्तत्वात् ॥ ९ ॥ सि०

नैतदेवं, ज्योतिष्टोमाभ्यास इति । कथं तर्हि । प्रकृतिस्तद्विशिष्टा स्यात् । द्वादशाहिकान्यहानि संस्थाविशिष्टानि स्युः । कस्मात् । अधिकारात् । तान्यत्र चोदकेनाधिकृतानि । एवं चोदकानुग्रहो भविष्यति । ननु प्रत्यक्षविहितो ज्योतिष्टोमोऽग्निष्टोमादिभिः शब्दैः । नेत्याह । कथम् । अभिधानस्य तन्निमित्तत्वात् । अग्निष्टोमाद्यभिधानं संस्थानिमित्तं, न ज्योतिष्टोमाभिधायकम् । तत्तत्संस्थं क्रतुं वदितुं शक्नोति, न ज्योतिष्टोममेव । यत्तु—अनेकार्थत्वमिति । नानेकार्थत्वं भविष्यति । गणचोदनया प्राप्तानामह्नां पञ्चानां संस्थामात्रं विधायिष्यते । उताग्निष्टोममित्यपि समास उभयविशेषणविशिष्टं गणमाह ।

स एक एवार्थः । यथा, लोहितोष्णीषा ऋत्विजः प्रचरन्तीति । पृथक्त्वनिवेशिनी चैवं संख्याऽनुगृहीता भविष्यति । तस्माद्द्वादशाहिकानां नानाह्नां वादः ॥ ९ ॥

(शतोक्थ्यादौ ज्योतिष्टोमिकोक्थ्यादिस्तोत्रानुष्ठानाधिकरणम् ॥ ९ ॥)

[५] गणादुपचयस्तत्प्रकृतित्वात् ॥ १० ॥ पू०

शतोक्थ्यं भवति, शतातिरात्रं भवतीति श्रूयते । तत्र द्वादशाहिकान्यहानि प्रवर्तन्ते । तानि च प्रायेणोक्थ्यसंस्थानि । द्वावग्निष्टोमौ । शतो-

॥ ८ । ९ ॥

१ दशस्तु संस्था—पा० । २ ज्योतिष्टोमवाचकम्-पा० । ३ तत्संस्थं—पा० । ४ अनेकार्थमिति—पा० । ५ नानेकार्थम्—पा० ।

ननु मत्यक्षश्रुता गायत्र्यः। ताभिश्चोदकपाप्ता इतरा बाधितव्याः। नेत्याह। कस्मात्। संख्यात्वात्। अयं गायत्रीशब्दः संख्यावाचकः। कथं ज्ञायते। अव्यतिरेकाच्चतुर्विंशतिसंख्यामेव न व्यभिचरति। न कश्चिच्चतुर्विंशतिसंख्यया विना दृष्टः। चतुर्विंशतिसंख्यादीनामु त्रिष्टुब्जगतीषु न कदाचिद्भवति। तस्मात्संख्याशब्दोऽयम्। संख्याशब्दश्चेदक्षरावलोपः कर्तव्यः। अग्निष्टोमवत्। यथा, अग्निष्टोमे भवतीत्युक्ते द्वादशाहिकानामह्नामुक्थ्यावलोपः क्रियते। एवमिहापि ॥ १२ ॥

तन्नित्यवच्च पृथक्सतीषु तद्वचनम् ॥ १३ ॥

तन्नित्यवत्संख्यामात्रं ब्रुवन्तं गायत्रीशब्दं मत्वा, पृथक्सतीषु पृथग्भूतासु गायत्रीभ्यो जगतीषु, अगायत्रीषु तद्वचनं भवति, गायत्रीवचनं भवति। ये हि द्वे गायत्र्यौ, सैका जगतीति। यदि संख्यायां गायत्रीशब्दस्ततो जगत्यां द्वे चतुर्विंशतिसंख्ये इत्येतद्वचनमुपपद्यते। अथ, ऋचि ततो द्वे ऋचौ जगत्यां न स्त इत्येतद्वचनमनुपपन्नं स्यात्। तस्मादपि संख्यायां गायत्रीशब्दः। तथेदमपरं च दर्शनम्। तिस्रोऽनुष्टुभस्चतस्रो गायत्रीः करोतीति ॥ १३ ॥

न विंशतौ दशेति चेत् ॥ १४ ॥

अथ, कश्चिद्ब्रूयात्, न विंशतौ दशसंख्याऽस्ति। न संख्या संख्यान्तरे वर्तते। गुणो हि संख्या। न च गुणा गुणेषु वर्तन्ते। एवमष्टाचत्वारिंशत्संख्यायां चतुर्विंशतिसंख्या नास्ति। तस्मात्संख्यार्थेऽपि गायत्रीशब्दे, एका जगती, द्वे गायत्र्यौ, इत्येतदनुपपन्नमेव। यश्चोभयोर्दोषो नासावेकस्य वाच्यः ॥ १४ ॥

एकसंख्यमेव स्यात् ॥ १५ ॥

अत्रोच्यते। न ब्रूमः संख्यायां संख्या वर्तत इति। किं तर्हि। अष्टाचत्वारिंशत्संख्यापरिच्छिन्नेष्वक्षरेष्ववयवभूते द्वे चतुर्विंशतिसंख्ये, न तु द्वे ऋचौ, इति। न च संख्या संख्यान्तरं निवर्तयति। यदि निवर्तयेदेकसंख्यमेव स्यात्। यस्य दश गावस्तस्य द्वौ पञ्चकौ गवामित्येतद्वचनं न स्यात्। भवति च तत्। तस्मान्न संख्या संख्यान्तरं निवर्तयति।

॥ १२ ॥ १३ ॥ १४ ॥

एवं वा ॥ न विंशतौ दशेति चेत् । यद्यपि संख्यायां गायत्रीशब्दः, एवमपि नाक्षरावलोपः कर्तव्यः । किं कारणम् । विंशतौ दश विद्यन्ते । कियतः । इदं तावदतः । येन विंशतिरुपात्ता, उपात्तास्तेन दश भवन्ति । एवं येन त्रिष्टुब्जगत्यः प्रयुक्ताः, प्रयुक्तास्तेन तदन्तर्गता गायत्र्यो भवन्ति । तस्मादविकारेण प्रयोग । एवं चोदकानुग्रहश्च भवति । गायत्रं चाहः कृतं भवति ।

ऐकसंख्यमेव स्यात् । अत्राऽऽह । जगत्यां त्रिष्टुभि चोपात्तायां न गायत्र्य उपात्ता भवन्ति । कथम् । साधनं परिच्छिन्दती संख्या कर्मणि, अङ्गी भवति । न जगत्याः, त्रिष्टुभो वाऽवयवः साधनम् । किं तर्हि । त्रिष्टुब्जगत्यः । अथोच्येत, गायत्रमेतदहर्भवतीति वचनादवयव एवात्र साधनमिति तथा सत्यक्षरावलोप एव प्राप्नोति । उत्तरस्यावयवस्यानङ्गत्वात् । न चानङ्गेऽनुपादीयमाने चोदको बाध्यते । तस्माद्यदुक्तं, यद्यपि संख्यायां गायत्रीशब्दः, एवमप्यविकारेण प्रयोग इति ।

एतदयुक्तम् । दर्शयति[2] च । नोत्तरस्यां संख्यायामुपात्तायां पूर्वाः[1] संख्या उपात्ता [3]भवन्तीति । यदयमेका च दश च शतं च सहस्रं च परार्धं चेति सर्वसंख्या अनुक्रामति । यदि चोत्तरस्यां संख्यायामुपात्तायां पूर्वाः संख्या उपात्ता भवन्ति, ऐकसंख्यमेव स्यात् । एकैव परार्धसंख्या भवेत् । सा हि सर्वाभ्य उत्तरा । यतस्त्वेकाद्या अप्यनुक्रान्ताः । अतो विज्ञायते, नोत्तरस्यां संख्यायामुपात्तायां पूर्वाः संख्या उपात्ता भवन्तीति ॥ १५ ॥

गुणाद्वा द्रव्यशब्दः स्यादसर्वविषयत्वात् ॥ १६ ॥ सि०

[4]नैतदेवं संख्यायां गायत्रीशब्द इति । कथं तर्हि । गुणाद्द्रव्यशब्दः स्यात् । चतुर्विंशत्यक्षरयुक्तस्य द्रव्यस्य वाचकः । कस्मात् । असर्वविषयत्वात् । यदि संख्याशब्दः स्यात्, सर्वस्मिंश्चतुर्विंशतिसंख्यासं[5]ख्येये वर्तेत गोयूथादौ । न च वर्तते । तस्मान्न संख्याशब्दः ॥ १६ ॥

॥ १९ ॥ ११ ॥

१ पूर्व-पा० । २ दर्शयति । न च-पा० । ३ भवन्ति-पा० । ४ न चैतदेवं—पा० ।
५ चतुर्विंशतिसंख्याये—पा० ।

गोत्ववच्च समन्वयः ॥ १७ ॥

यथा, गौरिति सत्यपि गमननिमित्ते सामान्यद्रव्याभिधाने सास्नादिमत्येव समन्वयो, नान्यत्रेति तद्वचन एव गोशब्दो विज्ञायते । एवमयमप्यृग्वचन एव विज्ञातुं न्याय्यः ॥ १७ ॥

संख्यायाश्च शब्दवत्त्वात् ॥ १८ ॥

चतुर्विंशतिसंख्यावाचकः शब्दोऽस्ति, चतुर्विंशतिरिति । नान्यापरेण गायत्रीशब्देनार्थः । संज्ञाया व्यवहारार्थत्वादेकेन व्यवहारसिद्धेः ॥ १८ ॥

इतरस्याश्रुतित्वाच्च ॥ १९ ॥

इतरस्य ऋग्द्रव्यस्याश्रुतित्वात् । अशब्दत्वादित्यर्थः । तस्यापि व्यवहारार्थेन संज्ञाशब्देन प्रयोजनम् । तत्रायं गायत्रीशब्दोऽर्थवान् भवति । संख्यायां निष्प्रयोजनः । तस्मादपि ऋक्शब्दो न्याय्यः । अतो गायत्रीणामृचामागमः कर्तव्य इति ॥ १९ ॥

द्रव्यान्तरे निवेशादुक्थ्यलोपैर्विशिष्टं स्यात् ॥ २० ॥

यदुपवर्णितम्, अग्निष्टोमवदिति । तत्र ब्रूमः । अग्निष्टोमशब्दस्य द्रव्यान्तरे कस्मिंश्चिन्निवेशो नास्ति । यथा गायत्रीशब्द ऋग्द्रव्ये । अयं हि केवलाग्निष्टोमान्ततां ब्रूते । न चोक्थ्यलोपमन्तरेण द्वादशाहिकानामह्नामग्निष्टोमान्तता भवतीत्यवश्यकार्य उक्थ्यलोपः । अयं पुनर्गायत्रीशब्द ऋग्द्रव्यस्य वाचक इत्युक्तम् । न चाक्षरावलोपेन तदृग्द्रव्यं प्राप्यते । तस्माद्विषमोऽयमुपन्यास इति ॥ २० ॥

अशास्त्रलक्षणत्वाच्च ॥ २१ ॥

अशास्त्रलक्षणानि चोक्थ्यस्तोत्राणि यत्राग्निष्टोमे, तानि शास्त्रलक्षणत्वादग्निष्टोमान्ततया बाध्यन्ते । इह पुनर्विपरीतं, शास्त्रलक्षणा गायत्र्यः, आनुमानिक्यस्त्रिष्टुब्जगत्यः । ता न शक्नुवन्ति गायत्रीं बाधितुम् ॥ २१ ॥

उत्पत्तिनामधेयत्वाद्भक्त्या पृथक्सतीषु स्यात् ॥ २२ ॥

अथ यदुक्तं, संख्यायां गायत्रीशब्दो दृष्टः । ये हि द्वे गायत्र्यौ, सैका जगतीति । तस्य कः परिहारः । उच्यते । औत्पत्तिकमेतद्वचो

॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

१ कार्यं प्रयोजनं—पा० ।

नामधेयमित्युक्तम्। अत उत्पत्तिनामधेयत्वाद्योऽयं जगत्यवयवे चतुर्विंशत्यक्षरे पदसंचये प्रयोगः, स भक्त्या विज्ञेयः। न ह्येकस्य शब्दस्यानेकार्थता सत्यां गतौ न्याय्या। कथं पुनर्भक्त्या। परिमाणसामान्यात्। यत्परिमाणं द्वयोर्गायत्र्योस्तदेकस्या जगत्याः। अत एतदुक्तम्। ये हि द्वे गायत्र्यौ, सैका जगतीति। यथा, यौ द्वौ कौरवौ स एको वाह्लीक इति। एतच्च गायत्रीद्वयमशंसार्थं वचनम्। कथम्। इदं श्रूयते, द्वाभ्यां गायत्रीभ्यां वैश्यस्येति। तदेतदयुक्तमिवोच्यते। जगत्या वैश्यस्य कार्यम्। जागतो हि वैश्यः। तदेतद्द्वाभ्यां गायत्रीभ्यां क्रियते। जगत्यैव तत्कृतं भवति। ये हि द्वे गायत्र्यौ सैका जगतीति। तस्मादहेतुरयं संख्यार्थत्वे गायत्रीशब्दस्य ॥ २२ ॥

वचनमिति चेत् ॥ २३ ॥

शक्यं तावदत्रैतद्वक्तुं, यत्रानुवादो गायत्रीशब्दः। यत्र तु विधिस्तत्र कथम्। यथा, तिस्रोऽनुष्टुभः, चतस्रो गायत्रीः करोति, इति। का पुनर्विधौ विशेषः। विधौ शब्दार्थेन व्यवहारो भवति। तिस्रोऽनुष्टुभश्चतस्रो गायत्र्यो न शक्याः कर्तुम्। शक्यास्तु चतस्रश्चतुर्विंशतयः। तस्मात्तत्र संख्यायां गायत्रीशब्द इति ॥ २३ ॥

अथ ब्रूमः—

यावदुक्तम् ॥ २४ ॥

इहैवैकत्र संख्यार्थो नान्यत्र। क्वचिद्दर्शनात्। आह। यद्येवं न संख्यावचनः। कथमिह संख्यार्थो जात इति। उच्यते। लक्षणयाऽपि विधानं भवति। यथा लोके, अमी पिष्टपिण्डाः सिंहाः क्रियन्तामिति। वेदेऽपि, पृष्ठैरुपतिष्ठत इति। न च तत्र सिंहशब्दः प्रतिकृतिवचनो दृष्ट इत्यन्यत्रापि प्रतिकृतिवचनो विज्ञायते। पृष्ठशब्दो वा पृष्ठसाधनमन्त्रवचनः। न च लक्षणया प्रयोगे शब्दार्थः परिच्छिद्यते। यत्कारणं, स्वार्थे एव वर्तमानोऽर्थान्तरं लक्षयति। स्वार्थं जहन्नैव लक्षयेत्। तस्मादयमप्यहेतुः ॥ २४ ॥

॥ २२ ॥ २३ ॥ २४ ॥

१ भाष्य०—पा०। २ कौरवौ—पा०। ३ बाह्लिक—पा०। ४ तदेतदुक्तं—पा०। ५ पृष्ठसाधन—इति वर्तिकाटि। ६ अशब्दार्थ—पा०।

अपूर्वे च विकल्पः स्यायदि संख्याविधानम् ॥ २५ ॥

अपूर्वे च दर्शपूर्णमासकर्मणि विकल्पः स्यात्, यदि संख्यायां गायत्रीशब्दः । तत्र हि श्रूयते, गायत्र्या परिदध्यादिति । एवं श्रुते, आजुहोतायाश्चतुर्विंशत्यक्षरस्य पदसंचयस्य च विकल्पः स्यात् । विकल्पे पक्षे आजुहोताया बाधः । स चायुक्तः सत्यां गतौ । तस्मादपि नैतत्संख्याविधानम् ॥ २५ ॥

ऋग्गुणत्वान्नेति चेत् ॥ २६ ॥

अत्रोच्यते । न प्रकृतौ विकल्पो भविष्यति । कुतः । ऋग्गुणत्वात् । ऋग्गुणो हि तत्र प्रयोगोऽङ्गीकृतः । ऋचस्तस्य सामिधेन्य आम्नाताः । यदि, अनृचा परिदधीत, ऋग्गुणत्वं बाध्येत । तस्मात्तत्राऽऽजुहोतयैव परिधास्यति । तथा सति गायत्र्या परिहितं भविष्यति । ऋग्गुणत्वं चोपसंगृहीतम् ॥ २६ ॥

तथा पूर्ववति स्यात् ॥ २७ ॥

पूर्ववत्यपि बृहस्पतिसवे तथा स्यात्, यथाऽपूर्वे । अत्रापि, ऋग्गुणकः प्रयोगोऽङ्गीकृतश्चोदकेन । तत्रापि ऋक्षूपादीयमानासु गायत्रं चैवाहः कृतं भवति । ऋग्गुणकत्वं च न बाधितम् । तस्मान्नाक्षरानः लोपः ॥ २७ ॥

गुणावेशश्च सर्वत्र ॥ २८ ॥

तुशब्दस्य स्थाने चशब्दः । दृष्टश्च तुशब्दस्यार्थे चशब्दः । यथा, किंचेह भवतीति । गुणस्य चतुर्विंशतिसंख्यायाः सर्वत्राऽऽवेशः कृत्स्नायामाजुहोतायां, नावयवे । अकृत्स्नायामुपादीयमानायामृग्गुणत्वं चोपगृहीतं भवति, संख्या च । बृहस्पतिसवे पुनर्या ऋचश्चोदकेनाङ्गीकृताः, तासामवयवे चतुर्विंशतिसंख्या निविष्टा । तस्मिन्नुपादीयमान ऋग्गुणत्वमनुपात्तं भवति । प्रकृतिगायत्रीषु तूपात्तं भवति । तस्मान्न संख्याभिधाने गायत्रीशब्दे प्रकृतिगायत्रीणामागमः प्राप्नोति ।

अपर आह । इदं तावदयं संख्यावादी प्रष्टव्यः । कस्मादक्षरगणनाया-
[illegible]

तायां चमसगतायां वा । यावताऽविशेषेण श्रुतं, गायत्रमेतदहर्भवतीति । एवं सति सर्वत्र गुणावेशः, संख्यावेशः प्राप्नोति ॥ २८ ॥

निष्पन्नग्रहणान्नेति चेत् ॥ २९ ॥

स चेद्ब्रूयात्, यत्रायं निष्पन्नो गायत्रीशब्दः, प्रसिद्ध इत्यर्थः । तस्य ग्रहणं न्याय्यम् । अयं चाक्षरगतायामेव संख्यायां प्रसिद्धो न सर्वत्र । तस्मान्न सर्वसंख्येयगतो गृह्यत इति ॥ २९ ॥

स वक्तव्यः—

तथेहापि स्यात् ॥ ३० ॥

यथाऽक्षरगतायामेव संख्यायां दृष्टो नान्यत्र, एवमृक्ष्वेव दृष्टो नान्यस्मिंश्चतुर्विंशत्यक्षरे गद्ये वा । यथा चाक्षरेष्वेव दृष्ट इति नानक्षरे विज्ञायते । एवमृक्षु दृष्ट इति नानृक्षु विज्ञातुं न्याय्यः । अत्राऽऽह । यद्यप्ययमृक्षु गायत्रीशब्दः, एवमप्यक्षरावलोप एव कार्यः । किं कारणम् । प्रकृत्युपबन्धनात् । चोदकेनात्र प्राकृतास्त्रिष्टुब्जगत्यः प्रापिताः । ता इमा नोज्झिता भविष्यन्ति । गायत्रीशब्दश्च संख्यासामान्याच्छक्नोति तद्वयवान् वक्तुम् । एवमुभौ विधी अनुगृहीतौ भविष्यतः—प्राकृतो वैकृतश्चेति ॥ ३० ॥

अत उत्तरं पठति—

यदि वाऽविशये नियमः प्रकृत्युपबन्धाच्छरेष्वपि प्रसिद्धः स्यात् ॥ ३१ ॥

यद्यविशये—असंशयेऽपि, गायत्रीषु विहितासु प्रकृत्युपबन्धनादगायत्र्यो गायत्रीशब्दः कल्प्यते, शरेष्वपि, शरमयं बर्हिर्भवतीति कुशेषु शरशब्दः कल्पयितव्यः । कौशमेव बर्हिः कार्यम् । वक्तव्यो वा विशेषः ॥ ३१ ॥

दृष्टः प्रयोग इति चेत् ॥ ३२ ॥

अयं विशेषो दृष्टः । चतुर्विंशतिसंख्यायामक्षरगतायां गायत्रीशब्द-

॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

१ संशयेऽपि इति प्रतिभाति । २ [illegible]—[illegible] ।

स्य प्रयोगः । ये द्वे गायत्र्यौ सैका जगतीति । तेन शक्यते कल्पयितुम् ॥ ३२ ॥

तथा शरेष्वपि ॥ ३३ ॥

शरशब्दस्यापि कुशेषु प्रयोगो दृश्यते, शरवणमेवेदं कुशवनमिति ॥ ३३ ॥

भक्त्येति चेत् ॥ ३४ ॥

अत्रोच्यते । स तत्र शरशब्दो भाक्तः प्रयुज्यते । दीर्घत्वात्पृथुपत्रत्वात्सादृश्यवादोऽसौ, शरवणमेवेदं कुशवनमिति । स्वार्थे वर्तमानः सादृश्यं गमयति । स्वार्थं जहत्कथं गमयेत् । तस्माच्छरेष्वेव तत्र शरशब्दस्य प्रयोगो न कुशेष्विति ॥ ३४ ॥

तथेतरस्मिन् ॥ ३५ ॥

तथेतरस्मिन्नपि, ये द्वे गायत्र्यौ सैका जगतीति भाक्त एव गायत्रीशब्द इत्युक्तम् । सोऽपि स्वार्थ एव वर्तमानस्तत्सदृशं गमयतीति, ऋक्ष्वेव प्रयुक्तो न संख्यायाम् । तस्मान्न संख्यायां गायत्रीशब्दः । अतो नाक्षरावलोपः कर्तव्यः ॥ ३५ ॥

अर्थस्य चासमाप्तत्वान्न तासामेकदेशे स्यात् ॥ ३६ ॥

अपि च त्रिष्टुब्जगतीनामेकदेशे वाक्यमपरिसमाप्तं भवति । न चापरिसमाप्तेन वाक्येनार्थः कश्चिदभिधीयते । अर्थाभिधानार्थश्च मन्त्रप्रयोगः । तत्र मन्त्रप्रयोग एवानर्थकः स्यात् । तस्मान्न तासां त्रिष्टुब्जगतीनामेकदेशे गायत्रीशब्दः स्यात् । तस्मादुत्पत्तिगायत्रीणामेव दाशतयीभ्य आगमः कर्तव्य इति ॥ ३६ ॥

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्येऽष्टमस्याध्यायस्य तृतीयः पादः ॥

---

३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥]

इति श्रीभट्टकुमारिलविरचितायां मीमांसाभाष्यव्याख्यायां टुप्टीकायामष्टमाध्यायस्य तृतीयः पादः ॥

अथाष्टमस्याध्यायस्य चतुर्थः पादः ॥

(दर्विहोमशब्दस्य कर्मनामधेयत्वाधिकरणम् ॥ १ ॥)

[१] दर्विहोमो यज्ञाभिधानं होमसंयोगात् ॥ १ ॥ सि०

यदेकया जुहुयात्, दर्विहोमं कुर्यादिति श्रूयते । अस्मिन् दर्विहोमशब्दे भवति संशयः । किं गुणविधिरुत कर्मनामधेयमिति । किं प्राप्तम् । दर्विहोमो यज्ञाभिधानं, कर्मनामधेयमित्यर्थः । कुतः । होमसंयोगात् । होमशब्दोऽत्र श्रूयते । तत्प्रधानश्चायं समासः । दर्विशब्द उपसर्जनं, होमश्च कर्म । अथवा जुहुयादिति कर्मोच्यते । तेन समुच्चितो, यदेकया जुहुयादिति । तस्मात्कर्मनामधेयं स्थितं तावत् । ततोऽर्थान्तरं प्रक्रियते ॥ १ ॥

(दर्विहोमशब्दस्य स्मार्तानां वैदिकानां च कर्मणां नामधेयताधिकरणम् ॥ २ ॥)

[२] स लौकिकानां स्यात्कर्तुस्तदाख्यत्वात् ॥ २ ॥ पू०

यदा कर्मनामधेयं, तदा चिन्त्यते, किं लौकिकानां स्मार्तानां कर्मणामष्टकादीनां नामधेयं दर्विहोमशब्द उत सर्वेषामेव लौकिकानां वैदिकानां चेति । किं प्राप्तम् । स लौकिकानां स्यात् । स खलु दर्विहोमशब्दो लौकिकानां कर्मणां नामधेयं स्यात् । कुतः । कर्तुस्तदाख्यत्वात् । तेषां कर्ता, तेन दर्विहोमशब्देन समाख्यायते । शिनीनां दार्विहोमिको ब्राह्मणः, अम्बष्ठानां दार्विहोमिको ब्राह्मण इति । यश्च यत्करोति स तेनाऽऽख्यायते । यथा, लावकः, पाचक इति । यदि चाष्टकादीनां नामधेयमेतत्, ततस्तेषां कर्मणां कर्ता दार्विहोमिकसमाख्यामर्हतीति । तस्माल्लौकिकानां नामधेयम् ॥ २ ॥

सर्वेषां वा दर्शनाद्वास्तुहोमे ॥ ३ ॥ सि०

सर्वेषां लौकिकानां वैदिकानां च नामधेयमेतत् । न लौकिकानामेव । कस्मात् । दर्शनाद्वास्तुहोमे । वास्तुहोमे हि वैदिके दर्विहोमत्वं दर्शयति । यदेकया जुहुयाद्दर्विहोमं कुर्यात् । पुरोनुवाक्यामनूच्य याज्यया जुहोति सदेवत्वायेति । ननु विपरीतमेतद्दर्शनं, यदेकया जुहुयाद्दर्विहोमं कुर्यात् । अदर्विहोमं सन्तमित्यापद्यते । यदि दर्विहोम एवासौ, तत एकया द्वाभ्यां च हूयमानो दर्विहोम एव भवति । तथे-

१ एतच्च दर्वि समयमपि नाम्नो गुणपक्षमिति वार्तिककृता न क्ष्मादगाजेमि। ज्ञेयम्।

तद्दर्शनं नोपपद्यते । यदेकया जुहुयाद्दर्विहोमं कुर्यादिति ।

अत्रोच्यते । यदि लौकिकानामेव नामधेयं, न वैदिकानाम् । तत प्रकृयाऽपि दृश्यमानोऽसौ नैव दर्विहोमो भवति । अलौकिकत्वात्, तत्रै-तद्वचनं नोपपद्यते । यदेकया जुहुयाद्दर्विहोमं कुर्यादिति । तस्माज्ज्ञाप-कमेवेदं वैदिकानां दर्विहोमत्वे एवमपि ज्ञापकमुक्तम् । कुतः प्राप्तिः । उच्यते । होमशब्दस्य सामान्याभिधायित्वात्प्राप्तिः । तस्माल्लौकिक-वैदिकानां नामधेयमेतत् ॥ ३ ॥

(दर्विहोमशब्दस्य होमनामधेयत्वाधिकरणम् ॥ ३ ॥)

[३] जुहोतिचोदनानां वा तत्संयोगात् ॥ ४ ॥ सि०

लौकिकानां वैदिकानां च नामधेयं दर्विहोमशब्द इति स्थितम् । इदानीं चिन्त्यते । किं यजतिचोदनानां जुहोतिचोदनानां च सर्वेषां नामधेयमुत जुहोतिचोदनानामेवेति । अविशेषात्सर्वेषामिति प्राप्ते, उच्यते । जुहोतीनां नामधेयं न यजतीनाम् । कुतः । तत्संयोगात् । होमशब्दसंयोगात् । अयं होमशब्दो जुहोतेर्वाचको न यजतेः । यजतौ लक्षणया स्यात् । तस्माज्जुहोतिनामधेयम् ॥ ४ ॥

(दर्विहोमशब्दस्य गुणविधित्वनिराकरणाधिकरणम् ॥ ४ ॥)

[४] द्रव्योपदेशाद्वा गुणाभिधानं स्यात् ॥ ५ ॥ पू०

स्थितादुत्तरमुच्यते । यदुक्तं कर्मनामधेयं दर्विहोम इति । तन्न । किं तर्हि । गुणाभिधानं स्यात् । गुणविधिरित्यर्थः । कुतः । द्रव्योपदेशात् । द्रव्योपदेशोऽवगम्यते, दर्व्या होमो दर्विहोम इति । एवमेतौ दर्विहोम-शब्दौ यथाप्रसिद्धिकल्पितौ भविष्यतः । तस्माद्गुणविधिः ॥ ५ ॥

न लौकिकानामाचारग्रहणत्वाच्छब्दवतां चा-न्यार्थविधानात् ॥ ६ ॥ सि०

नायं गुणविधिर्युज्यते । किं कारणम् । लौकिकानां तावदाचार-गृहीता दर्विः । स्थविरया मूलदण्डया दर्व्या जुहोतीति । सा न विधातव्या । श्रौतानामप्यन्यानि होमार्थानि पात्राण्याम्नातानि । स्रुवेण जुहोति, चमसेन जुहोतीति । तैः सह दर्वेर्विकल्पः स्यात् । स चान्याय्यः । परत्वात्, स्रुवादीनां विधायकः शब्दोऽस्ति, स्रुवेण जुहोतीति । न तु दर्व्याः । नच प्रानुमानिको विधिशब्दः ॥ ६ ॥

दर्शनाच्चान्यपात्रस्य ॥ ७ ॥

अन्यच्च पात्रं दर्विहोमे दृश्यते। भूतेभ्यस्त्वेत्यपूर्वां स्रुचमुद्गृह्णातीति। तस्मान्न गुणविधिः ॥ ७ ॥

तथाऽग्निहविषोः ॥ ८ ॥

अथोच्येत, अग्निहविषोः कार्ये दर्विर्भविष्यति। दर्व्यां होमो दर्विहोमो, दर्वेर्वा होमो दर्विहोम इति। तत्र ब्रूमः। तथाऽग्निहविषोरपि। यथा, पात्रकार्ये दर्विर्न युज्यते, तथाऽग्निहविषोः कार्येऽपि। तत्राप्याहवनीय आधारत्वेन विहितः, यदाहवनीये जुहोतीति। अन्यच्च प्रदेयत्वेन पुरोडाशादि। तस्मादग्निहविषोरपि कार्ये न दर्वेर्निवेशः ॥ ८ ॥

उक्तश्चार्थसंबन्धः ॥ ९ ॥

उक्तं चास्माभिरग्नेः कार्येऽन्यद्द्रव्यमसमर्थम्। दहनपचनप्रकाशनकर्म, अग्नेः। न चैतत्कार्यमन्यद्द्रव्यं शक्नोति कर्तुमिति[1] तस्मान्नाग्निकार्ये दर्वेरुपदेशः। अतो न गुणविधिः। कर्मनामधेयमेव दर्विहोमशब्द इति ॥ ९ ॥

दर्विहोमशब्दः कर्मनामधेयमित्युक्तम्। तत्र चिन्त्यते। किमपूर्वा दर्विहोमा उत कुतश्चिद्धर्मग्राहिण इति। किं प्राप्तम्। नापूर्वा इति। कुतः। इतिकर्तव्यताविधेः। अविहितेतिकर्तव्यताकं कर्म विहितेतिकर्तव्यताकाद्धर्मान् गृह्णातीत्युक्तम्। अविहितेतिकर्तव्यताकाश्चामी। तस्मात्पूर्ववन्त इति। यदेतदेवं, तदेतदापतति। किंपूर्वा इति। अत्रोच्यते—

(दर्विहोमानामपूर्वताधिकरणम् ॥ १ ॥)

[५] तस्मिन् सोमः प्रवर्तेताव्यक्तत्वात् ॥ १० ॥ पू०

तस्मिन् खलु दर्विहोमे सोमः प्रवर्तेत। सौमिको विध्यन्तः स्यात्। कुतः। अव्यक्तत्वात्। अव्यक्तचोदनः सोमः। अमी अपि चाव्यक्तचो-

---

१ तदेतत्तावदापतति—पा०। २ अव्यक्तचोदन इति—अव्यक्तत्वं च स्वाहात्वेनाविहितदेवताकत्वम्। सोमयागाहत्वेन विहितदेवताया अभावात्सोमयागोऽव्यक्त इति कथ्यते। कथमत्र सोमयागाहत्वेन विहितदेवताया अप्रसिद्ध्या यद्वा हिरण्यरूपमव्यक्तत्वमिति चेन्न। स्वाहात्वेन विहितदेवताकयागस्तदन्यत्वं, अव्यक्तत्वमित्येवं प्रतियोगित्वमन्तर्भाव्य परिष्कारे निरुक्तदोषानवकाशादिति ध्येयम्।

दनाः, भिन्ने जुहोतीति । अतश्चोदनासामान्यात्सौमिको विध्यन्त इति ॥ १० ॥

न वा स्वाहाकारेण संयोगाद्वषट्कारस्य च निर्देशा-
त्तन्त्रे तेन विप्रतिषेधात ॥ ११ ॥ सि०

वाशब्दः पक्षं व्यावर्तयति । नात्र सौमिको विध्यन्तो न्याय्यः। किं कारणम् । स्वाहाकारेण संयोगात् । स्वाहाकारेण संयुक्ता दर्विहोमाः। पृथिव्यै स्वाहा, अन्तरिक्षाय स्वाहेति। किमतः। वषट्कारस्य निर्देशात्तन्त्रे तेन च विप्रतिषेधः। तन्त्रे च सौमिके वषट्कारो निर्दिष्टः। तेनास्य विप्रतिषेधः । उभयोः प्रदानार्थत्वात् । यदि सौमिको विध्यन्तः, ततो वषट्कारेण भवितव्यम्। तत्रैतरस्वाहाकाराम्नानमनर्थकं स्यात्। अथ विकल्पः क्रियते, तथाऽप्युभयोः पक्षे बाधः। अथ त्वपूर्वा दर्विहोमाः, नैष विरोधो भविष्यति । तस्मा दपूर्वाः ॥ ११ ॥

शब्दान्तरत्वात् ॥ १२ ॥

शब्दान्तरं च यजतिशब्दाज्जुहोतिशब्दः। यजतिचोदनश्च सोमः। दर्विहोमाः पुनर्जुहोतिचोदनाः। चोदनासामान्येन च धर्मप्राप्तिरिष्यते। तस्मादप्ययुक्ता सौमिकी धर्मप्राप्तिः । नन्वव्यक्तत्वाच्चोदनासामान्यमुक्तम्। अत्रोच्यते। सामान्येऽव्यक्तत्वे, यजतिशब्दो विशेषलिङ्गम्। तेन यजिमतीष्वव्यक्तासु धर्मनियमः । यथा, समाने औषधगुणत्वे देवतैकत्वेन विशेषलिङ्गेन सौर्यकर्मण्याग्नेयविध्यन्त इति ॥ १२ ॥

लिङ्गदर्शनाच्च ॥ १३ ॥

लिङ्गदर्शनाच्चैतद्विज्ञायते, नात्र सौमिको विध्यन्त इति । औदुम्बरीहोमे हि स्वाहाकारं विधायाऽऽज्यविधिपरे वाक्ये दर्शयति। घृतेन द्यावापृथिवी आपृणेथामित्यन्तरा कर्णौ जुहोति। आ मूलाद्वस्त्रावपाति । भूमिगते स्वाहा करोतीति । यदत्र सौमिको विध्यन्तः स्याद्वषट्कारस्ततो भवेत्, न स्वाहाकारः ॥ १३ ॥

उत्तरार्थस्तु स्वाहाकारो यथा साप्तदश्यं तत्राविप्रतिषिद्धा
पुनः प्रवृत्तिर्लिङ्गदर्शनात्पशुवत् ॥ १४ ॥

लिङ्गदर्शनस्य परिहार उच्यते[1]। यदुक्तम्, औदुम्बरीहोमे सिद्धवत्स्वाहाकारस्य दर्शनात्सौमिको विध्यन्त इति। अत्र ब्रूमः। उत्तरार्थस्तु स्वाहाकारो यथा साप्तदश्यम्। तद्यथा, साप्तदश्यमनारभ्याधीत, सप्तदश सामिधेनीरन्वाहेति। अनारभ्यवादाना प्रकृत्यर्थत्वाद्दर्शपूर्णमासावागतम्। ततः प्राकरणिकेन पाञ्चदश्येन बाधितं सद्विकृत्यर्थं जातम्। एवमयं स्वाहाकारोऽनारभ्याधीतः, स्वाहाकारेण वषट्कारेण वा देवेभ्यो हविः प्रदीयत इति। तेनैव न्यायेन प्रकृतिं निविविक्षु सोमं दर्शपूर्णमासौ च। ततस्तथैव वषट्कारेणोपरुद्धस्तद्वर्जमन्यानि प्रदानान्युपसङ्क्रामति। तत्राविप्रतिपिद्धा सोमधर्मप्रवृत्तिः, पशुवत्। तद्यथा, पशौ साप्तदश्ये श्रूयमाणे न दार्शपौर्णमासिकी तत्र प्रवृत्तिर्विप्रतिपद्यते। वाचनिकत्वात्साप्तदश्यस्य। एवमिहापि वाचनिकत्वात्स्वाहाकारं प्रति लिङ्गदर्शनान्न सौमिकधर्मप्रवृत्तिर्विप्रतिपद्यते। पुनःशब्दश्चानर्थकः। यथा किं पुनरिदमिति ॥ १४ ॥

अनुत्तरार्थो वाऽर्थवत्त्वादानर्थक्याद्धि प्राकृतस्योपरोधः स्यात् ॥ १५ ॥

यदुक्तम्, उत्तरार्थः स्वाहाकार इति। तन्न। कुत। अनुत्तरार्थः। अर्थवत्त्वात्। प्रकृतावेवास्यार्थवत्त्वम्, नारिष्टहोमेषु। पार्वणहोमयोश्च, पूर्णमासाय सुराधसे स्वाहा, इति। अनर्थकत्वाद्धि प्राकृतस्योपरोधः स्यात्। यदि प्रकृतावनर्थकः स्यात्स्वाहाकार, ततः प्राकृतस्य वषट्कारस्य विकृतौ प्राप्तस्यानारभ्यवादेन स्यादुपरोध, वषट्कारबाध इत्यर्थः। न त्वस्याऽऽनर्थक्यम्। तस्मान्नोत्तरार्थः। न चेदुत्तरार्थः, लिङ्गमेवैतद्भवत्यसोमपूर्वत्वे दर्विहोमानां, भूमिगते स्वाहा करोतीति ॥ १५ ॥

न प्रकृतावपीति चेत् ॥ १६ ॥

एवं चेत्पश्यसि, नारिष्टहोमेषु पार्वणहोमयोश्च स्वाहाकारस्य निवेश इति। प्रकृतावपि नारिष्टहोमादौ नास्य निवेशो घटते। तत्रापि वषट्कार एव प्राप्नोति। स ह्यविशेषेण दर्शपूर्णमासयोर्विहितः। द्व्यक्षरो वषट्कार एष वै प्रजापतिः सप्तदशो यज्ञेऽन्वायत्त इति। ननु

[1] 'आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं, यजेति द्व्यक्षरं, ये यजामहे इति पञ्चाक्षरं, द्व्यक्षरो वषट्कार। एष वै सप्तदश प्रजापतिर्यज्ञमन्वायत्त' इत्येवं षण्डदेवादिधृतः पाठः।

लिङ्गदर्शनाच्च ॥ २० ॥

लिङ्गं चैतमर्थं दर्शयति । यथा नारिष्टहोमपूर्वत्वं दर्विहोमानामिति । किं लिङ्गं भवति । अग्निहोत्रे श्रूयते, यदि कीटोऽवपद्येतान्तःपरिधि निनयेदिति । तथाऽग्नौ श्रूयते, अन्तर्वेदि तिष्ठन् सावित्राणि जुहोतीति । परिधयो वेदिश्चाङ्गप्रधानार्थत्वान्नारिष्टहोमाङ्गम् । यदि तेषां धर्माः प्रवर्तेरंस्तत एतद्दर्शनमुपपद्यते । तस्मात्तेषां प्रवृत्तिः ॥ २० ॥

तत्राभावस्य हेतुत्वाद्गुणार्थे स्याददर्शनम् ॥ २१ ॥

यदेतद्गुणार्थे नारिष्टहोमार्थे दर्शनमुपदिष्टं, नारिष्टहोमानां प्रवृत्तिरित्यर्थः । अदर्शनं तत्, असाधकमित्यर्थः । कुतः । तत्राभावस्य हेतुत्वात् । त्र्यम्बकेषु, अप्रतिष्ठिता वै त्र्यम्बका इत्याहुः । नेध्माबर्हिः सनह्यते, न प्रयाजा इज्यन्ते, नानुयाजा इज्यन्ते, न सामिधेनीरन्वाहेति, अप्रतिष्ठितत्वं त्र्यम्बकाणां प्रतिज्ञाय तदुपपादनार्थमिध्मादीनामभावो हेतुत्वेनोपदिश्यते । यदि च नारिष्टहोमाः प्रवर्तेरंस्ततोऽङ्गप्रधानार्थत्वादिध्माबर्हिषोः सामिधेनीनां च त्र्यम्बकेषु भाव एव स्यात् । तत्रायं तदभावोऽसत्त्वाद्धेतुत्वेन न युज्यते । तस्मान्नारिष्टहोमानामप्रवृत्तिः ॥ २१ ॥

विधिरिति चेत् ॥ २२ ॥

इति चेत्पश्यसि, दर्शनमेतदिति । अथ कस्माद्विधिर्न भवति, नारिष्टहोमप्रवृत्तिरभ्यासानामिध्मादीनां प्रतिषेधको विधिः सन्नपूर्वमर्थं विधास्यति । अनुवादोऽप्रवृत्तिविशेषकरोऽनर्थकः स्यात् । स्थितायां प्रतिज्ञायां सूत्रेण परिचोदयति ॥ २२ ॥

न वाक्यशेषत्वाद्गुणार्थे च समाधानं नानात्वेनोपपद्यते ॥ २३ ॥

नायं विधिर्युज्यते । किं कारणम् । अन्योऽत्र विधिराम्नातः । आदित्यं घृते चरुं निर्वपेत्, पुनरेत्य गृहेष्विति । तस्य वाक्यशेषोऽयम् । कथं ज्ञायते । तेनाऽऽकाङ्क्षितत्वात् । अप्रतिष्ठिता वै त्र्यम्बकाः इति दोषमनुकीर्त्येदं श्रूयते, आदित्यं घृते चरुं निर्वपेत्, पुनरेत्य गृहेष्विति । इयं वा अदितिरियं प्रतिष्ठा, यदादित्योऽस्यामेव प्रतितिष्ठतीति । तदेतत्तस्य दोषस्य परिहारार्थमिति विज्ञायते । अतस्तेन सहैकवाक्यतां याति । तन्मध्ये च य इध्माद्यभाववचनास्तेऽपि तच्छेषा

एव समुच्चारणान्यार्थशाः । ते यदि विधयः कल्पेरन् पृथग्वाक्यानि भवेयुः । तत्रैकवाक्यरूपं बाध्येत । व्यवहितकल्पना च स्यात् । न चैषां विधायकत्वम् । अनुवादसरूपत्वात् । तस्मान्न विधयः । अथ कोऽत्र विशेषो, यत्समाने लिङ्गत्वेऽन्तःपरिधिदर्शनमसाधकमितरत्साधकमिति । विशेषमुपरिष्टाद्वक्ष्यामः ॥ २३ ॥

येषां वाऽपरयोर्होमस्तेषां स्यादविरोधात् ॥ २४ ॥

येषां वा यागानामपरयोरग्न्योर्होमः, तेषां प्रवृत्तिः स्यात् । पत्नीसंयाजानामित्यर्थः । कुतः । अविरोधात् । तत्र विरोधो नास्ति, यो नारिष्टहोमानां प्रवृत्तावुक्तः । तत्राभावस्य हेतुत्वादिति । तेषां हीध्माबर्हिःसामिधेन्यश्च नैवाङ्गम् । तदभावदर्शनं तत्र न विरुध्यते । प्रकृतिधर्माणस्तेऽपि जुहोतिचोदनाश्च । सह पत्न्या जुहोतीति । तस्मात्तेषां प्रवृत्तिः ॥ २४ ॥

तत्रौषधानि चोद्यन्ते तानि स्थानेन गम्येरन् ॥ २५ ॥

नैतद्युक्तम् । किं कारणम् । यतस्तत्रौषधानि चोद्यन्ते दर्विहोमे । यथा, त्र्यम्बकेषु पुरोडाशाः करम्भपात्राणि तण्डुला इत्येवमादीनि । तानि स्थानेन गम्येरन् । आज्यस्थानापत्त्याऽऽज्यधर्माः प्राप्येरन् । ते न शक्यास्तत्रानुष्ठातुम् । अनुष्ठीयमाना वाऽप्राकृतकार्याः स्युः । तत्र चोदको बाध्येत । तस्मान्न तेषां प्रवृत्तौ किंचित्प्रयोजनमस्ति । याज्यानुवाक्ये अपि मन्त्रान्तरेण निवर्त्येते, वषट्कारः स्वाहाकारेण ॥ २५ ॥

लिङ्गाद्वा शेषहोमयोः ॥ २६ ॥

पिष्टलेपफलीकरणहोमयोर्वा प्रवृत्तिः स्यात् । कुतः । लिङ्गात् । औषधसामान्यात् । यश्च पत्नीसंयाजानां प्रवृत्तौ दोष उक्तो धर्माणामानर्थक्यं, तदत्र नास्ति । तत्रौषधधर्मा निर्वपणादयः शक्याः कर्तुम् । तस्मात्तयोः प्रवृत्तिरिति ॥ २६ ॥

प्रतिपत्ती तु ते भवतस्तस्मादतद्विकारत्वम् ॥ २७ ॥

न त्वेतदेवम् । कुतः । यतः प्रतिपत्तिकर्मणी एतौ होमौ । दर्विहोमाश्च प्रधानकर्माणि । तेषां दूरतो भेदः । सामान्यतश्च धर्मप्राप्तिरि-

१ अनुवादस्वरूपत्वात्—पा० । २ सामान्यतश्चेति—आदर्शेन चेत्यर्थः ।

ध्यते । यच्चोक्तम्, औपभृतधर्माः शक्यास्तत्र कर्तुमिति । प्रतिषिद्धत्वा-
दप्रयोजकत्वेन निर्वपणादीनां धर्माणाम् । अतस्तदप्रकृतित्वं तेनैव
न्यायेन नोपपन्नम् । नापि प्रयोजनवत् । तस्मादेतदप्ययुक्तम् । एवं न
कुतश्चिदपि दर्विहोमानां धर्मप्राप्तिर्युज्यते । तस्मादपूर्वं ॥ २७ ॥

संनिपाते विरोधिनामप्रवृत्तिः प्रतीयेत विध्युत्पत्ति-
व्यवस्थानादर्थस्यापरिणेयत्वाद्वचनादतिदेशः
स्यात् ॥ २८ ॥

अथ कस्मादुभयपक्षसाधनानामपि लिङ्गानां भावेऽप्रवृत्तिरेव
प्रतीयते, न पुनः प्रवृत्तिरिति । उच्यते । संनिपाते विरोधिनामेतेषां
लिङ्गानां, प्रवृत्तिः प्राप्नोतु न न्याय्या । कुतः । विध्युत्पत्तिव्यवस्थानात् ।
विधीनामुत्पत्तिः पाठः । स च व्यवस्थितः । केचिद्दर्शपूर्णमासयोः प-
ठ्यन्ते, केचित्सोमे । तेनार्थस्यापरिणेयत्वम् । यत्र पठितास्ततोऽन्यत्र
परिणीयमानेषु प्रकरणं बाध्येत । तस्मादप्रवृत्तिः प्रतीयेत ।

तथाऽऽह । किमेष पक्षोत्सर्गः सर्वथाप्राप्तिरिति । एवं खलु प्राप्ते, उ-
च्यते । वचनादतिदेशः स्यात् । यथा, राड्भूताद्गुद्गातृकर्मसु । असत्ये-
वापि वचनेऽपूर्वा इति । अथ ये लिङ्गे उपदिष्टे, यदि क्रीतोऽन्वाये-
त, अन्तःपरिधि निनयेत्, अन्तर्वेदि तिष्ठन् सामिधानि जुहोतीति ।
तयोः क समाधिः । उच्यते । अन्वायपूर्वत्वाद्ब्राह्मणया वादः स वि-
ज्ञायेत । अन्तःपरिधिदेशे, अन्तर्वेदिदेशे, इति । परिधीनां वेदेश्च तत्रा-
भावात् । यथा, रजनी मे पर्द्दूपनि, तिलकी मे स्पन्दस इति । राजा-
भावे तिलकाभावे च नद्देशलक्षणया भवन्ति प्रकार इति ॥ २८ ॥

इति श्रीशबरस्वामिन कृतौ मीमांसाभाष्येऽष्टमस्याध्यायस्य
चतुर्थः पादः ॥

समाप्तश्चाष्टमोऽध्यायः ॥

इति श्रीमद्भट्टकुमारिलविरचितायां मीमांसाभाष्यव्याख्यायां
टुप्टीकायामष्टमाध्यायस्य चतुर्थः ॥

---

१ [illegible]

अथ नवमस्याध्यायस्य प्रथमः पादः ॥

(धर्माणामपूर्वप्रयुक्तत्वाधिकरणम् ॥ १ ॥)

[१] यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात् ॥ १ ॥ सि०

अष्टमेऽध्याये विशेषातिदेशलक्षणं वृत्तम् । इदानीमूहलक्षणं वर्तयिष्यामः । त्रिविधश्चोहः । मन्त्रसामसंस्कारविषयः । स इह प्राधान्येन वक्ष्यते। अन्यदपि किंचिदुपोद्घातेन प्रसङ्गेन च । आदितस्त्वपूर्वार्थश्चिन्त्यते लक्षणसिद्ध्यर्थम् । अग्निहोत्रं दर्शपूर्णमासौ ज्योतिष्टोमश्चोदाहरणम् । तत्र पृथग्धर्माः समाम्नाताः। तेषु संशयः। किं तेऽपूर्वप्रयुक्ता उत यजिप्रयुक्ता इति । अपूर्वप्रयुक्तेषु सत्सूहः सिध्यति । यजिप्रयुक्तेषु तु

ननु दशमानन्तरमूहश्चिन्तयितुं युक्तः । कुतः । उपकारातिदेशे सत्यूहोऽवकल्पते। शास्त्रातिदेशे सत्यूहाभावः । यथा, प्रकृतावाज्यपत्न्यवेक्षणादीनि ब्राह्मणतर्पणान्तानि गृहीत्वा कथमेतान्युपकरिष्यन्तीति[१], तत्र कानिचिदारादुपकारकाणि कानिचित्संनिपत्योपकारकाणि । एवं शास्त्रातिदेशे सौर्ये पेषणं प्राप्तम् । तद्यद्यपि प्रकृतौ दृष्टार्थं, तथाऽपि शास्त्रस्यातिदिष्टत्वाददृष्ट उपकारः कल्पनीयः पेषणस्य, प्रयाजादीनामिव । एवमेव[२] ' अग्नये जुष्टं निर्वपामि ' इति । तस्मादष्टमानन्तरं दशमश्चिन्तनीयः । बाधे कार्यापत्त्यर्थलोपादिभिः स्थिते ततो नवमव्यापारो युक्तः ।

सत्यम् । किंतु सप्तमेऽतिदेशसद्भाव उक्तः । आग्नेयात्सौर्ये इतिकर्तव्यता भवतीति, अष्टमे विशेषातिदेशः । नवमे सौर्ये, इतिकर्तव्यतायां प्राप्तायां किमविकृतः प्रयोक्तव्य उत विकारोऽपीत्यनेन प्रसङ्गेन नवमो दशमव्यापारमनुमन्यमान एवोत्तिष्ठति। ' विधेः[३] प्रकरणान्तरम् ' इति सूत्रं नवमाक्षेपेणैवाऽऽरभ्यते । तस्मान्नवमदशमयोः, ' अपि[४] वाऽभिधानसंस्कारद्रव्यम्' इत्यनेन सद्भावः । तेनाष्टमानन्तरं नवम आरभ्यते।

त्रिविधश्चोह इत्येतदयुक्तम् । कथम् । ऊहो नाम वितर्कणा । सा चैकरूपा मन्त्रसामसंस्कारेषु क्रियमाणा सैव सा, न तस्याः कश्चिद्विशेषः । सामग्रहणानर्थक्यं च । मन्त्रग्रहणेन संस्कारग्रहणेन चोपात्तत्वात् ।

---

१ उपकरिष्यन्तीति—अपेक्षायां सत्यामिति शेषः । २ एवमेवेति—यथा शास्त्रातिदेशपक्षे सौर्ये चरौ, अतिदिष्टशास्त्रप्राप्तस्य पेषणस्योपकारान्तरकल्पनया बाधो न स्यादेवमेव 'अग्नये जुष्टम्' इतीदृशस्यैव मन्त्रस्य शास्त्रप्राप्तस्य सौर्येऽदृष्टरूपोपकारान्तरकल्पनादूहोऽपि न स्यादित्यर्थः । ३ (अ० १० पा० १ अ० १ सू० १) । ४ (अ० १० पा० १ अ० १ सू० २) ।

सकरो धर्माणाम् । कथमिव । सर्वे हि ते यजतयः । यजतिसामान्ये यजतिशब्दवाच्ये धर्मा विधीयमानाः सर्वत्र भवितुमर्हन्ति । अपूर्वप्रयुक्तत्वे तु तदीयविशेषे विधीयमाना अन्यस्मिन्नपि तदीयविशेषापन्ने भविष्यन्ति । तस्मात्तत्रोहः सिद्धो भवति ।

अत्र वर्णयन्ति । नैव वयमूहभेदं प्रतिजानीम । किंतु विषयमस्य निरूपयाम । एषु त्रिषु वक्ष्यमाणेषु स भवतीति । तस्माद्विषयभेदः प्रदर्श्यते, न तूहभेदः । यजिसामान्ये यजतिशब्दवाच्ये विधीयमानाः सर्वत्र भवितुमर्हन्तीति—कोऽभिप्रायः । करणानुग्राहिणीतिकर्तव्यता तेन चापेक्षिता । तस्मात्करणमुद्दिश्य तत्रेतिकर्तव्यता विधीयते । उद्दिश्यमानस्य च विशेषणमविवक्षितम् । तस्माद्यागमात्रे विधान वाक्येन ।

अत्र चोद्यते । याग फले विधीयमानत्वादुपादेय इतिकर्तव्यता प्रति चोद्दिश्यमान । सकृदुच्चारिते चोपादीयमानोद्दिश्यमानत्वे न संभवत, विवक्षाभेदात् । तस्माद्वाक्येनेतिकर्तव्यतासंबन्धो न घटते ।

उच्यते । ‘दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत’ इतीदं यागोत्पत्तिं न विदधाति । ‘यदाग्नेयोऽष्टाकपालो भवति’ इत्येवमादिभिर्यागोत्पत्तेर्विधीयमानत्वात् । फलसंबन्धमपि न करोति । उत्पत्तिवाक्येन कृतत्वाद्विश्वजिन्न्यायेन । पारिशेष्यादितिकर्तव्यतासंबन्धार्थम् । यथा ‘अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति’ इति न दीक्षा विधीयते । नासौ यजमानस्य । न वाऽध्वर्युः कर्ता । सर्वस्य चोदकेन प्राप्तत्वात् । किं तर्हि । दीक्षाक्रमोऽनियमेन प्राप्तः संनियम्यते । एवमत्रापि यागमनूद्य धर्मा विधीयन्ते । उद्दिश्यमानस्य विशेषणमविवक्षितम् । तस्माद्यागमात्रे धर्मप्राप्तिरित्यभिप्राय ।

अपूर्वप्रयुक्तत्वे तु तदीयविशेषे विधीयमाना अन्यस्मिन्नपि तदीयविशेषापन्ने भविष्यन्ति । तस्मात्तत्रोहः सिद्धो भवतीति । कोऽभिप्राय । भाव्यमानेन करणेतिकर्तव्यते आकाङ्क्षिते । न च याग इतिकर्तव्यतया विना न सिध्यति । निर्ज्ञातोपायत्वाद्यागस्य लोके । तेन विशिष्टो भाव्यो विशिष्टेन करणेन

---

१ ऊहभेदमिति—ऊहावान्तरस्य भेदमित्यर्थः । २ कोऽभिप्राय इति—कथं धर्माणां यजतिप्रयुक्तता, कथं वा तेषां सार्वत्रिकमिति चाभिप्राय । ३ शङ्का समाधत्ते—करणत्वादिना । ४ विश्वजिन्न्यायेनेति— अ० ४ पा० ३ अ० ५) कल्पनेनेति शेष । ५ बर्हिः—विधात्त इति शेष । ६ एवमत्रापि—पा० । ७ सिध्यतीति—पा० । ८ विशिष्टो भाव्य इति—अपूर्वस्यो भाव्य इत्यर्थः ।

नन्वेतत्सर्वं सप्तमे विचारितं, निर्णीतं च । उच्यते । पुनस्तदेव स्मार्यते, उत्तरचिन्ताविवक्षया । अथवा, तत्र योऽर्थो नोक्तः[3], तद्विवक्षयेदमुच्यते । कश्चासौ । तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वादिति । एतेन चेह प्रयोजनमूहो विवक्षितः । एवं हि स सिध्यति । तत्रैवमोक्तम् । नैतेन तत्र प्रयोजनमिति । तत्रत्यैतावती चिन्ता । किं प्रतिप्रकरणं नियता धर्मा उत सर्वे सर्वत्रेति । तदपूर्वप्रयुक्तत्वे याजिप्रयुक्तत्वे च

भाव्यत इति न धर्माणां करणेन संबन्धः । आरुणाधिकरणन्यायेन तु करणेतिकर्तव्यतयोः संबन्धः । तस्माद्ये दर्शपूर्णमासप्रकरणे परिगृहीता धर्मा न तेऽन्यत्र सन्ति, प्रमाणाभावात् । तत्र विकृतौ भाव्यं ब्रह्मवर्चसम् । तस्य प्रत्यक्षं वाक्यविहितं करणम् । भाव्यमानं धर्मानाकाङ्क्षति, करणानुग्रहद्वारेण । न च संनिधाने धर्माः सन्ति । तस्माच्चोदनासामान्यादाग्नेयधर्माः सौर्येऽतिदिश्यन्ते । साकाङ्क्षत्वाद्वाक्यस्य ।

तत्र चैषा वचनव्यक्तिः । यथाऽऽग्नेय उपकृतं तथा सौर्येऽप्युपकर्तव्यम् । आग्नेये च मन्त्रेण भाव्यमानस्य देवता प्रकाशिता । इहापि तथैव प्रकाशयितव्या । न चोहादृते शक्यते प्रकाशयितुम् । तस्मादूहः कर्तव्य इत्ययमभिप्रायः । नन्वेतत्सप्तमे गतम् । उच्यते । 'यज्ञकर्म प्रधानम्' इत्यनेनावयवेनापूर्वार्थान्प्रयुङ्क्ते धर्मान्, अथवा परार्थान् 'भिन्ने जुहोति' इतिवत् । यथा भेदनस्य प्रयोजकत्वे सत्यपि न भेदनार्थो होमः । किंतु क्रत्वर्थः, एवमिहाप्यपूर्वं तु प्रयोजकं, यागार्थाश्च धर्माः । एतेनापि प्रकारेण सप्तमे प्रतिप्रकरणं नियता धर्मा इत्यूहस्त्वपूर्वार्थतामन्तरेण न सिध्यति ।

अत्र चोद्यते । ये दर्शपूर्णमासार्था धर्मास्ते सौर्ये न सन्ति । तस्मात्तत्राप्रवृत्तिरेव धर्माणां प्राप्नोति ।

उच्यते । वैकृतस्य वाक्यस्य साकाङ्क्षत्वादतिदेशेन वाऽनुषङ्गेण वा प्राकृतैरङ्गैः

---

१ सप्तम एव—पा० । २ प्रयोजनमूह विवक्षित —पा० । ३ (अ० ३ पा० १ अ० ६)। ४ प्रकरणपरिगृहीता —पा० । ५ परिगृहीता इति—दर्शपूर्णमासापूर्वपरिगृहीता इत्यर्थः । ६ भाव्यमिति—प्रत्यक्षमिति पूर्वं शेषः । ७ तत्प्रत्यक्षम्—पा० । ८ भाव्यमानस्य देवतेति—अपूर्वसंबन्धिनी देवतेत्यर्थः । ९ 'अपूर्वार्थान् प्रयुङ्क्ते' इत्यनयोः पदयोर्मध्ये बहुग्रन्थो त्रुटित इति, व्याख्यानानुसारेणानुमीयते । लिखितपुस्तके परं नोपलभ्यते । क्वचित्पुस्तके 'परार्थाः प्रयुङ्क्ते' एवं चिह्नितः पाठ उपलभ्यते । अतो यथावद्वार्तिकग्रन्थोपलम्भे सुधीभिर्यत्न आस्थेयः ।

सिध्यति, न द्रव्यसंस्कारस्यापूर्वार्थत्वे । तदिवह सिद्धम् । तत्रापूर्वप्रयुक्तत्वमिद्धा व्यवहारार्थमसूत्रितमुपादीयते । तस्मादपुनरुक्तम् ।

अथवा, अन्यामेव चिन्तामिह वक्ष्यामः । किं यजिनिमित्ता धर्मा अपूर्वप्रयुक्ता उतापूर्वनिमित्ता अपूर्वप्रयुक्ताश्चेति ॥ १ ॥

इदानीं तु, यजिप्रयुक्ता अपूर्वप्रयुक्ता वा इति चिन्त्यते । किं तावत्प्राप्तम् । यजिप्रयुक्ता इति । कुतः । यजिशब्देनेतिकर्तव्यतया अभिसंबन्धात् । एवं यागं कुर्यादिति । एवं यागेन कुर्यादिति ।

एवं प्राप्ते, ब्रूमः । यजत्यर्थस्य यत्कार्यं तत्प्रधानम् । तद्धि कर्तव्यतया चोद्यते । यत्र कर्तव्यता, तत्रैवेतिकर्तव्यता । अथ यदुक्तं, यजतिशब्देनाभिसंयोगो धर्माणामिति । तदुच्यते । तस्य द्रव्येषु यजतौ च यः संस्कारः, स तत्प्रयुक्तः— अपूर्वप्रयुक्तः । तदर्थत्वात् । यजतेर्द्र-

संबन्ध इति । तस्मादपूर्वार्थता प्रतिपाद्येहाभिद्धये । अथवा—सप्तमेऽपूर्वार्था धर्मा इति स्थितम् । तेषामपूर्वार्थता प्रकरणेन । तच्च प्रकरणमसंयुक्तानां ग्राहकम् । ये श्रुतिलिङ्गवाक्यैः संयुक्तास्तान्न गृह्णाति, संयुक्तत्वादेव । तस्मात्तेऽपूर्वार्था न संभवन्ति । दर्शपूर्णमासाधिकारे च पाठात्संयुक्तानामपि प्रकरण एव निवेशः । अनेनापि प्रकारेण सप्तमाष्टमयोर्न किंचिदनुपपन्नम् । ऊहे तु यद्यपूर्वार्थं प्रोक्षणं भवति, तथा सति नीवारेषु तन्न प्राप्नोति । तस्मात्संनिपत्योपकारका ये धर्मास्तेऽप्यपूर्वार्था इति नवमे प्रतिपाद्यते, ऊहसिद्धये ।

अथवाऽन्यामेव चिन्तां वर्तयिष्यामः । अपूर्वार्था धर्मा इति स्थिते सप्तमे, नवमे निमित्तं परीक्ष्यते, किमपूर्वं निमित्तमुत याग इति । न चानिमित्ता प्रवृत्तिः, येन विचार एव न स्यात् । तत्र भाव्यमानत्वाद्दर्शपूर्णमासापूर्वं निमित्तं न भवति । अनेनैव कारणेन फलमपि न निमित्तम् । परिशेषाद्यागो निमित्तं, निष्पन्नरूपत्वात् ।

ननु यागस्य फल उपादीयमानत्वान्निमित्तत्वेऽपाया योद्दिश्यमानत्वाद्विवक्षाभेदः स्यात् । →

१ इदानीं विचारादिना वर्णकद्वयमारचयति भाष्यकारः । २ 'एवं यागेन कुर्यादिति' इति पाठः लिखितपुस्तकेषु नोपलभ्यते । ३ प्रतिपद्यते इति—इहैवेति क॰ । ४ प्रयुक्ता इति—५ निपातेन ... इति क॰ । ६ संयुक्तानामपीति—... ७ उपादीयमानत्व इति—... नवमे-... उपादीयमानत्वादित्यर्थः ।

त्वाणां च तदीयत्वेन धर्मैरभिसंबन्धो, न स्वेनाऽऽत्मना । न हि धात्वर्थस्य च धर्माणां च परस्परेणाऽऽकाङ्क्षा विद्यते । प्रत्ययार्थेन हीतिकर्तव्यताऽऽकाङ्क्ष्यते, कर्तव्यं कथमिति, न यजिः कीदृश इति । तस्माद्यत्कर्तव्यं, तस्यैवेतिकर्तव्यतया संबन्धः । अपूर्वं च तत् । तस्मा-

---

उच्यते । दर्शपूर्णमासपदं निमित्तम्[1] । अकिंचित्करत्वात्[2] । प्रकृतयागाद्दर्शपूर्णमासपदाभावेऽपि विधीयन्त एव तेन[3] । यद्येतन्निमित्ततां न प्रतिपद्येतानर्थकमेव स्यात् ।

ननु सप्तम्यन्तं निमित्तं भवति, ' भिन्ने जुहोति ' इति । तृतीयान्तं चेदम् ।

उच्यते । निमित्तफलहेतुषु सर्वासां प्रायदर्शनमिति द्रष्टव्यम् । अपि चोद्दिश्यमानत्वात्करणविभक्तेरविवक्षैव । तस्माद्[4] विकृतावपूर्वमस्ति, दर्शपूर्णमासयोगो नास्ति । तदभावे धर्माणामप्यभावः । यथा भेदनाभावे होमाभावः । सौर्ये च साकाङ्क्षत्वादपूर्वस्यातिदेशेनानुपक्षेण[5] वा प्राकृतैरङ्गैरङ्गवान् सौर्ययागः सिध्यति । ऊहाभावस्तु[6] ।

अत्रोच्यते[7]—अयं दोषोऽस्मिन्व्याख्याने । आज्यभागादीनामपि फलसंबन्धः स्यात्, प्रकृतत्वादविशेषणात्[8] । अपि च दर्शपूर्णमासशब्दो लोके कालवाचकः[10] प्रसिद्धो न यागस्य वाचकः[11] । सामानाधिकरण्याद्यागवचनो भवेत् । न च निमित्तमिच्छतः सा-

---

१ निमित्तमिति–प्रतिपादयन्तीति शेषः । २ अकिंचित्करत्वात्–दर्शपूर्णमासपदस्य प्रयोजनान्तराभावादित्यर्थः । ३ तेनेति–यजिनेत्यर्थः । ४ तस्मादिति–यस्मादेव दर्शपूर्णमासपदवाच्यो यजिनिमित्तं, तस्माद्यद्यपि विकृतावपूर्वमस्ति, तथाऽपि निमित्तभूतो दर्शपूर्णमासयोगो नास्तीत्यर्थः । ५ अतिदेशेन वाऽनुपद्रवलाभप्र–पा० । ६ ऊहाभावस्त्विति—अयमभिप्रायः । यथा सिद्धान्तेऽपूर्वविशेषनिमित्ता धर्मा अपूर्वान्तरेऽतिदेशेन भवन्ति, तथा यागविशेषनिमित्तानां धर्माणां यागान्तरे प्रवृत्तिरतिदेशात्सिध्यत्येव । ऊहस्तु न सिध्यति । कुतः । यथा यागानुग्राहकाणां यागो निमित्तं भवति, एवं मन्त्राणामवघातादीनां चाग्न्यादयो व्रीह्यादयश्च निमित्तं भवेयुः । ततश्च सौर्यादौ नीवारादौ च निमित्ताभावाद्धर्माणामप्रसक्तेरूहो न सिध्यति । अत ऊहोपोद्घाततयाऽनेयं चिन्ता करणीयेति । ७ दर्शपूर्णमासपदस्य निमित्तप्रतिपादकत्वेन कृत व्याख्यानं दूषयति–अत्रोच्यत इत्यादिना । ८ प्रकृतत्वादिति–आज्यभागादीनामपि प्रकृतत्वेन याजनानुवादसंभवादित्यर्थः । ९ अविशेषणादिति—' दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ' इति वाक्ये दर्शपूर्णमासपदस्य निमित्तपरत्वे युक्तिविशेषस्याभावादित्यर्थः । १० कालवचन –पा० । ११ यागवाचक —पा० ।

दपूर्वप्रयुक्ता इति ॥ १ ॥

एवं वा ॥

एतेष्वेवोदाहरणेष्विति चिन्त्यते । किं यजिनिमित्ता धर्मा अपूर्वप्रयुक्ता उतापूर्वं प्रयोजकं निमित्तं चेति । किं प्राप्तम् । यजिर्निमित्तम्, अपूर्वं प्रयोजकमिति । कुतः । नैकस्य प्रयोजकत्वं निमित्तभावश्चोपपद्यते । यदर्थं हि क्रियन्ते धर्मास्तत्प्रयोजकम् । यस्मिन् सति क्रियन्ते, तन्निमित्तम् । न चैकस्मिन् शब्द अपूर्वार्था[1] एते, अपूर्वे च सति भवन्तीति[2] शक्यं वदितुम् । अन्या हि वचनव्यक्तिरपूर्वार्थेषु, अन्या चापूर्वे सतीति । यजिनिमित्तत्वे तु शब्दोऽवकल्पते । एवं यागेन कुर्यादिति । यागे सति, अपूर्वस्योपकारकाणि, असत्यनुपकारकाण्यङ्गानीति[3] । तस्माद्यजिर्निमित्तम्, अपूर्वं तु प्रयोजकमिति ।

एवं प्राप्ते, ब्रूमः । यत्कर्म प्रधानं, यजतेः कार्यम् । तद्धि फलवच्चोद्यते । तदीयेषु द्रव्येषु यजतौ च यः संस्कारः, सोऽपूर्वप्रयुक्तः । तदर्थास्त इति कृत्वा क्रियन्ते, न यज्यर्थेन तेषामभिसंबन्धः । प्रयोगवचनेनैते प्रत्ययार्थेन संबध्यन्ते । स हि साकाङ्क्षो न धात्वर्थः । तस्मादपूर्वप्रयुक्ता अपूर्वनिमित्ताश्च । यदुक्तम्, अपूर्वस्य प्रयोजकत्वं

सामानाधिकरण्यमुपपद्यते । यदि प्रकृतान्यागान्विशेषयेदेवं सामानाधिकरण्याद्यागवचनो भवेत् । न चैकस्मिन्नुच्चारणे निमित्तं भविष्यति, सामानाधिकरण्यं च प्रतिपत्स्यते । तस्मान्निमित्तमिच्छतः कालवचनः संपद्यत इत्ययं दोषः ।

अथोच्येत, यागपदं निमित्तम् । तत्रोद्दिश्यमानत्वाद्यागमात्रस्यैवोद्देशः प्राप्नोति । तत्र प्रकृतौ विकृतौ च निमित्तमेकं यागसामान्यम् । अपूर्वं च सौर्ये विद्यते । तस्मादनेन व्याख्यानेन प्रकृतिविकृत्योः साधारणा धर्माः प्राप्नुवन्ति तत्रातिदेशाभावः । तस्मादयमपि पक्षो दुःश्लिष्टः ।

अथवाऽपूर्वार्था धर्मा इति स्थितं संनिपत्योपकारका आरादुपकारकाश्च प्रकरणेन प्रमाणेन । तत्र प्रकरणे 'अग्नये जुष्टं निर्वपामि' इति मन्त्र आम्नायते । आम्नानसामर्थ्याच्च तेनोपकर्तव्यं प्रकरणिनः । तत्र कथमुपकरिष्यतीति विशेषाकाङ्क्षा जायते । किमुच्चारणमात्रेणोत प्रकाशनद्वारेणेति, अपूर्वदेवताप्रकाशनमाकाङ्क्षितम् ।

---

१ अपूर्वार्थे—पा० । २ अपूर्वे च भवन्तीति—पा० । ३ उपकारकाण्यङ्गानि—पा० ।
४ अपूर्वं चेति—अनेन च, विकृतौ निमित्ते सत्यपि प्रयोजनाभावात्कर्मणामप्रवृत्तिरिति शङ्का निरस्ता[illegible] । ५ अपूर्वेण चैव—पा० ।

निमित्तभावश्च नोपपद्यते, वचनव्यक्तिभेदादिति । तत्रोच्यते । प्रयोजकत्वं वाचनिकम् । निमित्तभावश्च नैव वचनाद्भविष्यतीति । यद्धि येन प्रयुज्यते, भवति तत्तस्य निमित्तम् । यथा, आरामपोषकस्याऽऽरामो वेतनदाने प्रयोजको निमित्तं च । आरामे सति तस्मै वेतनं दीयते । वेतनेन समर्थो भवत्यारामं रक्षितुम् । तस्माद्धर्माणामपूर्वमेव प्रयोजकं निमित्तं चेति ॥ १ ॥

(वाक्यविनियुक्तेषु प्रोक्षणादिसंनिपत्योपकारकेष्वपूर्वप्रयुक्तत्वाधिकरणम् ॥ २ ॥)

[२] संस्कारे युज्यमानानां तादर्थ्यात्तत्प्रयुक्तं स्यात् ॥ २ ॥ पू०

दर्शपूर्णमासौ प्रति समामनन्ति, प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति । प्रोक्षिताभ्यां दृषदुपलाभ्यां पिनष्टीति । तत्रायमर्थः सांशयिकः । किं प्रोक्षणं हन्तिपिषिप्रयुक्तमुतापूर्वप्रयुक्तमिति । किं प्राप्तम् । संस्कारे—हन्तिपिषरूपे, प्रयुज्यमानस्य प्रोक्षणस्य तत्प्रयुक्तता स्यात् । संस्कारप्रयुक्तता । संस्कारौ हि हन्तिपिषी । कुत एतत्प्रयुक्ततेति । —तादर्थ्यात् । यद्धि येन कर्तव्यं भवति, तत्तस्य प्रयोजकम् । यद्यपूर्वमनेन क्रियते, ततोऽस्यापूर्वं प्रयोजकम् । यदि हन्तिपिषी, ततस्तौ प्रयोजकौ । प्रकरणाच्चापूर्वं कर्तव्यं गम्यते । वाक्याद्धन्तिपिषी । वाक्यं च प्रकरणाद्बलीय इति ।

शक्नोति चायं तत्कर्तुम् । तस्मात्प्रकाशनद्वारेणैवोपकरोतीति । तेनापि प्रकाशयन्नुपकरिष्यतीति । निमित्तेन चास्य भवितव्यम् । तत्राग्निर्निमित्तमस्य । सोऽयं चाग्निर्नास्ति । तत्र निमित्ताभावान्मन्त्रस्य निवृत्तिः । यथा भेदनाभावाद्धोमस्य निवृत्तिर्दर्शपूर्णमासयोः ॥ १ ॥

नन्वधस्तादपूर्वार्था धर्मा इति स्थिते हन्तिपिषिप्रयुक्तं प्रोक्षणमिति पक्षस्यानुत्थानमेव । सत्यम् । किंतु श्रुतिलिङ्गवाक्यैर्ये संयुक्तास्तेऽपूर्वार्था न संभवन्तीति मन्यमानः पूर्वपक्षं करोति त्रिभिरधिकरणैः ।

अत्र चोद्यते । किमुलूखलमुसलप्रयुक्तं प्रोक्षणमुतापूर्वप्रयुक्तमिति संशयो युक्तः ।

---

१ पेषणसंबन्धो भवति—पा० । २ दर्शपूर्णमासयोरिति—इति पूर्वः पक्षः । सिद्धान्तस्तु—भङ्गेनैव निमित्तं नाग्न्यादिस्वरूपमिति शेषः ।

ननु हन्तिपिष्योः क्रियमाणमपूर्वार्थं भविष्यति । तत्र प्रकरणं च वाक्यं चोभयमप्यनुग्रहीष्यते । उच्यते । न शक्यमुभयमनुग्रहीतुम् । न प्रकरणसमाम्नायमात्रेण प्रकरणवतोऽर्थेन समाम्नातमिति गम्यते । प्रकरणसमाम्नानात्प्रकृतेनैकवाक्यता भवति । ततस्तादर्थ्यमवगम्यते । इह तु प्रत्यक्षाभ्यां हन्तिपिषिभ्यां प्रोक्षणस्यैकवाक्यता । सा प्रकृतेनैकवाक्यता परोक्षा बाधेत । न च द्वाभ्यामपि सहैकवाक्यता स्यात् । यदैकेनैकवाक्यता, तदा तेन निराकाङ्क्षस्य नान्येनाप्येकवाक्यता कल्प्यते । तस्मात्प्रकृतेनैकवाक्यत्वाभावान्नापूर्वार्थं प्रोक्षणम् ।

आह । ननु हन्तिपिषी अपूर्वार्थौ । तदर्थं प्रोक्षणम् । तस्मादपूर्वस्योपकारकमिति । उच्यते । भवति प्रणाड्योपकारकम् । न त्वपूर्वप्रयुक्तम् । द्विविधं ह्यङ्गमङ्गस्योपकारकं भवति । किंचिदपूर्वस्यैतदङ्गं विशिष्टमित्यनेन कारणेनाङ्गेन संबध्यते । किंचिदनपेक्ष्यैवापूर्वसंबन्धं स्वरूपेणैव कारणेन संबध्यते । यदपूर्वसंबन्धं कारणत्वेनोपादाय धर्मजातमङ्गविशेषेण संबध्यते, तदपूर्वप्रयुक्तं भवति । तादृशं च विकृतावर्थान्तरे तत्कार्यापत्तौ, ऊहितव्यं भवति ।

न तु हन्तिपिषिप्रयुक्तमिति । कथम् । 'प्रोक्षिताभ्याम्' इति प्रपूर्वादुक्षतेर्निष्ठाश्रवणात् । निष्ठा च कर्मण्युत्पद्यते । ईप्सितं च कर्म । 'तस्माद्यथा व्रीहीन्प्रोक्षति' इति व्रीह्यर्थमेवमिहापि निष्ठाश्रवणादुलूखलमुसलार्थमेव प्रोक्षणम् ।

उच्यते । 'व्रीहीन्प्रोक्षति' इत्यत्र व्रीह्यर्थं प्रोक्षणं भवति । प्रोक्षतीति भावना विद्यते । तस्याश्च भाव्येन भवितव्यम् । तत्र कश्चित्क्रियमाणतया भाव्यः, कश्चित्संस्कार्यत्वेन, कश्चिदुत्पाद्यत्वेन, कश्चिदाप्यत्वेन । 'व्रीहीन्प्रोक्षति' इति द्वितीयासंयोगाद्व्रीहयो भाव्याः । केन । प्रोक्षणेन । निष्ठान्ते पुनर्नास्ति भावना । तदभावाद्भाव्यमानस्याप्यभावः । सत्यपि कर्मत्वे प्रोक्षणमुलूखलमुसलार्थमिति केनोक्तम् ।

---

१ समाम्नातमात्रेण—पा० । २ समाम्नातात्तु प्र—पा० । ३ ईप्सितामिति—ईप्सिततममित्यर्थः । ४ यथा 'व्रीहीनवहन्ति' इत्यत्रावघातभावनाया व्रीहय इति शेषः । ५ यथा व्रीहय एव प्रोक्षणभावनाया इत्यर्थः । ६ यथा 'प्रणीताभिर्हवींषि संयौति' इत्यत्र संयवनभावनाया पुरोडाश इति पूरणम् । ७ यथा 'गां पयो दोग्धि' इत्यत्र गोदोहनभावनायाः पय इति शेषः ।

यत्र पुनः स्वरूपमङ्गस्य धर्मसंबन्धे कारणं भवति, तत्स्वरूपप्रयुक्तम् । तत्र यद्यपि तेन धर्मवताऽपूर्वं साध्यते । तत्र साध्यमानमपूर्वं न धर्मस्य प्रयोगहेतुभूतं भवति, न तत्प्रयोजकं, तस्य स्वरूपं विद्यत इति न धर्मः प्रयुज्यते । तत्र विकृतावर्थान्तरे तद्रूपाभावादूहो नावकल्पते । एवं सति वाक्यान्निर्णयः । यदि वाक्यमपूर्वस्य कारणतां वदति, ततोऽपूर्वप्रयुक्तम् । अथाङ्गस्य, ततोऽङ्गप्रयुक्तम् । तच्चोक्तप्रकरणादपूर्वप्रयुक्तं स्यात् । वाक्यात्त्वङ्गप्रयुक्ततेति । तस्माद्धन्तिपिषिप्रयुक्तं प्रोक्षणमिति । यत्र यत्र हन्तिपिषी प्रयुज्येते, तत्र तत्रैवंधर्मकौ भवत इति ॥ २ ॥

तेन त्वर्थेन यज्ञस्य संयोगाद्धर्मसंबन्धस्तस्मादयज्ञप्रयुक्तं स्यात्संस्कारस्य तदर्थत्वात् ॥ ३ ॥ सि०

तुशब्दः पक्षं व्यावर्तयति । न त्वेतदस्ति, हन्तिपिषिप्रयुक्तं प्रोक्षणमिति । तेन त्वर्थेन हन्तिना पिषिणा वा यस्मादपूर्वस्य संयोगः, तस्मात्तस्य प्रोक्षणसंबन्धः । अपूर्वसाधनविशेषकारितः प्रोक्षणसंस्कारेण संबन्धो न हन्तिपिषिकारितः । कथम् । निष्प्रयोजनौ हन्तिपिषी । यदि तत्प्रयुक्तं प्रोक्षणं, तदपि निष्प्रयोजनम् । अतो न तत्प्रयुक्तम् ।

द्वितीयाचतुर्थ्यौ सत्यां भावनायामात्मार्थां क्रियां कुरुतः । तृतीयाद्याश्च भावनायामेव सत्यामात्मानं क्रियार्थमेव कुर्वन्ति । अथवा—द्वितीयोद्भूतं शक्तिकर्म प्रतिपादयति । निदा न्यग्भूतम् । कथं ज्ञायते । आह—उलूखलमुसले अत्र कर्मभूते । ते च कारके कारकान्तरेणात्र संयुज्यमाने दृश्येते 'उलूखलमुसलाभ्याम्' इति । न च द्वितीयान्तं कारकं कारकान्तरेण संयुज्यते । उद्भूतशक्तित्वात् । तस्माद्यदुद्भूतशक्तिकारकं तत्क्रियां वशी करोति, न त्वनुद्भूतशक्ति । अनुद्भूतशक्तित्वात् । अपि च, एवमुलूखलमुसलयोः प्रोक्षणस्य च संबन्धार्थं हन्तिरुच्चार्येत, तत्रात्यन्तं वाक्यं स्यात् । तस्माद्धन्त्यर्थम्[1] । अथवा—वाक्यान्तरेण करणतया प्राप्ते उलूखलमुसले, अर्थप्राप्ते वा ते अनूद्योपसर्जनार्थो विधीयते ।

अत्र पूर्वः पक्षः । वाक्याद्धन्तिपिष्यर्थं प्रोक्षणं, प्रकरणादपूर्वार्थम् । वाक्यं च प्रकरणाद्बलीयः ॥ २ ॥

अत्र केचिद्वर्णयन्ति[2] । वाक्ये परिगृह्यमाण आनर्थक्यं प्रोक्षणस्याऽऽपद्येत । तस्मा-

---

१ हन्त्यर्थमिति—प्रोक्षणं, नोलूखलमुसलार्थमिति शेषः । २ वर्णयन्ति—सिद्धान्तमिति शेषः ।

आह । अपूर्वस्योपकारकौ हन्तिपिषी, न निष्प्रयोजनाविति । उच्यते । न प्रोक्षणस्यापूर्वस्य कश्चिदस्ति संबन्धः । यदि प्रोक्षणं न क्रियते, न हन्तिपिषी अपूर्वस्य साधनभावं न गच्छतः । तस्माद्यद्यपि हन्तिपिषी अपूर्वस्योपकारकौ, तथाऽपि ताभ्यां संबध्यमानं प्रोक्षणमनर्थकमेव ।

अथोच्यते, यदर्थं हन्तिपिषी उपादीयेते तत्प्रोक्षणसंबद्धौ शक्नुतः कर्तुं, नान्यथेति । उच्यते । नैवंजातीयकः शब्दोऽस्तीति । तत्राऽऽह । अयमेव शब्द एवमर्थमभिवदतीति । कथम् । प्रोक्षिताभ्यामवहन्ति, प्रोक्षिताभ्यां पिनष्टीति यद्धन्तिपिषिभ्यां क्रियते, तत्प्रोक्षणसंबद्धाभ्यामिति हन्तिपिषिकार्येण प्रोक्षणं संबध्यते, न ताभ्यामिति । उच्यते । नैतदेवम् । यदि यद्धन्तिपिषिभ्यां क्रियते, तत्प्रोक्षणेनाभिसंबध्यते, संबन्ध एव प्रोक्षणस्य न स्यात् । तद्धि ताभ्यामभिनिर्वर्त्यते । किमपरं तत्प्रोक्षणमभिनिर्वर्तयेत् । अथ प्रोक्षिताभ्यामपूर्वं क्रियत इति संबन्धः । न तर्हि हन्तिना पिषिणा वा । अथ तत्संबन्धोऽप्युच्यत इति । अनेकसंबन्धे वाक्यं भिद्येत । तस्माद्धन्तिपिषिभ्यां प्रोक्षणं संबध्यमानमप्रयोजनमिति प्रकरणादपूर्वेण संबध्यते ।

नन्वेवं हन्तिपिषिसंबन्धो नावकल्प्येत । अवकल्पिष्यत इति ब्रूमः ।

द्वाक्यार्थो बाध्यते । तत्रासंयुक्तं पदान्तरेण प्रोक्षणमपूर्वेण संमन्त्र्यते । अपूर्वं चामूर्तमशक्यं प्रोक्षितुम् । अतो व्रीहिद्वारेणापूर्वं प्रोक्ष्यत इति ।

एतदयुक्तम् । कथं प्रोक्षणमपूर्वेण गृह्यते । तच्च प्रयाजवदारादुपकारकं प्राप्नोति । तत्र कथं ज्ञेयमिदं संस्कारकमिति । अथोच्येत, लोके संस्कारकं दृष्टमिति । तन्न । इह शब्दलक्षणः संस्कारो गृह्यते । न कश्चिच्छब्दसंस्कारकं प्रोक्षणमाह । प्रकरणाम्नानादारादुपकारकं गम्यते । अपि च, लोके नैकान्ततः संस्कारकमेवेदं, कदाचिदसंस्कारकमपि स्यात् । अभ्युपेत्य ब्रूमः । संस्कारकं प्रोक्षणम् । न चापूर्वं शक्यं प्रोक्षितुम् । एवमपि तदवस्थमेवाऽऽनर्थक्यम् । अथोच्येत—आनर्थक्यात्तदङ्गेष्विति । अङ्गत्वाविशेषात्सर्वाङ्गेषु स्यात् । अपूर्वस्य संनिकर्षाद्वा द्रव्यवदाने ।

१ मं हिरदं च 'व्रीहीन् प्रोक्षति' इत्येतदपि, उलूखलमुसलवाक्यतुल्यन्यायमित्यभिधेय प्रयुक्तमिति ज्ञेयम्। २ एवमपीति—प्रोक्षणस्य प्रकरणविनियोगाङ्गीकारेऽपि वाक्यविनियोगाङ्गीकारपक्ष इवाऽऽनर्थक्यं तदवस्थमेवेत्यर्थः। ३ (अ० ३ पा० १ अ० ९ सू० १८)।

कथम् । इहावघाते प्रति यतमानस्य द्वयं निष्पद्यते । अवहन्तिरूपं, तण्डुलनिर्वृत्तिश्च । प्रणाड्या चापूर्वभावनाविशेषः । तण्डुलनिर्वृत्तिर्दृष्ट-पूर्वोपकारः । सोऽवहन्तिक्रियया चिकीर्षितः । तेन प्रोक्षणस्य संबन्धः । यद्यप्यवहन्तिरूपेण संबध्यमाने प्रोक्षणे श्रुत्या संबन्धो भवति, तथाऽपि तत्र निष्प्रयोजनत्वाल्लक्षणैवाऽऽश्रीयते । लक्षणा हि प्रत्यक्षा । साऽदृष्टकल्पनाया ज्यायसी [१] न चावहन्तिराराद्दुपकारकोऽपूर्वं निष्पादयति । दृष्टमुपकारं कुर्वन्नदृष्टेन सामर्थ्येन समीचीनं करोतीति गम्यते । यद्यपि च निष्पादयेत्, तथाऽप्युपकारेणासंबध्यमानं प्रोक्षणं केवलावहन्तिसंबन्धेनानर्थकमेव स्यात् । अतोऽवहन्तिलक्षितेनोपकारविशेषेणास्य संबन्धः । तस्मादनवहन्तिरपि यस्तत्कार्यापन्नस्तत्र प्रोक्षणं भवत्येव । यथा नखनिर्भिन्ने चरौ, नखेषु । तस्मादपूर्वप्रयुक्त एवंजातीयको धर्म इति ॥ ३ ॥

(अथवा—दीक्षणीयावाङ्नियमाधिकरणम् ॥)

एवं वा—

अस्ति ज्योतिष्टोमः । तत्रेदं समाम्नायते । यावत्या वाचा कामयेत, तावत्या दीक्षणीयायामनुब्रूयात् । मन्द्रं प्रायणीयायां, मन्द्रतरमातिथ्यायाम्, उपांशूपसत्सु, इति । तत्रायमर्थः सांशयिकः । किं परमापूर्वप्रयुक्ता एते धर्मा उत दीक्षणीयाद्यपूर्वप्रयुक्ता इति । किं प्राप्तम् । परमापूर्वसंस्कारे दीक्षणीयाद्यपूर्वे युज्यमानस्यास्य धर्मस्य परमापूर्वार्थत्वाद्दीक्षणीयादीनां परमापूर्वार्थतैव स्यात् । परमापूर्वं हि फलवत् । यत्कर्त-

---

अथोच्येत–व्रीहीणां श्रवणात्तेषां भविष्यति । स वाक्यसंबन्धो भवतैव निराकृतः । एवमवहन्त्यादिष्वप्येते दोषाः प्राप्नुवन्त्यनेन व्याख्यानेन । तस्माद्वाक्यमबाधित्वा योऽर्थः स ग्रहीतव्यः । वाक्ये चोचारिते द्वैविध्यं भवति । प्रकरणपाठात्तण्डुलनिर्वृत्तिप्रणाड्या शक्यमपूर्वं लक्षयितुम् । शक्यते च व्रीह्यर्थं प्रोक्षणं प्रतिपत्तुम् । तत्र लक्षितलक्षणायां गृह्यमाणायां फलकल्पना न भवति । श्रुतिवृत्ते फलकल्पना स्यात् । तस्मात्फलकल्पनाभयाल्लक्षितलक्षणयाऽपूर्वार्थं प्रोक्षणमिति सिद्धम् ॥ ३ ॥

एवं वा । संस्कारे–दीक्षणीयाख्ये यो धर्मो विहितः स परमापूर्वप्रयुक्तः । कुतः ।

---

१ ज्यायसी—पा० ।

ध्यतयाऽभिसंबध्यते, तदेव धर्मैरभिसंबध्यते, नाङ्गापूर्वम् । निष्प्रयोजनं हि तदिति ॥ २ ॥

तेन त्वर्थेन यज्ञस्य संयोगाद्धर्मसंबन्धस्तस्माद्यज्ञप्रयुक्तं स्यात्संस्कारस्य तदर्थत्वात् ॥ ३ ॥ सि०

तेन त्वर्थेन दीक्षणीयादिना, यस्मात्परमापूर्वस्य संबन्धः, तस्मात्परमापूर्वमेवजातीयकेन धर्मेण धर्मवत् । तस्मादङ्गयज्ञप्रयुक्तमेवंजातीयकं धर्मजातम् । तथा श्रुतिः शब्दो भवति । इतरस्मिन् पक्षे लक्षणा स्यात् । न च प्रायणीयाद्यपूर्वं निष्प्रयोजनम् । ज्योतिष्टोमस्य हि तदुपकारकम् । न च तद्विनैवजातीयकेन धर्मेण प्रायणीयाद्यपूर्वं सिद्धम् । अवहन्तिपिषिवत् ।

यदुच्यते, विनैव धर्मेण तदपूर्वं भविष्यतीति । तन्न । कुतः । तदपि ह्यपूर्वं शब्दादेवावगम्यते । अस्तीति न प्राक् शब्दादन्येन प्रमाणेनोपसंगम्यते । एवंजातीयके च शब्दप्रमाणके यच्छब्द आह, तदस्माकं प्रमाणम् । शब्दश्च प्रायणीयाद्यपूर्वस्योपकारकमिमं धर्ममाह, न परमापूर्वस्य । वचनप्रामाण्यात् । एवं चाऽऽपरमापूर्वनिष्पत्तेरजरमाविनाशि

परमापूर्वप्रयुक्तत्वाद्दीक्षणीयायाः । तस्माद्यस्तत्र धर्मो विहित स प्रोक्षणवत्परमापूर्वप्रयुक्तो न स्वरूपप्रयुक्त ॥ २ ॥

दीक्षणीयाद्यर्थेन यो धर्म सयुक्तः स न परमापूर्वार्थः । कुत. । दीक्षणीयाऽऽत्मीयमपूर्वं लक्षयति । तेन धर्माणा संबन्ध । अस्मिन्पक्षे लक्षणा[1] । यदा तु दीक्षणीयापूर्वं परमापूर्वं लक्षयति तदा लक्षितलक्षणया धर्माणा सबन्ध । तस्माल्लक्षणा[2] श्रुतिर्ब्रवीति लक्षितलक्षणापेक्षया]

अपत्राऽङ्गं[3] संबन्धादङ्गिन शक्नोति लक्षयितुम् । तेनाङ्गिसबन्धे[4] लक्षणा । अङ्गसंबन्धे तु श्रुति. । पूर्वपक्षे, 'त्रैधातवीया दीक्षणीया' भवति इत्याग्नावैष्णवकार्यापत्त्या तद्धर्मैर्युज्यते । यथा नीवारा· प्रोक्षणेन । सिद्धान्ते त्वाग्नावैष्णवापूर्वप्रयुक्ता धर्मास्त्रैधा-

---

१ लक्षणेति—लक्षणैव केवलेत्यर्थः । २ यदि सिद्धान्तेऽपि लक्षणा, कथं तर्हि 'तथा श्रुतिः शब्दो भवति' इति भाष्यमिति चेत्, लक्षितलक्षणापेक्षया लक्षितलक्षणामेव श्रुतिशब्देन भाष्यकारो व्यवहरतीत्याह—तस्मादित्यादिना । ३ अङ्गं—दीक्षणीयाख्यमङ्गम् । ४ अङ्गिन—ज्योतिष्टोमम् । ५ अङ्गिसंबन्ध इति—अङ्गिसंबन्धे विवक्षिते लक्षितेनाङ्गिना तदपूर्वं लक्षयितव्यं भवतीत्यर्थः । ६ अङ्गापूर्वसंबन्धे तु श्रुत्यैव दीक्षणं यथा स्यात्तल्लक्षणेत्याह—अङ्गसंबन्धे त्विति ।

चात्र धर्मः प्रतिष्ठितो न परमापूर्वं संक्रमिष्यति । एवमपि [1]प्रयोजनसमर्थम् । तस्मादेवंजातीयकं धर्मजातमङ्गापूर्वप्रयुक्तमेवेति ।

किं भवति प्रयोजनमितरस्मिन्नितरस्मिन् वा पक्ष इति । उच्यते । अश्वमेधे समाम्नायते, [2]त्रैधातवीया भवतीति । यदि परमापूर्वप्रयुक्त एवंजातीयको धर्मः, ततस्तस्योपकारविशेषे निबद्ध इति तत्कार्योपन्नायां

तवीयायां न भवन्ति । अपूर्वान्तरं हि तत् । न चापूर्वान्तरमपूर्वान्तरधर्मान्गृह्णाति ।

अनुपपन्नमिदं प्रयोजनम् । कथम् । 'त्रैधातवीया दीक्षणीया भवति' इति सामानाधिकरण्यम् । तत्र यदि मुख्यवृत्ते द्वे अपि पदे गृह्येयातां सामानाधिकरण्यं नोपपद्यते । तस्मादेकमत्र गौणं पदमन्यन्मुख्यम् । तत्र प्राथम्यादविरोधाच्च त्रैधातवीयापदं मुख्यम् । दीक्षणीयाशब्दस्त्वात्मीयं क्रतूपकारं लक्षयति । तस्मिँल्लक्षिते त्रैधातवीया विधीयते । सा विधीयमाना तत्कार्यापन्नत्वात्तद्धर्माँल्लभते । सिद्धान्तेऽपि, यथा खलेवाली यूपकार्ये विधीयमाना तद्धर्माँल्लभते । तस्मादुभयोः पक्षयोस्तुल्या धर्मप्राप्तिरिति ।

अथोच्येत—'त्रैधातवीया दीक्षणीया भवति' इत्यनेन त्रैधातवीयाया यत्कार्यं तन्निवार्य दीक्षणीयाकार्यं प्रति विधीयते । तच्च दीक्षणीयाकार्यमात्मीयैरेव धर्मैरात्मीयेन चापूर्वेण त्रैधातवीयाया भावयिष्यति, न दीक्षणीयाधर्मान्ग्रहीष्यति सिद्धान्तवादिनः ।

तन्न । पूर्वपक्षेऽपि यदि दीक्षणीयाकार्ये त्रैधातवीया वर्तते तथा सत्यात्मीयैरेव धर्मैस्तत्कार्यं साधयिष्यति । अथ न वर्तते सुतरामात्मीया धर्मास्तस्याः । अपि च परमापूर्वप्रयुक्ततायामपि वाङ्नियमस्य, प्रकृतावाग्नावैष्णवो विशिष्टं द्वारमभूत् । तच्चेह द्वारं नास्ति । तस्मान्नास्ति वाङ्नियमः ।

नन्वनेन न्यायेन नीवारेषु प्रोक्षणं न प्राप्नोति । उच्यते । सत्यं, विशिष्टं द्वारं प्रोक्षणस्य व्रीहय इति । इयांस्तु विशेषः—व्रीहयो दृष्टेनोपकुर्वन्ति । नीवाराश्च तत्कार्यं प्रत्यक्षं साधयन्तो दृश्यन्ते । तत्र कार्यापत्त्या धर्मप्राप्तिर्युक्ता । इह त्वदृष्टं द्वारं, तस्य कार्ये वर्तत इति नास्ति प्रमाणम् । अथवा—दूरादेवेदं भ्रष्टं प्रयोजनमिति । कथम् । त्रैधातवीया यादृश्येवोत्पन्ना तादृश्येव चोद्यते । त्रैधातवीयाशब्देन

---

१ प्रयोजनसमर्थं.—पा० । २ त्रैधातव्या—पा० । ३ आग्नावैष्णवो विधिद्वयमिति—आग्नावैष्णवापूर्वमित्यर्थः ।

त्रैधातवीयायां भविष्यति । अथ, आग्नावैष्णवापूर्वप्रयुक्तस्तर्हि नेदमाग्नावैष्णवापूर्वमिति तत्र त्रैधातवीयापूर्वे न तेन धर्मेण संमन्तस्यत इति ॥२॥

(फलदेवताप्रकाशकयोर्मन्त्रयोरपूर्वप्रयुक्तत्वाधिकरणम् ॥ ३ ॥)

[३] फलदेवतयोश्च ॥ ४ ॥ पू०

दर्शपूर्णमासौ स्तः, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तत्र फलसंबद्धो धर्मो देवतासंबद्धश्च श्रूयते । फलसंबद्धस्तावत्, अगन्म स्वः सं ज्योतिषा भूम, इति । देवतासंबद्धोऽपि, अग्नेरहमुज्जितिमनूज्जेषं, सोमस्याहमुज्जितिमनूज्जेषमित्यादिः । तत्र संशयः । किं स्वर्गसंबद्धस्य कर्मणः स्वर्ग एव प्रयोजकः, अग्न्यादिसंबद्धस्याग्न्यादय एवोतोभयत्राप्यपूर्वं प्रयोजकमिति । यद्येवमभिसंबन्धः क्रियते, गताः स्मः स्वर्गम्, अग्न्यादीनां चोज्जितिमनूज्जेषमिति, ततः स्वर्गाग्न्यादिप्रयुक्तः । अथैवं क्रियते, आगमा दर्शपूर्णमासफलं, दर्शपूर्णमासदेवतायाश्चोज्जितिमनूज्जेषमिति ततोऽपूर्वप्रयुक्तः । किं प्राप्तम् । स्वर्गाग्न्यादिप्रयुक्त इति । कुतः । मन्त्राम्नानसामर्थ्यात् । यस्य मन्त्रो वाचकः, स इह वदितव्य इति गम्यते । श्रुत्या च स्वर्गाग्न्यादीनां वाचको मन्त्रः । लक्षणया दर्शपूर्णमासफलदेवतयोः । तस्माद्यत्फलदेवतमिति संप्रधिगतं स्वर्गाग्न्यादि,

सैव विपरिवर्तते । अनुष्ठानाभावात् । कर्मान्तरमपि न भवति । तस्माद्यादृशी तत्र विज्ञाता तादृश्येवात्र कर्तव्या । यद्यपि च कर्मान्तरं स्यात्तथाऽपि नाम्ना धर्मान्गृह्णीयान्न चोदकेनेति ॥ २ ॥

दीक्षणीयापूर्वप्रयुक्तो वाङ्नियमो न परमापूर्वप्रयुक्त इति पूर्वाधिकरणापवादोऽयम् । दीक्षणीयासिद्धान्तेनैव 'फलदेवतयोश्च' इत्यत्र पूर्वपक्षः । अभिस्वरूपप्रयुक्तोऽयं मन्त्रः । स्वाभिधेयत्व, लिङ्गेन तत्र विनियोगः । सामर्थ्यं च लिङ्गम् । स्वरूपे च मन्त्राणां सामर्थ्यं, नापूर्वस्वरूपे । लक्षणा हि तदा स्यात् । न च प्रकरणवशेन लिङ्गबाधो युक्तः । तेन कामं वाक्यं प्रकरणेन बाध्यताम् । लिङ्गं ततो बलवत्तरं, न ततो बाधितुं युक्तम् । तेन यथा वाङ्नियमो ज्योतिष्टोमार्थदीक्षणीयार्थस्तथा मन्त्रोऽपि । अथवाऽयं मन्त्रः स्वसामर्थ्येनाभिप्रकाशकः । तत्र यो योऽर्थः स सामर्थ्याविरो-

१ त्रैधात०याया—ग० । २ समधिगतं लिङ्गान्—प० । ३ चोदकेनेति—दीक्षणीयाया अपूर्वप्रयुक्तत्वे परमापूर्वप्रयुक्ते वा मन्त्रोपयोगनाशेन प्रयोजनान्तरं ग्राह्यमित्यर्थः । ४ मन्त्राम्नानेति—दर्शपूर्णमासदेवताया स्वर्गं, यथा..., तत्तत्प्रयुक्त एव स्वर्गस्याग्नेरिति... मन्त्र इत्यर्थः ।

तत्प्रयुक्तो धर्मः स्यादिति ॥ ४ ॥

न चोदनातो हि ताद्गुण्यम् ॥ ५ ॥ सि०

नैतदस्ति, स्वर्गाग्न्यादिप्रयुक्त इति । चोदनातस्ताद्गुण्यं स्यात् । यत्फलवच्चोद्यते, तदितिकर्तव्यतयाऽनुबध्यते । अपूर्वं च फलवत्, न स्वर्गाग्न्यादि । तदर्थं वचनं सदृष्टार्थं कल्प्येत । लक्षणया चापूर्वफलदेवतावचने दृष्टोऽर्थः स्यात् । प्रोत्साहनात् । एतस्मिन् पक्षान्तरे दृष्टे सति न स्वर्गाग्न्यादिवचनस्यापूर्वकल्पना न्याय्या । शब्दार्थस्य च फलदेवतात्वेन संप्रतिपन्नत्वाल्लक्षणाऽदुष्टा । तस्मादपूर्वप्रयुक्त एवंजातीयको धर्म इति । किं भवति विचारस्य प्रयोजनम् । यथा पूर्वः पक्षः, सौर्ये कर्मण्यविकारेण मन्त्रः प्रयोक्तव्यः । यथा तर्हि सिद्धान्तः, ऊहेन, अगन्म ब्रह्मवर्चसं, सूर्यस्योज्जितिमनूज्जेषमिति । फले पर्यवसितम् । देवतायामुत्तरा चिन्ता वर्तिष्यते ॥ ५ ॥

(धर्माणां देवताप्रयुक्तत्वाभावाधिकरणम् ॥ ४ ॥)

[४] देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात् ॥ ६ ॥ पू०

नैतदस्ति, अग्न्यादयोऽप्रयोजका इति । सर्वा देवताः सर्वेषां धर्माणां प्रयोजिका भवितुमर्हन्ति । कुतः । भोजनस्य तदर्थत्वात् । भोजनं हीदं देवतायाः, यागो नाम । भोज्यं द्रव्यं देवतायै प्रदीयते, सा भोक्ष्यत इति । देवतासंप्रदानको ह्ययं यागः श्रूयते । संप्रदानं च नाम कर्मणोऽपीप्सिततमादभिप्रेततरम् । तस्मात्र गुणभूता देवता, देवतां प्रति गुणभूते द्रव्यकर्मणी । अपि च, यागो नाम देवतापूजा । पूजा च पूजनीयं प्रति गुणभूता लोके दृश्यते । तद्देवदतिथिवद्द्रष्टव्यम् । यथा, यावत्किंचिदतिथेः परिचरणं, सर्वं तदतिथिप्रयुक्तम् । एवमिदमपीति ।

पात्प्रकाशनीयः । एवं प्रकरणबाधं सामर्थ्येन मन्यमानः पूर्वपक्षमारभते । प्रोक्षणवत्सूत्रम् ॥ ४ ॥ [५ ॥]

अत्र यागो देवताराधनार्थ इति मन्यमानः पक्षं परिगृह्णाति । न भाव्यमानार्थो यागः । किं तर्हि । देवताराधनार्थः । कुतः । तद्धितशब्दादग्निर्देवताऽस्येति । तत्राग्निर्देवताशब्दावस्यशब्दस्य विशेषणम् । अस्यशब्दश्च द्रव्याभिधायी, इतरो तद्विशेषणम् । तद्द्रव्यं यदग्न्युद्देशेन दीयते, एवमग्निशब्दोऽस्य विशेषणं भवति, नान्यथा । यदा

---

१ अपूर्वस्य फलाभ—रा० । २ फलदेवतात्वेन—रा० । ३ पक्षमेव—पूर्वपक्षमित्यर्थः ।

आह। नन्वेवं श्रुता, विग्रहवती देवता, भुङ्क्ते चेत्यभ्युपगतं भवति। उच्यते। बाढम्। विग्रहवती देवता, भुङ्क्ते च। कुतः। स्मृतेः, उपचारात्, अन्यार्थदर्शनाच्च। एवं हि स्मरन्ति, विग्रहवती देवतेति। स्मृतिश्च नः प्रमाणम्। तथा, विग्रहवतीं देवतामुपचरन्ति। यमं दण्डहस्तमालिखन्ति, कथयन्ति च। तथा, वरुणं पाशहस्तम्, इन्द्रं वज्रहस्तम्। उपचारादपि स्मृतेर्दृढिमानं कल्पयामः। तथाऽन्यार्थवचनं, विग्रहवतीं देवतां दर्शयति। जगृभ्मा ते दक्षिणमिन्द्र हस्तमिति। पुरुषविग्रहस्य हि दक्षिणः सव्यश्च हस्तो भवति। तथा, इमे चिदिन्द्र रोदसी अपारे यत्संगृभ्णा मघवन् काशिरित्ते, इति। काशिर्मुष्टिः। सोऽपि पुरुषविग्रहस्यैवोपपद्यते। तथा, तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे। इन्द्रो वृत्राणि जिघ्नते, इति। ग्रीवा, उदरं, बाहू इति पुरुषविग्रहदर्शनं भवति। तस्माद्विग्रहवती देवतेति।

भुङ्क्ते च। कथमवगम्यते। स्मृतेः, उपचारात्, अन्यार्थदर्शनाच्च। एवं स्मरन्ति, भुङ्क्ते देवतेति। तथा चैनां भुञ्जानामिवोपचरन्ति यदस्यै विविधानुपचारानुपहरन्ति। तथा चान्यार्थवचनं भुञ्जानां देवतां गमयति। अद्धीन्द्र पिब च प्रस्थितस्येति। तथा च, विश्वासनानि जठरेषु धत्त इति। एकया प्रतिधापिबत्साकं सरांसि त्रिंशतमिति। आह। न देवता भुङ्क्ते। यदि च भुञ्जीत, देवतायै हविः प्रत्तं क्षीयेत। उच्यते। अन्नरसभोजिनी देवता मधुकरीवदवगम्यते। कथम्। देवतायै हविः प्रत्तं नीरसं भवति। तस्मादन्नरसं भुङ्क्ते देवतेति गम्यते ॥ ९ ॥

च द्रव्यं प्रदीयते, तदाऽग्निः संप्रदानं भवति। संप्रदानं च कर्मणोऽपि प्रधानतरम्। यजिक्रियया द्रव्यं व्याप्यते, द्रव्येण च संप्रदानम्। तस्मादग्न्यर्थो यागः। यथोपाध्यायाय गां ददातीति। अपि च देवपूजाया यागनिर्वृत्तिरिति स्मरन्ति। तस्मात् 'यजेत स्वर्गकामः' इति यागेन देवतामाराधयेत्ततः स्वर्गो भविष्यतीति ॥ ९ ॥

---

१ ऋ० सं० (अष्ट० ८ अ० १ व० ६)। २ ऋ० सं० (अष्ट० २ अ० २ व० १)। ३ ऋ० सं० (अष्ट० ६ अ० १ व० २१)। ४ तदादर्शं—पा०। ५ ऋ० सं० (अष्ट० ८ अ० ४ व० २१)। ६ ऋ० सं० (अष्ट० १ अ० ७ व० २)। ७ ऋ० सं० (अष्ट० ६ अ० ५ व० ११)। ८ स्मरन्तीति—'देवदेवपूजा ... स्मरन्ति' इत्यस्य स्थाने ... पाठः।

आर्थपत्याच्च ॥ ७ ॥

यदि कस्यचिदर्थस्येशाना देवता, उपचर्यमाणा च प्रसीदेत्, ततस्तदाराधनार्थमियं देवतापूजाऽभिनिर्वर्त्येत। न चैतदुभयमप्यस्तीति। तदुच्यते। अर्थपतिर्देवतेति। कथमवगम्यते। स्मृतेः। उपचारात्। अन्यार्थदर्शनाच्च। एवं हि स्मरन्ति। अर्थानामीष्टे देवतेति। तथा, देवग्रामो देवक्षेत्रमित्युपचारस्तामेव स्मृतिं द्रढयति। तथा, अन्यार्थवचनमीशानां देवतां दर्शयति। इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानाम्। इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्र इति। तथा, ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुष इति।

तथा, स्मृत्युपचाराभ्यां प्रसीदतीत्यवगच्छामः। एवं हि स्मरन्ति, प्रसीदति देवतेति। तथोपचरन्ति—प्रसन्नोऽस्य पशुपतिः, पुत्रोऽस्य जातः। प्रसन्नोऽस्य वैश्रवणः, धनमनेन लब्धमिति। तथाऽन्यार्थदर्शनं भवति। आहुतिभिरिव हुतादो देवान् प्रीणातीति। तस्मै प्रीता इषमूर्जं नियच्छन्तीति ॥ ७ ॥

ततश्च तेन संबन्धः ॥ ८ ॥

ततो देवतायास्तेन फलेन संबन्धः परिचरितुर्भवति। यो देवतामिज्यया परिचरति, तं सा फलेन संबध्नाति। कथमेतदवगम्यते। स्मृत्युपचाराभ्याम्। स्मरन्ति हि, देवता यष्टुः फलं ददातीति। तामेवोपचारेण स्मृतिं द्रढयति। पशुपतिरनेनोपचरितः, पुत्रोऽनेन लब्ध इति। तथा, अन्यार्थदर्शनमिममेवार्थं दर्शयति। स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः। देवानां यः पितरमाविवासति। श्रद्धामना हविषा ब्रह्मणस्पतिमिति। तथा, तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीति। तस्माद्यविर्दानेन गुणवचनैश्च देवताऽऽराध्यते, सा प्रीता सती फलं प्रयच्छति। येन कर्मणाऽग्निराराधितो यस्मै फलस्येष्टे, तत्कर्मै प्रयच्छति, न तत्सूर्यः प्रदातुमर्हति। वचनादेतदवगम्यते, कः किं प्रयच्छतीति। यथा, अग्नेः वचनं, न तत्सूर्ये ॥ ८ ॥

---

७ ॥ ८ ॥]

---

१ निर्वर्तेत—पा०। २ ऋ० सं० (अष्ट० ८ अ० ४ व० १६)। ३ प्रसीदतीत्युपग—पा०। ४ आहुतिभिरेव—पा०। ५ तै० सं० (२-२—१४)। ६ तस्य—पा०। ७ वचनादेवावगम्यते—पा०।

अपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्याद्गुणत्वे देवताश्रुतिः ॥ ९ ॥ सि०

अपि वेति पक्षो व्यावर्त्यते। न चैतदस्ति, यदुक्तं देवता प्रयोजिकेति। यज्ञकर्म प्रधानं स्यात्। यजतेर्जातमपूर्वम्। कुतः। शब्दपूर्वत्वात्। यद्धि फलं ददाति, तत्प्रयोजकम्। इदं फलं ददातीत्येतज्ज्ञानं शब्दपूर्वकं, न प्रत्यक्षादिभिरवगम्यते। शब्दश्च यजतिवाच्यात्फलमाह, न देवतायाः। कथमवगम्यते। दर्शपूर्णमासयोः करणत्वेन निर्देशः, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति। तथा, ज्योतिष्टोमेन स्वर्गकामो यजेतेति। यजत्यर्थस्य हि स्वर्गकामेन समभिव्याहारो न देवतायाः। ननु द्रव्यदेवताक्रियं यजत्यर्थः। सत्यमेवम्। किं तु गुणत्वे देवताश्रुतिः। द्रव्यदेवतं हि भूतं, भावयितव्यो यजत्यर्थः। भूतभव्यसमुच्चारणे च भूतं भव्यायोपदिश्यते। तस्मान्न देवता प्रयोजिका।

अथ यदुक्तं, कर्मण ईप्सिततमभिप्रेततरमिति। नास्याभिप्रेततामपह्नुमहे। तद्धितशब्देन चतुर्थ्या वा संयुक्तस्य देवतार्थस्य वाक्यादभिप्रेतताऽवगम्यते। फलसंयोगस्तु वाक्यादेव यजत्यर्थस्य। तस्य च श्रुत्या करणताऽवगम्यते, न देवतायाः। तत्र यद्यपि देवतार्थता याग-

'यजेत स्वर्गकामः' इति यजेतेत्यस्योत्तरार्थोत्तिस्र[1] आकाङ्क्षा जायन्ते। तत्र प्रथमं तावद्भाव्यमानमाकाङ्क्षति, भावयेत्किमिति। तत्फलपदेन निराकाङ्क्षी क्रियते। तद्भाव्यमानं केन भाव्यत इति द्वितीयामाकाङ्क्षां पूर्वार्धो[2] निराकाङ्क्षी करोति। कथमिति तृतीयामाकाङ्क्षामभ्यन्वाधानादीनि निराकाङ्क्षी कुर्वन्ति। संनिधानात्। तदेवमस्माद्वाक्याद्यागात्फलं श्रूयते, न देवतातः।

ननु देवता संप्रदानमित्युक्तम्। उच्यते। यागः फले चोदितो निर्वृत्तिमपेक्षते। सा च द्रव्यदेवतमन्तरेण न संभवतीति[3]। अपेक्ष्यमाणं च द्रव्यदेवतं कारकांशेनैवापेक्ष्यते, न साध्यत्वेन। तत्र द्रव्यं तृतीयया कारकं भवति। देवता तद्धितेन चतुर्थ्या वा। तच्च देवताकारकं यागं प्रति प्राधान्यं यदि न प्रतिपद्येत, तथा सति यागो नैव निर्वर्तेत। यागनिर्वृत्त्यभावाच्च कारकमेव न स्यात्। यदि च यागस्तस्य गुणतां न प्रतिपद्येताऽऽत्मानमेव न लभेत। तस्माद्यागेन नान्तरीयको गुणभावः प्रतिपत्तव्यः।

१ उत्तरार्धोत्तिस्र—आख्यातादित्यर्थः। २ पूर्वार्धं इति—यजतिरित्यर्थः। ३ न संभवतीति—द्रव्यदेवतमपेक्षत इति पूरणम्।

म्य गम्यते, फलार्थताऽपि तेन न प्रतिपिध्यते। फलं च पुरुषार्थः। पुरुषार्थो च नः प्रवृत्तिः। न चासौ देवतायाः। तस्मान्न देवताप्रयुक्ताः प्रवर्तिष्यामहे। या तु संप्रदानस्याभिप्रेतता, सा फलवतो यजेः साधनत्वे सत्युपपद्यते।

यच्च, यजिर्देवतापूजा, सा पूज्यमानप्रधाना लोके लक्ष्यत इति। न लोकवादिह भवितव्यम्। इह पूज्यमानं पूजाप्रधानम्। यद्धि फलवत्, तत्प्रयोजकम्। तस्माद्यज्ञकर्म प्रयोजकम्। अपि चैतस्मिन् पक्षे विग्रहवती देवता, भुङ्क्ते चेत्यध्यवसनीयं भवति। न ह्यविग्रहायै, अभुञ्जानायै च दानं भोजनं वा संभवतीति।

यथोक्तं, स्मृत्युपचारान्यार्थदर्शनैर्विग्रहवती, भुङ्क्ते चेति। तन्न। स्मृतेर्मन्त्रार्थवादमूलत्वात्। मन्त्रेभ्यश्चार्थवादेभ्यश्च स्मृतिमूलं विज्ञानमुत्पद्यत इति प्रत्यक्षमवगम्यते। ते च मन्त्रार्थवादा नैवंपरा इत्येतद्वक्ष्यामः। आह। यदि नैवंपरा न तर्हि मन्त्रार्थवादमूलं तद्विज्ञानमिति। उच्यते। य आलोचनमात्रेण मन्त्रार्थवादान् पश्यन्ति, तेषां तत्स्मृतिमूलम्। ये पुनर्निपुणतः पश्यन्ति, तेषां तद्बाधितमपि च कस्यचित्स्मृतिमूलं भवति। तस्मात्तत एव स्मृतिः। उपचारोऽपि स्मृतिमूल एव।

यत्तु, अन्यार्थदर्शनमुक्तं—जगृभ्मा ते दक्षिणमिन्द्र हस्तमिति। नैतदेवंपरम्, इन्द्रस्य हस्तो विद्यत इति। यस्तस्य दक्षिणो हस्तस्तं वयं गृहीतवन्त इति। तस्माद्वाक्यादिन्द्रस्य हस्तसत्ता न प्रतीयते। आह। यदि त्वसौ नास्ति, वयं ते हस्तं गृहीतवन्त इत्येवं नावकल्पत इति हस्तसत्ताऽध्यवसीयते, अस्त्यसौ हस्तो वयं यं गृहीतवन्त इति। तन्नोपपद्यते। यद्यप्यस्य हस्तो भवेत्, तथाऽपि न तमुपगृहीतवन्त इति प्रत्यक्षमेतत्। तथाऽप्येतन्नावकल्पत एव। तत्रैतदसंबद्धं वा कल्पयितव्यं, स्तुतिर्वा। तच्च मत्पक्षेऽपि तुल्यम्।

अथैवमुच्यते, तस्यैतद्वचनं यो गृहीतवांस्तस्य हस्तमिति। उच्यते। नैतदध्यवसेयम्। आदिमत्तादोषो वेदस्य प्रसज्येत। न च गृहीतवानासीदित्युच्यते। प्रमाणाभावात्। एतस्मादेव वचनादर्थात्कल्प्यते हस्त-

देवताकारकेणापि नान्तरीयकं प्रधानभाव. । न च नान्तरीयको व्यापारो गुणभावे प्रधानभावे वा कारणम्। अचोदितत्वात्। यागेन हि फलं चोदितः सन्नहं नान्यथा फलं साधयामीत्येवं नान्तरीयकव्यापारेण देवतां प्रति गुणभूतेन भवितव्यम्।

१ हेपामेता—पा०।

गृहीतेति चेत्। तन्न। अयथार्थस्याप्युच्चारणं संभवत्येव यतः। यथा, दश दाडिमानि षडपूपा इति। यस्यापि चैष पक्षो विग्रहवानिन्द्र इति, तस्यापीन्द्रशब्देनाऽऽमन्त्रणं संबोधनार्थं, संबोधनमनुवचनाय। तत्र संबुद्ध इत्यवगतेऽनुवचनं न्याय्यम्। न चासौ केनचित्प्रकारेण संबुद्ध इत्यवगम्यते। अनवगते संबोधनं व्यर्थम्।

वचनप्रामाण्यात्संबुध्यत इत्येव गम्यत इति चेत्। उक्तम्। अदृष्टकल्पनायां हस्तादिकल्पनानुपपत्तिरिति। न चासौ संबुद्ध इत्यवधार्यते। प्रमाणाभावात्। तस्मात्संबोधनवचनं न संबोधनाय। निर्देशार्थमेव। अविग्रहपक्षेऽपि तन्निर्देशार्थमेव भविष्यति। तत्राऽऽमन्त्रितविभक्तिवचनं स्तुतये। एवमिदं देवताख्यं साधनं साधयितृतमं, यच्चेतनादिवत्संबुद्धं साधयतीति चेतनवदिवोपचर्यमाणः संबुद्धिशब्देनाऽऽमन्त्र्यते। तथा, संबोधनशब्देन निर्देश उच्यते, गृहीतवन्तो वयं तव हस्तम्। त्वदाश्रया वयमित्यर्थः। अस्माभिरिन्द्रकर्म कर्तव्यमित्येतदनेन स्मार्यते।

तथा, इमे—द्यावापृथिव्यौ, दूरे अपारे यत्संगृभ्णासि मघवन्महो ते पूजितो मुष्टिरिति सन्तमिव मुष्टिं स्तुत्यर्थेन वदति। तस्यापि मात्रे न प्रमाणमस्ति। नेदं वचनम्, इह—महान् काशिरस्तीति। किं तर्हि, यस्तव काशिः, स महानिति। अन्यार्थस्तव काशिरस्तीति, अन्यस्तव काशिर्महानिति। सता हि स्तुतिरुपपद्यत इति चेत्। नैतत्। नियोगतो यस्यापि पौरुषविधिकैरङ्गैर्नास्ति संयोगः, पौरुषविधिकैरङ्गैस्तस्यापि स्तुतिर्भवति। यथा, एते वदन्ति शतवत्सहस्रवदभिक्रन्दन्ति हरितेभिरासभिः। विष्ट्वी ग्रावाणः सुकृतः सुकृत्यया होतुश्चित्पूर्वे हविरद्यमाशत, इति। तथा, सुखं रथं युयुजे सिन्धुरश्विनमिति। तस्मान्न स्तुतिवचनादर्थापत्तिर्भवति पुरुषविधत्वे देवतायाः।

तस्मात्सर्वथाऽदृष्टमस्ति। तत्र किं विवक्षितं किमविवक्षितमिति विज्ञेयम्। तत्र लोकेऽर्थकृता विवक्षा भवति। वेदे तु शब्दकृता। शब्देन च प्रत्यासन्नस्य यागस्य फलसाधनत्वात्प्राधान्यं, देवतायाश्च गुणत्वं विज्ञायते। न चोपकारलक्षणं शेषत्वम्।

---

१ संवद—पा०। २ संवद—पा०। ३ सवम्यते—पा०। ४ व्यर्थ—पा०। ५ संवद—पा०। ६ साधकतमं—पा०। ७ संबुध्य—पा०। ८ निर्दिश्य—पा०। ९ 'इमे चिदिन्द्र रोदसी अपारे यत्संगृभ्णा मघवन् काशिरित्ते' (ऋ० सं०—अष्ट० ३ अ० २ व० १) इत्यस्या ऋचोऽयमनुवदति—इमेत्यादिना। १० पौरुषविधिकैरङ्गैस्तस्यापि—पा०। ११ ऋ० सं० (अष्ट० ८ अ० ४ व० १०)। १२ ऋ० सं० (अष्ट० ८ अ० ३ व० ८)।

तथा, तुविग्रीव इन्द्र इति, नैतदुक्तं भवति, ग्रीवावानिन्द्र इति । किं तर्हि, याऽस्य ग्रीवा, सा महती । ग्रीवासत्त्वे नास्ति प्रमाणम् । न च ग्रीवास्तुतिरर्थापत्तिः । अपुरुषविधेऽपि स्तुत्युपपत्तेः ।

अपि च, इन्द्रो वृत्राणि जिघ्नते, इत्येताभ्यां पदाभ्यामिन्द्रशब्दः संबद्धो न शक्नोति तुविग्रीवादिभिः संबन्धं यातुम् । द्विरुच्चारणमस्य प्रसज्यते । तुविग्रीवावान् इन्द्रो वेदितव्यः, वृत्राणि चेन्द्रो हन्तीति । तथा हि सति भिद्येत । अभिन्नं च वाक्यमुपलभ्यते । तदेवमवकल्पते । यदि तुविग्रीवादयोऽस्य नोपादिश्यन्त इति । स्तुत्यर्थं संकीर्त्यते तुविग्रीवादिः । अन्धसो मदे, ईदृशो वृत्राणि हन्तीति । एषा तु वचनव्यक्तिः । वृत्रवधोपदेशपरमिदं वचनमिति । यदपि वचनं—बाहू ते इन्द्र रोमशौ, अक्षी ते इन्द्र पिङ्गले, इति । तदपि बाह्वो रोमशत्वमक्ष्णोश्च पैङ्गल्यमाह, न बाहुसत्तामक्षिसत्तां च । यदपि, अक्षिसत्ता यदतीति गम्यते । चक्षुष्मते शृण्वते ते ब्रवीमीति । तदपि न चक्षुःसंबन्धार्थं, चक्षुष्मते ब्रवीमीति वचनसंबन्धार्थम् । तत्सतीमिव चक्षुष्मत्तां स्तुत्यर्थमुच्चारयति । कुत एतदवगम्यते । चतुर्थीनिर्देशात् । यदि प्रातिपदिकार्थोऽध्यवसीयते, तथा वाक्यं भिद्येत । चक्षुष्मानित्येवं चोदिश्येत । चक्षुष्मते ते ब्रवीमीति च । तस्मान्न किंचिदन्यार्थदर्शनं पुरुषविधतां देवताया इदं ख्यापयतीति । न चेदं भोजनम् । न हि देवता भुङ्क्ते । तस्माद्भोजनस्य तदर्थत्वादिति तदसद्वचनम् ।

यदपि स्मृत्युपचारान्यार्थदर्शनैर्भुङ्क्त इति । तदविग्रहत्वेन प्रत्युक्तम् । अपि च, भुञ्जानायै देवतायै प्रत्तं हविः क्षीयेत । न च मधुकरीवदन्नरसभोजिन्यो देवता इति प्रमाणमस्ति । मधुकरीषु प्रत्यक्षम् । न च तद्देवतायाम् । तस्मान्न भुङ्क्ते देवतेति । यदुक्तं, देवतायै हविः प्रत्तं नीरसं भवतीति । नैष दोषः । वातोपहतं नीरसं भवतीति । शीतीभूतं च । न चासौ कस्यचिदर्थस्येष्टे । अनीशा कथं दास्यतीति ।

किं तर्हि । चोदनालक्षणं तदिति स्थितम् । किं भवति प्रयोजनं चिन्तायाः । यदि देवताराधनार्थो यागस्ततः पूज्यमाना देवता । यागश्च पूजा । पूजा च लौकिकः पदार्थः । तत्र येन प्रकारेणाग्निः पूज्यते तेनैव सूर्यः पूज्यत इति क आश्वासः । विपरीतमपि कदाचित्स्यात् ।

---

१ ऋ० सं० (अष्ट० ६ अ० १ व० ३१) । २ अविनद्धत्वेन—पा० ।

यदुक्तं, स्मृत्युपचारान्यार्थदर्शनैरीशाना देवतेत्यवगम्यत इति। तन्न। स्मृतेर्मन्त्रार्थवादमूलत्वादित्युक्तम्। उपचारोऽपि देवग्रामो देवक्षेत्रमिति। उपचारमात्रम्। यो यदभिप्रेतं विनियोक्तुमर्हति, तत्तस्य स्वम्। न च ग्रामं क्षेत्रं वा यथाभिप्रायं विनियुङ्क्ते देवता। तस्मान्न संप्रयच्छतीति। देवपरिचारकाणां तु ततो भृतिर्भवति, देवतामुद्दिश्य यत्त्यक्तम्।

यदुक्तम्, अन्यार्थदर्शनमीशानां देवतां ख्यापयति, इन्द्रो दिव इन्द्र ईशे इत्येवमादीति। तत्प्रत्यक्षामनीशानां देवतामुपलभ्याध्यवस्यामो भाक्त एष शब्द इति। तत्राऽऽह। वचनप्रामाण्याद्देवस्येशानताऽवगम्यते, यद्देव लोका अर्थान् विनियुञ्जते, तद्देवताभिप्रायाद्वेत्यध्यवस्याम इति। तन्न। प्रत्यक्षात्प्रमाणाद्देवतापरिचारकाणामभिप्राय इत्यवगम्यते। स न शक्यो बाधितुम्। येऽपि देवतामीशानां वर्णयन्ति, तेऽपि नापह्नुवते परिचारकाणामभिप्रायम्। किंत्वाऽऽहुः। तथा देवता करोति, यथा परिचारकाणामभिप्रायो भवतीति। न च स ईशानो भवति यः पराभिप्रायमनुरुध्यते, यस्य न स्वाभिप्रायाद्विनियोगो भवति।

अपि च, न चैतद्वचनम्। वर्तमानकालोपदेशत्वात्। प्रत्यक्षविरोधात्स्तुतिवादोऽवधार्यते। स्तुतिवादे च संभवति न वचनप्रामाण्यादीशिष्यत इति गम्यते। न च देवता फलेन संबध्नाति, या तदर्थं परिचर्येत। यदुक्तं, स्मृत्युपचारान्यार्थदर्शनैर्ददाति प्रसीदति चेति। तत्र स्मृत्युपचारयोरुक्तम्। यदन्यार्थदर्शनं, तस्मै भीता इषमूर्जं प्रयच्छन्तीति। तन्न। अन्यस्य विधेराम्नानात्। दक्षिणतः संपरिहर्तव्या इत्याहेति।

तथा, तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीति । अत्रेन्द्रस्य हविषो विधानम् । तस्माद्देवता न प्रयोजिकेति ॥ ९ ॥

अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्रीतिप्रधानत्वात् ॥ १० ॥

यदुक्तम्, अतिथिवदिति । तत्परिहर्तव्यम् । आतिथ्यमतिथिप्रयुक्तं स्यात् । आतिथ्ये हि तत्प्रीतिर्विधीयते । अतिथिः परिचरितव्यः । यथा प्रीयते तथा कर्तव्यमिति । दानं भोजनं वा कार्यमिति । यद्यदतिथये रोचते, तत्कर्तव्यम् । यदस्मै न रोचते, न तद्बलात्कारयितव्यमिति । इह तु कर्मणि, अभावः प्रीतिविधानस्य । तस्माद्विषमवतिथिनेति ॥ १० ॥

(श्रुतिविनियुक्तप्रोक्षणादिधर्माणामपूर्वप्रयुक्तत्वाधिकरणम् ॥ १ ॥)

[५] द्रव्यसंख्याहेतुसमुदायं वा श्रुतिसंयोगात् ॥ ११ ॥ पू०

दर्शपूर्णमासयोरामनन्ति, व्रीहीन् प्रोक्षतीति । तत्रैव, त्रीन् परिधीन्, तिस्रः समिध इति मन्त्रम् । चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्राऽमावास्यामिति । चातुर्मास्यानां द्वितीये पर्वणि वरुणप्रघासेष्वाम्नायते, शूर्पेण जुहोति, तेन ह्यन्नं क्रियत इति । तत्र संशयः । किं द्रव्यसंख्याहेतुसमुदायप्रयुक्ताः प्रोक्षणादयो धर्मा उतापूर्वप्रयुक्ता इति । किं तावत्प्राप्तम् । द्रव्यादिप्रयुक्ता इति । इह, व्रीहीन् प्रोक्षतीति प्रकरणेनापूर्व-

---

द्रव्यसामान्याद्विधीयन्त इति । तन्नोपपद्यते । देवताराधनार्थत्वाद्यागस्य देवतासामान्यमेव नेशिषः । विप्रकृष्टत्वाद्द्रव्यसामान्यस्येति ॥ ९ ॥ [१० ॥]

प्रोक्षिताभ्यामिति वाक्याद्धन्त्यर्थं प्रोक्षणम् । स च वाक्यसंयोगः श्रौतांशेन निराकृतः । तथा, लिङ्गसंयोगश्च श्रौतांशेन निराकृतः । [2]अस्मिन्नधिकरणे लिङ्गवाक्यसंयुक्ता नैवोदाहरणं, निराकृतत्वात् । श्रुत्या तु येषा तादर्थ्यं त इहोदाहरणम् । ताञ्श्रुत्या तदर्थान्मन्यमानः पूर्वपक्षं करोति । ' व्रीहीन्प्रोक्षति ' इति द्वितीया श्रुत्या[3] व्रीह्यर्थतां प्रोक्षणस्य प्रतिपादयति । अपूर्वसंबन्धः प्रकरणात्स्यात् । श्रुतिश्च प्रकरणाद्बलीयसी । ' पौर्णमासीम् ' इत्यत्रापि समुदायार्थमभिमर्शनं श्रुत्यैव द्वितीया प्रतिपादयति । ' त्रीन्परिधीन् ' इति द्वितीया, अत्रापि श्रुत्यैव मन्त्रस्य संख्यार्थता-

---

१ धर्म्य इति—प्रकारगतत्वादिति भाव. । २ ' पूर्वस्मिन्नधिकरणे ' इति सर्वत्र पाठ उपलभ्यते । स च प्रामादिकः । ३ श्रुत्येति—विभक्तिश्रुत्येत्यर्थः ।

ननु प्रथमेऽध्याये प्रतिषिद्धा हेत्वर्थता । शूर्पस्यार्थवादोऽयमित्युक्तम् । सत्यमुक्तम् । अपूर्वप्रयुक्ततायां हि सिद्धायां नैकस्मिन् वाक्ये होमे शूर्पविधानं, हेतुविधानं चावकल्पत इत्यर्थवादः प्रकल्पते, नान्यथा । चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्राऽमावास्यामिति, समुदायसमभिव्याहाराद्वाक्येन तत्प्रयुक्तता, प्रकरणसामर्थ्याल्लक्षणयाऽपूर्वसमभिव्याहारादवगतामपूर्वप्रयुक्ततां बाधते । तस्माद्द्रव्यादिप्रयुक्ताः प्रोक्षणादयो धर्माः ॥ ११ ॥

अर्थकारिते च द्रव्येण न व्यवस्था स्यात् ॥ १२ ॥

अपूर्वप्रयुक्त एवंजातीयके धर्मे सति द्रव्येण च धर्मव्यवस्था न स्यात् । पयसा मैत्रावरुणं श्रीणाति, सक्तुभिर्मन्थिनं, धानाभिर्हारियोजनं, हिरण्येन शुक्रम्, आज्येन पात्नीवतमिति । यस्मान्मैत्रावरुणोऽपूर्वस्य, तस्मात्पयसा श्रयितव्य इति । ऐन्द्रवायवोऽप्यपूर्वस्य । सोऽपि पयसा[1] श्रयितव्यः प्राप्नोति । एवं सर्वाणि श्रयणादीनि सर्वेषां ग्रहाणाम् । तत्र मैत्रावरुणादिग्रहणमविवक्षितं स्यात् । तस्मादपि द्रव्यादिप्रयुक्ताः प्रोक्षणादय इति ॥ १२ ॥

अर्थो वा स्यात्प्रयोजनमितरेषामचोदनात्तस्य च गुणभूतत्वात् ॥ १३ ॥ सि०

वाशब्दः पक्षं व्यावर्तयति । न द्रव्यादिप्रयुक्ता भवेयुः । किं तर्हि । अर्थ एषां प्रयोजनम् । अर्थ इत्यपूर्वं ब्रूमः । तदर्थास्ते । तद्धि कर्तव्यतया श्रूयते । तदितिकर्तव्यतयाऽनुबध्यते । इतरेषां द्रव्यादीनां कर्तव्यतया न चोदना । किं तर्हि । अर्थस्य गुणभूतत्वेन । अर्थं प्रति,

---

करणयोः संबन्धकर्तृ । तेनानुमितेन वाक्येन हेतुश्रवणमुपपत्स्यते । सति च हेतुश्रवणेऽन्नकरणं संस्कार्यं, होमः संस्कारकः । यद्यदन्नकरणं तत्तद्धोमेन व्याप्यते । यथा यत्कृतकं तत्तदनित्यत्वेन व्याप्यते । यथा च यत्र यत्र धूमस्तत्राग्निना व्याप्यते । तस्माद्धिशब्दश्रुत्याऽन्नकरणार्थो होम इति मन्यमानः पूर्वपक्षं करोति । इहापूर्वार्थे होमे स्थिते प्रथमेऽध्याये किमन्नकरणं विधीयत उतान्नकरणं स्तुतिरित्ययं विचारः ॥ ११ ॥ [१२ ॥]

यदि व्रीहिस्वरूपप्रयुक्तं प्रोक्षणं स्यात्तथा सति फलकल्पना स्यात् । न हि स्वरूपार्थत्वे परम्परयाऽपि प्रकृतापूर्वप्रयोजनत्वमग्निद्वारेणेवाऽऽधानस्य क्रतुप्रयोजनता, संभवति । न च वाक्यस्य द्वावर्थौ । यदि वा तण्डुलनिर्वृत्तिप्रणाड्या यदपूर्वं लक्ष्यते

---

1 विचार इति—अतो नास्य विचारस्य हेत्वधिकरणेन पौनरुक्त्यं, विषयभेदादिति भावः ।

अपूर्वं प्रति गुणभूतानामेषां श्रवणम् । किमतो यद्येवम् । अकर्तव्यानामितिकर्तव्यतया नास्ति संबन्ध इति ।

ननु व्रीह्यादिसमभिव्याहाराद्यैर्हि संबन्धः । तत्र द्वितीयया व्रीहिसमुदायप्रयुक्तता गम्यते। लिङ्गवाक्याभ्यां संख्याहेतुप्रयुक्तता । नेत्याह । एवं सति फलं कल्पनीयं स्यात् । तस्मादपूर्वप्रयुक्तता ।

नन्वेवमपि सत्यपूर्वोपकारः कल्पयितव्यः । सत्यं कल्पयितव्यः । प्रकृतेन त्वेकवाक्यतां नीत्वा । त्वत्पक्षे त्वप्रकृतेन फलवचनेनैकवाक्यता स्यात् ।

ननु प्रकरणं वाक्यस्य श्रुतेर्वा न बाधकम् । सत्यमबाधकम् । फलाभावात्तु भवदीयः पक्षो मुच्यते । तस्मिन्नानर्थक्येनाविवक्षिते प्रकरणवता प्रयोगवचनेनापरिपन्थि प्रोक्षणादि विधायिष्यते । आह । अपूर्वसंबन्धेऽपि तदीयैर्व्रीह्यादिभिरेव धर्मः प्रयुज्यते । किमेवं भविष्यति । द्रव्यादिसंबन्धश्चैवं हि नावज्ञातो भविष्यति । फलं च न कल्पयितव्यम् । उच्यते । नैवं शक्यम् । व्रीहीन् प्रोक्षतीति हि व्रीहिजातिर्निर्दिश्यते, व्रीहिद्रव्यलक्षणार्था वा, अपूर्वसाधनविशेषलक्षणार्था वा । अन्यतरलक्षणया कृतार्थेति, नोभयलक्षणार्था स्यात् । [1]द्रव्यलक्षणे वा, तत्र च लक्षणैव दोषः। फलकल्पनेति कृत्वा साधनविशेषलक्षणार्था जातिरवसीयते। व्रीहिजातिलक्षितं यत्साधनं, किं तत् । यतस्तण्डुला भवन्ति, तत्प्रोक्षितव्यमिति । तण्डुलनिर्वृत्तिकरता हि तत्र साधनत्वं, न द्रव्यता । एवं संख्यादिष्वपि योजयितव्यम् । तस्मादपूर्वप्रयुक्तता प्रोक्षणादीनामिति ॥ १३ ॥

तस्यायं धर्मः । अथवा व्रीहिजातिलक्षितस्य द्रव्यस्य • । अत्र ग्रन्थः । व्रीहिजातिलक्षितं यत्साधनं, किं तद्यतस्तण्डुला भवन्ति । तत्प्रोक्षितव्यमिति । तण्डुलनिर्वृत्तिकरता हि तत्र साधनत्वं न द्रव्यता । कोऽभिप्रायः । तण्डुलनिर्वृत्तिप्रणाड्या यत्साधनत्वं लक्षयति तदर्थं प्रोक्षणम् । येष्वपि तण्डुलनिर्वृत्तिरविशिष्टा । न चान्यद्द्रव्यं तण्डुलनिर्वृत्तिकरणांशेन शक्यते लक्षयितुम् । तस्मादन्येषु द्रव्येषु प्रोक्षणाभावः ॥ १३ ॥

---

१ द्रव्यलक्षणा वा—पा० ।

अपूर्वत्वादूव्यवस्था स्यात् ॥ १४ ॥

अथ यदुक्तम्, अर्थकारिते च द्रव्येण न व्यवस्था स्यादिति । साधनविशेषलक्षणार्था जातिरित्येवं सति व्यवस्था भविष्यति । मैत्रावरुणेन यत्क्रियते, तत्र पयःश्रयणं, न तत्, ऐन्द्रवायवेन । अतो न मैत्रावरुणापूर्वादैन्द्रवायवस्य धर्माः । अपूर्वो ह्यैन्द्रवायवः । तस्मात्, अपूर्वत्वाद्व्यवस्था स्यादिति ॥ १४ ॥

तत्प्रयुक्तत्वे च धर्मस्य सर्वविषयत्वम् ॥ १५ ॥

यच्च मन्यते, द्रव्यादिप्रयुक्ताः प्रोक्षणादयो धर्मा इति । तस्य सर्वविषयता धर्मस्य प्राप्नोति । येऽपि भक्षार्था व्रीहयस्तेऽप्येवं प्रोक्षितव्याः प्राप्नुवन्ति । न चैतत्त्वयाऽपीष्यते । तस्मादयमस्मिन् पक्षे दोष इति ॥ १५ ॥

तद्युक्तस्येति चेत् ॥ १६ ॥

इति चेत्पश्यसि, सर्वविषयता धर्मस्य भविष्यतीति । तद्युक्तस्य प्रकरणयुक्तस्य भविष्यति । एवं प्रकरणमनुगृह्यते । न च सर्वविषयता धर्मस्येति ॥ १६ ॥

नाश्रुतित्वात् ॥ १७ ॥

नैतदेवम् । न हि श्रूयते, प्रकरणयुक्ता व्रीहयो निर्वप्तव्याः, प्रोक्षितव्याश्चेति । ननु प्रकरणानुग्रहायैतदध्यवसानम् । नेत्याह । न हि वाक्येन बाधितं प्रकरणमुत्सहते धर्मान् नियन्तुम् । अथापि न बाध्यते, तथाऽपि न प्रकरणस्य विशेष्टुं सामर्थ्यमस्ति[1] । कर्तव्यतया हि तत्क्रियमाणं चोद्यते, न प्रसिद्धसंबन्धमिव विशेषणत्वेन । तस्मान्न प्रकृतयाग-

[१४ ॥ १५ ॥ १६ ॥]

न प्रकरणस्य विशेष्टुं सामर्थ्यमस्ति । कर्तव्यतया हि तत्क्रियमाणं चोद्यते,[2] न प्रसिद्धसंबन्धमिव परविशेषणत्वेनेति । कोऽभिप्रायः । भावयेत्स्वर्गं, केन यागेन, कथमिति प्रकाराकाङ्क्षा भवति । स च प्रकारोऽनिर्ज्ञातरूपत्वात्कर्तव्यः । यश्च निर्ज्ञातस्वरूप उच्चार्यते, स परविशेषणं, यथा शुक्लः पट इति । इह यत्कथंभावाकाङ्क्षायामन्यन्वाधानाद्युपनिपतति, तदस्य संबन्धित्वे कारणं, नान्यस्य[3] भवति,

1 'अपूर्वपृथक्त्वाद्व्यवस्था स्यात्' इति सूत्रपाठो लिखितपुस्तक उपलभ्यमानोऽपि भाष्यकारैः सोऽनादृत इति यथाश्रुत एव पाठः प्रकाशितः । 2 चोद्यत इति न-पा० । 3 नान्यस्य भवतीति-प्रकरणमन्यस्य संबन्धित्वे कारणं न भवतीत्यर्थः ।

विशेषितानां व्रीहीणां निर्वापः प्रोक्षणं वा चोद्यत इति ॥ १७ ॥

अधिकारादिति चेत् ॥ १८ ॥

इति चेत्पश्यसि, न प्रकरणं विशेषकं व्रीहीणामिति । बाढम् । अधिकाराज्ज्ञास्यत्यध्वर्युः । इमे भक्तार्थाः, इमे कार्यार्थाः । तत्र कार्यार्थान् प्रोक्षिष्यतीति ॥ १८ ॥

तुल्येषु नाधिकारः स्यादचोदितश्च संबन्धः, पृथक्सतां यज्ञार्थेनाभिसंबन्धस्तस्माद्यज्ञप्रयोजनम् ॥ १९ ॥

तुल्या एते व्रीहयः । य एव भक्तार्थास्त एव कर्मार्थाः, न पृथक् केचित्कर्मार्था नाम । ननु ये निरुप्तास्ते कर्मार्थाः । सत्यं भवेदेतत् । प्रोक्षणादिषु दोषो न स्यात् । निर्वापे तु दोषः । न तत्र केचन प्रकृता विद्यन्ते, पृथक्सतां यज्ञार्थेन निर्वापः श्रूयते । कथम् । अपरेण गार्हपत्यं प्रागीषमनोऽवस्थितं भवति तस्य दक्षिणं चक्रमारुह्यानसोऽधिनिर्वपतीति । तस्माद्धर्मस्य सर्वविषयत्वं प्राप्नोत्येव । पूर्वेण हेतुनाऽपूर्वप्रयुक्तत्वं प्रोक्षणादीनामिति ॥ १९ ॥

(अग्नीषोमीयप्राग्भागवर्तिपदार्थधर्मस्योपांशुत्वस्य तत्तत्पदार्थजन्यावान्तरापूर्वप्रयुक्तत्वाधिकरणम् ॥ ६ ॥)

[६] देशबद्धमुपांशुत्वं तेषां स्याच्छ्रुतिनिर्देशात्तस्य च तत्र भावात् ॥ २० ॥ सि०

ज्योतिष्टोमे समाम्नायते—रसरा वा एषा यज्ञस्य, तस्माद्यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्तीति । तदत्रैषोऽर्थः सांशयिकः ।

न चोन्यस्य भवति ॥ १७ ॥ [१८ ॥ १९ ॥]

आग्नेयेऽधिकरणे समुदायप्रयुक्तमभिर्शनमित्युक्तम् । समुदायप्रसङ्गेनान्यो यः समुदाय इव दृश्यते प्रहृदज्यप्यासससमुदाय इति, तत्र विचार्यते । किं तत्प्रयुक्तमुपांशु-

---

१ यदि प्रकरणं विशेषकं न भवेत्कथं तर्हि प्रकृतापूर्वसाधनीभूतेषु व्रीहिषु प्रोक्षणं सिध्येदिति शङ्कां निराकर्तुमाह—न चानारभ्येति । अयं भावः । [illegible] प्रकरणं [illegible] विशेषकं न भवति, प्रकृतानु[illegible] प्रोक्षणेन व्रीहिषु [illegible] प्रकृतापूर्वमुपकुर्यादिति । [illegible] प्रकृतेन [illegible] कल्पनापादनमुभयत्र भवत्येव परम्परया प्रकरणं विशेषकमिति [illegible] प्रोक्षणं कर्तव्यं भवतीति । २ समुदायप्रयुक्तमिति—समुदायापूर्वप्रयुक्तमित्यर्थः । ३ तत्प्रयुक्तमिति—ज्योतिष्टोमापूर्वप्रयुक्तमित्यर्थः ।

किं प्रागग्नीषोमीयात्प्रयाजानि कर्माणि, तत्प्रयुक्तमुपांशुत्वमुत परमापूर्वप्रयुक्तमिति । किं प्राप्तम् । प्रागग्नीषोमीयात्, यान्यङ्गापूर्वाण्यारादुपकारकाणि, यच्च प्रधानद्रव्यसंस्कारकं, तत्प्रयुक्तोऽयं धर्मः । योऽयं देशसंबद्धः । कुत एतत् । श्रुतिनिर्देशात् । मर्यादया देशलक्षिता ये पदार्थास्ते श्रुत्या, एतेन धर्मेण संबद्धाः । य एतस्मिन् देशे पदार्थास्तेरुपांशु चरन्तीति ।

ननु वाक्येनैष धर्मो विनियुक्तो न श्रुत्या । न ब्रूमो न वाक्येनेति । किं तर्हि । श्रुतेनास्यैकवाक्यता, न प्रकृतेन लक्षितेन, कल्पितेन वेति । उच्यते । गृह्णीम एतदङ्गापूर्वाणामयं धर्म इति, न तु प्रधानद्रव्यस्य संस्कारकं यदपूर्वं तस्यापीति । कतमं तत् । यत्प्रधानद्रव्यसंस्कारकं पूर्वस्मिन् देशेऽस्तीति । उच्यते । तस्य च तत्र भावात् । तस्यैवंजातीयकस्य पूर्वस्मिन् देशे भावात् । अस्ति हि सोमप्रवहणीयं नाम सूक्तम् । तस्मादेषधर्मो भविष्यतीति । यथा प्रणीताः प्रणेष्यन् वाचं यच्छति, तां

त्वमुत तत्पदार्थप्रयुक्तमिति[1] । अथवा—संस्कारोहो विचार्यते, प्रकृतौ विकृतौ निर्णयार्थं[2] । अग्नीषोमीयात्प्राग्भाविना पदार्थानामुपांशुत्वं श्रुत्या भवति । ननु वाक्येनैष धर्मो विनियुक्तः । न च तृतीयाद्या विभक्तिरस्ति ।

उच्यते । सत्यं, किंतु प्राक्शब्दोऽवश्यं निराकाङ्क्षीकर्तव्यः । तत्र यदि सोमयागेन संबन्धः क्रियते, प्रकरणाम्नानानुमितेन संबन्धः स्यात् । यदग्नीषोमीयेण संबध्यते, श्रुतेन संबध्यमानोऽग्नीषोमीयात्प्राग्भाविनः पदार्थास्तैः सर्वैरगृह्यमाणविशेषत्वात्संबध्यते । तस्य च तत्र भावादिति सूत्रावयवेनापूर्वान्तो ये पदार्था इति ब्रवीति[3] । तेषु यो धर्मो विधीयते नासावनर्थकः । यथा दीक्षणीयावाङ्नियमः पदार्थप्रयुक्त इत्युक्तमेवमिहापि[4] ।

श्रुतिनिर्देशादिति—श्रुतेन वाक्येन संबन्धमभिप्रेत्य श्रुतिमाह । अथवा—पदार्थापूर्वेण संबध्यमानो लक्षणया । परमापूर्वेण तु लक्षितलक्षणया संबध्यते । प्रथमं

---

१ तत्पदार्थप्रयुक्तमिति—अग्नीषोमीयप्रागभाविपदार्थजन्योत्पत्त्यपूर्वप्रयुक्तमित्यर्थः । २ निर्णयार्थे—ऊहानूहनिर्णयार्थेत्यर्थः । ३ इति ब्रवीतीति—न तु भाष्यकृदुक्तरीत्याऽनेन सूत्रावयवेन संनिपत्योपकारकाङ्गापूर्वप्रयुक्तत्वं प्रसाधनीयम् । पौनरुक्त्यापत्तेरिति शेषः । ४ एवमिहापीति—अपूर्वप्रत्यासन्नपदार्थानां पदार्थप्रयुक्तोऽयं धर्म इत्यर्थः ।

सहविष्कृत्वा विसृजतीति । अस्मिन् देशे ये पदार्थास्तेषां धर्मो वाग्यमो न प्रधानापूर्वस्य । एवमिदमप्युपांशुत्वमिति ॥ २० ॥

यज्ञस्य वा तत्संयोगात् ॥ २१ ॥ पू०

वाशब्दात्पक्षो विपरिवर्तते । नैतदस्ति । तद्देशानां धर्म इति । कस्य तर्हि । परमापूर्वस्येति । कुतः । तत्संयोगात् । तत्संयोगो भवति । यज्ञस्य संयोगः । त्सरा वा एषा यज्ञस्य यत्प्राचीनमग्नीषोमीयादिति । यज्ञस्य यत्प्राचीनमिति संबन्धः, न त्सरा वा यज्ञस्येति । कुतः । प्राचीन विशिंषन् यज्ञस्येति शब्दो विधिपदशेषो भवति । ततः प्रवृत्तिविशेषकरो भविष्यति । इतरथा, अर्थवादशेषः सन्ननर्थकः स्यात् । वादमात्रं ह्यनर्थकमिति ।

प्राचीनमिति च यज्ञभागं श्रुत्या वदति । लक्षयति च तद्गतान् पदार्थान् । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या स्यात् । तस्मात्प्राग्देशस्यैष धर्मः । तेनास्य श्रुत्या संयोगः । न प्राग्देशगतानां पदार्थानां, तैरस्य लक्षणया संबन्धः स्यात् । अथाप्यर्थवादपदशेषो यज्ञस्येति स्यात्, तथाऽपि प्राग्देशः श्रुत्या धर्मेण संबध्यते । प्राग्देशगताः पदार्था लक्षणयेति यज्ञप्रयुक्तैव न्याय्या । अपि च प्रत्यक्ष उपकारः परमापूर्वस्य लक्ष्यते । यत्प्राचीनमग्नीषोमीयाच्चदुपांशुत्वे न शिथिलप्रयत्नः प्रचरन्नखिन्नः सुखं बहुवचान्तं सोऽत्यमहर्निर्वर्त्स्यतीति । तस्मात्परमापूर्वप्रयुक्त-

पदार्थैस्तैरपूर्वाणि, तै. परमापूर्वमिति । एवं च लक्षितलक्षणामभिप्रेत्य लक्षणा श्रुतिमाह । अथवाऽग्नीषोमीयः पदार्थः । स चोच्चरितः प्राग्भाविनः पदार्थान्बुद्धावुपस्थापयति, न यज्ञभागम् । तमभिप्रेत्य श्रुतिमाह ॥ २० ॥

न यज्ञशब्दः त्सराशब्देन संबध्यते । अप्रवृत्तिविशेषकरत्वात् । यस्मात्प्राचीनशब्देन संबध्यमानः प्रवृत्तिविशेषकरो भवति, तेन यज्ञस्य यः प्राग्भागस्तस्यायं धर्म उपांशुत्वं विधीयते । न च प्राचीनशब्दः पदार्थान् शक्नोति वदितुम् । श्रुत्या भागवचन एव प्रतीयते । अक्षरोच्चारणमात्रेणैव प्राग्भागमाह । इतरत्र लक्षणया, पदार्थान्यदि लक्षयेत् । अत्र ग्रन्थः—अथाप्यर्थवादपदशेषोऽयं यज्ञस्येति स्यात्तथाऽपि प्राग्देशमात्रं श्रुत्या धर्मेण संबध्यत इति । कोऽर्थः । प्राचीनशब्दमुद्दिश्योपांशुत्वं विधीयते । तत्र यद्यग्नीषोमीयशब्देन विशेष्येत प्राचीनशब्दः, ततो वाक्यं भिद्येत ।

१ (अ० १ पा० २ अ० २ सू० १९) । २ निर्वर्त्स्यती—पा० । ३ अपूर्वाणीति—स्वापूर्वाणि लक्षणीयानि स्वर्थः । ४ तैरिति—लक्षितैः स्वापूर्वैरित्यर्थः ।

मुपांशुत्वमिति ॥ २१ ॥

अनुवादश्चं तदर्थवत् ॥ २२ ॥

अनुवादश्च तद्देशपदार्थस्यैव भवति । त्सरा वा एषा यज्ञस्य यत्प्राचीनमग्नीषोमीयादिति । त्सरा नाम छद्मगतिः । यथा शकुनिग्राहकस्य शकुनिं जिघृक्षतश्छद्मना गतिर्भवति । शनैः पदन्यासो, दृष्टिप्रणिधानम्, अशब्दकरणं च । कथमनवबुद्धः शकुनिर्गृह्येतेति । एवमिहाप्यनवबुद्धमिव ग्रहीतुं यज्ञं प्रच्छन्नगतिरुपांशुत्वं नाम । यथा शकुनिग्राहकस्य यस्मिन् देशे शनैः पदन्यासो न स तद्देशार्थः । अपि तु तद्देशाभिगतस्य शकुनेरर्थेन क्रियते । एवमिहाप्युपांशुत्वं न तद्देशानां पदार्थानामर्थेन क्रियते, तद्देशाभिगतस्य यज्ञस्यार्थेन गम्यते । यस्तु त्सराशब्दं यज्ञविशेष्यं मन्यते, तस्य सुतरामर्थवादः परमापूर्वप्रयुक्ततां दर्शयति । यज्ञस्यैषा त्सरेति । यथा शकुनेः त्सरा, एवं यज्ञस्येति ॥ २२ ॥

प्रणीतादि तथेति चेत् ॥ २३ ॥

इति यदुक्तं तत्परिहर्तव्यम् ॥ २३ ॥

न यज्ञस्याश्रुतित्वात् ॥ २४ ॥

नैतदेवम् । तद्देशपदार्थप्रयुक्तनैव स्यात्, न परमापूर्वप्रयुक्ततेति । नात्र पदार्थानां यज्ञभागविशेष्यता वाक्यसंबन्धे तावद्गम्यते[2] । यज्ञस्याश्रुतित्वात् । नात्र संबन्धी यज्ञशब्दः श्रूयते । नन्विदानीमेवोक्तं, यज्ञं तनिष्यन्तावध्वर्युयजमानौ वाचं यच्छत इति । उच्यते । तद्देशपदार्थप्रयुक्ततायामप्येतदवकल्पते । कथम् । यज्ञं विस्तारयितुं वाचं यच्छतः । तौ वाचंयमौ सन्तावविक्षिप्यमाणचेतस्कौ, पदार्थेषु क्रियमाणेष्वप्रमाद्यन्तौ तथा करिष्येते, यथा न कश्चित्पदार्थः पदार्थावयवो वा हीयते । अध्वर्युर्वाग्यमेनानन्यचेतस्को न पदार्थान् प्रमादयिष्यति । यजमानश्चैवं वाग्यमेनानन्यचेतस्कः प्रमादयिष्यन्तं तं बोधयिष्यति । अङ्गैरप्यनन्त-

---

तस्मान्न विशेष्यते । कस्य तर्हि प्राग्भागः । विप्रतिवृत्तेर्ज्योतिष्टोमस्येति ॥ २१ ॥

[२२ ॥]

प्रणीतादि तथेति चेत् । इति प्रत्यवस्थानसूत्रम् ॥ २३ ॥

---

१ 'अर्थवादश्च तदर्थवत्' इति लिखिते केवलसूत्रपाठे, दृश्यते । २ वाग्यमसंबन्धेनावगम्यते–पा० ।

रीयमाणैर्यज्ञो विस्तार्यते, न केवलैः स्वैरवयवैरङ्गैश्च विस्तारयितुं वाग्यमः शक्नोति । अस्मिन् काले क्रियमाणो न स्वेनाऽऽत्मना । यज्ञसंयोगश्चात्र विस्तारसंबद्धः । तस्मादङ्गप्रयुक्ततायामप्युपपद्यते, यदध्वर्युयजमानौ वाचं यच्छतस्तत्प्रजापतिभूयंगतौ यज्ञं तन्वाते, इति दृष्टेन कारणेन, नादृष्टेनेति वर्तमानकालापदेशादवगम्यते । यथा वयं वाग्यमेन तायमानं यज्ञं विश्वस्तथेति ॥ २४ ॥

तद्देशानां वा संघातस्याचोदितत्वात् ॥ २५ ॥ सि०

स्थितादुत्तरम् । वाशब्दात्पक्षो विपरिवर्तते । नैतदस्ति, परमापूर्वप्रयुक्तमुपांशुत्वमिति । कथं तर्हि । प्राचीनमग्नीषोमीयात्, ये पदार्थास्तत्प्रयुक्तम् । कुतः । संघातस्याचोदितत्वात् । संघात इति ग्रहयज्ञप्रभ्याससंघातं ब्रूमः । न तस्यायं भाग उपांशुत्वेन संबद्ध इति चोदना । नैवं संबन्धः क्रियते, यज्ञस्य यत्प्राचीनमिति । कथं तर्हि । रसरा वा एषा यज्ञस्येति । कुतः । तस्मादिति पदेन व्यवधानात् । अथापि प्राचीनेन संबन्धः । एवमपि न परमापूर्वप्रयुक्तम् । न हि यदित्यनेन देशोऽभिसंबध्यते । किं तर्हि । देशगताः पदार्थाः ।

न यज्ञस्याश्रुतित्वात् । इति परिहारसूत्रम् ॥ २४ ॥

अथवा नासिद्धो दृष्टान्तो भवतीति दृष्टान्तसिद्धयेऽधिकरणं प्रक्रियते । 'प्रणीतादि तथेति चेत्' इति । यथा 'यज्ञेन संयोगात्' इत्युपांशुत्वं परमापूर्वप्रयुक्तमेवमिहापि न पदार्थप्रयुक्तो वाङ्नियम इति । 'नन्विदानीमेवोक्तं' 'स्थितादुत्तरम्' इति चेत्तस्माद्ग्रन्थादनुमीयतेऽधिकरणान्तरम् ॥ २३ ॥

'न यज्ञस्य' इत्युत्तरपक्षे सूत्रं वर्णनीयम् ॥ २४ ॥

अत्र ग्रन्थः । नैवमभिसंबन्धः क्रियते, यज्ञस्य यत्प्राचीनमिति । कथं तर्हि । रसरा वा एषा यज्ञस्येति । कोऽर्थः । पदार्थप्रयुक्तोऽपि वाङ्नियमवदर्थवान्भवति । परमापूर्वप्रयुक्तोऽपि । तत्र यदि पदार्थापूर्वप्रयुक्तोऽनर्थको भवति, तत्र व्यवहितकल्पनाऽध्याहारो वाऽश्रुतोऽपि कल्प्येत । इह तु यथाश्रुत एव वाक्ये घटमाने किमर्थं व्यवहितकल्पनाऽध्याहारो वा कल्प्यते ।

---

१ तायमानं—तन्यमानमित्यर्थः । २ पक्षं विपरिवर्तयेद्—पा० । ३ एतस्माद्ग्रन्थ इति—'न यज्ञस्याश्रुतित्वात्' 'तद्देशानां वा संघातस्याचोदितत्वात्' इति सूत्रद्वयस्थभाष्यग्रन्थादित्यर्थः । ४ वाङ्नियमोऽर्थवान्—पा० । ५ अर्थवान् भवतीति—उपांशुत्वाख्यो धर्म इति शेषः ।

यदि देशोऽभिसंबध्येत, यत्प्राचीनमग्नीषोमीयादिति भवेत्, न यत्किंचिदिति । वीप्सायां ह्येतद्भवति । वीप्सा च बहुषु भवति, नैकस्मिन् । एकश्च देशो बहवस्तत्र पदार्थाः । तस्मात्पदार्थानामुपांशुत्वेन संबन्धो न देशस्येति । कथं पुनर्वीप्साऽवगम्यत इति । यदित्यनेन लक्ष्यते । किमित्यज्ञानवचनम् । विशेषाश्चाज्ञाता ज्ञातुमिष्टाः प्रतीयन्ते । बहुषु च सामान्यं विशेषाश्च भवन्ति । तस्माद्यद्देशाः पदार्था वीप्सया लक्ष्यन्ते, ते चोपांशुत्वेन संबध्यन्त इति ।

अपि च, प्राचीनशब्दे यच्छब्देन विशेष्यमाणेऽपि यद्यग्नीषोमीयपदमविवक्षितं, तथा सति साकाङ्क्षत्वाद्वाक्यमेव न घटते, कतरस्मात्पदार्थात्प्रागिति । तस्मादग्नीषोमीयशब्दोऽवश्यं विवक्षणीयः । तस्माद्द्वयोरपि शब्दयोरग्नीषोमीयशब्दस्तन्त्रम् । तेन सुदूरमपि गत्वा प्राचीनशब्दस्याग्नीषोमीयेसंबन्धः । तेन संबन्धे कृते[3] पदार्थधर्मो भवतीत्युक्तम् ।

यदि हि देशोऽभिसंबध्येत, यत्प्राचीनमग्नीषोमीयादिति भवेन्न यत्किंचिदिति । *कोऽर्थः । यस्यायं धर्मः परमापूर्वप्रयुक्तस्तस्य प्राग्देशो नामैकं वस्तु ।* भवता किंचिच्छब्दोऽनुवादो वर्णनीयः, उत्सर्गो वा । तत्रानुवादस्तावन्न घटते । वीप्सार्थे किंचिदिति वर्तते । न चैकस्मिन्वस्तुनि वीप्सा संभवति । उत्सर्गोऽपि नैव । गम्यमानत्वादभिमतार्थस्य । वाक्ये च शक्यतेऽयमर्थो विवक्षितुम् । तस्माद्वीप्सावाची सन्विवक्षितव्यः । पदार्थधर्मेऽभ्युपगम्यमाने बहुत्वात्पदार्थानां किंचिच्छब्दस्यार्थोऽनुगृहीतो भवति ।

नन्वयं न वीप्सावाची । उच्यते । किंशब्दोऽयमज्ञाते ज्ञातुमिष्टे वर्तते । देशश्च ज्ञातः । प्राचीनशब्दश्रवणात् । तत्र किंशब्दोऽनुपपन्नः । विशेषास्त्वज्ञाताः, तेषूपपद्यते । तस्माद्वीप्साफलोऽस्मिन्वाक्ये वर्तते । दीक्षणीयाया याजुर्वेदिकत्वात्साद्गुण्यादुपांशुत्वं प्राप्नोति । तद्बाधकेन बाध्यते । 'प्राक् स्विष्टकृतः प्रथमस्थानेन' 'मध्य-

---

१ यन्नमिति—विवक्षितमित्यर्थः । २ अग्नीषोमीयसंबन्ध इति—अग्नीषोमीयशब्देन संबन्ध एवितव्य इत्यर्थः । ३ तेन संबन्धे कृते इति—आदावेवाग्नीषोमीयशब्देन प्राचीनशब्दस्य संबन्धे कृत इत्यर्थः । ४ तेषूपपद्यत इति—प्राचीनशब्दात्सामान्यतो ज्ञातेष्वपि पदार्थविशेषेष्वज्ञातेषूपपद्यते किंचिच्छब्द इत्यर्थः । ५ प्राप्नोतीति—'उपांशु यजुषा' इति सामान्यवाक्येनेत्यर्थः ।

ननु दीक्षणीयादिष्वन्यो धर्म उक्त', यावत्या वाचा कामयेत ताव त्या दीक्षणीयायामनुब्रूयात्, मन्द्रं प्रायणीयायां, मन्द्रतरमातिथ्याया-मुपांशूपसत्स्विति। कथं तत्रोपांशुत्वं कर्तुं शक्यमिति। उच्यते। स धर्मः प्रधानेषु भविष्यति। दीक्षणीयादिषु प्रधानशब्दोपबन्धत्वात्। उपांशुत्वं प्रधानवर्जितेष्वङ्गेषु निवेक्ष्यते। सामान्योपदेशात्।

प्रयोजनं, कुण्डपायिनामयने, मासमग्निहोत्रं जुह्वतीत्येवमादीनि प्राग-ग्नीषोमीयात्। एषूपांशुत्वसबन्धो भवति, यथा पूर्वः पक्षः। यथा तर्हि सिद्धान्त', न सबन्धः ॥ २५ ॥

(अग्नौ प्रोक्षणादेः सकृदनुष्ठानाधिकरणम् ॥ ७ ॥)

[७] अग्निधर्मः प्रतीष्टकं संघातात्पौर्ण-मासीवत् ॥ २६ ॥ पू०

अस्त्यग्नि, य एव विद्वानग्निं चिनुत इति। तत्रैव समाम्नायते।

मेनेहाया'' शेष तृतीयस्थानेन' इत्यनेनत्स्वरवैचित्र्य चोदकप्राप्तम्। तत् 'अग्नी षोमीयात्' इत्युपांशुत्वेन बाध्यते। 'यावत्या वाचा कामयेत' इत्यनेन दीक्षणीया-शब्दवाच्ये वाङ्नियमो विधीयते। स दीक्षणीयाशब्द प्रधानमात्रे वर्तते, नाङ्गेषु। तस्मादुपांशुत्वमङ्गेषु। प्रधानेषु 'यावत्या वाचा' इति।

ननु यत्किंचिच्छब्देन विशेषा उच्यन्ते। दीक्षणीयादिभिरपि विशेषा एव। तत्र द्वयोर्विशेषवाचिनोर्नास्ति बाध्यबाधकभाव। तस्माद्दीक्षणीयादिषु प्रधानेषु विकल्प प्राप्नोति। उच्यते। दीक्षणीयादिभिर्वर्णोपात्तमेव प्रधानम्। यत्किंचिच्छब्दे न कश्चिद्वर्णोपात्त। बाधे च वर्णोपात्तेनावर्णोपात्तो बाध्यते। 'उच्चै प्रवर्ग्येण' इति करणविभक्तिनिर्देशात्प्रधानस्योच्चैष्ट्वम्। 'उपांशूपसत्सु' इत्यौचित्येन नित्यानुवादोऽयम्।

यदेतत्प्रयोजन वर्णित देशप्रयुक्तत्वेऽस्योपांशुत्वस्य मासाग्निहोत्रादिषु प्राप्तिरिति। तन्न। तेषां नाम्नाऽन्यस्वर प्राप्नोति, चोदकेनोपांशुत्वम्। चोदकाच्च नामधेयं बलवत्। तस्मादन्यत्प्रयोजनम्-न अनारभ्योक्त 'पुरस्तादुपसदां सौम्येन प्रचरन्ति' 'अन्तरा त्वष्ट्रेण', 'उपरिष्टाद्वैष्णवेन' इति ॥ २५ ॥

१ अग्नीषोमीयादिति-' यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्ति ' इति वचनविहितेनोपांशुत्वेनेत्यर्थः। २ दीक्षणीयादिभिरर्थानि-' यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात् ' मन्द्रं प्रायणीयाम् ' 'मन्द्रतरमातिथ्यायाम् ' उपांशूपसत्सु ' इत्यादिवाक्यगतदीक्षणीयादिपदैरित्यर्थः।

हिरण्यशकलसहस्रेणाग्निं प्रोक्षति, दध्ना मधुमिश्रेणाग्निं प्रोक्षति, वेतसशाखयाऽवकाभिश्चाग्निं विकर्षति, मण्डूकेनाग्निं विकर्षति। तत्रायमर्थः सांशयिकः। प्रतीष्टकं किं विकर्षणं प्रोक्षणं च कर्तव्यम्, अथ सकृदेव कर्तव्यमिति। तत्रैवं तावद्विचार्यते। किमिष्टकासमुदायेऽग्निशब्द उत तद्व्यतिरिक्ते द्रव्यान्तर इति। यदि समुदाये, ततस्तल्लक्षितानामिष्टकानामगम्यमाने विशेषे सर्वासां प्रोक्षणं विकर्षणं च। यदा च द्रव्यान्तरे, ततः सकृदेवेति। किं प्राप्तम्। प्रतीष्टकमिति। कुतः। समुदाये ह्यग्निशब्दो वर्तते। कथमवगम्यते। द्रव्यान्तरस्याभावात्। द्रव्यान्तरमेवान्यन्नास्ति, कोऽग्निशब्देनाभिधीयेत, कस्मिन्नग्निर्निधीयेतेति। कथं पुनर्नास्तीति गम्यते। द्रव्यान्तरवैलक्षण्यात्।

तत्र हि द्रव्यान्तरमस्तीति गम्यते। यत्रैकस्मिन्नवयवे गृहीत्वा कृष्यमाणे कृत्स्नः कृष्यते। कोऽभिप्रायः। यद्येकोऽवयवो हस्तेन संयुक्तः कृष्यते, न द्रव्यान्तरं, कः प्रसङ्गो यत्तत्र द्वितीयोऽप्यवयवः कृष्येतेति। अथ द्रव्यान्तरमपि तत्र कृष्यते, तत्र द्रव्यान्तरस्य समवायिनामवयवानामपि निर्भागात्कर्षणमुपपन्नम्। न च संयुक्तसंयोगस्य द्रव्यान्तरादृते धर्म एषोऽवकल्पते। न ह्यबद्धे काष्ठपूलके, काष्ठ एकस्मिन्नाकृष्यमाणे काष्ठान्तराणि कृष्यन्ते। यत्र हि परस्परव्यतिषङ्गजनिता एका बुद्धिर्भवति, नावयवबुद्धिर्दृश्यते, नापि केनचिदनुमानेनानुमीयते, तत्र द्रव्यान्तरं जातमित्युच्यते।

इह तु यैवेष्टका गृहीत्वा कृष्यते, सैवाऽऽगच्छति, नेष्टकान्तराणि। संधिश्च लक्ष्यते। तेन नावयवसंस्यूतिरस्तीति गम्यते। तस्मान्नास्ति द्रव्यान्तरम्। तत्र, इष्टकाभिरग्निं चिनुत इति चयनमात्रमिष्टकाभिः कर्तव्यम्। न चयनमात्रेण कृतेन किंचिद्दृष्टमस्ति। तस्मादग्निनिधानार्थानामिष्टकानां चयनसमुदायोपलक्षितानामगम्यमाने विशेषे सर्वासामेव प्रोक्षणं विकर्षणं च कर्तव्यम्। पौर्णमासीवत्। यथा, य एवं

प्रतीष्टकं प्रोक्षणादि कर्तव्यम्। कुतः। व्यतिरिक्तस्यावयविनोऽभावात्। यत्र

विद्वान् पौर्णमासीं यजते, य एवं विद्वानमावास्यां यजत इति, आग्नेयादय एव क्रियन्ते, नार्थान्तरं किंचित् । एवमिहापीति ॥ २६ ॥

अग्नेर्वा स्याद्द्रव्यैकत्वादितरासां तदर्थत्वात् ॥ २७ ॥ सि०

[1] वाशब्दात्पक्षो विपरिवर्तते । नैतदस्ति । प्रतीष्टकं कर्तव्यमिति । कथं तर्हि । सकृदेवेति । तत एतद्वर्ण्यते, द्रव्यान्तरमिष्टकाभिः क्रियते । तत्राग्निर्निधातव्यः । तत्र चाग्निशब्दो वर्तत इति । कथम् । पारार्थ्येनेष्टकानां निर्देशात् । इष्टकाभिरग्निं चिनुते, इति तृतीयया विभक्त्या पा-

---

व्यतिरिक्तोऽवयव्यस्ति तत्रैकावयवाकर्षणेन कृत्स्नोऽवयव्याकृष्यते ॥ २९ ॥

पूर्वपक्षवादिनः प्रोक्षणमेवानर्थकम् । अथावयवव्यतिरिक्तेष्टकाऽस्ति, ततोऽग्निरपीष्यताम् । यदुक्तमेकेष्टकाकर्षणे न कृत्स्नः कृष्यत इति । तदुच्यते । यत्र यत्र द्रव्यान्तरबुद्धिर्भवति तत्र तत्र द्रव्यान्तरम् । यत्रैकस्मिन् कृष्यमाणे कृत्स्नोऽवयवी

---

[1] इत उत्तरं पूर्वपक्षग्रन्थः सिद्धान्तग्रन्थश्च कियाश्चित् लुप्त इति व्याख्यानानुरोधेनानुमीयते । परं तु लिखितेष्वप्यादर्शपुस्तकेषु नोपलभ्यते । अत आनुपूर्व्या तद्ग्रन्थान्वेषणे यत्नो विधेयः । अत्रैवं तन्त्ररत्नग्रन्थः । "इह त्वेकेष्टकाकर्षणेऽपि न द्वितीया कृष्यते । आकर्षणमेव ह्यवयविसद्भावे प्रमाणम् । तच्च दर्शितं भाष्ये । कथं तदभावे तत्सिद्धिः । तस्मादवयव्यभावादग्निशब्द इष्टकासमुदायवचनः । समुदायश्चामूर्तो न शक्यते प्रोक्षितुमिति तल्लक्षितानां प्रोक्षणं विधीयत इति प्रतीष्टकं कर्तव्यमिति । २६ ॥ अग्नेर्वा स्यात् ॥ 'इष्टकाभिरग्निं चिनुते' इति शब्दतस्तावदिष्टकानां तृतीयान्तानां पारार्थ्येनावगतत्वात्तदर्थं प्रोक्षणं न भवति । गुणानां च परार्थत्वादिति न्यायात् । किंतु द्वितीयासंयोगादग्न्यर्थं प्रोक्षणम् । अग्निशब्दश्च ज्वलनवचनोऽपि प्रोक्षणादिवाक्येषु तदाधारभूते स्थले लक्षणया वर्तत इति वेदितव्यम् । नन्वग्निशब्देन समुदायोऽभिधीयते, अवयव्यभावादित्युक्तम् । उच्यते । प्रत्यक्षेणेष्टकाव्यतिरिक्तोऽवयव्युपलभ्यते । न च कालान्तरे पुरुषान्तरेऽवस्थान्तरे वाऽविपर्यासाद्भ्रान्त इति शक्यते कल्पयितुम् । अथेष्टकाः पृथक्त्वानुपलम्भात्र तावद्व्यतिरिक्तोऽवयव्यस्ति । अव्यतिरेके तु स भावापन्नः । व्यतिरेकाव्यतिरेके तु विप्रतिषेधान्न संभवति । तस्मान्नावयवी विद्यत इत्युच्यते । तथा सति, इष्टकानामप्यहेतुत्व स्यादित्याह । अपि चाऽऽरम्भोऽयानवयवानपेक्ष्येष्टकाऽप्यवयविनी भवत्येव । तेन तद्वदग्निरप्यभ्युपगम्यतामित्याशङ्कां विवृणोति । अथोच्येत—इष्टका अपनीय स निदर्श्यतां यदि व्यतिरिक्तोऽस्ति । न तु स निदर्श्यते । तस्मादिष्टका एव परमार्थतः सन्तीति । परिहरति । एवं वर्ण्यमाने भवताऽऽत्मावयवव्यतिरिक्तेष्टका निदर्शयितव्या । न च भवताऽपि शक्यते निदर्शयितुम् । अपि चेष्टकानामवयवान्तरमेव तेषामप्यवयवा इतरेषामन्येऽवयवास्तेषामप्यन्ये । तेन तेन क्रमेणाऽऽपरमाणुभ्यो गमनात्परमाणुष्वेव प्रोक्षणमवतिष्ठते । न च ते शक्याः प्रोक्षितुम् । तस्मात्पूर्वपक्षवादिनः प्रोक्षणमेवानर्थकं स्यात् " इति । अत्र च लुप्तवार्तिकग्रन्थस्थान एवार्थप्रतिपत्तय उपयुक्तस्तन्त्ररत्नग्रन्थः प्रकाशित इति वेदितव्यम् ।

राध्र्यमिष्टकानामवगम्यते । यदि चयनमात्रमत्रोच्यते, तदिष्टकासंस्कारार्थमवगम्यते । तत्र द्वितीयया विभक्त्या संयोगः स्यात् । तृतीयया संयोगो बाध्येत । तस्मादिष्टकाभिरन्यत्क्रियते । तत्राग्निर्निधातव्यः । तदर्था इष्टकाश्रयणं चेति ।

आह । नन्वेतदुक्तं, तस्याभावादयमन्यः पक्षः परिगृह्यत इति । अत्रोच्यते । नाभावः । प्रत्यक्षा तत्रैकबुद्धिः । सा बह्वीष्विष्टकासु नावकल्पते । न चावयवसंधिर्दृश्यते, पुरीषच्छन्नानाम् । तस्मात्पक्वामसंयोगेऽप्येकबुद्धेरुत्पादादेकमिष्टकाभ्यो व्यतिरिक्तं द्रव्यमग्निनिधानार्थमस्ति । यदि वा, इष्टकासंस्युतिरप्येकबुद्धेरेवावगम्यते । यत्तु, एकाकर्षणे न कृत्स्नाकर्षणमिति । सत्यं, संस्यूनो तत्र विच्छेदः क्रियते । द्विविधानि हि द्रव्याणि, स्थावराणि जंगमानि च । तत्र स्थावरेषु विच्छेदो भवति । यथा वनस्पतौ पर्णे गृहीत्वा कृष्यमाणे न कृत्स्नः कृष्यते, स्थावरत्वात् । एवमिदमपि । स्थावरं हीदमग्निद्रव्यम् । तस्मात्सकृदेव मोक्षणं विकर्षणं च कर्तव्यमिति ॥ २७ ॥

चोदनासमुदायात्तु पौर्णमास्यां तथा स्यात् ॥ २८ ॥

अथ यदुक्तं, य एवं विद्वान् पौर्णमासीं यजते, य एवं विद्वानमावास्यां यजत इति । नात्राऽऽग्नेयादिभ्यः किंचिदर्थान्तरम् । तथेहापीति । उच्यते । युक्तं पौर्णमास्यां तथाभावः । चोदनासमुदायो हि तत्र कर्म । न च कर्मसाध्यं विद्यते । इह तु द्रव्यान्तरमस्तीत्युक्तम् । तस्माद्वैषम्यं पौर्णमास्येति ॥ २८ ॥

(द्वादशाहे, उत्तमाहवर्गे पत्नीसंयाजान्तत्वाधिकरणम् ॥ ८ ॥)

[८] पत्नीसंयाजान्तत्वं सर्वेषामविशेषात् ॥ २९ ॥ पू०

अस्त्यहर्गणः, द्वादशाहेन प्रजाकामं याजयेदिति । तत्र श्रूयते ।

कृष्यते, तत्र तथा दृष्टम् । यत्रैकस्मिन् कृष्यमाणे एकः कृष्यते, तत्रापि तथा दृष्टम् । न चैकस्मिन् कृष्यमाणे यस्मात्कृत्स्नः कृष्यते, तस्माद्द्रव्यान्तरम् । न च द्वितीये कृष्यमाणे द्रव्यान्तरं द्रव्यान्तरस्य कारणं, यत्र द्रव्यान्तरबुद्धिर्न विपर्येति ॥ २७ ॥

[२८ ॥]

' पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते ' इत्यविशेषश्रवणात्सर्वेषां पत्नीसंयाजान्तता ।

---

१ पक्वामसंयोगेऽपीति—अनेन ' पक्वामसंयोगे न द्रव्यान्तरम् ' इति गौतमीयवचनं निर्मूलत्वादप्रमाणमिति सूचितं ज्ञेयम् ।

पत्नीसंयाजान्तान्यहानि संतिष्ठन्त इति । तत्रायमर्थः सांशयिकः । किं सर्वेषामह्नां पत्नीसंयाजान्तत्वमुत प्रागुत्तमादिति । दशमं वर्जयित्वा संदेहः क्रियते । तस्य हि मानसान्तता वचनेनोक्ता । किं तावत्प्राप्तम् । सर्वेषामह्नामिति । कुतः । अविशेषात् । अविशेषेणोच्यते, पत्नीसंयाजान्तान्यहानि संतिष्ठन्त इति । न च कश्चिद्विशेष आश्रीयते । तस्मात्सर्वेषामिति ॥ २९ ॥

लिङ्गाद्वा प्रागुत्तमात् ॥ ३० ॥ सि०

वाशब्दः पक्षव्यावृत्तौ । प्रागुत्तमादह्नः पत्नीसंयाजान्तता स्यात् । कुतः । लिङ्गात् । लिङ्गं भवति । पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते, न बर्हिरनुप्रहरति, असंस्थितो हि तर्हि यज्ञ इति । यस्मिन्नहन्यसंस्थितो यज्ञस्तस्मिन् पत्नीसंयाजान्ततां दर्शयति । कथम् । हेत्वर्थेनासंस्था निर्दिश्यते । यस्मादिमान्यसंस्थितान्यहानि, तस्मादेषु पत्नीसंयाजान्ततेति । संस्थितिश्चान्त्येऽहनि । अपि च, येष्वहःसु पत्नीसंयाजान्तता, तेष्वसंस्था दृश्यते कीर्त्यमाना । तस्मादसंस्थायाः पत्नीसंयाजान्ततायाश्च सामानाधिकरण्यम् । असंस्थां च प्रागुत्तमादृद्दष्ट्वा प्रागुत्तमादेव पत्नीसंयाजान्ततामध्यवस्यामः ॥ ३० ॥

अनुवादो वा दीक्षा यथा नक्तं संस्थापनस्य ॥ ३१ ॥

वाशब्दः पक्षं व्यावर्तयति । नैतदस्ति । प्रागुत्तमात्पत्नीसंयाजान्तता स्यादिति । किं तर्हि । सर्वेषामविशेषात् । यदुक्तं, येषु पत्नीसंयाजान्तता, तेष्वसंस्था दृश्यते । तस्मादसंस्थायाः प्रागुत्तमादह्नां पत्नीसंयाजान्ततां नियच्छाम इति । नैतदेवम् । न हीदं विधिमूलं दर्शनम् ।

न तु गम्यते विशेषः । ' असंस्थितो हि तर्हि यज्ञः ' इति यत्रासंस्था तत्र पत्नीसंयाजान्तता । अन्त्ये त्वाहनि संतिष्ठते, तत्र पत्नीसंयाजान्तता न भवति । हेतुसामर्थ्यात् ।

नैतदेवम् । वचनात्सर्वेषां पत्नीसंयाजान्तता प्राप्यमाणा वचनान्तरेण विना कथं हस्त्या विशेषेऽवस्थापयितुम् । यदुक्तं हेतुसामर्थ्याद्यत्रासंस्था तत्र पत्नीसंयाजान्ततेति । उच्यते । हेतुवचनं पत्नीसंयाजान्ततावस्तुत्यर्थं भविष्यति । चिरेण संस्थामाऽोऽस्य स्तुतिः ॥ २९ ॥ [३० ॥

नान्यप्रमाणमूलम् । अतो मृगतृष्णारूपमेतद्दर्शनम् । यदप्यसंस्था हेतुरिति, तदपि न स्यात् । उक्तं हि—स्तुतिस्तु शब्दपूर्वत्वादिति । न च सामानाधिकरण्यमसंस्थापत्नीसंयाजान्ततयोः । पत्नीसंयाजान्तता सर्वेषामह्नां शब्देन गम्यते । असंस्था पुनर्न्यायेन प्रागुत्तमादह्नः । यदेतदसंस्थितो हि तर्हि यज्ञ इति । अर्थवाद एष पत्नीसंयाजान्ततास्तुत्यर्थः ।

तथा हि । असंस्थितो यज्ञश्चिरेण संस्थास्यत इत्यालोच्यते । यस्माच्चिरेण संस्थास्यते तस्मादवलुप्यतां, पत्नीसंयाजान्तान्यहानि भवन्त्विति । संतिष्ठमानेष्वेवाहःसु, असंस्थावचनं पत्नीसंयाजान्ततापशंसार्थम् । संस्थावन्ति हि तान्यहानि । अवभृथादय एषां शेषाः पदार्थाः करिष्यन्ते । यथा, दीक्षोन्मोचनवचनं नक्तं संस्थापनस्यार्थवादः । एवमेतद्द्रष्टव्यम् । वरुणपाशाभ्यां वा एषोऽभिधीयते यो दीक्षितः । अहोरात्रे वै वरुणपाशौ । यद्दिवा संस्थापयेदनुन्मुक्तो वरुणपाशाभ्यां स्यात् । नक्तं संस्थाप्यो वरुणपाशाभ्यामेवोन्मुच्यते, आत्मनोऽहिंसाया इति । अनुन्मुक्तः स वरुणपाशाभ्यां, न तावद्दीक्षया मुच्यते । अवभृथो हि दीक्षोन्मोचनार्थः । अपवोच्यते । वरुणपाशाभ्यामिव निर्मुच्यत इति बहवो नियमास्तदानीं विसृज्यन्ते, यानालोच्य एष वादो भवति । एवमिहापि चिरेण संस्थामालोच्यासंस्थितवचनं भवतीति ॥ ३१ ॥

स्याद्वाऽनारभ्यविधानादन्ते लिङ्गविरोधात् ॥ ३२ ॥

वाशब्दात्पक्षो विपरिवर्तते । भवेद्वा प्रागुत्तमात्पत्नीसंयाजान्तता । न ह्यारभ्योत्तममहः, एष विधीयते । कथं तर्हि । सामान्येन, पत्नीसंयाजान्तान्यहानि भवन्तीति । तत्रान्ते लिङ्गविरोधो भवति । का पुनर्न्यायेन प्राप्तिरिति । पत्नीसंयाजान्तान्यहानि संतिष्ठन्त इति, नेत-

---

२१ ॥]

भावयेत्प्रजाः । केन द्वादशाहसंज्ञकेन । तत्र, 'संख्यया कर्मभेदः' इत्यनेन न्यायेन द्वादश यागा एते । अहःशब्दो यागसामानाधिकरण्यात्कर्मैह भवीति । प्रकृतो चानेनाहःशब्देनोपात्ताद्दिहारियोजनपर्यन्तो यागः परिच्छिन्नः । इहाप्येवं द्रष्टव्यम् । तत्र द्वादश यागाः सह फलेन चोदितत्वात्सह कर्तव्याः । तेषामग्नीषो-

---

१ (अ० १ पा० २ अ० ३ सू० २०) । २ (अ० २ पा० २ अ० ५ सू० २१) ।

दुक्तं भवति, शिष्टमवक्लृप्यत इति । संतिष्ठन्ते नानुष्ठीयन्त इति । कर्तृव्यापार एषूपरमतीति । तेषु सह क्रियमाणेष्वहःसु, अवश्यं कस्मिंश्चित्पदार्थेऽवस्थायावश्यमपरस्याह्नः पदार्था अनुष्ठातव्याः । तत्रानियमे प्राप्ते पत्नीसंयाजान्ते संस्थाप्यमिति नियम्यते । तस्यावस्थानस्यैतत्प्रयोजनं, कथमहरन्तरस्य पदार्थानुष्ठानेन यौगपद्यमनुगृह्येतेति । एतद्धि दृष्टमवस्थानकार्यम् । यस्मिन्नैतद्दृष्टं, न शक्यं कल्पयितुं तत्रादृष्टम् । तत्र न पत्नीसंयाजान्तता । तथान्त्यस्य प्रयोजनं न विद्यते । तस्मात्प्रागन्त्यात्पत्नीसंयाजान्ततेति न्यायेन प्राप्ते लिङ्गदर्शनम्, असंस्थितो हि तर्हि यज्ञ इति ॥ ३२ ॥

(सामिधेन्या त्रिरभ्यासस्य प्रथमोत्तमस्थानधर्मत्वाधिकरणम् ॥ ९ ॥)

[९] अभ्यासः सामिधेनीनां प्राथम्यात्स्थानधर्मः स्यात् ॥ ३३ ॥ सि०

स्तो दर्शपूर्णमासौ । तत्र सामिधेनीः प्रकृत्योच्यते, त्रिः प्रथमामन्वाह, त्रिरुत्तमामन्वाहेति । तत्रैषोऽर्थः सांशयिकः । किम् ऋग्धर्म एषः, यत्र तत्रस्था, प्र वो वाजा त्रिरभ्यसितव्या, उत स्थानधर्मः, याऽन्याऽपि प्रथममुच्यते सा त्रिरभ्यसितव्येति । कुतः संशयः । उभयथोपपत्तेः । यद्येवमभिसंबन्धः क्रियते, याऽसावुच्चारितानां सामिधेनीनां प्रथममुच्चारिता, सा त्रिरभ्यसितव्येति । ततः, प्र वो वाजाया ऋचो धर्मः । अथैवं विज्ञायते, प्राथम्यसंयुक्तं त्रिर्ब्रूयादिति, ततो वचनस्य स्थानधर्मता ।

भीदाद्येतिकर्तव्यता साऽगृह्यमाणविशेषत्वात्तन्त्रेण कर्तव्या । अवभृथादीन्यपि तन्त्रेणैव । ये संनिपत्योपकारकास्त आवर्तन्ते । सहप्रयोगात्कस्मिंश्चिदनियमेनावस्थाने प्राप्ते पत्नीसंयाजान्तता नियम्यते । तत्रान्त्य उत्तरस्य यागस्याभावादवस्थानं नास्त्यनियमेन । अनियमस्याभावान्नियमोऽपि नास्ति । न चैतद्वाक्यं क्वचिन्नियमपरं, क्वचिदपूर्वविधिपरम् । विषयाभेदात् । अपि च, यस्य नियमार्थं तस्य दृष्टोऽर्थः । यस्यावस्थानस्यानारादुपकारकत्वाददृष्टोऽर्थः । तस्मात्प्रागुत्तमात्पत्नीसंयाजान्तता नियम्यते ॥ ३२ ॥

---

१ संस्थाप्यमिति—पा० । २ उच्चरितानां—पा० । ३ संनिपत्योपकारका इति—इदं च प्रदर्शनमात्रम्, सवनीयादीनामप्यारादुपकारकाणामप्युपलक्षणं ह्येयम् ।

किं तावत्प्राप्तम्। ऋचो धर्म इति। कुतः। प्राथम्यस्य व्यक्त्या संबन्धात्। व्यक्तेरभ्यासेन। कथमवगम्यते। स्त्रीलिङ्गनिर्देशात्। व्यक्तिविशेषो हि स्त्री नाम। यदि तद्विशेषणं प्राथम्यं स्यात्ततो लिङ्गविशेषनिर्देशोऽवकल्पते। साऽपि स्त्री, अभ्यासेन संबध्यते। अथ प्रथममनुब्रुवता त्रिरभ्यसितव्यमिति, ततो व्यक्तिविशेषो न विवक्ष्येत। तत्र स्त्रीलिङ्गविशेषनिर्देशो नोपपद्यते। अपि च, वाक्यभेदः प्रसज्येत। प्रथममुक्तं त्रिरभ्यसितव्यं, प्रथममुक्ता ऋक् त्रिरभ्यसितव्येति। मत्पक्षे पुनः प्राथम्यलक्षिताया ऋचो धर्म उच्यते। तत्रैकार्थविधाने न भवेद्वाक्यभेदः। अपि च श्रुत्या प्राथम्येन स्त्री संबध्यते। वाक्येनाभ्यासः। तस्मादृग्धर्मो यत्र तत्रस्था, स यो वाजा त्रिरभ्यसितव्येति।

एवं प्राप्ते, ब्रूमः। योऽयं सामिधेनीनां प्रथमायास्त्रिरभ्यास उच्यते स प्रथमस्थाननिमित्तो धर्मो, न ऋचः कस्याश्चिज्जातिनिमित्तः। कुतः। न हि कृत्स्नेऽपि ऋग्वेदे प्रथमा नाम काचिदृग् विद्यते, या त्रिरभ्यस्येत। तत्र प्राथम्यमृग्लक्षणार्थं स्यात्। इतरस्मिन् पक्षे श्रुतिर्न लक्षणा। श्रुतिश्च ज्यायसी लक्षणायाः। तस्मादस्मत्पक्षः। अथ यदुक्तं, स्त्रीलिङ्गसंबन्धादस्मत्पक्ष एव श्रुतिः। वाक्यं च न भिद्यते। स्त्रीलिङ्गोपपत्तिश्चेति।

अत्रोच्यते। गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीत्यविशेष्यमाणायामपि व्यक्तौ यदवश्यं प्राप्तं लिङ्गं, तदाश्रयभूतं गुणस्य भवति। अविधित्सितेऽपि तस्मिँल्लिङ्गविशेषनिर्देशोऽनुवादभूतो भवत्येव। यथा, शुक्लः पुमान्, शुक्ला स्त्री, शुक्लं नपुंसकम्। शुक्ल एकः, शुक्लौ द्वौ, शुक्ला बहव इति। शुक्लां शाटीमानयेति। यद्यपि शाट्याद्यानयनं न विधीयते, शुक्लसंबन्धमात्रविधित्सा भवति, न तत्र लिङ्गेन विशेषणं क्रियते। तथाऽप्यनुवादभूतः स्त्रीलिङ्गनिर्देशो भवत्येव, शुक्लामानयेति। अनुवादभूतत्वाच्च न वाक्यभेदो भविष्यति। एवं च सति, यद्यपि प्राथम्यस्य स्त्रीलिङ्गसंबन्धः श्रौतस्तथाऽपि प्राथम्यस्यैवाभ्यासेन संबन्धो न लिङ्गस्य। यदि लिङ्गस्यैतेन संबन्धोऽभिधीयते, प्राथम्यस्यानुवादता कल्प्येत। प्राथम्यसंबन्धेऽप्यभिधीयमाने वाक्यं भिद्येत।

अपि च, नैवात्र विवदितव्यम् । प्रातिपदिकविशेषणं हि स्त्रीशब्दः । स्त्रियां यत्प्रातिपदिकं वर्तते, तस्माट्टाबादय इति । न विशेषणस्य पदान्तरेण संबन्धो भवति । यथा राजपुरुषो गच्छतीति । यदा तु प्राथम्यस्याभ्यासेन संबन्धः, तत्र प्राप्तमनूद्यते स्त्रीत्वम् । यानि सामिधेनीषु वचनानि, ऋचस्ताः । स्त्रीलिङ्गश्च ऋक्शब्दः । तत्र यत्प्रथमं वचनं, तस्याऽऽश्रय ऋक् । गुणवचनानां च शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीत्यविशेषितायामप्यृचि स्त्रीलिङ्गं भविष्यतीति । यत्प्रथमवचनं, तत्त्रिराहेति । स्त्री च सा ऋक् सामिधेनी । तस्मात्, त्रिः प्रथमामन्वाहेति प्राप्तस्य लिङ्गस्यानुवादः । त्रिः प्रथमामन्वाह, त्रिरुत्तमां, ताः पञ्चदश संपद्यन्ते, इति पञ्चदशानां सामिधेनीनां संपत्तये त्रिर्वचनमुच्यमानं परिपूर्णाया ऋचो भवति, न ऋगवयवस्य । परिपूर्णा च समिन्धनवती, न ऋगवयवः । तस्मात्प्राप्तानुवादो लिङ्गस्येति प्राथम्यस्य धर्मो न ऋचः ॥ ३३ ॥

(दर्शपूर्णमासयोरन्वारम्भणीयायाः सकृदनुष्ठानाधिकरणम् ॥ १० ॥)

[१०] इष्ट्यावृत्तौ प्रयाजवदावर्त्तेताऽऽरम्भणीया ॥ ३४ ॥ पू०

स्तो दर्शपूर्णमासौ, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तत्राऽऽरम्भणीयेष्टिः समाम्नाता । आग्नावैष्णवमेकादशकपालं निर्वपेत्, सरस्वत्यै चरुं, सरस्वते द्वादशकपालम्, अग्नये भगिनेऽष्टाकपालं निर्वपेद्यः कामयेतान्नादः स्यामिति । नित्यवदेके भगिनमामनन्ति । आवृत्तिश्च दर्शपूर्णमासयोः श्रूयते, यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति । तत्रेष्ट्यावृत्तौ संदेहः । किमारम्भणीयाऽप्यावर्तते, नेति । किं प्राप्तम् । आवर्तेतेति । असकृदेव कर्तव्येति । कुतः । एवं प्रयोगवचनोऽनुगृहीतो भविष्यति । प्रयाजवत् । यथाऽङ्गभूताः प्रयाजा आवर्तन्त एवमङ्गभूताऽऽरम्भणीयाऽप्यावर्तेत ॥ ३४ ॥

. [३३ ॥]

'अपि वाऽप्येकदेशे स्यात्' इति यावज्जीविके प्रयाजादीतिकर्तव्यता भवतीत्युक्तम् । प्रथमपदार्थद्वारेण श्रूयमाणा दर्शपूर्णमासाङ्गमारम्भणीया । सा किं प्रतिप्रयोगं कर्तव्योत सर्वप्रयोगे सकृदिति । किं प्राप्तम् । प्रतिप्रयोगं कर्तव्येति । कुतः । इतिकर्तव्यता हि प्रयोगाङ्गम् । प्रयोगाश्च भेदैः । तस्मादावर्तते ॥ ३४ ॥

१ (अ० १ पा० ३ अ० १ सू० २)। २ भेद इति—आवृत्तिरित्यर्थः ।

सकृद्वाऽऽरम्भसंयोगादेकः पुनरारम्भो याव-
ज्जीवप्रयोगात् ॥ ३५ ॥ सि०

वाशब्दः पक्षं व्यावर्तयति । नैतदस्ति, यदुक्तमारम्भणीयाऽऽवर्तेतेति । सकृदेव कर्तव्या । कुतः । आरम्भसंयोगात् । दर्शपूर्णमासयोरारम्भेण संयुज्यते । साधारणश्च सर्वेषां प्रयोगाणामारम्भः । कथम् । अग्नीनाधाय सर्वः संकल्पयति । पर्वणि पर्वणि मया दर्शपूर्णमासौ कर्तव्याविति । एवं चाध्यवसाय दर्शपूर्णमासौ कर्तव्यावित्यारम्भणीया क्रियते । एष एवास्याऽऽरम्भो यदध्यवसानं नाम । तच्च साधारणं सर्वेषां प्रयोगाणाम् । यावज्जीवप्रयोगात् । अथापि प्रथमं प्रवर्तनमारम्भस्तथाऽपि प्रथमप्रवृत्तेन सर्वे प्रयोगाः कृता भवन्ति । तस्मात्सकृदा·

सकृद्वा कर्तव्या । कुतः । आधानं कृत्वा सर्वः संकल्पयति, मया यावज्जीवं दर्शपूर्णमासौ कर्तव्यावागत आगते काले । स च संकल्पः सर्वेषां प्रयोगाणामगृह्य·माणविशेषत्वात्साधारणः । संकल्पश्च पूर्वावस्थां बाधमानोऽध्यवसानम् । अध्यवसानं च पदार्थः । स च सर्वेषां साधारण इत्युक्तम् । तस्मात्सकृत्कर्तव्या । अत्र ग्रन्थः । अथापि प्रथमं प्रवर्तनमारम्भस्तथाऽप्यारम्भणीयाप्रवृत्तेन सर्वे प्रयोगाः कृता भवन्तीति ।

नैतद्युक्तम् । कथम् । कालो निमित्तम् । स कर्म प्रयोजयति । प्राक् पौर्णमासकालात्कर्म न प्रयुज्यते । निमित्ताभावात् । तच्च निमित्तमेकमेव प्रयोगं प्रयोजयति । पुरुषश्च पूर्वावस्थामौदासीन्यं चोज्झित्वा ततः संकल्पमध्यवसानं करोति । अध्यवसानं संकल्पो वैकस्यैव प्रयोगस्य, न द्वितीयादेः । निमित्ताभावात् । अपि चेतिकर्तव्यता प्रयोगेण प्रयुज्यते, न कर्मणा । प्रयोगाभेदाच्च भेदस्तस्याः । यदि च कर्मणा प्रयुज्येत, तथा सति प्रयाजादीनामपि कर्मैकत्वात्सकृदेव प्रयोगः स्यात् । न चैतदिष्टम् । यदुक्तमाधानं कृत्वा सर्वः संकल्पयति, पर्वणि पर्वणि मया दर्शपूर्णमासौ कर्तव्याविति । स च संकल्पः सर्वप्रयोगाणामगृह्यमाणविशेषत्वादिति ।

तत्रोच्यते । सर्वप्रयोगाणां संकल्प एव न प्राप्नोति । निमित्ताभावादित्युक्तम् । नन्वाधानानन्तरं सर्वसाधारण एव संकल्पो भवति । विद्वांश्चाधिक्रियते । स जानाति,

---

१ कर्तव्यता-पा० । २ पूर्वावस्थामिति-औदासीन्यरूपामवस्थामित्यर्थः । ३ पदार्थः-आरम्भपदार्थः । ४ भाष्यकारीयं वर्णकान्तरं पूर्ववर्णकेऽपरितोषादिति दर्शयितुं प्रथमवर्णकं तावद्दूषयति—नैतद्युक्तमित्यादिना । ५ तत इति—निमित्तवशादेवेत्यर्थः । ६ सर्वप्रयोगाणामिति—अङ्गमिति शेषः । कुतः । अगृह्यमाणविशेषत्वादित्यर्थः । ७ नन्विति शङ्कां समापत्ते—विद्वांश्चाधिक्रियत इत्यादिना ।

रम्भणीया कर्तव्येति ॥ ३८ ॥

एवं वा—

इष्टयावृत्तौ प्रयाजवदावर्तेताऽऽरम्भणीया ॥ ३४ ॥ पू०

यस्तु प्रथमः पदार्थ आरम्भ इति, तत्रैव संशयः । किं दर्शपूर्णमासयोरारभ्यमाणयोरारम्भणीया प्रथमं पदार्थं सम्पन्नं करोति, उत पुरुषस्याऽऽरभमाणस्य प्रथमं दर्शपूर्णमासयोः प्रवर्तमानस्याऽऽरम्भणीया कर्तारमारम्भणयोग्यं करोति । किं प्राप्तम् । दर्शपूर्णमासयोः प्रकरणान्तर्योरारम्भे स्यात् । पुरुषसंबन्धे फलं कल्पयितव्यम् । तस्मात् दर्शपूर्णमासारम्भे । एवं चेदारम्भभेदादिष्टयावृत्तौ प्रत्यारम्भं स्यात् । यथा प्रयोगावृत्तौ प्रयाजाः ॥ ३४ ॥

सकृद्वाऽऽरम्भसंयोगादेकः पुनरारम्भो यावज्जीवप्रयोगात् ॥ ३५ ॥ सि०

सकृद्वा भवितुमर्हति । कुतः । पुरुषारम्भसंयोगात् । पुरुषे दर्शपूर्णमासावारभमाणे विधीयते । कुतः । निर्वपेदिति हि श्रुत्या कर्तृसंबन्धः क्रियते । तत्र पुरुषप्रयत्नवचनं विवक्षितस्वार्थं भवति । इतरथा पदार्थमात्रे विधित्सिते कर्तुः प्रयत्नवचनमविवक्षितं स्यात् । प्रयोगवचनमात्रमेवानूद्यते । यत्तु, कर्तृसंबन्धे फलं कल्पयितव्यम् । तत्र कल्पयिष्यते ।

नित्यानि कर्माणि मया कर्तव्यानि, काम्यानि फलार्थेनेति । योऽस्याऽऽधानादुत्तरकालं, स संकल्प इव, न प्रयोगाङ्गम् । तस्मादिदमशोभनम् । अतोऽन्यत्क्रियते ॥ ३९ ॥

'दर्शपूर्णमासावारप्स्यमानः' इति ध्यानमारम्भकर्तारमभिधत्ते । तत्र संदेहः । किमारम्भो दर्शपूर्णमासाद्यं पदार्थमभिधत्ते, किं वाऽप्रवृत्तस्याऽऽद्यं प्रवर्तनम् । पूर्वपक्षवादी मन्यते, यद्ययं कर्तारमभिधत्ते, तथा सति फलकल्पना प्राप्नोति । यच्चवादारम्भणीया न पुरुषार्था । किं तर्हि । क्रत्वर्था । तथा च प्रतिप्रयोगमावर्तेत ॥ ३४ ॥ सिद्धान्तस्तु । दर्शपूर्णमासारम्भयोग्यं पुरुषं कुर्वती क्रतुना गृह्यते । अपि च, यः ध्यानया पुरुष उपात्तस्तस्य विधिरिवर्तमानस्य निर्वपेदित्यारम्भणीया तदर्था श्रुत्या प्रतिपाद्यते । इतरथा ध्यानमनर्थकः स्यात् । निर्वपेदित्यनुच्चारितेऽप्यन्वारम्भणीया

१ एवं तावद्वृत्तिकारमतेनाधिकरणमुपवर्ण्य स्वमतेनाधिकरणं प्रकारान्तरेणोपवर्णयति—एवं वेत्यादिना । २ निर्वपेदित्यनुच्चरितेऽपीति—'अन्वारम्भणीयमिष्टिं निर्वपेत्' इत्येव वदेत्, अनुच्चरितेऽपि 'दर्शपूर्णमासावारप्स्यमान' इति शब्दे भवत्येवाऽऽरम्भणीया क्रत्वर्थेत्यर्थः ।

कृतारम्भणीयाकः पुरुषः प्रयोगवचनेन ग्रहीष्यते । एवं चेदेकस्मिन्नेवाऽऽरम्भे कृतारम्भणीयाके कृते पुरुषे तन्त्रप्रयोगात्, यावज्जीवं प्रयोगे कृतारम्भणीयाकः पुरुषो भवति । प्रथमं दर्शपूर्णमासावारभमाणः कृतारम्भणीयाको जातः । द्वितीयादिष्वपि प्रयोगेषु दर्शपूर्णमासावारप्स्यमानः कृतारम्भणीयाको जात इति योग्य एव भविष्यति ।

अथोच्यते । समानेऽहनि, आरप्स्यमान इति भवति । न च द्वितीयादिषु प्रयोगेषु समानेऽहनि कृतारम्भणीयाकोऽसाविति । अत्रोच्यते ।

क्रत्वर्था भवत्येव । महाप्रयोगवचने यो भावनावचनस्तेन विधानं भविष्यति । सा च बहिःप्रयोगात्क्रियमाणा पुरुषमारम्भयोग्यं करोति । तस्य[1] चैकत्वान्न ज्ञायतेऽस्यायं प्रयोगस्य योग्योऽस्य नेति । अगृह्यमाणविशेषत्वात्सर्वप्रयोगाणाम् । यदि तन्त्रमध्ये क्रियते, तथा सति यस्य तन्त्रं तस्यैव योग्यं करोति, नान्यस्येति । ननु लृटः समानेऽहन्युत्पद्यमानत्वाद्यस्यैव समानेऽहनि प्रयोगस्याऽऽरम्भणीया क्रियते, तस्यैव पुरुषं योग्यं करोतीति गृह्यते विशेषः ।

उच्यते । द्वितीयादिष्वपि प्रयोगेषु समान एवाहनि दर्शपूर्णमासावारप्स्यमानोऽसौ कृतारम्भणीयाको जात इति योग्य एव भविष्यतीत्यनेन निराकरोति[2] । समानेऽहनि[3] लृडुत्पद्यत इत्येतन्न युज्यते । भविष्यत्कालसामान्ये लृडुत्पद्यने । ननु लुटाऽनद्यतनकालेऽनेनायं बाध्यते । नैतद्युक्तम् । यदि लुडनद्यतने विधीयमानो लृटमबाधमान आत्मानं न प्रतिलभते ततो बाधेतापि । अबाधमानोऽप्यात्मानं लभते । तस्मान्न बाधते । तस्माल्लृडनद्यतनेऽद्यतने च भविष्यति काले भवति । लुट्प्रत्ययस्त्वनद्यतन एव ।

न च ' सोमेन यक्ष्यमाणः ' इत्यनेनैतत्तुल्यम् । यत्राऽऽधानं कृत्वा सोमेनान्येद्युर्यक्ष्यते, तत्र ' सोमेन यक्ष्यमाणोऽग्निमादधीत ' इति यद्येतदानन्तर्यं न कुर्यात्तदाऽनर्थकमेव स्यात् । तस्मादनेनाऽऽनन्तर्यं विधीयते । यद्यपि लृट् सामान्येनोत्पन्नस्तथाऽपि सोमाधानानन्तर्यसामर्थ्यादद्यतने कल्प्यते, प्रमाणान्तरवशात् । इह तु नास्ति प्रमाणं, येनाद्यतने कल्प्येत । तस्मात्सामान्येनोत्पद्यते । अथवा, दर्शपूर्णमासौ निमित्तभूतौ श्रूयेते आरम्भसंयुक्तौ । तत्र समानेऽहनि दर्शपूर्णमासावारम्भणीयासंयुक्तौ

---

1 तस्य चैकत्वादिति—आरम्भस्यैकत्वादित्यर्थः । 2 निराकरोति—भाष्यकार इत्यर्थः ।
3 स्वयमन्यथा चोद्यपरिहारमाह—समानेऽहनीत्यादिना ।

द्वितीयादिष्वपि प्रयोगेषु समान एवाहनि दर्शपूर्णमासावारभ्यमाणोऽसौ कृतारम्भणीयाको जात इति योग्य एव भविष्यति ॥ ३५ ॥

(निर्वापमन्त्रे सवित्रादिपदानामसमवेतार्थानां विकृतावनूहाधिकरणम् ॥११॥)

[११] अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्तत्राचोदितमप्राप्तं चोदिताभिधानात् ॥ ३६ ॥ सि०

स्तो दर्शपूर्णमासौ । तत्र निर्वापमन्त्रः । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति । तत्रैषोऽर्थः सांशयिकः । किं सवित्रश्विपूषशब्दानां विकृतावूह उतानूह इति । तत एतद्यावत्परीक्ष्यते । कर्मणि समवेतमर्थमेते शब्दा अभिदधति, उतासमवेतमिति । यदि समवेतम् । ऊहिष्यन्ते । अथासमवेतम् । अविकृताः प्रयोक्ष्यन्ते । तदुभयमपि सह परीक्ष्यते ।

किं तावत्प्रः प्रतिभाति । तत्र समवेतमभिवदन्तीति । कुतः । एतद्धि मन्त्रपदानां दृष्टं प्रयोजनं, यत्समवेतमर्थं प्रकाशयन्तीति । तत्रासमवेतार्थप्रकाशने न किंचिदपि दृष्टं प्रयोजनम् । समवेतानां तु प्रकाशने दृष्टमस्ति । तद्यदि समवेताभिधायिन एते शब्दास्ततः प्रयोजनवन्तः । कथं

कर्तव्यो । एवमारम्भद्वारेणाऽऽरम्भणीया प्रथमः प्रयोगोऽपेक्षते । द्वितीयादयश्चैवमेव । तत्र बहिःप्रयोगात्क्रियमाणाया योऽसौ दर्शपूर्णमासारम्भाद्यतनकालः स सर्वेषु विद्यते । किं दर्शपूर्णमासावारभमाणेनान्वारम्भणीया न कृता, येन पुनः क्रियेत । न च प्रयोगोऽद्यतनेनापेक्षितः, दर्शपूर्णमासशब्दश्रवणात् । तस्मात्सकृत्कर्तव्या । एवं च काम्ये कचिन्नैव कर्तव्या, प्रयोगमात्रभेदात्, कर्मणो भेदाभावात् ॥ ३५ ॥

उपोद्घातप्रसक्तानुप्रसक्तादि वृत्तम् । इहेदानीमूहश्चिन्त्यते । किं सवित्रादिशब्दा विकृतावूहितव्या उत नेति । ऊहितव्याः । कुतः । सवित्रादिशब्दा अर्थप्रकाशका यदि श्रुतिवृत्तास्तनो दृष्टार्थाः स्युः । प्रकाशनद्वारेण मन्त्रस्यापेक्षितत्वात् । यदि लक्षणयाऽभिमभिवदन्ति ततो दृष्टार्था भवन्ति । अथवा सवित्रादिनिर्मुक्त्य एवार्थः प्रत्याय्यते, तथाऽपि समवेतवचनाः । कथम् । भिन्नत्वान्मन्त्राणाम् । मान्त्रवर्णिको देवताविधिर्दर्शपूर्णमासयोरग्न्यादिभिर्विकल्पितो भविष्यति ।

१ काम्ये—दर्शपूर्णमासप्रयोग इति शेषः । २ ऊहश्चिन्त्यत इति—साक्षादिति शेषः । ३ अर्थप्रकाशका इति—मन्त्राधिकरणन्यायादिति शेषः । ४ अग्नेरिवत्यादिदिष्ट—कर्मेति शेषः । ५ यदि लक्षणया सवित्रादिपदैरग्नि० प्रकाश्यते, तर्हि सौर्यादिविकृतावपि लक्षणयैव सूर्यादिप्रकाशनोपपत्तेरूहप्रसक्तो न लिङ्गेदिरपिन्द्रस्य पशान्तरमाह—अथवेत्यादिना ।

पुनः समवेताभिधायिनः । यदि नाम सवित्रादयः शब्दा अग्न्यादीनां वाचका भवेयुः । यदि वा सवित्रादयो देवताविशेषा दर्शपूर्णमासयोः स्युः । तन्मन्त्रपदानामदृष्टार्थता मा भूदित्यन्यतरदध्यवसीयते, मान्त्रवर्णिको वा देवताविधिः । सवित्रादयो वा शब्दा अग्न्यादीनां वाचका भवेयुः । तस्मादर्थवत्त्वादन्यतरदध्यवसेयम् ।

अत्राऽऽह । ननु, अग्नये जुष्टमित्यत्रावयवभूताः सवित्रादयोऽग्न्यादीनां वचना अपि सन्तोऽग्न्यादिभिः प्रकाशिताया देवताया न किंचिदप्यधिकं कुर्युः । नो खल्वपि सवित्रादिवचना एव मान्त्रवर्णिकाः शक्नुवन्त्युपकर्तुम् । अत्रोच्यते । पृथग्वाक्यान्येतानि भविष्यन्ति । तेषां जुष्टं निर्वपामीति साधारणोऽनुषङ्गः । तानि वाक्यानि दर्शपूर्णमासयोर्गुणभूतानि । यद्येतद्देवत्यान्यत्र हवींषि विद्यन्ते, ततोऽवकल्पन्त इत्यर्थापत्त्या मान्त्रवर्णिक्यो देवता विधीयन्ते । अग्न्यादिवचना वा सवित्रादीनाम् । पृथग्वाक्यानि वाऽश्रितावयवेन वैकल्पिकानीति ।

एवं प्राप्ते, ब्रूमः । नेवमादीन्यूहितव्यानीति । अचोदित ऊहो न प्राप्नोति । चोदिताभिधानान्मन्त्रस्येति । तत एतद्रूपर्थते । असमवेताभिधायिनः सवित्रादय इति । कथम् । न ह्यत्र सवित्रादिदेवत्यं कर्म चोद्यते । न चाग्न्यादीनामर्थेषु सवित्रादयः शब्दाः प्रसिद्धाः अत्राऽऽह । नन्वर्थापत्त्याऽन्यतरदध्यवसीयेतेत्युक्तम् । सति, एतद्देवत्ये कर्मणि सवित्रादिवाक्यान्युपपद्यन्ते । अग्निवचनत्वे वा सति । या हविषो देवता, सा मन्त्रवचनेन प्रकाशयितव्या । सवित्रादयश्च शब्दा निर्वापवाक्ये प्रकाशनार्थाः । ते हविर्देवता प्रकाशयन्त उपपद्यन्ते, नान्यथेति । अग्न्यादयश्च हविर्देवता इति तद्वचना इत्यध्यवसीयते ।

अत्र केचिदाहुः—मान्त्रवर्णिकेन देवताविधानेन न शक्यन्तेऽग्न्यादयो देवता बाधितुं, विप्रकृष्टत्वात् । तस्मात्सवित्रादिमन्त्रवर्णैर्यागान्तराणि कल्प्यन्ते । तेषु मुख्याश्च समवेतवचनाश्चेति । नैतद्युक्तम् । एवं सति यागान्तरत्वात्तत्रानुहः । तत्र चोदकेनातिदिष्टानामप्यविकारः स्यात् । यथा प्रयाजानाम् । तत्र पूर्वपक्षोत्तरपक्षयोः सह न कश्चिद्विशेषः । तस्मात्स एव पक्षो यत्रोहः सिध्यति ।

एवं प्राप्ते—लोके सवित्रादयोऽग्न्यादिवचना न प्रसिद्धाः । न च गुणेनाग्न्यादीनभिधातुं समर्थाः । यत्र परशब्दसामानाधिकरण्यं तत्र गुणेन परशब्दः परत्र

---

१ गुणेनेति—गुणद्रव्याश्रयणेनेत्यर्थः । २ गुणेनेति—निमित्तेनेत्यर्थः ।

अत्रोच्यते । यद्यकल्प्यमान आनर्थक्यमेषां स्यात्ततोऽन्यतरत्कल्प्येत । अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावो भवतीति । न त्वेवमकल्प्यमानेऽप्यानर्थक्यम् । तस्मान्नान्यतरस्यापि कल्पने किंचिदस्ति प्रमाणम् । न च चोद्यन्त एतच्छब्दिका देवताः । तत्राचोदितप्रमाणमूहं, चोदिताभिधानात् ॥ ३६ ॥

अथ यदुक्तं, प्रत्यायकेन शब्देन प्रकाश्यन्तेऽत्र देवताः । तत्राप्यश्रूयमाणा प्रकाशने न किंचिदस्ति प्रयोजनमिति । तत्परिहर्तव्यम् । अत्रोच्यते—

ततश्चावचनं तेषामितरार्थं प्रयुज्यते ॥ ३७ ॥

ततश्च—तेन कारणेन, अश्रुतानां वचनं न क्रियते सवित्रादिभिः शब्दैः । केन तर्हि कारणेन क्रियते । इतरार्थं प्रयुज्यते । निर्वापस्तुत्यर्थम् । देवस्य सवितुः प्रसवे—देवेन सवित्रा यजमानेन प्रसूते, उदिते वा सवितरि । अश्विनोर्बाहुभ्या—परिक्रयमभिप्रेत्य यजमानयोर्दम्पत्योर्बाहुभ्याम् । आश्विनौ हि तौ—अग्न्याधेयेऽश्वदानेन, अश्विवन्तौ वा तद्यज्ञफलमश्नुवाते । तद्बाहू इति स्वौ बाहू व्यपदिशति । देवताध्वर्य्वोर्वाऽश्विनोरेतौ बाहू इति । पूषण तु यजमानमेव मन्यते पुष्णातेः । एवं सर्वे निर्वापविशेषप्रकाशनार्थाः ।

अत्राऽऽह । कस्मान्नोत्कृष्टाः सवित्रादयः शब्दाः प्रकरणान्तरे सवितारमश्विनौ पूषणं चाभिवदन्ति । लिङ्गेन तत उत्कृष्यमाणाः प्रकरणं बाधितुमर्हन्ति । अत्रोच्यते । सवित्रादयः परविशेषणं विभक्तिश्रुत्या क्रियन्ते । प्रातिपदिकार्थस्तव्यतिरिक्त इति गम्यते । तत्र लिङ्गं श्रुत्या बाध्यते । लिङ्गं हि प्रातिपदिकार्थप्रकाशनं देवतार्थमिति कृत्वा, इह देवताभावाद्यत्र देवता तत्रोत्कर्षति । विभक्तिश्रुतिस्तु प्रातिपदिकार्थं

पदार्थान्तरविशेषणं ज्ञापयति। तच्चेहास्ति पदान्तरम्। श्रुतिश्च लिङ्गाद्बलीयसी। तस्मान्नोत्कर्षः।

आह। यदा सवित्रादयो यजमानपराः, तदा सत्रे कथमनूह इति। उच्यते। जोषणार्थमिदं वाक्यं, नानुज्ञापनार्थम्। अजोषितस्य जोषणं कर्तव्यम्। तत्र दृष्टोऽर्थः। अनुज्ञापनं पूर्वं वृणानेन कृतं, तददृष्टार्थमापद्येत। अपि च। जुष्टं निर्वपामीति जोषणकरणं निर्वपामीति भावशब्देनोच्यते। सवितुः प्रसवे, इत्यनुज्ञानिर्वृत्ता परविशेषणार्थं कीर्त्यते। अननुज्ञातमपि निर्वपणशब्दार्थं[1] कुर्यादेव, न त्वजोषितेन यागः श्रूयते। तस्माज्जोषणार्थत्वात्परार्थाः सवित्रादयः शब्दा नोहिष्यन्त इति ॥३७॥

(निर्वापमन्त्रे श्रुतस्याग्निशब्दस्य समवेतार्थस्य विकृतावूहाधिकरणम् ॥ १२ ॥)

[१२] गुणशब्दस्तथेति चेत् ॥ ३८ ॥ पू०

तस्मिन्नेव वाक्ये दर्शपूर्णमासयोः, अग्नये जुष्टं निर्वपामीति समाम्नायते। तत्रायमर्थः सांशयिकः। किमग्निशब्दोऽपि विकृतौ नोह्यते, सोऽपि न समवेतवचनः, उतोहितव्यः, समवेतवचनो हि स इति। किं प्राप्तम्। एवं चेत्तत्र संशयः, सोऽपि गुणशब्दस्तथैवासमवेतवचनः। कुतः। सवित्रादयोऽस्मिन् वाक्येऽसमवेतवचनाः। यद्यग्निशब्दोऽप्यसमवेतवचनः, एवमवैलक्षण्यं भविष्यति। अवैलक्षण्यं च न्याय्यम्। यदि समानं कारणं, तेन न्यायेनावैलक्षण्यमुच्यते। समानं चेह कारणं, य एषां शब्दानामर्थः, स इह प्रयोगे नास्तीति। अग्नये जुष्टं निर्वपामि, इत्यस्यापि योऽर्थः, स इह नास्ति। अग्नये जुष्टं निर्वपामि, इत्यनेन जुष्टस्य निर्वाप उच्यते। न चेह जुष्टस्य निर्वापोऽस्ति। अजुष्टं चेह निर्वप्तव्यम्। निर्वापेणैव तज्जोष्यते। तस्मान्न समवेतवचनः। तस्याप्यश्रुतार्थस्य वचनमितरार्थं[2] प्रयुज्येत, निर्वापस्तुत्यर्थेनेति। तस्मादेतदपि विकृतौ नोहितव्यमिति ॥ ३८ ॥

[३७ ॥]

'अग्नये जुष्टं निर्वपामि' इति 'जुषी प्रीतिसेवनयोः' इत्यग्निना यद्द्रव्यं सेवितं तन्निर्वप्तव्यम्[3]। न चाग्निना सेवितं द्रव्यमस्ति। तस्मादविद्यमानत्वात्तादृशस्य द्रव्यस्यासमवेतवचन[4] इति ॥ ३८ ॥

---

१ निर्वपणं शब्दार्थं–पा०। २ वचनमुत्तरार्थं–पा०। ३ इतीति—इति पाणिनीयधातुपाठेनेत्यर्थः। ४ असमवेतवचन इति—यद्यप्यस्मिन्कर्मण्यग्निः समवेतस्तथाऽपि निर्वापे तादृशः श्रुतस्यार्थस्याविद्यमानत्वान्निर्वापस्तुत्यर्थमेवाग्निः संकीर्त्यत इत्यसमवेतवचन इति तात्पर्यम्।

न समवायात् ॥ ३९ ॥ सि०

नैतदेवम् । समवेतवचनो हि, अग्नये जुष्टं निर्वपामीति । नन्वेतदुक्तं, जुष्टस्यात्र निर्वाप उच्यते । न च जुष्टं निर्वप्तव्यमिति । अत्रोच्यते । नैव जुष्टस्य निर्वाप एतेन वाक्येनोच्यते । किं तर्हि । निर्वापेण जुष्टकरणम्, अग्नये जुष्टं करोमीति । एवं हि दृष्टार्थं भवतीति । अतोऽतुल्यकारणत्वादिलक्षणमेव न्याय्यम् । तस्मात्समवेतवचनोऽग्निशब्द ऊहितव्यश्च विकृताविति ॥ ३९ ॥

एवं वा—

गुणशब्दस्तथेति चेत् ॥ ३८ ॥ पू०

दर्शपूर्णमासयोरामनन्ति, धान्यमसि धिनुहि देवानिति इत्यादि तण्डुलानावपतीति । तत्र धान्यशब्दं प्रति संशयः । किं समवेतवचनो न वेति । किं प्राप्तम् । योऽयं गुणशब्द इव लक्ष्यते धान्यशब्दः, नासौ समवेतवचनः स्यात् । धान्यशब्दो हि धान्यमभिवदति, न तु धान्यमेवोप्यते । सतुषे हि धान्यशब्दो वर्तते । तण्डुलेष्वेवोप्यमानेषु धान्यप्रकाशनं क्रियते । तदसमवेतस्य प्रकाशनेऽदृष्टं यथा स्यादिति । तस्माद्विकृतिषु नोहितव्यमिति ॥ ३८ ॥

न समवायात् ॥ ३९ ॥ सि०

नैतदेवम् । समवेतो हि धान्यशब्दार्थः । स हि तण्डुलेषु वर्तते तद्विकारत्वाल्लक्षणया । यथा, पाशिकेषु शालयो भुज्यन्ते, गावः पीयन्त इति, श्रुत्युपादानेऽदृष्टं कल्पयितव्यमिति लक्षणाशब्दः परिकल्प्यते ।

समवेतवचनोऽग्निशब्दः । निर्वापेण करणभूतेन जुष्टं भावयेत् । स भाव्यमान एवं भाव्यते, अग्निरिदं जोषिष्यते द्रव्यमिति । एवं सेव्यमानो दृष्टार्थो निर्वापो भविष्यतीति ।

---

१ अग्नये त्वा जुष्टं—पा० । २ दर्शपूर्णमासयोरिदं समामनन्ति-पा० । ३ किं तावत्प्राप्तं—पा० । ४ गुणवचनशब्द—पा० ५ समवेतवचन इति—आरादुपकारकसंबन्धेन प्रकृतापूर्वसाधनीभूतकर्मसंबन्धिद्रव्यार्थप्रतिपादकत्वं—समवेतवचनत्वम् । अस्ति चेदं 'देवस्य त्वा' इति मन्त्रे, अभि निर्वापादयो । निर्वापे देवतासंयोगस्य हविःसंस्कारकस्य पञ्चस्वाभिधानस्य च [illegible] [illegible] [illegible] । [illegible] [illegible] न समवेतवचनमिति ध्येयम् ।

तस्मात्समवेतवचनः । विकारे चोहितव्य इति । प्रयोजनम् । अस्ति शाक्त्यानामयनं षट्त्रिंशत्संवत्सरम् । तत्रेदं समाम्नायते, संस्थिते संस्थितेऽहनि गृहपतिर्मृगयां याति, स तत्र यान् मृगान् हन्ति, तेषां तरसाः सवनीयाः पुरोडाशा भवन्तीति । तत्राविकारेण धान्यमसि धिनुहि देवानिति प्रयोगः कर्तव्यः, यथा पूर्वः पक्षः । यथा सिद्धान्तः, ऊहः कर्तव्यः, मांसमसि धिनुहि देवानिति ॥ ३९ ॥

(इडानिगदे यज्ञपतिशब्दस्यासमवेतार्थकस्य विकृतावनूहाधिकरणम् ॥१३॥)

[१३] चोदिते तु परार्थत्वाद्विधिवदविकारः स्यात् ॥ ४० ॥ सि०

स्तो दर्शपूर्णमासौ, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तत्र, इडानिगदः, इडोपहूता—इत्येवमादिः । तत्रेदमाम्नायते । दैव्या अध्वर्यव उपहूता उपहूता मनुष्या य इमं यज्ञमवान्, ये च यज्ञपतिं वर्धानिति । तत्रायमर्थः सांशयिकः । किं बहुयजमानके यज्ञपतिशब्द ऊहितव्य उताविकारेण प्रयोक्तव्य इति । तत्रेदं तावत्परीक्ष्यते । किं समवेतवचनो यज्ञपतिशब्द उतासमवेतवचन इति । कथं समवेतवचनः । यदि यज्ञपतिवृद्धिवचनं यज्ञपतेरुपकारकं, ततः समवेताभिधायी । अथैतत्स्तुत्यर्थं, ततो न समवेताभिधायी ।

किं प्राप्तम् । ऊहितव्यः, समवेताभिधायीति । कथम् । यज्ञपतिवृद्धिवचनाद्यज्ञपतयः प्रोत्सहन्ते । इडापदानपेक्षैश्च पदैर्यज्ञपतिवृद्धिरभिधीयते । तस्मान्मुख्यः प्रत्ययः । इडास्तुतौ जघन्यः । तस्मादर्थविप्रकर्षा-

---

प्रयोजने[1] चोद्यते । प्रकृतिशब्देन संबन्धशब्देन विकारास्तण्डुलाः प्रकाशिता लक्षणया । इहापि चोदकस्तथैव प्रापयति । तस्मान्मृगशब्देन मांसं प्रकाश्यं लक्षणया ।

नैतदेवम् । विकृतावर्थश्चोदकेनातिदिश्यते, न शब्दो वाचक इत्येतद्वक्ष्यामः । स चार्थोऽस्मदायत्ते प्रयोगे केनचिद्वाचकेन प्रकाश्यते । प्रकृतावाख्यानसादृश्याद्धान्यवाचकेन शब्देन प्रकाशनं कृतम् । तथापि श्रुतं न चोदकः प्रापयति । न वचनमस्ति, प्रकृत्या विकारः प्रत्याय्यत इति । तस्मान्मांसशब्दस्यैव प्रयोगः ॥ ३९ ॥

'यज्ञपतिं वर्धान्' इति वृद्ध्या सह यज्ञपतेरिडापदमनपेक्ष्य प्रत्यक्षैकवाक्यता, इडया सह परोक्षा ।

---

१ प्रयोजने इति—भाष्यस्थाधस्तनद्वितीयपङ्क्तिस्थप्रयोजन इत्यर्थः ।

मेडास्तुतिः। अतो यज्ञपतिशब्द ऊहितव्यः। यस्यैव वृद्धिर्नोच्यते, स एवोत्साहसंस्कारेण संस्कृतो न स्यात्। तस्मात्सर्वे वृद्धिसंस्कारार्थं वदितव्याः। सर्वेषु वदितव्येषु बहुवचनम्।

एवं प्राप्ते, ब्रूमः। चोदिते तु परार्थत्वाद्विधिवदविकारः स्यात्। चोदितमपि यत्, समवेतं परार्थं चिकीर्ष्यते न स्वसंस्कारार्थं, तदप्यविकारेण प्रयुज्यते। तन्नोहितव्यं स्यात्। परार्थत्वात्। अत्र हि यज्ञपतिवचनं वृद्धिविशेषणार्थं, वृद्धिवचनं चेडास्तुत्यर्थम्। कथमवगम्यते। इडोपह्वानेनैकवाक्यत्वात्। इडाप्रकरणाच्च। अथ यदुक्तं—गम्यते, इडापदानपेक्षं यज्ञपतिवृद्धिवचनं तेषामुत्साहकम्। उपहूता मनुष्या ये यज्ञपतिं वर्धयेयुरिति।

अत्रोच्यते। स यो हैवं विद्वानिडया चरतीत्यभिधाय, अथ प्रतिपद्यते, इडोपहूतोपहूतेडोपास्माँ इडाह्वयतामिडोपहूतेत्याह। तेनावगम्यते यस्यैष आरम्भः स इडाया मन्त्र इति। तन्मध्यपतितश्च, उपहूता मनुष्या इत्येवमादिः, यज्ञपतिं वर्धान् इत्यन्तः। तस्मादिडामुपह्वातुं वदितव्य इति वाक्यादवगम्यते। समर्थश्चेडोपाह्वाने। यजमानं तु प्रोत्साहयितुं वदितव्य इति नास्ति वाक्यम्। केवलं वदितुं सामर्थ्यमस्ति। न च सामर्थ्यमात्रेण वाक्यादृते विनियोगा भवन्ति। इडाप्रकरणं चैवमनुगृहीतं भविष्यतीति इडया च सहैकवाक्यता। तस्मादियं वचनव्यक्तिः, उपहूता मनुष्या ये यज्ञपतिं वर्धयितुं समर्था इति। तत्र यज्ञपतिविशिष्टा वृद्धिर्वक्तव्येति, एकस्मिन्नपि यजमाने कीर्तिते भवति विशेषणकार्यम्। तस्माददविकारः स्यात्। विधिवत्। यथा यत्र यजमानो

सिद्धान्तस्तु—यज्ञपतिशब्दो वृद्धिविशेषणम्, वृद्धिरिडास्तुत्यर्था। इडोपह्वानेनैकवाक्यत्वात्। अथ यदुक्तमिडापदानपेक्षं यज्ञपतिवृद्धिवचनं गम्यत इति। उच्यते। 'स यो हैवं विद्वानिडया चरति' इत्यनेन, इडया चरितव्यमिति विधीयते। तदारभ्यायं मन्त्र इडोपहूतेत्यादिः। 'ब्रह्मदेवकृतमुपहूतम्' इत्येवमन्त इडोपह्वानार्थः। 'दैव्या अध्वर्यवः' इत्यादि ऋत्विगुपह्वानार्थः। अध्वर्युशब्दवाच्याः सर्वऋत्विजो लक्षणया, 'उपहूता मनुष्याः' इति त एवोच्यन्ते। कीदृशास्त इति।

1 कीर्तिते-पा०।

गुणभूतो विधीयते, तत्र येन केनचिद्यजमानेन स विधिः सिध्यति । यथा, यजमानसंमितौदुम्बरी भवति, शुक्रं यजमानोऽन्वारभत इति ॥ ४० ॥

(सूक्तवाके श्रूयमाणस्य यजमानपदस्य विकृतावूहाधिकरणम् ॥ १४ ॥)

[१४] विकारस्तत्प्रधाने स्यात् ॥ ४१ ॥ सि०

अस्ति दर्शपूर्णमासयोः सूक्तवाकः, सूक्तवाकेन प्रस्तरं प्रहरतीति । तत्रेदं समाम्नायते । अयं यजमान आयुराशास्त इति । तत्रायमर्थः सांशयिकः । किं बहुकर्तृके विकारे यजमानशब्द ऊहितव्य उत नेति । किं प्राप्तम् । अविकारेण यथोक्तव्यः । तथा सामर्थ्यमनुगृह्यते । न चायं समवेतवचनः । परार्थेन ह्यम्, यजमान आयुराशास्त इति । आयुराशासनेन यजमानस्य न कश्चिद्दृष्टोऽर्थः संजन्यते । तस्मादायुराशासनमदृष्टार्थम् । यजमानविशिष्टाऽऽशीरेकेनापि यजमानेन कीर्तितेन यथा श्रुता, तथा कृता भवति । यथा, यजमानेन संमितौदुम्बरी भवतीति । तथैतत् । तस्मादविकारेण यथोक्तव्यमिति ।

एवं प्राप्ते, ब्रूमः । विकारः स्यादूहः । तत्प्रधाने यजमानप्रधाने । कथं यजमानप्राधान्यम् । एवं श्रूयते, सूक्तवाकेन प्रस्तरं प्रहरतीति । यदि सूक्तवाकः प्रस्तरप्रहरणे तत्साधनं, तत्फलं वा, प्रकाशयति ततः सूक्तवाकेन प्रस्तरः प्रहृतो भवति । प्रहरणफलमायुराशासनं कल्पितम् । यजमान आयुराशास्त एतेन कर्मणेति, यजमानेन प्रस्तरः प्रहृतो प्र-

---

उच्यते । ये यज्ञमवन्ति रक्षन्ति, ये च यज्ञाति वर्धयितुं क्षमास्तादृशा मनुष्या उपहूताः । तस्मान्मनुष्यविशेषणत्वात्परार्थो यज्ञपतिशब्दः । तेन नोह्यते ॥ ४० ॥

प्रत्युदाहरणमिदम् । अथवाऽधिकरणान्तरं कयाचिदाशङ्कयाऽऽरभ्यते । 'अयं यजमान आयुराशास्ते' इत्यायुषः फलत्वं नागतं प्रमाणान्तरेण । तस्माद्यजमानाशीः-संबन्धो वाच्योऽदृष्टार्थेन । यजमानसंबद्धाऽऽशीर्विवक्षया । सा चैकेनापि भवत्येव । तस्मादनूहः ।

नैतदेवम् । 'सूक्तवाकेन प्रस्तरं प्रहरति' इति करणविभक्तिनिर्देशात्सूक्तवाकः प्रहरणाङ्गम् । न चासौ प्रहरणं प्रकाशयति, न तत्साधनम् । श्रुत्या च तदङ्गता निर्दिष्टा । तस्माच्छ्रुतिसामर्थ्याभ्यामनेन प्रकाशयते तत्प्रहरणसंबन्धि । तेन चान्याद्यो

---

१ आयुराशासने दक—पा० ।

वर्ति। तत्र य एव यजमानः फलं प्रति प्रधानभूतो न संकीर्त्यते, तेन न प्रहृतं स्यात्। तस्मात्सर्वे समवेताः संकीर्तयितव्याः। सर्वेषु च कीर्त्यमानेषु बहुवचनं भवति। तस्मादूहो यजमानस्येति ॥ ४१ ॥

(सुब्रह्मण्यानिगदे हरिवदादिगुणवाचकपदानामनूहाधिकरणम् ॥१९॥) .

[१५] असंयोगात्तदर्थेषु तद्विशिष्टं प्रतीयेत ॥४२॥ सि०

अस्ति ज्योतिष्टोमः। तत्र सुब्रह्मण्यानिगदः समाम्नातः, इन्द्र आगच्छ हरिव आगच्छ मेधातिथेर्मेष इत्येवमादिः। अग्निष्टुति च श्रूयते, आग्नेयी सुब्रह्मण्या भवतीति। तत्रेन्द्रशब्दस्य स्थाने, ऊहः क्रियते। अथेदानीं हरिव आगच्छ इत्येवमादिषु संशयः। ऊहितव्यं, नेति। किं प्राप्तम्। तद्विशिष्टं प्रतीयेत। तेन विशिष्टम्। इन्द्रपदस्थान ऊहः। एतेन विशेषेण विशिष्टमविकृतमेव वचनं प्रतीयेत। कुतः। असंयोगात्तदर्थेषु। नैषा शब्दाना तेष्वर्थेषु संयोगः, हरिवत्त्वादिषु। न हरिवदादयः समवेता इन्द्रे विद्यन्ते गुणाः। प्रमाणाभावात्। अविद्यमानास्तस्योच्यन्ते। एवं श्रुत्याऽर्थः प्रतिज्ञातो भवति। इतरथा लक्षणा स्यात्। न हरिवत्त्वादय उच्येरन्। हरिवत्त्वादिभिः सोऽस्य गुणो लक्ष्यते। अथासमवेतवचना पुरुषार्था एव भविष्यन्ति। आत्मीयं गुणं न लक्षयिष्यन्तीत्युच्येत। तथाऽस्मत्पक्ष एव। तस्मादूहार्थं गुण उच्यत इत्यविकारेण प्रयोगः स्यात्।

तथैवं वचनव्यक्तिर्भवति। इन्द्र आगच्छ हरिव आगच्छ, इति हरिवदादीनस्य गुणानारोपयति। हरिवदादिभिः संबध्यमान इन्द्रोऽभ्युदयकारी भवतीति। शक्यते चाग्निरपि तैः संबन्धयितुम्। तस्मादविकारेण

देवताः प्रसाद्यन्ते, आयुरादीनि च फलानि। तत्र देवताः साधनतां प्रतिपद्यन्ते, आयुरादीनि च साध्यत्वम्। तस्मादायुरादीनि फलानि। कर्तृगामि च क्रियाफलम्। तस्माद्यजमानः प्रधानभूतः फलं प्रति। प्रधानस्योहः. ॥ ४१ ॥

नैते सन्तीन्द्रे गुणाः, प्रमाणाभावात्। ऊहं चेच्छता सन्तीन्द्र एते गुणा इत्यभ्युपगन्तव्यमि-द्रगुणसंबन्धमात्रम्। इन्द्रस्याऽस्मीयगुणा इति चाभ्युपगमे लक्षणा

१ तेन विशेषेणेति—ग०। २ पूर्वोऽर्थः। ५ अभ्युपगन्तव्य इति—तेनैव प्रमाणेन-रैति तेन।

गुणानां प्रयोगः। अथोच्यते। अस्मादेव सामानाधिकरण्यवचनादिन्द्र एते गुणा विद्यन्त इति। तन्न। अविद्यमानेष्वपि स्तुत्याऽस्य सामानाधिकरण्यवचनमुपपद्येतैव। यथा, इन्द्रो बृहस्पतिर्देवदत्त इति ॥४२॥

कर्माभावादेवमिति चेत् ॥ ४३ ॥

इति चेद्भवान् पश्यति, अविकारेण हरिवदादीनां वचनमिति। कर्माभावादेवं स्यात्,[1] यद्येते गुणा इन्द्रे न भवेयुः। कर्मजास्तु, एते गुणा इन्द्रस्य विद्यन्ते। हरिव आगच्छेति। पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी, ताभ्यां ह्येव सर्वं हरतीति। मेधातिथेर्मेष इति, मेधातिथिं हि काण्वायनं मेषो भूत्वा जहार। [2]वृषणश्वस्य मेनका नाम दुहिता बभूव, तामिन्द्रश्चकमे। गौरावस्कन्दन् इति, गौरमृगो भूत्वाऽरण्याद्रागत्य सोमं पिबतीति वचनैरिमे गुणा इन्द्रस्याऽऽख्यायन्ते। तस्मात्समवेतवचना हरिवदादयः शब्दाः। तथा सतीन्द्रमत्यथायोच्चार्यन्त इति नादृष्टकल्पना भविष्यति। तत्रैवं वचनव्यक्तिः। इन्द्र आगच्छ, हरिव आगच्छ, इति—हरिवत्त्वादिगुणवान् यस्त्वं स आगच्छेति। लक्षणा चादृष्टकल्पनाया ज्यायसी। तस्माद्विहितव्या हरिवदादयः शब्दा इति ॥ ४२ ॥

न परार्थत्वात् ॥ ४४ ॥

नैतदेवम्। परार्था हि हरिवदादयः शब्दा इन्द्रस्तुत्यर्थाः। स्तुतये हरिवदादिसंबन्धोऽस्य क्रियते। तत्पुरस्तादेवोपवर्णितम्। स्तुत्यर्थं चाग्नेरप्येतैरभिसंबन्धः शक्यते कर्तुम्। यत्तूक्तं, समवेता गुणा इन्द्रस्य विद्यन्ते, पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी इत्येवमादिभिर्वचनैरवगता इति। तन्न। न ह्येतानि वचनानीन्द्रस्य संबन्धिनौ हरी विदधति। न ह्येवमभिसंबन्धः क्रियते, यावेतौ पूर्वपक्षापरपक्षौ ताविन्द्रस्य हरी इति। तत्र हि हेतुरुपदिश्यते। ताभ्यां ह्येव सर्वं हरतीति। न हीदं

स्यादनेनांशेन प्रकाश्यमानेषु। अथोच्येत, असमवेता एते गुणा इन्द्रे। न चाऽऽत्मीयत्वं लप्स्यन्ते। द्वावपि दोषौ परिहरिष्यामः। इन्द्रो हरिवद्गुणविशिष्ट उच्चार्यमाणोऽभ्युदयकारी ॥ ४२ ॥ [४३ ॥]

'पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी, ताभ्यां ह्येव सर्वं हरति' इति यदुक्तं, तन्न। कुतः। यावेतौ पूर्वपक्षापरपक्षौ करणभूतौ, ताभ्यामिन्द्रो हरति, नान्य इत्य-

[1] 'कर्माभावामेति चेत्'—पा०। [2] वृषणश्वस्य मेनस्य—पा०। [3] करणभूतावितिः—रणस्य कारणभूतावित्यर्थः।

प्रसिद्धं, ताभ्यामिन्द्रः सर्वं हरतीति। सिद्धो हि हेतुर्भवति, न प्रसाध्यः। यथा स्त्रिमौ हर्तारौ प्रसिद्धौ, कालेन सर्वमपक्षीयत इति। तथा नेन्द्रस्याग्नेश्च कश्चिद्विशेषः। तत्रैभिरभिधानमग्नेः प्राप्नोत्येव।

अथ इन्द्रस्य हर्तृत्वं विधीयत इत्युच्यते। तथा च वाक्यं भिद्येत। इन्द्रस्यैतौ हरी इत्येतदपि विधातव्यम्। अथैतन्न विधीयते। तथा स एव दोषः, नास्त्यग्नेरिन्द्रस्य वा विशेष इति। अथ पूर्वपक्षापरपक्षाविन्द्रस्येति विधीयते, तौ च हरी। तस्मादिन्द्रो हरिवानिति। तथा हेत्वप्रसिद्ध्यादिः स एव दोषः। न च विधीयमाने वैशब्दो भवति। प्रसिद्धवचनो ह्येष दृष्टः। न वै स्त्रैणानि सख्यानि सन्तीति यथा।

तथा, मेधातिथेर्मेष इत्येवमादि—इतिहासवचनमिव प्रतिभाति। इतिहासे च विधौ सति, आदिमत्तादोषो वेदस्य प्रसज्येत। अस्तिवाति चेत्। तथा सति तस्याप्रामाण्यान्मेधातिथेर्हि काण्वायनस्य मेष इत्यप्रसिद्धिः। सर्वत्र च निर्भेदविधानम्। तत्रापरस्मिन् विधीयमाने वाक्यभेदप्रसङ्गः। तस्मान्नैते गुणा इन्द्रे विद्यन्त इत्यसमवेतवचनत्वादविकारेण प्रयोग इति। तदेतन्न रोचयन्ते याज्ञिकाः। ऊहं कुर्वन्ति। अग्न आगच्छ रोहिताश्व बृहद्भानो धूमकेतो जातवेदो विचर्षण इति ॥४४॥

अथेदमन्यदुदाहियते—

असंयोगात्तदर्थेषु तद्विशिष्टं प्रतीयेत ॥ ४२ ॥ सि०

अस्ति साद्यस्क्रः। तत्रेदं समामनन्ति, साण्डास्त्रिवत्सः सोमक्रयण इति। अस्ति तु मक्ष्वावैकहायनी क्रयार्था। तत्रेदमाम्नायते, इयं

यमर्थो न लभ्यते। कुतः। 'ताभ्या ह्येष सर्वं हरति' इति हेतुरयम्। हेतुश्च प्रसिद्धे संबन्धे भवति। न चेन्द्रस्य हर्तृत्वमवगतं प्रमाणान्तरेण। येन हेतुः स्यात्। वाक्यभेदादिदोषश्च स्थित एव। तस्मात्सर्वेषा स्तुतिद्वारेणैकवाक्यता ॥ ४४ ॥

---

१ इत्येवमादिरितिहास—पा०। २ निगदव्याख्यानं विधानं—पा०। ३ 'येन हेतुः स्यात्' इत्यस्य पश्चात् 'वाक्यभेदादिदोषश्च' इत्यस्मात्प्राक् वार्तिकग्रन्थो लुप्तः। यतस्तद्व्याख्यानपरस्तन्त्ररत्नग्रन्थ एवमुपलभ्यते। अत्र चैवं तन्त्ररत्नग्रन्थः। 'येन हेतु स्यात्'। नापि चैताविन्द्रस्य करणत्वेन प्रसिद्धौ। तस्मादश्वे हरिशब्दवाच्ये कर्तृत्वं विधीयते। तस्मादिन्द्रो हरिवान् भविष्यतीत्येवमपि हेत्वप्रसिद्धिस्तदवस्थैव। कर्तृत्वं हीन्द्रस्य प्रमाणान्तरेणानवगतम्। येन हेतुः समर्थितो भविष्यति। न केवलमनवगतकर्तृत्वम्। किं तु विपर्यय एवेत्याह—पूर्वपक्षापरपक्षयोः कर्तृत्वे विधीयमाने कथमिन्द्रस्य स्यात्। योऽयं प्रतिज्ञाहेत्वोर्विरोधः। पूर्वपक्षापरपक्षौ हर्ताराविति प्रतिज्ञा। तस्य हर्तृत्वादिति हेतुः। तेन प्रतिज्ञैव हेतोर्विपर्यय इति। वाक्यभेदादिदोषश्च स्थित एव इति।

गौस्तया ते क्रीणामि, तस्यै शृतं, तस्यै शरः, तस्यै दधि, तस्यै मस्तु, तस्या आतञ्चनं, तस्यै नवनीतं, तस्यै घृतं, तस्या आमिक्षा, तस्यै वाजिनमिति । तदिह चोदकेन प्राप्तम् । तत्र संदेहः । किं गोशब्दस्थान ऊहं कृत्वाऽवशिष्टानां पदानामविकार उत सर्वेषामूह इति । किं प्राप्तम् । गोपदार्थविशिष्टमेवोहवचनं स्यात् । तस्यै शृतमित्येवमादीनामविकारः । असंयोगाच्छृतादिभिरर्थैः । तेषामेकहायन्यामेकहायनीत्वादेव । न ह्येकहायनी दुग्धे, तस्यां समवेतं वदन्त्येते । तस्मात्साण्डेऽप्यविकारेण प्रयोक्तव्या इति ॥ ४२ ॥

कर्माभावादेवमिति चेत् ॥ ४३ ॥

इति चेत्—एवं भवान्मन्यते, नैकहायन्यामेते समवेतानर्थानभिवदन्तीति । भवेदेतदेवं, यद्येकहायन्या इमे गुणा न भवेयुः । कालान्तरे तु तस्या उपपद्यन्ते, न तु साण्डस्य । भविष्यत्कालवचना अप्येते प्ररोचनार्था भवन्ति । तस्यै शृतं भविष्यति । तस्मान्नाविकारेण प्रयोक्तव्या इति ॥ ४३ ॥

न परार्थत्वात् ॥ ४४ ॥

नैतदेवम् । अविकारेण प्रयोक्तव्या इति । असमवेतवचना ह्येते, नैकहायन्यां भवन्ति । एकहायनीत्वादेव । अथोच्यते, कालान्तरे भविष्यन्तीति । साण्डेऽपि कालान्तरे भवितुमर्हन्ति । साण्डादपि हि या धेनुर्जनिष्यते, सा धोक्ष्यत इति । तस्मादविकारेण प्रयोक्तव्या इति ॥ ४४ ॥

(सारस्वत्यां मेष्यामध्रिगुप्रैषस्य प्रवृत्त्यभावाधिकरणम् ॥ ११ ॥)

[१६] लिङ्गविशेषनिर्देशात्समानविधानेष्वप्राप्ता सारस्वती स्त्रीत्वात् ॥ ४५ ॥ सि०

अस्ति ज्योतिष्टोमः । तत्र पशवः समाम्नाताः । आग्नेयः पशुरग्निष्टोम आलब्धव्यः, ऐन्द्राग्नः पशुरुक्थ्ये, ऐन्द्रो वृष्णिः षोडशिनि, सारस्वती मेष्यतिरात्रे, इति । अस्ति त्वग्नीषोमीयेऽध्रिगुप्रैषः । उपनयत

पशुषु पशुष्वेकवचनान्तोऽसमर्थ एव प्रास्मैशब्दः ।

उच्यते । प्रातिपदिकार्थस्तावद्विधीयते । वचनेन यथा प्रातिपदिकं नोत्कृष्यते तथा

---

१ 'तस्यै शर' इति क्वचिन्नास्ति । २ तस्यामसमवेतं—पा० । ३ 'कर्माभावान्नेति चेत्' इत्येवं पाठो लिखितपुस्तकेषु दृश्यते ।

मेध्या दुर आशासाना मेधपतिभ्यां मेधम्, इति । तत्र संदेहः । किं सारस्वत्यां मेष्यामध्रिगुवचनं कर्तव्यं, नेति । नन्वग्नीषोमीयार्थं तत्, चोदकेनेह प्राप्तमिति । अत्रोच्यते । सर्वेषां समानो विधिरिति कृत्वा चिन्ता । किं तावत्प्राप्तम् । समानविधानेष्वेषु पशुषु, अप्राप्ता सारस्वती मेष्यध्रिगुवचनम् । कुतः । लिङ्गविशेषनिर्देशात् । विशिष्टलिङ्गो ह्यध्रिगुवचनेन निर्दिष्टः, प्रास्मा अग्निं भरत इति पुंपशुः स्त्रीत्वं चास्याः । न च पुंवचनः स्त्रियमभिवदितुमलं भवति शब्दः । तस्मादध्रिगुवचनमप्राप्ता सारस्वती मेषीति ॥ ४५ ॥

पश्वभिधानाद्वा तद्धि चोदनाभूतं पुंविषयं पुनः पशुत्वम् ॥ ४६ ॥ पू०

वाशब्दः पक्षं व्यावर्तयति । नैतदस्ति । अप्राप्ता सारस्वती, अध्रिगुवचनमिति । तस्यामप्यध्रिगुवचनं स्यात् । कुतः । प्रकरणात् । समानं प्रकरणं सर्वेषां पशूनामिति कृत्वा चिन्त्यते । तेन सारस्वत्या अपि प्राप्नोतीति । लिङ्गविशेषादयुक्तं तस्यामिति यदुच्यते । तत्र । पश्वभिधानात् । अस्ति तत्र पशुत्वं संनिहितम् । तदभिप्रेत्य, प्रास्मा अग्निं भरत पशव इति ब्रूयात् । तद्धि चोदनाभूतम् । सर्वनामशब्दस्य पुंविषयत्वम् । तत्पशुशब्देनोच्यते । अस्ति च तत्, मेष्याम् । तदभिप्रेत्य पशुशब्दसमानाधिकरणं सर्वनामशब्दं समुच्चारयिष्यति । एवं प्रकरणमनुग्रहीष्यते । तस्मात्प्राप्नुयात्सारस्वती, अध्रिगुवचनमिति ॥ ४६ ॥

वक्ष्यामः पार्ष्ठाधिकरणे । तस्मात्समवेतवचनः, प्रातिपदिकार्थसंभवात् । स्त्री तु पुंलिङ्गेन न शक्यते वदितुम् । नात्र लिङ्गं वचनमिव विभक्त्यर्थः । किं तु प्रातिपदिकार्थो लिङ्गमित्युक्तम् । तस्मान्मेष्यामभावो युक्तः, असमवेतार्थत्वादिति सिद्धान्तवादी मन्यते, 'लिङ्गविशेषानिर्देशात्' इति ॥ ४५ ॥

पूर्वपक्षवादी तु मन्यते । पशुशब्देनात्र सामानाधिकरण्यं भविष्यति, 'प्रास्मै पशवे' इति । स च पशुशब्दवाच्यो मेष्यामपि विद्यते । तस्मात्समर्थो निगदोऽयम् । 'पश्वभिधानाद्वा' इत्यनेन प्रतिपादयति ॥ ४६ ॥

---

१ मेषस्वये—पा० । २ वचनेनेह—पा० । ३ पुंशब्द —पा० । ४ (अ० ९ पा० ३ अ० ५ सू० ११) इत्यत्रेति शेषः । ५ इत्युक्तमिति—(अ० ९ पा० १ अ० ९ सू० ३३) इत्यत्र 'प्रातिपदिकविशेषणं हि स्त्रीशब्दः । स्त्रियां यत्प्रातिपदिकं वर्तते, तदष्टाबादय इति' इत्यादिना भाष्यकारेणेति शेषः । ६ समर्थं इति—मेष्यामपीति शेषः ।

विशेषो वा तदर्थनिर्देशात् ॥ ४७ ॥

वाशब्द एतं पक्षं व्यावर्तयति। नैतदस्ति। प्राप्नुयात्सारस्वत्यध्रिगुवचनमिति। अयमन्यः पक्षः, न प्राप्नुयादिति। कुतः। विशेषो वा तदर्थनिर्देशात् पुमर्थं ह्येष शब्दो निर्देष्टुं शक्नोति। स्त्रीलिङ्गश्चायमर्थो मेषीति। स्त्रियं पुंशब्दो न शक्नोत्यभिवदितुमिति प्रथम एव पक्षः संकीर्तितः। केवलं परपक्षस्यानवक्लृप्तिर्वक्तव्या ॥ ४७ ॥

पशुत्वं चैकशब्द्यात् ॥ ४८ ॥

अथ यदुक्तं, पशुत्वाभिप्रायमेतद्वचनम्। एको हि शब्दः पशुत्वस्य च पशोश्च। तेन, प्रास्मै पशून् इत्यभिसंबन्धो भविष्यतीति। तत्परिहर्तव्यमिति ॥ ४८ ॥

यथोक्तं वा संनिधानात् ॥ ४९ ॥ सि०

यथोक्तं स्यादध्रिगुवचनम्। अप्राप्ता सारस्वती। कुतः। पूर्वस्मादेव कारणाल्लिङ्गविरोधादिति। यदुक्तं, पशुशब्दसमानाधिकरणः सर्वनामशब्दः प्रयोक्ष्यत इति। तन्न। कुतः। संनिधानात्। संनिहितवचनो हि सर्वनामशब्दः। उच्चरितमात्रो यः पदार्थः शब्देन संनिहितः, तेन संबध्यते। अथ तस्मिन्नसति, लिङ्गादिसर्वविशेषणविशिष्टे रूपेण संनि-

---

'विशेषो वा तदर्थनिर्देशात्' इति सिद्धान्तसूत्रेण प्रथमसूत्रार्थ एव स्मार्यते ॥४७॥

'पशुत्वं चैकशब्द्यात्' इति पशुशब्दोऽयं पुंलिङ्गः। अस्मैशब्दोऽपि, तयोर्यत्सामानाधिकरण्यं तत्प्रत्युच्चार्यते ॥ ४८ ॥

'यथोक्तं वा संनिधानात्' इति पूर्वपक्षवादिना यदुक्तं तदेतेन निराक्रियते। संनिहितवचनत्वं सर्वनामशब्दानां स्वभावः। उच्चरितमात्रः सर्वनामशब्दो यत्पदान्तरेण संनिधाप्यते, तेन सह शीघ्रं संबध्यते। न चेह पशुशब्द उच्चरितः, येन संबन्धः स्यात्। तस्मिन्नसति शब्दोपात्ते, संनन्धप्रकार आश्रीयते प्रकरणाद्यालोचनेन। लिङ्गादिसर्वविशेषणविशिष्टेन रूपेण संनिहिते प्रयुज्यत इति—कोऽर्थः। जातिलिङ्गसंख्याविशेषणविशिष्टां व्यक्तिमभिदधाति, रूपेण—स्वसामर्थ्येनेत्यर्थः। सर्वनाम्नामेतदेव सामर्थ्यं, यदेतानि विपरिवर्तमानमेवाभिदधति। व्यक्तिस्तु विपरिवर्तते।

अथवा, रूपेणेति रूपशब्देन विद्यमानं वस्त्वभिधीयते। तच्च विद्यमानं यदि

---

१ विशिष्टेन स्वरूपेण संनिहितेन युज्यते—पा०। २ तत्प्रत्युच्चार्यते इति—सामानाधिकरण्यं परित्यज्योच्चार्यत इत्यर्थः।

हिते प्रयुज्यते। संनिधाने नैकेन विशेषणेन विशिष्टां व्यक्तिमभिवदितुं शक्नोति। संनिधानात्तत्रैकं सामान्यमाश्रीयते, नान्यत्किंचित्पशुत्वादि। तत्रोच्चार्यमाणे पशुशब्दे शब्देन व्यक्तेर्निष्कृष्टे पशुत्वे, अस्मै पशव इति शक्यते संबन्धः कर्तुम्। अनुच्चार्यमाणे तु लिङ्गविशेषवचनः प्राप्नोति। तस्मादप्राप्तं सारस्वत्यध्रिगुवचनमिति। कृत्वा चिन्तेयम्। अत्र प्रयोजनं न वक्तव्यम्। किमग्नीषोमीयायाः पशुधर्मा उत साधारणा इत्यस्मिन्नधिकरणे प्रयोजनाय विचारोऽयम्। यदि साधारणाः पशुधर्मास्तत्र सारस्वत्यध्रिगुवचनमप्राप्तम्, अथाग्नीषोमीयधर्मास्ततोऽस्यामध्रिगुवचनमूहेन प्राप्यते। न च प्रयोजनस्य प्रयोजनं वक्तव्यम् ॥ ४९ ॥

(यज्ञायज्ञीये नित्यमिरापदस्य गिरापदबाधकत्वाधिकरणम् ॥ १७ ॥)

[१७] आम्नातादन्यदधिकारे वचनाद्विकारः स्यात् ॥५०॥ सि०

अस्ति ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेतेति। तत्र यज्ञायज्ञीयं प्रकृत्याऽऽमनन्ति—न गिरा गिरेति ब्रूयात्, यद्गिरा गिरेति ब्रूयादात्मानं तदुद्गातोद्गिरेत्। ऐरं कृत्वोद्गेयमिति। तत्र संशयः। किमिरापदं गिरापदं वा कर्तव्यम्। अथवेरापदमेवेति। किं प्राप्तम्। यत्राधिकार आम्नातादन्यदुच्यते, तत्रं तद्विकारभूतं स्यात्। ज्योतिष्टोमाधिकार आम्नाताद्गिरापदादन्यदुच्यत इरापदम्। तद्विशेष उच्यमानं सामान्येन प्राप्तं गिरापदं बाधेत ॥ ५० ॥

द्वैधं वा तुल्यहेतुत्वात्सामान्याद्विकल्पः स्यात् ॥ ५१ ॥ पू०

वाशब्दः पक्षं व्यावर्तयति। न, इरापदं नियम्येत। द्वैधं स्यात्। द्वौ प्रकारौ स्यातामित्यर्थः। कौ द्वौ प्रकारौ। इरापदवचनं, गिरा-

विपरिवर्तेते प्रकरणसंनिहितम्। संनिधानेनैकेन विशेषणेन विशिष्टां व्यक्तिमभिधातुं शक्नुवन्ति। यद्यत्संनिधानविशिष्टं तत्तदभिदधाति। तस्मात्संनिधानमेषां सामान्यं निमित्तम्। संनिहितं च पुंलिङ्गम्। यद्यपि स्त्रीलिङ्गमपि संनिहितं तथाऽप्ययमसमर्थः शब्दस्तत्र वर्तितुं, पुंलिङ्गत्वात्। तत्रोच्चार्यमाणे पशुशब्द इति। उच्चार्यमाणे पशुशब्दे 'अस्मै पशवे' इति पुंलिङ्गेन पुंलिङ्गशब्दः शक्यः संबन्धयितुम्। अस्मिन्पक्षे व्यक्तितो निष्कृष्य पशुत्वं तेन सह सबध्यते, अस्मैशब्दो न व्यवस्था। एतदपि पशुशब्द उच्चार्यमाणे न भवतीत्युक्तमेव ॥ ४९ ॥ [५० ॥]

यज्ञायज्ञीयं प्रकृत्याऽऽमनन्ति ' न गिरा गिरेति ब्रूयात्। यद्गिरा गिरेति ब्रूयादात्मानमेव तदुद्गातोद्गिरेत्, ऐरं कृत्वोद्गेयम् ' इति।

१ तत्रेति क्वचिन्नास्ति।

पदवचनं च । तुल्यो हि हेतुः । गिरापदमाम्नातम् । तद्वता साम्ना ज्योतिष्टोमः साधयितव्य इत्येतदवगम्यते । इरापदेन साधयितव्यमित्येतदपि । समानार्थे चैते द्वे पदे । एकमपि स्तुत्यर्थमपरमपि । तस्माद्विकल्पः स्यात् । इरापदं गिरापदं वेति ॥ ५१ ॥

उपदेशाच्च साम्नः ॥ ५२ ॥

अत्राऽऽह । नैतयोस्तुल्यता विद्यते । गिरापदे समाम्नानमात्रं, न कर्तव्यता विधीयते । इरापदे तु कर्तव्यता विधीयते । तन्न । कुतः । उपदेशात्साम्नः । उपदिश्यते हि साम, यज्ञायज्ञीयेन स्तुवन्तीति । गिरापदवच्च यज्ञायज्ञीयम् । तस्मिन्नुपदिश्यमाने गिरापदमप्युपदिष्टं भवति । तस्माद्विकल्प इति ॥ ५२ ॥

नियमो वा श्रुतिविशेषादितरत्साप्तदश्यवत् ॥ ५३ ॥ सि०

नियमो वा स्यादिरापदस्य । कुतः । श्रुतिविशेषात् । श्रुतिविशेषेणेरापदमुपदिष्टम्, ऐरं कृत्वेति । सामान्येन गिरापदम् । तत्कथं साम्नः कर्तव्यतोच्यते । गिरापदस्य पाठमात्रं, न कर्तव्यता । न ह्यन्यथा साम कृतं भवतीत्यर्थापत्त्या गिरापदस्य कर्तव्यता कल्प्यते । इरापदस्य पुनः श्रुत्यैव कर्तव्यता । तेन साम्नि सिद्धे नास्त्यर्थापत्तिर्गिरापदस्य ।

अत्र पूर्वः पक्षः । 'ऐरं कृत्वोद्गेयम्' इति, इरापदस्यानेनोत्पत्तिः केवलं क्रियते । उत्पत्त्युत्तरकालं च प्रयोजनं प्रति साकाङ्क्षस्य यज्ञायज्ञीयप्रयोगवचनेनाङ्गता[1] विधीयते । गिरापदस्यापि, यज्ञायज्ञीयस्य प्रयोगवचनेनैवाङ्गता । तस्मादुभयोस्तुल्यप्रमाणत्वाद्विकल्पः । अथवा, यद्यपीरापदमनेन वाक्येन विधीयते स्तोत्राङ्गत्वेन, तथाऽपि तामुत्पन्नां श्रुतिः शक्नोति निर्वर्तयितुमित्यर्थादुत्पत्तिरपेक्षितव्या । 'यज्ञायज्ञीयेन स्तुवीत' इत्यनेन गिरापदस्य स्तुतिसाधनत्वमुपपद्यते[2] । पाठात्तु गिरापदस्योत्पत्तिः सिद्धा । तस्मादेकत्रोत्पत्तिरपेक्षितव्या, अन्यत्र विनियोगः । तस्मादेकाङ्गविकल्पत्वाद्द्वयोरपि प्रत्ययविप्रकर्षः । विप्रकर्षाच्च विकल्पः ॥ ५१ ॥ [५२ ॥]

यदुक्तम् 'ऐरं कृत्वोद्गेयम्' इत्यनेनोत्पत्तिः, यज्ञायज्ञीयप्रयोगवचनेन स्तुतिसाधनत्वमिति । तन्न । यद्येवं श्रूयते, 'ऐरं भवति' इति, तदोत्पत्तिः स्यात् । इह

---

१ प्रयोगवचनेनेति—'यज्ञायज्ञीयेन स्तुवीत' इत्येवं रूपेणेत्यर्थः । २ उपपद्यत इति—यज्ञायज्ञीयस्य गिरापदं विना स्तुतिसाधनत्वानुपपत्त्येति शेषः । ३ एकत्र—इरापदे । ४ अन्यत्र—गिरापदे ।

(गिरापदस्यानापन्नेरापदे गानकर्तव्यताधिकरणम् ॥ १८ ॥)

[१८] अप्रगाणाच्छब्दान्यत्वे तथाभूतोपदेशः स्यात् ॥ ५४ ॥ पू०

ज्योतिष्टोमे यज्ञायज्ञीयं प्रकृत्याऽऽमनन्ति, न गिरा गिरेति ब्रूयात्, यद्गिरा गिरेति ब्रूयादात्मानमेव तदुद्गातोद्गिरेत्, ऐरं कृत्वोद्गेयमिति । ज्योतिष्टोमे गिरापदस्य स्थान इरापदं कर्तव्यमिति समधिगतम् । इदानीमिदं संदिग्धम्[1] । किं प्रगीतमिरापदं कर्तव्यमुताप्रगीतमिति । किं प्राप्तम् । गिरापदादन्यस्मिञ्शब्दे श्रूयमाणे ब्रूमः, अप्रगीतमिरापदं कर्तव्यमिति । कुतः । अप्रगाणात् । न हि तत्प्रगीतमुपदिश्यते । सर्वं हि यद्यथाभूतमुपदिश्यते, तत्तथाभूतमुपयोक्तव्यम् ।

ननु नैव तदप्रगीतमुच्चार्यते । तद्धितशब्देनायं निर्देशः क्रियते । तेन स्वरविशेषः कश्चिन्निर्दिष्टो भवति । अत्रोच्यते । यद्यपि चास्ति स्वरविशेषः । अन्ये तु गीतिविकारा आईभावादयो न निर्दिश्यन्ते । अविकृतात्तद्धित उत्पादितः । तस्मादविकृतं प्रयोक्तव्यम् । अथोच्यते । तद्भूतनिर्देशोऽविवक्षित इति[2] । उच्यते । अविवक्षायां कारणं वक्तव्यम्[3] । विवक्षायां तु निर्देश एव कारणम् । तस्मादप्रगीतं प्रयोक्तव्यमिति ॥ ५४ ॥

गिरापदगीतिरिरापदे न स्यात् । कुतः । गीत्या वर्णाः संस्क्रियन्ते । गिरापदवर्णाना च या संस्कारिका गीतिः, सा तानेव वर्णान्संस्करोति । तैरेव वर्णैः प्रयुज्यते । इरापदवर्णैर्न प्रयुज्यते । गिरापदवर्णस्वरूपप्रयुक्तत्वाद्गीतेः । तस्माद्यथाभूतमिरापदं तथाभूतमेव प्रयोक्तव्यम् । ननु च 'ऐरम्' इति विकारे तद्धित उत्पन्नः । वर्णाना च स्वर एव विकारः । तस्मात्तद्धितशब्देनैव गीतिरुपदिश्यते । नात्र विकारे तद्धित उत्पन्नः । किं तर्हि । स्वार्थ एव । यावदेवोक्तम् 'इरा कृत्वोद्गेयम्' तावत् 'ऐरम्' इति । यदि च प्रगीतात्तद्धित उत्पद्यते, तथा सति वृद्धं तालव्यं प्रथमस्वरं वेति कृत्वा, इकारस्य, आयीभावः स्यात्[4] । तत्र 'वृद्धाच्छः'[5] इति छो भवति । तथा च 'आयिरीयम्' इति स्यात् । न चैवं श्रूयते । तस्मात्स्वार्थे तद्धितः ॥ ५४ ॥

---

१ संदिग्धम्—पा० । २ तद्भूतनिर्देशो न विवक्षित—रा० । ३ अविवक्षाया न किंचित्—पा० । ४ स्यादिति—'तालव्यमायी यद्वृद्धम्' इति छन्दोगसूत्रेण गीतिदशायां यदिमावापन्नत्वया वृद्धं तालव्यं तत्, आयीभवतीत्यर्थकेनेत्यर्थः । ५ पा० सू० (४-२-११४) ।

तत्स्थाने वा तद्गीतिः स्यात्पदान्यत्वप्रधानत्वात् ॥ ५५ ॥ सि०

वाशब्दः पक्षं व्यावर्तयति । यस्य पदस्य स्थान इरापदं प्रयुज्यते, तस्य पदस्य या गीतिः सा, इरापदे स्यात् । कुतः । पदान्यत्वप्रधानत्वात् । पदान्यत्वप्रधानं हीदं वाक्यम् । गिरापदस्य स्थान इरापदं भवतीति । नाप्रगीतं प्रयोक्तव्यमिति । अन्या हि वचनव्यक्तिरिरापदस्य विशेषे विधीयमाने । अन्या, इरापदे । एवं हि श्रूयते, इरापदस्य विकारं कृत्वोद्गेयमिति । तत्रानेन प्रकारेणेरापदं विधीयते, नान्यं प्रगाणादिरापदस्य विकारं ब्रूयात् । न गिरापदस्येरेयेतद्धितेनोच्यते । नाप्रगीतस्येरापदस्य विकारस्तद्धितशब्देनाध्यवसीयते । पक्षाचाद्धितार्थो विकारं ब्रूयादित्यसावनूद्यत एव । यः प्रकृत्यर्थ इरापदस्येति, स विधीयते । तेन पदान्यत्वपरमेतद्वचनं, न गीत्यनन्वयपरम् ।

गिरापदे कर्तव्या । कुतः । स्तोत्रापूर्वप्रयुक्ता हि गीतिः, न वर्णस्वरूपप्रयुक्ता । तस्माद्गिरापदाभावेऽपि गीतिरवतिष्ठते । सा च साकाङ्क्षा । इरापदमपि विधीयमानं गीतिं प्रति साकाङ्क्षम् । तस्मात्तयोः संबन्धः । ननु विकारतद्धितोऽयं, न स्वार्थिकः । आवश्यकप्रसङ्गात् । तस्माच्छब्देनैव गीतिर्विज्ञायत इति ।

सत्यम् । अत्र चतस्रो वचनव्यक्तयः प्रतिभान्ति । यद्वा, इरापदगीतिविकारे तद्धितोऽयमनूद्येरापदं विधीयते । अथवेरापदमनूद्य गीतिः । अथवोभयम् । अथवा, शुद्धमिरापदम् । तत्रेरापदस्य न लोकवेदयोर्गीतिः प्रसिद्धा । अप्रसिद्धत्वाच्च न शक्याऽनुवदितुम् । इरा, स्वयमप्रसिद्धत्वादेव न शक्याऽनुवदितुम् । अपि च यदीरापदमनूद्य गीतिर्विधीयते, गिरापदस्य निवृत्तिर्न प्राप्नोति । न गीत्या वर्णा निवर्त्यन्ते । अतुल्यकार्यत्वात् । तत्र गिरापदप्रतिषेधानुवादो न प्राप्नोति । तत्र गिरापदस्य भेदेन प्रतिषेधो वक्तव्यः । तस्मिन्नुच्यमाने वाक्यभेदः ।

अपि च गिरापदे निषिद्धेऽनियमेन तत्स्थाने वर्णाः प्राप्नुवन्ति, नावश्यमिरापदम् । उभयोरप्रगीतमिरापदं च, तथा वाक्यभेदः । तस्मादिरैव प्रातिपदिकं

---

१ तत्पदनिर्देशे—पा० । २ गीत्यनन्वयपरम्—पा० । ३ गिरापदे कर्तव्येति—गिरापदे या गीतिः सेरापदे कर्तव्येत्यर्थः । अथवा—'गिरापदगीतिरिरापदे कर्तव्या' इति वा वार्तिकपाठ आवश्यकः । ४ प्रधानेति—नेयं प्रतीतिः शेषः । ५ अनूद्येति—तद्धितविहिता गीतिरिति शेषः । ६ अथवोभयमिति—गीतिमिरापदं कर्तव्यमित्येवमित्यर्थः । ७ द्वितीयपक्षं दूषयति—इरेत्यादिना । ८ तृतीयं दूषयति—अपि चेत्यादिना । ९ प्रातिपदिकमिति—ऐरमिति पदे—इति शेषः ।

गीतिर्हि विकारः सामान्याभिर्दिश्यते ॥ ५५ ॥

गानसंयोगाच्च ॥ ५६ ॥

गानसंयोगो भवति, उद्गेयमा इरा चा दाशीसा, इतीरागानं दर्श-
यति ॥ ५६ ॥

वचनमिति चेत् ॥ ५७ ॥

इति चेत् पश्यसि, गानदर्शनमेतद्भवतीति । नैवम् । वचनं भविष्यति, उद्गेयमा इरा चा दाशीसा, इति ॥ ५७ ॥

न तत्प्रधानत्वात् ॥ ५८ ॥

नैतदेवम् । तत्प्रधानं हीदं वाक्यम् । किंप्रधानम् । इरापदप्रधानम्[1] । निर्देशात् । न गीतिप्रधानम् । अनिर्देशादित्युक्तम् । तथा, इरापदस्यार्थवादो भवति, न गीतेः । इरामहं यजमाने ददानि, इति पदस्यार्थवादो न गीतेः । तस्मात्प्रगीतं प्रयोक्तव्यमिति । किं भवति प्रयोजनं चिन्तायाः, नात्र कश्चिद्विशेषः । अन्यस्मिन्नेतत्सदृशे प्रयोजनमस्ति, न प्रगीतिं ब्रूयात्, प्रगीति ब्रूयात् । यदि पूर्वः पक्षः, प्रगीतपदं वा

विधीयते । तत्र विधीयमान गिरापदस्य वा गीतिरन्या कार्यापत्त्या लभते ।

यदि पूर्वपक्षः—प्रगीतपदं प्रगीतपदं वा प्रयोक्तव्यम् । यदि सिद्धान्तः—प्रगीतपदमेव प्रयोक्तव्यम् । नैतदनन्तराधिकरणस्य प्रयोजनम् । पदप्रयोगविकल्पमाह, न प्रगीते[2] । तस्मात्पूर्वाधिकरणस्य[1] प्रयोजनमिदं ' आम्नातादन्यत् ' इत्यस्य, प्रगीतपदं प्रगीतपदं वा पूर्वपक्षे, सिद्धान्ते प्रगीतपदमेवेति । प्रमादाल्लिखितम्[2] । ' अप्रगाणात् ' इत्यस्य प्रयोजनम्, अप्रगीतगिरापदं पूर्वपक्षे । सिद्धान्ते तु प्रगीतं प्रयोक्तव्यम् ।

यत्पुनरिदं नात्र कश्चिद्विशेषः । अन्यस्मिन्नेतत्सदृशे प्रयोजनमस्तीति । इदं, ' वचनमिति चेत् ' इत्यस्य सूत्रद्वयस्य प्रयोजनम् । इरापदे वचनात्प्रगाणं, यदि वा स्थानापत्त्या, सर्वथेरापदं प्रगीतं प्रयोक्तव्यम् । प्रगीतपदे तु न वाचनिकं प्रगाणमस्ति । किं तर्हि । न्यायात् । तत्र यदि वचनेन गानं प्राप्यते, प्रगीतपदादीनां तु वचनाभावादप्रगीतता स्यात् ।

तस्मात्प्रगीतपदादीनां नैव स्यादप्रगीतता ।
यदीन्यत्प्रधानत्वाद्वाक्यस्य स्यात्प्रगीतता ॥१९॥[१९]॥५७॥

---

१ पूर्वाधिकरणस्येति—'आम्नातादन्यदधिकारे वचनाद्विकारः स्यात्' (अ० ९ पा० १ अ० १७ सू० ५०) इत्यस्येति शेषः । २ प्रमादाल्लिखितमिति—लेखके प्रमादादस्मिन्नधिकरणे लिखित-मित्यर्थः । ३ किं तर्ह्यस्याधिकरणस्य प्रयोजनमिति चेदाह—अप्रगाणादित्यादिना । ४ गानं प्राप्यत इति—इरापदे गानं प्राप्यते । तत इति शेषः ।

वक्तव्यं, प्रगीपदं वा । यदि सिद्धान्तः, प्रगीपदमेव वक्तव्यमिति ॥५८॥

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये नवमस्याध्यायस्य प्रथमः पादः ॥

अथ नवमाध्यायस्य द्वितीयः पादः ॥

(सामादिशब्दानां गीतिवाचित्वाधिकरणम् ॥ १ ॥)

[१] सामानि मन्त्रमेके स्मृत्युपदेशाभ्याम् ॥ १ ॥ पू०

सन्ति सामानि, रथंतरं–बृहत्–वैरूपं–वैराजं–शाक्वरं–रैवतमिति, अभित्वा शूर नोनुम इत्येवमादिषु । तत्रैषोऽर्थः संदिह्यते । किं प्रगीता एते मन्त्राः सामानि, उत गीतयः सामानीति । ननु सिद्धं, गीतिषु सामाख्येति । उच्यते । तत्र द्वितीयेऽध्याये मन्त्रगते भावशब्दे चोदकत्वं प्रति विचार्यमाणे, मन्त्राभावाशङ्कायां मन्त्रसद्भावोपपादनाय, तच्चोदकेषु मन्त्राख्या, इति कृते लक्षणे, अहे बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रयिविदा विदुः । ऋचः सामानि यजूंषि, इति, ऋगादीनां विभागाय प्रसक्तानुप्रसक्तं लक्षणं, गीतिषु सामाख्या, इत्युक्तम्[1] । तत्र यदि प्रगीतो मन्त्रः साम, यदि वा गीतिमात्रम् । उभयथाऽपि, ऋग्यजुर्भ्यामन्यत्सामेति सिद्धे विभागे न विवेकाय प्रयत्नः, प्रयोजनाभावात् । इह तु प्रगीते मन्त्रेऽन्यत्कार्यं, गीतिमात्रेऽन्यदिति विवेकाय प्रयत्यते ।

आह । नन्वेतदपि सिद्धं, गानकर्मणो वाचकः सामशब्द इति । उच्यते । तदेव पुनरभिधीयते स्मरणाय, उत्तरमधिकरणं चिन्तयितुम् । गीतिः सामेति स्थित इदं चिन्त्यते, गीतिषु ऋचः प्रधानभूता उत गुणभूता इति । आह । नैव स्मरणाय पूर्वपक्षोद्धरणम् । न हि मन्त्राः सामानीत्येषोऽर्थः स्मर्तव्यः । अत्रोच्यते । पूर्वपक्षेऽपि सिद्धान्तस्मरणार्थमेवोपादीयते । यत्प्रगीतं मन्त्रवाक्यं तत्सामेत्येवं पूर्वपक्षं कृत्वा गीति-

---

॥ ९८ ॥)

इति श्रीभट्टकुमारिलविरचितायां मीमांसाभाष्यव्याख्यायां टुप्टीकायां नवमाध्यायस्य प्रथमः पादः ॥

---

१ (अ० २ पा० १ अ० ११ सू० ३६) । २ (अ० २ पा० १ अ० ७ सू० ३२) । तै० ब्रा० (१-२-१) ।

मात्रं सामेति स्थापितम्। तस्मिन् स्थितेऽयमुत्तरो विचारः कर्तव्यः, गीतिषु किमृचः प्रधानभूता उत गुणभूता इति।

किं प्राप्तम्। एके मन्यन्ते, प्रगीतं मन्त्रवाक्यं सामेति। कुतः। स्मृत्युपदेशाभ्याम्। एवं हि स्मरन्ति, प्रगीतं मन्त्रवाक्यं सामेति तत्रभवन्तश्छान्दसाः। एवं चोपदिशन्ति शिष्येभ्यः। आह। ननु यदेव स्मरन्ति, तदेवोपदिशन्ति। नैवं सत्युपदेशो हेत्वन्तरमिति। उच्यते। बाढम्। अन्यथा तर्ह्युपदेशं वर्णयामः। अयमुपदेशः। अहे बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रैविदा विदुः। ऋचः सामानि यजूंषि, इति मन्त्रप्रकारः कश्चित्सामानीति मन्त्रोपदेशो भवति। तस्मादुपदेशान्मन्त्राः सामानीत्यवगच्छामः॥ १॥

तदुक्तदोषम्॥ २॥ सि०

तस्यैतस्य पक्षस्योक्तो दोषः सप्तमे। ऋच्युपदेशो नोपपद्यते, कवतीषु रथंतरं गायतीति। देशलक्षणा धर्मलक्षणा वा प्राप्नोतीति। तस्माद्गीतयः सामानि, न प्रगीतानि मन्त्रवाक्यानीति॥ २॥

(अथवा—ऊहमन्त्रस्य पौरुषेयत्वाधिकरणम्॥ १॥)

एवं वा—

[१] सामानि मन्त्रमेके स्मृत्युपदेशाभ्याम्॥ १॥ पू०

इदं संदिह्यते, योऽयमूहो नाम कथं नश्चित्र आश्रुत इति। किमयमार्षो नित्य उत पुरुषप्रणीत इति। किं प्राप्तम्। एतान्यूहसामानि मन्त्रभूतानि—आर्षाणि नित्यानीत्येके मन्यन्ते। कुतः। स्मृत्युपदेशाभ्याम्। एवं हि स्मरन्ति। मन्त्रभूतान्येतान्यार्षाणि नित्यानीति। उपदिशन्ति चैवंविधमेव शिष्येभ्यः। आह। ननु यदेव स्मरन्ति, तदेवोपदिशन्ति। बाढम्। अयमन्य उपदेशो वर्ण्यते, ऊहश्चिकीर्षित इति ब्राह्मणमुपदिशन्ति। चिकीर्षित इति च, इष्ट उच्यते। इच्छायां हि सन् विधीयते। यदि चायमपुरुषबुद्धिपूर्वको वेदतुल्यस्ततः इष्टः। अथ पुरुषप्रणीतस्ततो न प्रमाणम्। यज्ञे चाचिकीर्षितो न प्रयोक्तव्यः। चिकीर्षित इति च शब्दो भवति। तस्मान्नित्य ऊह इति॥ १॥

(॥ १॥)

१ सप्तम इति—(अ० ७ पा० २ अ० १ सू० ११) इत्यत्रेति शेषः। २ चिन्तयित्वा मे गोप०—पा०। ३ मन्त्रभूतान्यार्षाणि—पा०।

तदुक्तदोषम् ॥ २ ॥ सि०

सदेतदुक्तदोष मयद्वचनम् । भवतैव हेतुं वर्णयताऽस्योक्तो दोषः, ऊहश्चिकीर्षित इति । ऊहश्चिकीर्षित इत्यनित्ये, एतद्भवति । यदुक्तम्, इष्टे चिकीर्षितशब्दो भवति । इच्छायां हि सन् विधीयत इति । उच्यते । सत्यम् । इष्टं कर्तुं यद्धि क्रियते, तत्कर्तुमिष्टं भवतीति । तस्मादनित्य ऊहः । यदुक्तं, स्मृतेर्नित्यतेति । नैषा स्मृतिः प्रमाणम् । दृष्टमूला ह्येषा । भवति हि वचनं, कवतीषु रथंतरं गायतीति । तस्मादतिदेशवचनान्न्यायेनैवं गातव्यमिति वाचनिकं प्रथमं विज्ञानम् । तत एषा स्मृतिः । तस्मादप्रमाणम्, कृत्रिम ऊह इति । किं भवति प्रयोजनम् । न्यायविरुद्धमपि प्रमाणं, यथा पूर्वः पक्षः । यथा तर्हि सिद्धान्तः, न्यायविरुद्धमप्रमाणम् ॥ २ ॥

(साम्नामृक्संस्कारकर्मत्वेन प्राधान्याधिकरणम् ॥ २ ॥)

[२] कर्म वा विधिलक्षणम् ॥ ३ ॥ पू०

सान्येवोदाहरणानि । तेष्वयमर्थः समधिगतः, गीतिः सामशब्देनोच्यत इति । तत इदमिदानीं संदिह्यते, किं सा गीतिः, ऋचः प्रति प्रधानभूता, उत गुणभूतेति । ननु सिद्धं संस्कारकर्मण. सामशब्दो

'तदुक्तदोषम्' इति ह्येतदयुक्तम् । कथम् । 'कवतीषु रथंतरं गायति' इति प्रवर्तयिताऽत्र कृतकः । रथंतरमपि नैव कृतकम् । यदप्यतिदेशवाक्यं 'कवतीषु रथंतरं गायति' इति, तदपि नैव कृतकम् । तस्मादूहे न किंचित्कृतकम् ।

अत्रोच्यते । रथंतरगीतौ कवतीषु क्रियमाणायां पुरुषस्य गीतिक्रियां प्रति य प्रथम प्रयत्न स कृतकः । समाम्नायेन 'अभि त्वा' रथंतरगीतिर्दृष्टा । अतिदेशसामर्थ्य-' साऽन्यत्र नियता । यथा प्रयत्नाना नित्यानामपि यदनुष्ठानं तत्कृतकम्, एवमिहापि ॥ २ ॥

ननु सप्तमे निर्णीत संस्कारकर्म सामेति । उच्यते । यदि प्रधानकर्म, सर्वथाऽन्य-

---

१ साम गीति —पा० । २ ऊहग्रन्थस्य पौरुषेयत्वसाधकं दशमाध्यायीयं वर्णकान्तरं तत्र विद्यमानं सावधानतया—इति टुप्टीकायां । ३ ऊह इति—ऊहनामके ग्रन्थे सामगानां प्रसिद्धे, इति टीका । ४ एवमिहापीति—अयमाशयः । रथंतरगीतिर्यथा 'अभि त्वा शूर नोनुमः' इत्यस्यामाम्नाता, न तथा कवतीषु क्वचित् । किंतु 'कवतीषु रथंतरं गायति' इत्यतिदेशसामर्थ्यात् रथंतरगीतिः कवतीषु पुरुषेण प्रयत्नेनोत्पाद्यते । अत ऊहग्रन्थे, ऋचां साम्नां च स्वरूपेणापौरुषेयत्वेऽपि कवत्यादिष्वतिदिष्टस्य रथंतरस्य प्रयत्नसाध्यत्वेन पौरुषेयत्वम् इति । ५ प्रधानकर्मेति—प्रधानकर्म, इत्यस्यानुकर्षणम् ।

वाचक इति, अपि तु कर्मशब्दः स्यात्तद्योऽर्थः प्रसिद्धग्रहणत्वादिति। उच्यते। सत्यम्, आक्षेपेण प्रवर्तते। स एव निर्णीतो भविष्यति। किं प्राप्तम्। तेनैवाधिकरणेन संस्कारकर्मेति।

तथा प्राप्ते, ब्रूमः। प्रधानकर्म वा सामशब्देनोच्यत इति। किं कारणम्। प्रधानविधिलक्षणं ह्यत्रास्ति द्वितीया विभक्तिः—रथंतरं गायति, बृहद्गायतीति। तस्मात्प्रधानकर्मेति। अपि च, अकर्मकाले गानं भवति। तद्यदि द्रव्यसंस्कारार्थं, संस्कृतं द्रव्यग्रहणेन संस्कारेण, न कर्मकाले पुनः संस्कर्तुं शक्यम्। न हि स्निग्धस्य स्नेहनं शक्यं कर्तुं, पिष्टस्य वा पेषणम्। स एषोऽधीनामिवाभ्युपगन्तव्यः, अकर्मकाले क्रियमाणः संस्कारो भवतीति। अस्मत्पक्षे पुनः प्रधानकर्म फलाय भविष्यति। तत्राविप्रतिषिद्धमकर्मकाले गानम्। अपि च, श्रावण्यां पौर्णमास्यां प्रतान्युपाकृत्य, अर्धपञ्चमान् मासान् स्वाध्यायमधीयीतेति। तदेषां फलाय भविष्यति। इतरथा पुरुषाणामुपदिश्यमानं कर्मणा कल्प्येत। तस्मादपि प्रधानकर्मेति ॥ ३ ॥

तदृग्द्रव्यं वचनात्पाकयज्ञवत् ॥ ४ ॥

आह। प्रधानकर्मेत्युच्यते। न चैतत्प्रधानकर्म। न हीदं फलवत्। फलकल्पनायां चाश्रुतं कल्प्येत। तेन यागं प्रति गुणभूतम्। यदि न गुणभूतं, किमस्य द्रव्यम्, यत्प्रति प्रधानभूतमेतत्। तदुच्यते। ऋग्द्रव्यम्। ऋगस्य द्रव्यस्थानीया। यथाऽन्यस्य कर्मणो द्रव्यं साधकम्, एवमस्य ऋक् साधिका। तस्मादेतं प्रति प्रधानभूतमेतत्। भूतं हि मध्यायोपदिश्यते। कथं पुनरेतदृग्द्रव्यम्। वचनात्। वचनमिदं भवति, ऋचि साम गायतीति। यथा, पाकयज्ञेषु तत्तद्वाचनिकं द्रव्यं भवति, लाजाः, धानाः, तण्डुलाः, आज्यमिति। एवमिहापि ऋग्द्रव्यं, वचनादिति ॥ ४ ॥

तत्राविप्रतिषिद्धो द्रव्यान्तरे व्यतिरेकः प्रदेशश्च ॥ ५ ॥

आह। या ऋगस्य वचनेनोच्यते, तद्द्रव्यमेतद्भवति। कथं द्रव्य-

तिदेशस्य सिद्धिः। इह गुणप्रधानताऽवश्यं विचारणीया। यदि प्रधानं ततो नास्य पुरोधेन वर्णः। अथ गुणभूताः, ततो विपरीतम् ॥ ३ ॥ [४ ॥

---

१ (अ० ७ पा० २ अ० १ सू० १२)। २ कर्मकाले—पा०। ३ तस्माद्दृग्द्रव्यमेवद्भव-तीति—पा०। ५ (अ० १० पा० ९ अ० १ सू० १)

व्यतिरेके सति द्रव्यान्तरप्रदेशे च तदिदं सामेति । अत्रोच्यते । अवि-
प्रतिषिद्धमेतत् । गीतिमात्रं हि सामेति । द्रव्यमस्य निर्वर्तकं वाचनिकम् ।
तत्सामान्यविहितं विशेषविहितेन द्रव्यान्तरेण बाध्यते । यदत्र द्रव्यव्य-
तिरिक्तं गीतिमात्रं, तदेव बृहद्वा रथंतरं वेति न दोषो भवति । तस्मा-
त्प्रधानकर्म सामेति ॥ ५ ॥

शब्दार्थत्वात्तु नैवं स्यात् ॥ ६ ॥ सि०

तुशब्दः पक्षं व्यावर्तयति । नैतदेवं भवितुमर्हति, प्रधानकर्म सामेति ।
गुणकर्म स्यात् । कुतः । शब्दार्थत्वात् । शब्दस्योपकारकं साम प्रत्य-
क्षमुपलभ्यते । साम्नि क्रियमाण ऋगक्षराण्युच्चार्यन्ते । तस्मिन् सति
नादृष्टं कल्पनीयम् ॥ ६ ॥

परार्थत्वाच्च शब्दानाम् ॥ ७ ॥

परार्थाश्च शब्दाः स्तुत्यर्थाः । स्तुतिर्हि चोदिता, आज्यैः स्तुवते,
पृष्ठैः स्तुवत इति । सा ऋगक्षरैरुच्चार्यमाणैः प्रत्यक्षाऽवगम्यते । ततः
स्तुत्यर्था ऋचः सत्याः सामार्थता परिकल्प्येत । कल्पनायां च
प्रमाणं नास्ति । तस्मादपि साम गुणभूतमृच इति ॥ ७ ॥

असंबन्धश्च कर्मणा शब्दयोः पृथगर्थत्वात् ॥ ८ ॥

इतश्च गुणभूतं साम । कुतः । असंबन्धश्च साम्नः स्तोत्रेण स्यात् ।
तस्य प्रधानभावेन स्तुतिः साम्न उपदिश्येत, न साम स्तुतेः । तत्र बृहत्
पृष्ठं भवति, रथंतरं पृष्ठं भवतीति वचनं बाध्येत । रथंतरगुणकं पृष्ठं
भवति, बृहद्गुणकं पृष्ठं भवतीत्येतदेवमुपदिश्यते । तद्गुणत्वे साम्न्यवक-
ल्पते । प्रत्यक्षं हि सदा पृष्ठस्योपकारं साम करोति । यदस्य वाचकं
प्रकाशयति शब्दं, तद्रथंतरपृष्ठशब्दयोः सामानाधिकरण्यादेकार्थत्वे
प्रत्ययं विद्यात् । पृथगर्थत्वे त्वसंबन्धः स्यात् । तस्मादेवः साम गुण-
भूतमिति ॥ ८ ॥

संस्कारश्चाप्रकरणेऽग्निवत्स्यात्प्रयुक्तत्वात् ॥ ९ ॥

अथ यदुक्तं, अकर्मकाले गानमृचः संस्कारकमग्न्याधानमिव
कल्प्येत । प्रयुक्तत्वादिति । तत्परिहर्तव्यम् ॥ ९ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

१ नैवं भवितुमर्हति—पा० । २ गुणभूतमिति—पा० । ३ तस्य प्रधानभावेन—पा० ।
४ तस्मादस्तुव—पा० । ५ कर्मकाले—पा० ।

अकार्यत्वाच्च शब्दानामप्रयोगः प्रतीयेत ॥ १० ॥

यदि ह्यकर्मकाले गानं कृतं कर्मकालं यावत्तिष्ठेत्, न विनश्येत्। ततः पुनरप्रयोगः प्रतीयेत । यदि वा पुनर्न शक्येत कर्मकाले गानं कर्तुं, तथाऽप्यप्रयोगः स्यात् । शक्यन्ते तु प्रगीताः शब्दाः पुनः प्रयोक्तुम् । तस्मादकर्मकाले प्रयुक्ता असाधका इति कर्मकाले प्रयुज्येरन् । तस्मान्न दोषो भविष्यतीति ॥ १० ॥

आश्रितत्वाच्च ॥ ११ ॥

अपि च, कर्मकालाश्रितं गानं दर्शयति । औदुम्बरीं स्पृष्ट्वाऽनपाश्रित उद्गातोद्गायेदिति । सदस्यौदुम्बरी मध्यमा स्थूणा भवति । तां स्पृष्ट्वेति ब्रुवन् सदसि गानं दर्शयति । तस्मात्कर्मकाले गानमग्न्याधानवत्कल्पयितव्यमिति ॥ ११ ॥

प्रयुज्यत इति चेत् ॥ १२ ॥

अथ यदुक्तम्, अर्धपञ्चमान्मासानध्ययनं प्रयुज्यते, तत्फलाय भविष्यतीति । तत्परिहर्तव्यम् ॥ १२ ॥

ग्रहणार्थं प्रयुज्येत ॥ १३ ॥

न हि फलाय भवितुमर्हति । तथा ह्यदृष्टं कल्प्येत । दृश्यते ऽत्र प्रयोजनम् । यत्तावदुपाध्यायः शिष्यसंनिधावधीते, तद्ग्रहणार्थम् । यच्छिष्यस्तद्धारणार्थम् । ग्रहणधारणे प्रयोगार्थे भूमिरथिकवत्, शुष्केष्टिवद्वा । तद्यथा, भूमिरथिको भूमौ रथमालिख्य शिक्षां करोति, संग्रामे प्राशुभावो भवितेति । यथा च छात्रः शुष्केष्टीः प्रयुङ्क्ते, प्रयोगे प्राशुकर्मा भविताऽस्मीति । एवमेतद्द्रष्टव्यम् । तस्माद्दृष्टे सति नादृष्टायाध्ययनम् । तस्मात्संस्कारकर्म सामेति ॥ १३ ॥

(तृचे गेयस्य साम्नः प्रत्यृचं परिसमापनाधिकरणम् ॥ ३ ॥)

[३] तृचे स्याच्छ्रुतिनिर्देशात् ॥ १४ ॥ पू०

ज्योतिष्टोमे समाम्नायते, तस्मादेकं साम तृचे क्रियते स्तोत्रीय-

---

१० ॥ ११ ॥ १२ ॥ १३ ॥]

ननु ' तृचे भौ लिङ्गदर्शनात् ' इति दशमे त्रिषु ऋक्षु साम गेयमित्येतद्रूपा-

---

१ कर्मकाले—पा० । २ तस्मात्कर्मकालेऽग्न्याधान—पा० । ३ शुष्केष्टिवच्च । ४ अध्यापनम्—पा० । ५ (अ० १० पा० ६ अ० १ सू० २) ।

मिति । अत्रायमर्थः सांशयिकः । किं त्रिषु ऋक्षु व्यासज्य गानं कर्तव्यमुत प्रत्यृचं समाप्तं गानं कर्तव्यमिति । किं प्राप्तम् । व्यासज्येति । कुतः । श्रुतिनिर्देशात् । एवं श्रूयते, एकं साम तृचे क्रियत इति । साम्नि क्रियमाणे, तन्निर्दिष्टा गुणभूता त्रिसंख्या ऋग्गता श्रूयते । तत्र यद्येकस्यामृच्युपक्रम्य तस्यामेवैतत्परिसमापयेयुः, न त्रिसंख्यया साधनमस्य क्रियमाणस्य परिच्छिन्द्युः । एकसंख्यापरिच्छिन्नं क्रियमाणं स्यात् । तत्र श्रुतिर्बाध्येत । तद्यथा, अयं घटस्त्रिषु नागदन्तकेषु स्थाप्यतामित्युक्ते व्यासज्य स्थाप्यते, न पर्यायेण एवमिहापि द्रष्टव्यम् ।

ननु पर्यायेऽप्येवंजातीयकः शब्दो भवति । यथा, त्रिषु गृहेषु देवदत्तो भुङ्क्त इत्युक्ते न यौगपद्यमवगम्यते । पर्यायेणापि भुञ्जाने भवत्येष वादः । एवमिहापि पर्यायेण प्राप्नोतीति । अत्रोच्यते । न तत्र त्रिसंख्या भुजिं प्रत्युपदिश्यते, येनैतदेवं भवति । तत्र गृहशब्देन संबध्यते । त्रिषु गृहेषु न द्वयोरेकस्मिन्वेति । यदा भुजिनिर्दिष्टा प्रत्युपदिश्यते, तदा यौगपद्येनैव भोजयितव्यः । इह तु त्रिसंख्या क्रियत

पितम् । आधारस्थे चाधिकरणे संस्कारकर्म सामेति स्थितम् । प्रतिसंस्कार्यं च संस्कारावृत्तिरित्यतो व्यासज्य गानपक्षो नैवोत्तिष्ठति ।

उच्यते । दशमे ह्येवं चिन्ता, तृचे साम गेयं, न द्वयोरेकस्यां वेति । इह, तृच गाने स्थिते किं प्रत्यृचमुत व्यासज्येति । यदुक्तं प्रत्यृचं गानं सिद्धमिति । श्रुत्य न्यायबाधं मन्यमानः पूर्वपक्षमारभते । 'एकं साम तृचे क्रियते' इत्ययं धातु सामान्यवचनो विशेषधातुना (न) निराकाङ्क्षी क्रियते । तस्मादयं निराकाङ्क्षी कर्मण्यः । साम चात्र द्वितीयासंयोगादीप्सितम् । तस्मात्तेन निराकाङ्क्षी क्रियते सामान्यम् । धातुविशेषस्थानीयं सामजातम् । तस्य धातुविशेषस्थानीयस्य निर्वर्तकत्वेन तृचो विधीयते । एवं करोतिरभूतप्रादुर्भाववचनोऽनुगृहीतो भविष्यति । इतरथा परसाम ऋचं संस्पृशेत्तृच इत्यभ्यासलक्षणा प्राप्नोति करोतेः ।

---

१ निर्दिष्टो-पा० । २ कुटेषु-पा० । ३ कुटशब्देन-पा० । ४ कुटेषु-पा० । ५ भुजिं प्रति-पा० । ६ टिप्पणि ३—प्रतिप्रधानं गुणावृत्तिरिति न्यायादिति शेषः । ७ सामान्यवचन इति—धात्वर्थसामान्यमात्रवचनः कर्माकाङ्क्षो धात्वर्थविशेषवाचिना धातुना निराकाङ्क्षी भवतीत्यर्थः । ८ द्वितीयासंयोगादिति—कर्मोपपदद्वारेण क्रियत इत्यनेन सामानाधिकरण्यादित्यर्थः ।

इत्यनेन संबध्यते। एवं सति क्रियायां त्रिसंख्या विहिता भवति। तत्र स्वपदगतस्य किंचिद्विधायकेन विहितं भवति। इतरथा, ऋचः संख्यायाश्च संबन्धस्य पदान्तरगतेन शब्देन भावनोच्येत। तथा, अर्थविप्रकर्षः स्यात्। तस्मात्सामनिर्वृत्तिं प्रति त्रिसंख्योच्यते।

आह। ननु त्रिसंख्या ऋक्शब्देनैवात्र संबध्यते। अन्यथा, असति सामर्थ्ये समास एव न स्यादिति। अत्रोच्यते। न ब्रूमो न संबध्यत इति। संबध्यत एव। समासश्च भवति। स तु समासशब्दः सामनिर्वृत्त्यावुपदिश्यत इति। तत्र त्रिशब्दस्य ऋक्शब्दस्य चार्थौ निर्वृत्तावुपदिष्टौ भवति। ऋचि साम निर्वर्तयितव्यम्, एवं तास्तिस्र ऋचो भवन्ति, न न्यूना इति। इतरस्मिन्पक्षेऽभ्यासात्त्रिसंख्यया संबध्येत। तत्र, साम क्रियत इति लक्षणा स्यात्। अभ्यासनिर्वृत्तौ सामनिर्वृत्तिशब्दो भवेत्। तस्माद्व्यासज्य गानं कर्तव्यम्॥ १४॥

शब्दार्थत्वाद्विकारस्य॥ १५॥

इतश्च पश्यामः। तृचे व्यासज्य साम गातव्यमिति। कुतः। शब्दार्थोऽयं सामसंज्ञको विकारः। ऋचो गुणभूत इत्यर्थः। स यदि व्यासज्य क्रियते, बहून्यक्षराण्यविकृतानि भवन्ति। तत्रायं चोदकोऽनुग्रहीष्यते। तस्माद्व्यासज्य गातव्यम्॥ १५॥

दर्शयति च॥ १६॥

अथवाऽन्यः श्रुतिप्रकारः। यदि, ऋगनुवादेन तृचो विधीयते तथा सत्येकी विधीयमानत्वाद्गुणभूतः। शब्दवृत्तेन चाप्रधानभूतः। अपर उद्दिश्यमानत्वात्प्रधानभूतः। शब्दवृत्तेन चागुणभूतः। तयोः सापेक्षत्वादसमासः स्यात्। 'तृचे' इति च समासः। तस्मादपि च धात्वर्थे किंचिद्विधेयम्। अपि च, सप्तम्याऽऽधारत्वं तृचस्य प्रतिपाद्यते। तत्र यद्येकस्यां सामाऽऽधीयेत तथा सप्तमी बाध्येत तिसृषु श्रुता॥ १४॥ [१९॥

---

१ उपयुज्यते—पा०। २ वर्तेत—पा०। ३ एक इति—तृच इत्यत्र त्रिशब्दोपात्तत्रित्वरूपोऽर्थ इत्यर्थः। ४ ऋक्शब्दार्थो वस्तुतः शब्दवृत्त्या च प्रधानभूत इत्याह—अपर इत्यादिना।

ऋचं सामोवाच मिथुनं संभवावेति। सोऽब्रवीत्, न वै त्वं ममाऽलमसि जायायै, वेदो मम महिमेति। ते द्वे भूत्वोचतुः। सोऽब्रवीत्। न युवां ममाऽलं स्थो जायायै, वेदो मम महिमेति। तास्तिस्रो भूत्वोचुः, मिथुनं संभवामेति। सोऽब्रवीत्, संभवामेति। तस्मादेकं साम तृचे क्रियते स्तोत्रीयमिति। नैका स्तोत्रीयसाम्नः संभवति। नापि द्वे। तिस्रः संभवन्तीति व्यासज्य गानं दर्शयति ॥ १६ ॥

वाक्यानां तु विभक्तत्वात्प्रतिशब्दं समाप्तिः स्यात्संस्कारस्य तदर्थत्वात् ॥ १७ ॥ सि०

तुशब्दः पक्षं व्यावर्तयति। वाक्यानि विभक्तानि त्रीण्येतानि। यास्तिस्र ऋचस्तत्रैकैका ऋक् कृत्स्नेन पदग्रामेण कांचित्स्तुतिमभिनिर्वर्तयति, न ऋगन्तरेण सह कंचिदर्थं संस्तौति तत्र साम, ऋचः संस्तवमभिनिर्वर्तयन्त्या गुणभावं गच्छत्साहाय्यं करोति। तत्र यदि व्यासज्य गीयेत, न ऋचः स्तुतिमभिनिर्वर्तयन्त्याः साम, उपकारकं स्यात्। न हि सांपार्थयपः साम भवतीति। न च ऋक्समुदायेन कश्चिदर्थः स्तूयते, यत्र सामसंबद्धा स्तुतिं कुर्यात्। ऋक् स्तुतिं करोति, सा न सामसंबद्धा। य ऋक्समुदायः सामसंबद्धः स स्तुतिं न करोति। तत्र प्रत्यृ-

१९ ॥]

प्रत्यृचं वा गेयम्। कुतः। सा स्तोत्रसाधनतया विहिता। सा स्वरं वर्णांश्च संस्कारमनियमेनाऽऽकाङ्क्षति। तत्र साम नियम्यते संस्कारकत्वेन। तस्मात्साम ऋक्संस्कारद्वारेण स्तोत्रेण संबध्यते। यथा ऋग्गुणः। 'एकं साम तृचे क्रियते' इति त्रिषु साम्नि संस्कारके गुणवाक्यमिदम्। तत्र योऽप्राप्तो गुणः स विधीयते। यत्साम्ना ऋचं संस्कुर्यादित्यनूद्यते, तास्तिस्र इति विधीयते। व्यासज्य गाने साम्ना न ऋक् संस्क्रियेत। ऋगेकदेशः संस्क्रियेत। न च ऋगेकदेशः स्तुतिं करोति। न च ऋगेकदेशस्य स्तोत्रीयेण संस्कारोऽपेक्षितः। ऋचः स्तुतिसाधनत्वात्। तस्माद्व्यासज्य गाने [illegible] स्यात्।

१ 'ऋचं सामोवाच, मिथुनं संभवावेति। सोऽब्रवीत्' न वै त्वं ममाऽलं जायायै, वेदो मम महिमेति। ते द्वे भूत्वोचतुः। सोऽब्रवीत्, न वै युवां ममाऽलं स्थो जायायै इति। तास्तिस्रो भूत्वोचुः, संभवामेति। तस्मादेकं साम तृचे क्रियते स्तोत्रीयम्' इत्येवं [illegible] कृतः पाठः।

र्चे सोऽग्नि परिसमाप्ते क्रियमाणे सामधेयो शब्देन स्तुतिः कृता भवति। सामसंस्कारस्य स्तुतिभावनार्थत्वात्। प्रत्यृचं परिसमाप्ते गानं कर्त्तव्यमिति॥ १७॥

तथा चान्यार्थदर्शनम्॥ १८॥

अन्यार्थमपि वाक्यमेतमर्थं दर्शयति। अष्टाक्षरेण प्रथमाया ऋचि प्रस्तौति द्व्यक्षरेणोत्तरयोरिति प्रस्तावभेदं दर्शयति। तथा च, एका वाऽस्योत्तमा स्तोत्रीया, तामुद्गृह्योद्गायेदिति—उद्गीथभेदं दर्शयति। तस्मादपि प्रत्यृचं गानं कर्त्तव्यमिति। अर्धर्चप्रगीतेष्वपि ऋच्येव गानं कर्त्तव्यम्। अपरिपूर्णं तद्वाक्यमर्धर्चे भवति। ऋचि तु परिपूर्यत इति। पादप्रगीतेषु पाद एव गानं कर्त्तव्यमिति। पाद एव हि तत्परिपूर्णं वाक्यम्। यथा, गोष्ठो वासिष्ठ इति। एवं यावति परिपूर्णं वाक्यं, तावति साम परिसमापयितव्यम्। क्वचित्पादेऽपि पूर्णं वाक्यम्। ऋच्यपि, क्वचिदर्धर्चेऽपि परिपूर्णम्। यत्र यथा परिपूर्णं तत्र तथा गातव्यमिति॥ १८॥

अनवानोपदेशश्च तद्वत्॥ १९॥

अनवानोपदेशश्च तद्वदुपपन्नो भविष्यति। यथाऽस्माभिरन्याय उपदिष्टः। अनवानं गायतीति, शक्यतेऽनवानं प्रत्यृचं परिसमापयितुम्। न तु त्रिष्टुप्-व्यासज्य शक्यते। अपि च, स्वाध्यायकाले प्रत्यृचं गानं परिसमापितम्। स्वाध्यायकाले चाभ्यासः, प्रयोगकाले कथं प्राप्नुता स्यादिति। यद्यपि प्रयोगकाले प्रत्यृचं गानं कर्त्तव्यं, ततः स्वाध्यायकाले तदभ्यासो युक्तः। तस्मादपि प्रत्यृचं गेयमिति॥ १९॥

अभ्यासेनेतरा श्रुतिः॥ २०॥

पादप्रगीतेषु पाद एव गानं कर्त्तव्यम्। पाद एव हि तत्परिपूर्णं वाक्यम्। यथा गोष्ठो वासिष्ठ इति। एतदयुक्तं भाष्यम्। कथम्। ऋच्येवैते सामनी उत्पन्ने, न पादे। समाना गीतिरिति छार्धवाक्त्रिषु पादेषु न गीयते। यथा, 'तेभ्यो दश प्राचीः' इति मन्त्रे। अपि च, पादोत्पन्नायाः पाद एव प्रयोगश्छान्दोग्ये नैव दृश्यते ऊह इति॥ १७॥ [१८॥ १९॥

---

१ प्रस्तावे भेदः—पा०। २ एते सामनी इति—गोष्ठवासिष्ठसंज्ञके सामनी इत्यर्थः। ३ ऊहे—ऊहमन्ये।

अथ यदुक्तं, तस्मादेकं साम तृचे क्रियत इति । तास्वभ्यासेनेतरा श्रुतिर्द्रष्टव्या । पर्यायेणेत्यर्थः । न ह्यत्र ऋक् सामनिर्वृत्त्यर्थमुपादीयते । तस्मान्न शक्यमिदं वक्तुम् । सामनिर्वृत्तिसाधनीभूतामृचं त्रिशब्दः परिच्छेत्स्यतीति । साम स्तोत्रस्य गुणभूतं निर्दिश्यते । रथंतरं पृष्ठं भवति, बृहत् पृष्ठं भवतीत्येवमादि । तत्र प्रत्यृचं न्यायेन गानं प्राप्तं, न सामनिर्वृत्त्या संख्या संबध्यते । किं तर्हि । ऋग्भिः । तत्रान्यथा नावक्लृप्त इत्यभ्यासो लक्ष्यते । तिसृष्वभ्यसितव्यं सामेति । यथा त्रिषु कुलेषु देवदत्तो भोजयितव्य इति । यदा त्रिसंख्या कुलैः संबध्यते, तदाऽभ्यासो लक्ष्यते । एवमिहापि द्रष्टव्यम् । तस्मात्प्रत्यृचं परिसमाप्तं गानं कर्तव्यमिति ॥ २० ॥

(समानच्छन्दस्कास्वेव तिसृषु ऋक्षु गानाधिकरणम् ॥४॥)

[४] तदभ्यासः समासु स्यात् ॥ २१ ॥ सि०

अस्ति ज्योतिष्टोमः । ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्रैतत्समाम्नायते, तस्मादेकं साम तृचे क्रियते स्तोत्रीयमिति । तत्रैतत्समधिगतम् । प्रत्यृचं परिसमाप्य गेयमिति । इदमन्यत्सांशयिकं, समासु विषमासु वा गेयमुत समास्वेवेति । किं तावन्नः प्रतिभाति । नियामकस्य शास्त्रस्याभावादनियम इति ।

एवं प्राप्ते, ब्रूमः । समास्वेव गेयं, न नानाछन्दस्कास्विति । किमेवं भविष्यति । गीतेः संग्रहविश्लेषौ न भविष्यतः । यदि न्यूनच्छन्दस्का ऋच उपादास्यामहे गीतिं संगृणीयाम । अथ, अधिकच्छन्दस्काः, ततो गीतिं विश्लेषयाम । उभयथा चाऽर्थं बाधेमहि । समासु तूपादीयमानासु न किंचिद्दुष्यति । तस्मात्समासु गानं कर्तव्यमिति । अपि च, त्रिशब्दोपचारः समासु युक्तो भविष्यति । समाने हि कस्मिंश्चिदाधीयमाने संख्याव्यवहारो भवति ॥ २१ ॥

लिङ्गदर्शनाच्च ॥ २२ ॥

लिङ्गं खल्वप्यस्मिन्नर्थे पश्यामः । स्यात्यां सवत्यवधीयत इत्याहुः, यद्बृहत्यामग्रीषु क्रियते, ऋक्त्वेनान्तरजतीति, न चास्यां संभवतीति विच्छन्दस्कासु दोषं ब्रुवन् समानच्छन्दस्कासु गानं दर्शयति॥२२॥

२० ॥ २१ ॥ २२ ॥]

(उत्तराशब्देनोत्तराग्रन्थपठितानामेव ऋचामुपादानाधिकरणम् ॥ ६ ॥)

[५] नैमित्तिकं तूत्तरात्वमानन्तर्यात्प्रतीयेत ॥ २३ ॥ सि०

ज्योतिष्टोमे समामनन्ति । रथंतरमुत्तरयोर्गायति, बृहदुत्तरयोर्गायति, कवतीषु रथंतरं गायति, यद्योन्यां गायति, तदुत्तरयोर्गायतीति । तत्रैतत्समधिगतम् । समासु गेयमिति । अथेदानीमिदं संदिह्यते । किं योन्युत्तरयोर्वा, उत्तराग्रन्थसमधीतयोर्वा गेयमुतोत्तराग्रन्थसमधीते एव उपादातव्ये इति । किं प्राप्तम् । नियमकारिणः शास्त्रस्याभावादनियम इति ।

एवं प्राप्ते, ब्रूमः । नैमित्तिकं तूत्तरात्वमुत्तराग्रन्थसमधीतासूपपद्यत इति । कुतः । समाख्यानात् । प्रकृतत्वाच्चोत्तराग्रन्थाधीतानाम् । आह । द्वाभ्यामपि समाख्याप्रकरणाभ्यां वाक्यं बलीयः । तस्मादनियम एव प्राप्नोति । अत्रोच्यते । सर्वे हि संबन्धिशब्दाः पदान्तरमनपेक्षमाणा न कंचिदप्यर्थमाहुः । तस्मादपेक्षितं पदान्तरं, तत्प्रकृतं संनिहितं वा । इतरथाऽपरिपूर्णोऽर्थे वाक्यमनभिधायकमेव कस्यचिदर्थस्य स्यात् । संज्ञाग्रहणे पुनर्न पदान्तरमपेक्षते । श्रुत्यैव परिपूर्णोऽर्थो गृह्यते । तस्मान्न संबन्धिशब्दोऽध्यवसानीयः । उत्तरासंज्ञैवोपादातव्येति । न हि संज्ञासु गृह्यमाणासु पदान्तरानन्तर्यमपेक्षितव्यं भवति ॥ २३ ॥

ऐकार्थ्याच्च तदभ्यासः ॥ २४ ॥

'रथंतरमुत्तरयोर्गायति' इति । अत्र पूर्वपक्षवाद्युत्तराशब्दं संख्याशब्दं मन्यते । 'यद्योन्या तदुत्तरयोर्गायति' इति वाक्याद्योन्युत्तरे गम्येते । प्रकरणादुत्तराग्रन्थसमाम्नाते । प्रकरणाच्च वाक्यं बलीयः । अथवा, 'यद्योन्यां तदुत्तरयोः' इति योन्युत्तरे वाक्यात् । उत्तराग्रन्थपठिते अपि वाक्यादेव । तस्मादनियमः ।

सिद्धान्तस्तु, उत्तराशब्दो रूढ्या ग्रन्थे प्रसिद्धः । उत्तरा वर्तते, उत्तरा अध्यापयाम इति । तस्मिन्गृह्यमाणे न पदान्तरसंनिधानमपेक्षितव्यम् । योन्युत्तरासु गृह्यमाणासु प्रकृतत्वमपेक्षितव्यम् । तत्र विलम्बितः प्रत्ययः । इतरत्र त्वविलम्बितः ॥ २३ ॥

---

१ उत्तराग्रन्थसमधीतानाम्—पा० । २ संज्ञासंज्ञिग्रहणे न पुनः—पा० । ३ अपेक्षितव्यमिति—संबन्धिशब्दत्वादिति शेषः ।

तास्वेव चोत्तराग्रन्थसमधीतासु सामाभ्यसितव्यम् । एवमेकार्थता तृचशब्दस्य भविष्यति । एकं कंचित्सामान्यविशेषमाश्रित्य तृचशब्द-मुपचरन्ति । एतदेवमुक्तम् । यद्विशेषे कस्मिंश्चित्संख्या भवति । इत-रथा हि सर्वत्र सर्वसंख्या भवेयुः । तथा हि संव्यवहाराभावः स्यात् । तस्मात्समानच्छन्दस्कासु समानदेवताकासु च तृचशब्दोपचारादुत्तरा-ग्रन्थसमधीता एव ग्रहीतव्या इति ॥ २४ ॥

(अथवा—त्रैशोकसाम्न उत्तराग्रन्थपठितयोर्बृहत्योरेव गाना-धिकरणम् ॥ ५ ॥)

एवं वा—

[५] तदभ्यासः समासु स्यात् ॥ २५ ॥ पू०

अस्ति द्वादशाहः, द्वादशाहेन प्रजाकामं याजयेदिति । तत्र चतुर्थेऽहनि त्रैशोकं नाम साम, अतिजगत्यामुत्पन्नम् । अतिजगती—विश्वाः पृतना अभिभूतरं नरं सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे । क्रत्वा वरिष्ठं वर आमुरीमुतोग्रमोजिष्ठं तवसं तरस्विनम् । उत्तरे द्वे बृहत्यौ । तयोः पूर्वा, नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा । सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः । उत्तरा, समीं रेभासो अस्वरन्निन्द्रं सोमस्य पीतये । स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा समूतिभिरिति । तत्रैषोऽर्थः सांशयिकः । किमन्ये अतिजगत्यामुत्पादाय समासु गेय-मुत ये एव ते उत्तरे बृहत्यौ, एते एवोपादाय विषमास्वेव गातव्य-मिति । किं प्राप्तम् । संशयविश्लेषो मा भूतामित्यन्ये उत्पत्तिजगत्यानु-पादायेतरसाम समास्वेवाभ्यसितव्यमिति ॥ २५ ॥

एकविंशतिकृत्वः षोडशिन्यभ्यस्यमाने त्रैशोकस्याभ्यास इति । एतदयुक्तम् । न हि द्वादशाहे षोडशिन एकविंशतिकृत्वः प्रयोगः । किं तर्हि । सकृदेव प्रयोगः । तस्मादन्यो वाक्यार्थः । 'एकविंशः षोडशी' इति सर्वस्तोत्राणि षोडशिनि, एक-विंशानि भवन्ति । (तत्रैकविंशतिकृत्वः संपत्तये) त्रैशोकस्य सप्तकृत्वोऽभ्यासः । -तस्मिन्नभ्यस्यमाने सप्तातिजगत्यो भवन्ति । एवं सति जगतीबहुत्वं भविष्यति ॥२४॥

१ अतिजगत्यामिति—पा० । २ यसावदाय (?) क्वचित्— 'तदभ्यासः समासु स्यात्' इत्यादिसूत्रचतुष्टयेन वर्णकान्तरम् रचितं तत्र 'ऐकाङ्गं च तदभ्यासः', इति सूत्रद्वयं भाष्यमाक्षिपति—एकविंशत्यादिना । ३ त्रिविहितस्थाने 'तत्रैकविंशतिसंपत्तये' इति पाठ आदरणीय इति भाति ।

लिङ्गदर्शनाच्च ॥ २२ ॥

लिङ्गं खल्वप्यस्मिन्नर्थे दर्शयति, अतिजगतीषु स्तुवन्तीति । किं लिङ्गम् । अतिजगतीष्विति बहुवचनम् । तस्मादन्ये अतिजगत्यावपादातव्ये इति ॥ २२ ॥

नैमित्तिकं तूत्तरात्वमानन्तर्यात्प्रतीयेत ॥ २३ ॥ सि०

नैमित्तिकं तूत्तरात्वमानन्तर्यादुत्तरापाठनिमित्तमानन्तर्ये सति प्रतीयेत । श्रुतिर्हि वाक्याद्बलीयसीति । प्रकृतत्वादुत्तरे बृहत्यावेवमनुग्रहीष्येते । तस्मान्नान्ये आदातव्ये इति ॥ २३ ॥

ऐकार्थ्याच्च तदभ्यासः ॥ २४ ॥

एवं च समानदेवताके त्रैशोके तृच इति तृचशब्दोपचारो युक्तो भविष्यति । तस्मादपि नान्ये उपादातव्ये इति । अत्राऽऽह । अथ यदुक्तम्, अतिजगतीषु स्तुवन्तीति शब्दोपचारादतिजगतीबहुत्वं दर्शयतीति । तत्परिहर्तव्यम् । अत्रोच्यते । तदभ्यास एव द्रष्टव्यः । पोडशयभ्यासः । एकविंशः पोडशीति, एकविंशतिकृत्वः पोडशिन्यभ्यस्यमाने त्रैशोकाभ्यासः । तत्र सप्तकृत्वोऽतिजगत्यामभ्यस्यमानायामतिजगतीषु स्तुवन्तीति वचनमुपपत्स्यत इति ॥ २४ ॥

(बृहद्रथंतरयोः स्वयोन्युत्तराग्रथनेन संपादितककुभोरेव गानाधिकरणम् ॥ १ ॥)

[६] प्रागाथिकं तु ॥ २५ ॥ सि०

ज्योतिष्टोमे श्रूयते, बृहत् पृष्ठं भवति, रथंतरं पृष्ठं भवतीति । रथंतरस्य योनिर्बृहती, अभि त्वा शूर नोनुमो दुग्धा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः । उत्तरा पङ्क्तिः, न त्वावान् अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते । अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे । बृहतो योनिर्बृहत्येव, त्वामिद्धि हवामहे साता वाजस्य कारवः । त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः । उत्तरा पङ्क्तिरेव, स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः । गामश्वं रथ्यमिन्द्र संकिर सत्रा वाजं न जिग्युषे,

---

१ उपादातव्ये-पा० । २ त्रैशोके तृचशब्दोपचारो भविष्यति-पा० । ३ स्तुवन्तीत्यतिजगती-बहुत्वं-पा० । ४ एष-पा० ।

इति । तयोर्वैच्छन्दस्कं गानमाम्नायते, न वै बृहद्रथंतरमेकच्छन्दो यत्तयोः पूर्वा बृहती ककुभावुत्तरे इति । तत्रायमर्थः सांशयिकः । किमन्ये उत्पत्तिककुभावागमय्य गातव्यमुत याऽसौ पूर्वा बृहती, उत्तरा च पङ्क्तिस्तयोः प्रग्रथनेन तृचकर्म कृत्वा ककुबुत्तराकारं गानं कर्तव्यमिति । किं प्राप्तम् । उत्पत्तिककुभावागमयितव्ये इति । कुतः । एवमन्यासां ककुभामुत्पत्तिरर्थवती भविष्यति, यदि ताः ककुप्कार्ये प्रयुज्यन्ते । आह । ननु वाचस्तोमे तासामर्थवत्ता भविष्यति । उच्यते । सत्यमर्थवत्ता तत्र भविष्यति । ककुप्कार्यार्थताऽपि तु गम्यते । सा नापह्नोतव्येति ।

एवं प्राप्ते, ब्रूमः । प्रागाथिकं तु । तुशब्दः पक्षं व्यावर्तयति । प्रागाथिकं सामगानं कर्तव्यमिति । याऽसौ पूर्वा बृहती, उत्तरा च पङ्क्तिस्तयोः प्रग्रथनं कर्तव्यम् । एवं हि स्मरन्ति । काकुभः प्रगाथ इति । आह । ननु ककुभि, अनाद्यायां काकुभ इति न प्राप्नोतीति । उच्यते । तस्येदमिति, तत्र भव इति वा, न दोषः ॥ २५ ॥

स्वे च ॥ २६ ॥

एवं च, स्वे छन्दसि गानं कृतं भवति । उत्तरापाठेन ह्यत्रैषा पङ्क्तिरुपदर्शिता तृचकर्मणि । तत्र प्रकृतहानमप्रकृतप्रक्रिया च न कृता भविष्यति । तस्मादपि तयोः प्रग्रथनं कर्तव्यमिति ॥ २६ ॥

प्रगाथे च ॥ २७ ॥

एवं चात्र प्रगाथशब्द उपपन्नो भवति । प्रकर्षं हि प्रशब्दो द्योतयति । प्रकर्षेण यत्र गानं स प्रगाथः । कश्च प्रकर्षः । यत्किंचित्पुनर्गीयति । तस्मादपि प्रकृतयोः प्रग्रथनं कर्तव्यमिति ॥ २७ ॥

लिङ्गदर्शनाव्यतिरेकाच्च ॥ २८ ॥

अव्यतिरेकेण च सर्वत्र लिङ्गं दर्शयति । कथमिदमव्यतिरेकेणेति । परप्रकृतयोरेव प्रग्रथनमुपपद्यते, न प्रकृतव्यतिरेकेणेति । किं लिङ्गं भवति । एवमाह । एषा वै प्रतिष्ठिता बृहती या पुनःपदा । तदुत्पादं

एवं हि स्मरन्ति । काकुभः प्रगाथ इति । एतदयुक्तम् । बार्हत एवायं प्रगाथश्छन्दोगैः स्मर्यते । अतो भ्रान्त्या परिचोदनापरिहारौ ॥२५॥[२१॥२७॥]

---

१ यत्तयो—पा० । २ ककुभावुत्तरपरं—पा० ।

पुनरारभते तस्माद्वत्सो मातरमभि हिंकरोतीति । पुनःपादारम्भः प्रग्रथन उपपद्यते, नान्यथा । तस्माद्याऽसौ पूर्वा बृहती, उत्तरा च पङ्क्तिः, तयोः प्रग्रयनेन तृचकर्म कृत्वा ककुबुत्तराकारं गानं कर्तव्यमिति ॥२८॥

(अथवा—बृहतीविष्टारपङ्क्त्योरेव प्रग्रयनेन संपादिते बार्हते तृचे रौरवयौधाजयसाम्नोर्गानाधिकरणम् ॥६॥)

एवं वा— .

[६] प्रागाथिकं तु ॥ २५ ॥ सि०

अस्ति ज्योतिष्टोमः । ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्र त्रिष्छन्दा आवापो माध्यंदिनः पवमानः पञ्चसामा । गायत्रामहीयवे गायत्रे तृचे भवतः, रौरवयौधाजये चार्हते तृचे, औशनमन्त्यं त्रिष्टुप्स्विति । यदेतद्रौरवं यौधाजयं च द्वे सामनी, तयोः पूर्वा बृहती, पुनानः सोम धारयापो वसानो अर्षसि । आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्ययः । उत्तरा विष्टारपङ्क्तिः, दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् । आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धूतो विचक्षणः । तदत्र संशयः । किमन्ययोरुत्पत्तिबृहत्योरागमं कृत्वा समासु गानं कर्तव्यमुत याऽसौ पूर्वा बृहती, उत्तरा च विष्टारपङ्क्तिस्तयोः प्रग्रयनेन तृचकर्म कृत्वा बृहतीकारं गानं कर्तव्यमिति । किं प्राप्तम् । अन्ये बृहत्यावागमयितव्ये इति । कुतः । एवमृचामुत्पत्तिरर्थवती भविष्यतीति ।

एवं प्राप्ते ब्रूमः । प्रागाथिकं तु । तुशब्दः पक्षं व्यावर्तयति । प्रागाथिकं सामगानं कर्तव्यं, नोत्पत्तिबृहत्यावागमयितव्ये । प्रकृतयोरेव प्रग्रयनं कर्तव्यम् । एवं हि स्मरन्ति, बार्हतः प्रगाथ इति । उत्पत्तिबृहत्योरानीयमानयोः प्रगाथो न स्यात् । तत्र स्मृतिर्बाध्येत । तस्मात्प्रकृतयोः प्रग्रयनं कर्तव्यमिति ॥ २५ ॥

स्वे च ॥ २६ ॥

एवं च स्वे छन्दसि प्रकृते गानं भविष्यति, न प्रकृतहानमप्रकृतप्रक्रिया । तस्मादपि नान्ये बृहत्यावागमयितव्ये इति ॥ २६ ॥

प्रगाथे च ॥ २७ ॥

(अथवा—अनुष्टुब्गायत्रीद्वयप्रग्रथनेन संपादिते आनुष्टुभे तृचे श्यावाश्वान्धीगवसाम्नोर्गानाधिकरणम् ॥ १ ॥)

एवं वा—

[६] प्रागाथिकं तु ॥ २५ ॥

पञ्चच्छन्दा आवाप आर्भवः पवमानः सप्तसामा । गायत्रसंहिते गायत्रे तृचे भवतः, श्यावाश्वान्धीगवे आनुष्टुभे, उष्णिहि सफं, ककुभि पौष्कलं, काबमन्त्यं जगतीष्विति । यदेतत्, श्यावाश्वमान्धीगवं च द्वे सामनी, तयोः पूर्वाऽनुष्टुप्, पुरोजिती वो अन्धसः सुताय मादयित्नवे । अप श्वानं श्रथिष्टन सखायो दीर्घजिह्वयम् । उत्तरे द्वे गायत्र्यौ, यो धारया पावकया परिप्रस्यन्दते सुतः । इन्दुरश्वो न कृत्व्यः । तं दुरोषमभी नरः सोमं विश्वच्या धिया । यज्ञं हिन्वन्त्यद्रिभिरिति । तत्रैषोऽर्थः सांशयिकः । किमन्ययोरुत्तरयनुष्टुभोरागमं कृत्वा समासु गानं कर्तव्यमथवा, याऽसौ पूर्वाऽनुष्टुप्, उत्तरे च गायत्र्यौ, तयोः प्रग्रथनेन तृचकर्म कृत्वाऽनुष्टुप्कारं गानं कर्तव्यमिति । किं प्राप्तम् । अन्ये अनुष्टुभावागमयितव्ये इति । कुत एतत् । एवं तासामुत्पत्तिरर्थवती भविष्यति ।

एवं प्राप्ते, ब्रूमः । प्रागाथिकं तु । प्रागाथिकं गानं कर्तव्यम् । एवं हि स्मरन्ति । आनुष्टुभः प्रगाथ इति । प्रगाथता स्मर्यमाणा नापह्नोतव्या ॥ २५ ॥

स्वे च ॥ २६ ॥

एवं स्वे गानं भविष्यति । तत्र प्रकृतमनुग्रहीष्यते । नाप्रकृतप्रक्रिया भविष्यति ॥ २६ ॥

प्रगाथे च ॥ २७ ॥

प्रगाथशब्दश्चोपपत्स्यते पुनःपादे गीयमाने ॥ २७ ॥

लिङ्गदर्शनाव्यतिरेकाच्च ॥ २८ ॥

अव्यतिरेकेण च लिङ्गं भवति । एवमाह, चतुर्विंशतिर्जगत्यस्तृतीयसवनम्, एका ककुबिति । तन्निर्दिश्यते । पञ्चच्छन्दा आवाप आर्भवः पवमानः सप्तसामा । गायत्रसंहिते गायत्रे तृचे भवतः । ताः षड् गाय-

ऽप्यस्तिस्रो जगत्यो भवन्ति । श्यावाश्वान्धीगवे आनुष्टुभे, तयोः पूर्वाऽनुष्टुप्, उत्तरे गायत्र्यौ । तत्र प्रग्रथनेन क्रियमाणे द्वयोः साम्नोः षडनुष्टुभः, ताश्चतस्रो जगत्यः, पूर्वाभिः सह सप्त । उष्णिहि सफं, ककुभि पौष्कलम् । एकमप्येकस्यामृचि, अपरमप्येकस्याम् । ते द्वे उष्णिक्ककुभौ । सैका जगती, गायत्रीपादश्च । पूर्वाभिः सहाष्टौ जगत्यः । कावे तिस्रो जगत्यः । ताभिः सहैकादश भवन्ति । एकविंशं यज्ञायज्ञीयम् । तत्र पूर्वा बृहती, उत्तरा विष्टारपङ्क्तिः । ततः ककुभावुत्तरे कृत्वा प्रगाथः क्रियते । एकविंशे च स्तोमे क्रियमाणे सप्त बृहत्यो भवन्ति । चतुर्दश ककुभः । याः सप्त बृहत्यः, ताः पञ्च जगत्यः । पूर्वाभिः सह षोडश । एकश्चात्र जगतीपादः । पूर्वेण गायत्रीपादेन सह विंशत्यक्षराणि । अथ चतुर्दशसु ककुप्सु या द्वादश ककुभः, ताः सप्त जगत्यः । पूर्वाभिः सह त्रयोविंशतिः । ये द्वे ककुभौ शिष्टे, सैका जगती, गायत्रीपादश्च । पूर्वाभिः सह चतुर्विंशतिर्जगत्यः । गायत्रीपादः पूर्वविंशत्यक्षरैः सहैका ककुब् भवति । एवं प्रगाथे क्रियमाणे चतुर्विंशतिर्जगत्यः, एका च ककुप् । अथ प्रगाथो न क्रियते, ततः श्यावाश्वान्धीगवयोरुत्तरयनुष्टुभोरागमात्, यज्ञायज्ञीय उत्पत्तिककुभोरागमाच्चैषा संख्या संपद्यते । तस्मात्प्रग्रथनेन गानं कर्तव्यमिति ॥ २८ ॥

(अथवा—गवामयने द्वयोर्द्वयोर्ऋचोः प्रग्रथनेन ब्रह्मसामगानाधिकरणम् ॥ १ ॥)

एवं वा—

[६] प्रगाथिकं तु ॥ २५ ॥ सि०

गवामयने ब्रह्मसाम प्रकृत्य समामनन्ति, चतुःशतमैन्द्रा बार्हताः प्रगाथाः । त्रयस्त्रिंशच्च सतोबार्हतास्तृचा इति । तत्र संदेहः । किं द्वयोर्द्वयोर्ऋचोः प्रग्रथनं कृत्वा गातव्यमुत त्रिसृषु ऋक्षु गातव्यमिति । किं प्राप्तम् । तिसृषु ऋक्ष्विति । कुतः । एवं प्रकृतौ श्रूयते, तस्मादेकं साम तृचे क्रियत इति । तदिह चोदकेन प्राप्तम् । तस्मात्तिसृषु गातव्यमिति ।

एवं प्राप्ते, ब्रूमः । प्रागाथिकं तु । स्वे च । प्रगाथे च ।

---

1 उत्तरत्रानुष्टुभो.—पा० । २ त्रयस्त्रिंशच्च सतोबार्हतास्त्रिकाः—पा० । ३ प्रगाथे—पा० ।

द्वयोर्द्वयोर्ऋचोर्ग्रथनम् । एवं स्वे गानं कृतं भविष्यति । कस्मिन्, स्वे प्रगाथे। कथं प्रगाथः स्वः। विहितो हि गवामयने ब्रह्मसाम प्रकृत्य। तस्माद्ब्रह्मसाम्नः स्वः प्रगाथः । प्रगाथशब्देन च वचनात्स्वः प्रगाथ इत्युच्यते ॥ २५ ॥ २६ ॥ २७ ॥

लिङ्गदर्शनाव्यतिरेकाच्च ॥ २८ ॥

भवति हि लिङ्गदर्शनं, पञ्चसु मासु बार्हताः प्रगाथा आप्यन्त इति । तच्च प्रग्रथने युज्यते, न तृचगाने। कथम् । चतुरुत्तरं हि शतं वै प्रगाथाः। तत्र बृहद्रथंतरयोर्ज्योतिष्टोमे प्रगाथद्वयम् । नौधसकालेययोरपि तत्रैव प्रगाथद्वयम्। इन्द्रक्रतुः प्रगाथ उत्तरस्मिन् पक्षसि भवति । त एते नवनवतिः प्रगाथाः शिष्टा अभिप्लवेषु कर्तव्याः । पृष्ठ्येषु सतोबृहत्यो विधीयन्ते। अभिप्लवानां तृतीये दिवसे सतोबृहत्यः । एवमवशिष्टान्यभिप्लवानां नवमहानि। तेषामन्त्ये सतोबृहत्यः । अन्येषु नवनवतौ दिवसेषु नवनवतिः प्रगाथा आप्यन्त इति लिङ्गमप्युपपन्नं भवति । तृचे पुनर्गाने क्रियमाणे षट्षष्टिस्तृचाश्चिषु सप्ताधिकेषु मासेषु समाप्येरन् । तदेतस्माल्लिङ्गदर्शनात्प्रगाथे गानं कर्तव्यमिति मन्यते।

आह। अथ कस्मान्न प्रथमतृचे गानं कृत्वा ततस्तस्मात्तृचादेकामृचमादायान्ये द्वे ऋचौ गृहीत्वा तृचे गानं क्रियते । तथा हि तृचगानवादी चोदकोऽनुगृहीतो भवति । लिङ्गं चोपपत्स्यते । पञ्चसु मासु बार्हताः प्रगाथा आप्यन्त इति । उच्यते । अव्यतिरेकेण लिङ्गं दर्शयति, अन्या अन्या ऋचो भवन्ति । तदेव सामेति । तस्माद्द्वयोर्द्वयोर्ऋचोः प्रग्रथनं कृत्वा गानं कर्तव्यमिति ॥ २८ ॥

---

१ गवामयन इति—गवामयने षष्ट्यधिकशतत्रयं सुत्याः । ताश्च षड्विंशतिकाण्डकथा खिनाभिवमाम्नाता । तत्राशीतिशतं पूर्वं पक्षः, तथोत्तरं, मध्ये विषुवान् । पूर्वस्मिन् पक्षसि—' प्रायणीयं प्रथममहः, चतुर्विंशं द्वितीयं, ततश्चत्वारोऽभिप्लवाः षडहाः । तानि चतुर्विंशत्यहानि । एकः पृष्ठ्यः षडहः । एवं मासः, तादृश एव द्वितीयस्तृतीयश्चतुर्थः पञ्चमः । ततस्त्रयोऽभिप्लवाः षडहाः । तान्यष्टादशाहानि, एकः पृष्ठ्यः षडहः, अभिजिदेकाहः, त्रयः स्वरसामानः, इत्यष्टाविंशत्यहानि । आद्याभ्यामहोभ्यां सह षण्मासाः । तदिदं पूर्वं पक्षः । मध्ये विषुवान् । अथोत्तरं पक्षः । त्रयः स्वरसामानः, विश्वजिदेकाहः, एकः पृष्ठ्यः षडहस्त्रयश्चिरारम्भणः, त्रयोऽभिप्लवाः षडहाः, तान्यष्टाविंशत्यहानि, पुनः पृष्ठ्यः षडहश्चतुश्चिरारम्भणः, चत्वारोऽभिप्लवाः षडहाः । एवं मासः, तादृश एव द्वितीयस्तृतीयश्चतुर्थः । ततस्त्रयोऽभिप्लवाः षडहाः । आयुर्गौरिति द्वे अहनी, द्वादशाहस्य दशाहानि, महाव्रतं षष्ठिरात्रयेति द्वात्रिंशदहानि । अन्त्यैरष्टाविंशत्यहोभिः सह षण्मासाः' इति । २ प्रगार्थं—पा० ।

(गीत्युपायानां शाखाभेदेन समाम्नातानां विकल्पाधिकरणम् ॥ ७ ॥)

[७] अर्थैकत्वाद्विकल्पः स्यात् ॥ २९ ॥ सि०

सामवेदे सहस्रं गीत्युपायाः । आह । क इमे गीत्युपाया नाम । उच्यते । गीतिर्नाम क्रिया । सा, आभ्यन्तरप्रयत्नजनितस्वरविशेषाणामभिव्यञ्जिका । सा सामशब्दाभिलप्या । सा नियतपरिमाणा, ऋचि च गीयते । तत्संपादनार्था ऋगक्षरविकारो विश्लेषो विकर्षणमभ्यासो विरामः स्तोभ इत्येवमादयः सर्वे समधिगताः समाम्नायन्ते । तेषु संशयः । किं समुच्चीयन्त उत विकल्प्यन्त इति । किं तावन्नः प्रतिभाति । सर्वेषां समाम्नानात्सर्वाङ्गोपसंहारित्वाच्च प्रयोगवचनस्य, समुच्चीयेरन्निति ।

एवं प्राप्ते, ब्रूमः । अर्थैकत्वाद्विकल्पः स्यादिति । एकार्था हि गीत्युपायाः । गीतिः कथं निर्वर्तेतेति प्रयुज्यन्ते । तत्रान्यतमेन[1] गीतौ निर्वृत्तायां नेतरे प्रयोगमर्हन्ति । तस्माद्विकल्प इति ॥ २९ ॥

(प्रगीताया एव ऋचो वैकृतापूर्वस्तोत्रसाधनत्वाधिकरणम् ॥ ८ ॥)

[८] अर्थैकत्वाद्विकल्पः स्यादृक्सामयोस्तदर्थत्वात् ॥ ३० ॥ पू०

क्वचित्कर्मविशेषे श्रूयते, ऋचा स्तुवते, साम्ना स्तुवते । यदृचा स्तुवते तदसुरा अन्ववायन्, यत्साम्ना स्तुवते तदसुरा नान्ववायन् । य एवं विद्वान् साम्ना स्तुवीतेति । तत्रायमर्थः सांशयिकः । किमृचा वा स्तोतव्यं साम्ना वा, उत साम्नैवेति । किं तावत्प्राप्तम् । विकल्पः, ऋचा वा साम्ना वा । भिन्नमिदं[2] वाक्यं दृश्यते । यदृचा स्तुवते तदसुरा अन्ववायन्निति । ऋचा स्तवे क्रियमाणेऽसुरा अन्वागता इति । परिपूर्णमेतावति वाक्यं पश्यामः । एवमर्थमिदं संकीर्त्यते, कथं नाम गम्यत ऋचा स्तोतव्यमिति । किमर्थम् । यस्मिन् कर्मविशेषे श्रूयते, तस्याङ्गं

[२९ ॥]

ऋचा स्तोतव्यं, साम्ना वा । कुतः । उभयत्र वर्तमानापदेशात् । यदि साम्नि विधायक. श्रूयेत, तथा सति काचिन्निन्दा प्रकल्प्य साम्ना स्तुत्येकवाक्यता स्यात् ।

---

1 तत्रान्यतरेण भित्ती गीतौ निर्वृत्तायाम्–पा० । 2 भिन्नमिदं द्वि–पा० ।

यथा स्यात्। तच्च प्रयोगसामर्थ्यात्प्रयोगवचनेन गम्यत इति । नन्व-सुरसकीर्तनान्निन्देषा । नेत्याह । न वय निन्दितानिन्दितान्वाऽसुरान् विद्म. । सकीर्तनात्कर्तव्यतामध्यवस्यामः । एव साम्ना स्तुवत इति पृथग्वाक्यम् । तस्माद्विकल्प. । ऋक्सामयोः स्तुत्यर्थत्वादुभयोरप्येक कार्यम् । स्तुतिर्हि निर्वर्तयितव्येति, तदन्यतरेण सिध्यतीति विकल्प. ॥३०॥

वचनाद्विनियोगः स्यात् ॥ ३१ ॥ सि०

नैतदस्ति, विकल्प इति । साम्नो विनियोगः स्यात् । कुतः । तस्येद विनियोजक वचनमस्ति । यदृचा स्तुवते तदसुरा अन्ववायन । यत्साम्ना स्तुवते तदसुरा नान्ववायन् । य एव विद्वान् साम्ना स्तुवीतेति साम्ना स्तुति. प्रशस्यते प्रत्यक्षेण प्रशसावचनेन । इतरथा कल्प्या स्याद्, ऋचा स्तवनेऽसुरा अनुगताः । तस्मादृचा स्तोतव्यमिति । अथ साम्ना स्तवः प्रशस्यते, ततो यदृचा स्तुवते तदसुरा अन्ववायन्नितीतरप्रशसार्था निन्देषा, न किंचित्कल्पयिष्यत इति । कथं निन्दावचनमेतदिति गम्यते । इतरस्तुतिवचनात् । तस्मात्साम्नैव स्तोतव्यमिति ॥ ३१ ॥

(अथवा—विकृतिविशेषे प्रगीतयैव ऋचाऽऽहवनीयोपस्थानाधिकरणम् ॥८॥)

एव वा—

[८] अर्थैकत्वाद्विकल्पः स्यादृक्सामयोस्तदर्थत्वात् ॥ ३० ॥ पू०

क्वचित्कर्मविशेषे श्रूयते । अयं सहस्रमानव इत्येतयाऽऽहवनीयमुपतिष्ठत इति । अत्रायमर्थः सांशयिकः । किमप्रगीतयोपस्थातव्यमुत प्रगीयेति । किं प्राप्तम् । प्रगीतया, अप्रगीतया वा । कुतः । अविशेषोपदेशात् । प्रगीताऽप्यसावियमेव ऋक्, अप्रगीताऽपीयमेव । उभयथा हि तां समामनन्ति । तस्मान्न विशेष आदर्तव्य इति । न चेद्विशेषः, स्तुतिपरत्वादृक्सामयोर्विकल्प इति ॥ ३० ॥

एवं प्राप्ते ब्रूमः—

वचनाद्विनियोगः स्यात् ॥ ३१ ॥ सि०

प्रगीतैव विनियुज्येत, नाप्रगीता । कुतः । वचनात् । किं वचनम् । अयं सहस्रमानव इत्येतया—इति प्रकृतवचनः शब्दः । प्रगीता च सामवेदे प्रकृता । सा, एतयेति संबध्यते । नन्वप्रगीताऽपि तत्र पठ्यते । सत्यम् । प्रगाणसंबन्धार्था तु सा । न ह्यपठितायां प्रगाणं शक्यते कर्तुमिति, ऋक् सामार्थे । ऋचोऽध्ययनं सामार्थं गम्यते । न ह्यन्तरेण ऋचं सामनिर्वृत्तिर्भवति । अन्तरेणापि तु साम, ऋक् निर्वर्त्यते । न ऋक् सामाऽऽकाङ्क्षत इति । तस्मादेव सामदेवे, उपतिष्ठते वा, स्तौति वेत्युक्ते प्रगीतायामेव ऋचि संप्रत्ययो भवति, नाप्रगीतायाम् ।

आह । यदि प्रगीतायां संप्रत्ययः प्रकरणात्, वचनादप्रगीतायाम् । अप्रगीताऽपि हि शाखान्तरे समाम्नायते । सा प्रकरणं बाधित्वा वाक्येन गृह्येतेति ।

'अयं सहस्रमानव इत्येतयाऽऽहवनीयमुपतिष्ठते' इति प्रगीतायामपि संप्रत्ययोऽप्रगीतायामपि । उपस्थानं, स्तुतिं वा प्रगीताऽपि । तस्माद्विकल्पः ॥ ३० ॥

एवं प्राप्ते, ब्रूमः । 'एतया' इति संनिहितवचनः । प्रगीता च संनिहिता । यद्यप्यप्रगीताऽपि संनिहिता, तथाऽपि प्रगीतैव ग्राह्या । कुतः । यदप्रगीतायाः परार्थपाठः । न ह्यपठितायां सामर्थ्यं निर्वर्तयितुम् । नन्वप्रगीताऽपि शाखासु पठ्यते । सा वाक्येन ग्रहीष्यते ।

---

१ ऋक्सामसंबन्धे, ऋचोऽध्ययनं—पा० । २ प्रगीताऽपीति—निर्वर्तयेत् । अप्रगीताऽपीति शेषः । ३ निर्वर्तयितुमिति—ह्यनवधारितायामृचि सुखेन सामगानं संभवति । अतोऽप्रगीतायाः पाठः प्रगाणार्थं इति प्रगीतैव प्रयोजनधाकाङ्क्षा माक्षेत्यर्थः ।

उच्यते । न वाक्येन ऋक् गृह्यते । प्रतीकग्रहणं ह्येतत् । अयं सहस्रमानव इत्येतयेति पुनः प्रकृतीया ऋचो वाचको मुख्य ऋक्शब्दः । स्वपक्षे प्रतीकग्रहस्य लक्षणा स्यात् । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या, न लक्षणा । तस्मात्प्रगीतयोपस्थातव्यमिति ॥ ३१ ॥

(अथवा—ऋग्यजुर्मन्त्राणां तानस्वरेण कर्मणि प्रयोगाधिकरणम् ॥ ८ ॥)

एवं वा—

[८] अर्थैकत्वाद्विकल्पः स्यादृक्सामयोस्तदर्थत्वात् ॥ ३० ॥ पू०

इह केचित्त्रैस्वर्येणाधीयन्ते, केचिच्चातुःस्वर्येण । आह । य इमे चातुःस्वर्येणाधीयन्ते, किं त उदात्तानुदात्तस्वरितेभ्योऽधिकमपरं स्वरं कुर्वन्ति । नेत्याह । तेषामप्येत एव स्वराः, येऽन्येषाम् । किं नु कुर्वन्ति । एकं स्वरान्तरमुत्क्रम्याधीयते । तत्र संदेहः । किं समुच्चयस्त्रैस्वर्यादीनामुत विकल्प इति । किं प्राप्तम् । सर्वाङ्गोपसंहारित्वात्प्रयोगवचनस्य, समुच्चय इति । एवं प्राप्ते, ब्रूमः । अर्थैकत्वाद्विकल्पः स्यात् । एकोऽर्थः सर्वेषां त्रैस्वर्यादीनामध्ययननिर्वृत्तिः । तस्माद्विकल्पः ॥३०॥

वचनाद्विनियोगः स्यात् ॥ ३१ ॥ सि०

वचनमिदं भवति स्मृत्यनुमितम्, तानो यज्ञकर्मणीति । तस्मात्तानेन प्रयोगः कर्तव्यः । अथ त्रैस्वर्यादीनां किमर्थं समाम्नानमिति । उच्यते । अर्थावबोधनार्थं भविष्यति ॥ ३१ ॥

उच्यते । तस्याः प्रकरणेन संबन्धः कल्प्यः । इतरस्य तु वैलक्षः । 'एतया' इत्यपि नेत्र संनिहितवचनो वाच्यते ॥ ३१ ॥

---

१ प्रगीतायाः—पा० । २ प्रतीकग्रहणमस्य लक्षणार्थं स्यात्—पा० । ३ आम्नायन्ते—अधीयते—इति च—पा० । ४ अधीयन्ते—पा० । ५ अधीयन्ते—पा० । ६ स्मृत्यनुमित मिति—' यज्ञकर्मण्यजपन्यूङ्खसामसु ' (पा० सू० १-२-३४) इति व्याकरणस्मृत्यनुमितमित्यर्थः । तान इति च पूर्वाचार्याणामेकश्रुतेः संज्ञा । ७ बत्ता इति—प्रकरणसंबन्ध इत्यर्थः । तथा चाऽऽत्रेयीन्यायेन कल्प्यमाना त्वर्थसंबन्धप्रगीता बाधिता मन्त्रासमाम्नायसंबन्धा प्रगीतैव प्राह्येत्याशयः ।

(योनिसाम्न उत्तरावर्णवशेनोत्तरयोर्ऋचोर्गानाधिकरणम् ॥ ९ ॥)

[९] सामप्रदेशे विकारस्तदपेक्षः स्याच्छास्त्रकृतत्वात् ॥ ३२ ॥ पू०

इदमाम्नायते, रथंतरमुत्तरयोर्गायति, यद्योन्यां तदुत्तरयोर्गायति, कवतीषु रथंतरं गायति, विराट्सु वामदेव्यं गायतीति । तत्र संदेहः । किमुत्तरावर्णवशेन गातव्यं, किं योनिवर्णवशेन । कथमुत्तरावर्णवशेन गीतं भवति, कथं वा योनिवर्णवशेनेति । उच्यते । किंचिदुदाहरणं गृहीत्वा व्याख्यास्यामः । यदा तावत्, दृष्टं तालव्यवाई भवतीति, योनौ यस्मिन् भाग आईभावः कृतस्तस्मिन्नेव भाग उत्तरासु, आईभावः क्रियते, ततो योनिवर्णवशेन गीतं भवति । अथ भागान्तरे दृष्टं तालव्यं दृष्ट्वा, आईभावः क्रियते, तत उत्तरावर्णवशेन गीतं भवति ।

किं पुनरत्र कर्तव्यम् । योनिवर्णवशेनेति । कथम् । यावति भाग एकारस्य योनावाईभावः कृतस्तं विचारयामः । किं तत्र कृतमिति । एकारो नोच्चारितः, इकाराकारावागमिताविति । एवं चेदुत्तरास्वपि तावत्येव भागे यो वर्णः, स नोच्चारयितव्यः । इकाराकारावागमयितव्याविति । एवं, यद्योन्यां तदुत्तरयोर्गीतं भवति । तस्माद्योनिवर्णवशेन गातव्यमिति । अपि चैवं गीतिर्न प्रणङ्क्ष्यति । इतरथा क्वचित्प्रणश्येत् । यत्र महती गीतिरल्पेष्वक्षरेषु गीयते । तत्र व्यक्तं प्रणश्यति यद्युत्तराक्षरवशेन क्रियते । तस्माद्योन्यक्षरवशेन कर्तव्यम् ।

अपि च क्वचित्क्रम उपरुध्यते, यत्राक्रम आईभावभाग्वर्णः । अपि च क्वचिदुपरुध्यते । यत्र प्राकृत आगमो नैव क्रियते, तत्र स्वाध्याय-

---

‘ आम्नातादन्यत् ’ इत्यारभ्यौपोद्घातिकं वृत्तम् । प्रासङ्गिकं च । प्रकृतमिदानीमभिधीयते । सामोहः प्रतिज्ञातः । सोऽभिधीयते ।

अत्र पूर्वपक्षः । नोहः साम्नाम् । कुतः । वचनादेतदतिदिश्यते, ‘ यद्योन्यां तदुत्तरयोः’ इति । यद्यपि साम ऋगक्षराणामुपकारकमिति समधिगतं, तथाऽप्युपकारस्यानतिदिष्टत्वात् । यादृशं योनौ तादृशमेवोत्तरयोरपि यदि । नात्र यथातथाभावः

---

१ सामभागे—पा० । २ कृतस्तत्र—पा० । ३ (अ० ९ पा० १ सू० १७ पृ० ५०) । ४ तथाऽपीति—नोह. साम्न मित्यनुषङ्गः । ५ यादृशं—यथोपकारजनकम् । ६ यदीति—मन्यसे इति शेषः । ७ समादधाति—नानेति ।

काले गानेन च कर्षकाळं गानमविरुद्धं कर्तव्यम् । तस्माद्योन्यक्षरवशेन कर्तव्यमिति । सामप्रदेशे विकार आईभावादिः । तदपेक्षो योन्यपेक्षः । एवच्छास्त्रेण कृत, यथोन्यां तदुत्तरयोरिति । यावति सामभागे योनावाईभावः कृतस्तावत्येवोत्तरासु कर्तव्यः ॥ ३२ ॥

वर्णे तु बादरिर्यथाद्रव्यं द्रव्यव्यतिरेकात् ॥ ३३ ॥ सि०

उत्तरावर्णवशेन कर्तव्यं बादरिर्मन्यते स्म, न योनिभागवशेन । कुत । योऽसौ प्रकृतावाईभावः कृतो नासावागमः । न च तत्रैकारलोपः । किं तर्ह्यैकारो नाम । अवर्णम्, इवर्णं च । अवर्णं संवृतम्, इवर्णं विवृतम् । उभे अपि च दीर्घे । ताभ्यामसाधुभ्यां संध्यक्षरं साधु जन्यते । तत्र प्रकृतावकारेकारौ विश्लेषितौ, नापूर्वावागमितौ । गुणस्तु तयो. कश्चिदपूर्वः कृतः । सर्वत्रात्र प्रमाणं प्रत्यक्षम् । तद्यत्र, तावति भागेऽन्यो वर्णो भवति, न संध्यक्षरं, तत्र संश्लेषाभावे विश्लेषो न शक्यः कर्तुम् । अन्यस्मिन् भागे यत्र संध्यक्षरं भवति, तत्र तद्वशाद्विश्लेष क्रियते । एवं, यथोन्यां तदुत्तरयोः कृतं भवति । योन्यां हि संश्लिष्टयोर्विश्लेष कृतः । इहापि संश्लिष्टयोर्विश्लेषः । इतरथा व्यतिरिक्त कल्पितं स्यात् । अथ यदुक्तं, गीतिः मणङ्क्ष्यतीति । न मणङ्क्ष्यतीति । विरामं कृत्वाऽनक्षरं गायिष्यते । संश्लेषाभावाच्चाशक्यो

(पाठोऽन्यथाभाव)[3] । यथा ऐष्टिकानां विकृतिषु । वचनादिदं साधारणीकृतम् । तस्माद्यथा सप्तमे पूर्वपक्षे साधारणा धर्मा इति तथेहापि । वचनसामर्थ्याच्च यत्र भागे योनावाईभाव कृत, उत्तरयोरपि तथैव कर्तव्य ॥ ३२ ॥

एव प्राप्ते, ब्रूम. । नैतद्वचनमुपकारस्य निषेधकम् । किं तर्हि । उत्तरयोः कर्तव्यमित्येतावदुक्त्वा कृतार्थम् । तत्तूत्तरयो क्रियमाण यथोपकरोति ऋगक्षराणां तथा कर्तव्यम् । नेदमदृष्टेनोपकरोति । तस्माद्यस्य वर्णस्य येन प्रकारेणोपकारकमवगम्यते तस्मिंस्तथैव प्रयोक्तव्यमत आह—सर्वत्रात्र प्रमाणं प्रत्यक्षमिति । विरामं कृत्वाऽनक्षरं गायिष्यत इति । एतदयुक्तम् । ऋगक्षराणां साम संस्कारक समधिगतं योनौ । तत्र यद्यनक्षर गीयतेऽयथाप्रकृतिक स्यात् । अदृष्टार्थं च स्यात् । सर्वं चैतदन्याय्यम् । तस्माद्यत्राल्पान्यक्षराणि महती गीतिस्तत्रापि तयाऽक्षराण्येव संस्कर्तव्यानि ।

---

१ किं तर्ह्यैकारो नाम बादरिर्मन्यते स्म—पा० । २ विरामं—पा० । ३ चिह्नितस्थाने 'अतिदेशार्थः' इति पाठ आवश्यक । ४ इहापीति—सामस्वरूपमित्यर्थः ।

विश्लेषः कर्तुम् । आर्षक्रमौ नोपरोत्स्येते[1] ॥ ३३ ॥

(उत्तरयोः स्तोभातिदेशाधिकरणम् ॥ १० ॥)

[१०] स्तोभस्यैके द्रव्यान्तरे निवृत्तिमृग्वत् ॥ ३४ ॥ पू०

कवतीषु रथंतरं गायति, रथंतरमुत्तरयोर्गायति, यद्योन्यां तदुत्तरयोर्गायतीति । तत्रोत्तरावर्णवशेन गातव्यमित्येतत्समधिगतम् । अथेदानीमिदं संदिह्यते । किं स्तोभाः प्रदिश्यन्ते, नेति । किं प्राप्तम् । न प्रदिश्यन्त इति । कुतः । गीतिर्हि साम, न स्तोभाः । या गीतिः सा प्रदिश्यते । यद्योन्यां तदुत्तरयोर्गायतीति, गायतिशब्दसंबन्धात् । अपि च, ऋक्शब्दार्थैरसंबध्यमानः स्तोभोऽनर्थकः स्यात् । तस्मादपि न प्रदिश्येत, अपि च, क्वचिद्भवति वचनम्, ऐन्द्र्यामवभृयसाम गायतीति । तत्रानुपपत्तिर्भवेत् । शीतकर्मा हीन्द्रो वाक्यशेषेभ्योऽवगम्यते । तस्य तपतीत्यनेन संबन्धो न स्यात् । तस्मात्स्तोभस्य ऋगन्तरे निवृत्तिः । यथा, ऋगक्षराणामगीतित्वान्निवृत्तिरेवं स्तोभाक्षराणामपीति ॥ ३४ ॥

सर्वातिदेशस्तु सामान्याल्लोकवद्विकारः स्यात् ॥ ३५ ॥ सि०

नैतदस्ति, स्तोभानां निवृत्तिरिति । सर्वातिदेशो[2] भवति । ऋक्स्तोभस्वरकालाभ्यासविशिष्टाया गीतेः सामशब्दो वाचकः । कथमवगम्यते । तत्र प्रयोगात् । यदि स्तोभा निवर्तेरन्, तत्कृतो विशेषो नोपसंगृहीतः स्यात् । तत्र शब्दो बाध्येत । तस्मात्स्तोभाः प्रदिश्येरन् । यच्चुक्तम्, ऋक्शब्दार्थैरसंबध्यमानाः स्तोभा अनर्थका भवेयुः । अत्र ब्रूमः । लोकवत् । नानर्थका भविष्यन्ति । तद्यथा लोके गायनैरङ्गव-

---

तथा यत्राक्षरा गीतिर्बह्व्यक्षराणि, तत्रापि सैव तेषां संस्कारिकाऽवगन्तव्या । न तत्रैक-श्रुत्यं त्रैस्वर्यं[3] वा कर्तव्यम् । एतदेव साम्नामृचं प्रति गुणभावस्य प्रयोजनम् ॥ ३३ ॥

[३४ ॥]

ऋक्स्तोभस्वरकालाभ्यासविशिष्टाया गीतेः सामशब्दो वाचक इति—एतदयुक्तम् । 'गीतिषु सामाख्या'[4] इत्युक्तत्वात् । तस्मादन्यथा वर्ण्यते । यद्यपि स्तोभा न सामशब्दवाच्यास्तथाऽप्यतिदिश्यन्ते । कथम् । सामोपकारकऋगक्षराणाम् । तयो-

---

१ नोपरुध्येते-पा० । २ सर्वातिदेशो हि—पा० । ३ न तत्रेति—ऋक्श्रेषे, 'तानो यज्ञकर्मणि' इति सू यत्रगतमैकश्रुत्यं, अध्ययनावगतं त्रैस्वर्यं वा न कर्तव्यमित्यर्थः । ४ (अ० २ पा० १ अ० ११ सू० ३६) ।

स्तुकानि यानि नाम प्रक्षिप्यन्ते, तानि गीतिकालगणनार्थानि, नार्थसंबन्धायोच्चार्यन्ते। सुखं ह्यक्षरैर्गीतिकालः परिच्छिद्यते। तद्वदिहापि कालपरिच्छेदार्थानि स्तोभाक्षराण्यनुवर्तेरन्निति ॥ ३५ ॥

अन्वयं चापि दर्शयति ॥ ३६ ॥

अन्वयतश्चापि स्तोभान् दर्शयति। यत्राऽऽर्चिकानि पदानि निवर्तन्ते, स्तोभा गेह्याश्चानुयन्तीति। स्तोभाः—स्तोभा एव। गेह्याः—स्वराः। तस्मादपि स्तोभाः प्रदिश्यन्ते ॥ ३६ ॥

निवृत्तिर्वाऽर्थलोपात् ॥ ३७ ॥

वाशब्दात्पक्षो विपरिवर्तते[1]। निवृत्तिः, अग्निष्टपतीत्येवंजातीयकानां स्तोभानाम्। शीतकर्मा हीन्द्रो वाक्यशेष उपलभ्यते। न तेनैवंजातीयकाः स्तोभाः संबध्येरन्निति। अन्वयात्संबध्यन्ते लोकादिति यदुक्तं, तत्परिहर्तव्यम् ॥ ३७ ॥

अन्वयो वाऽर्थवादः स्यात् ॥ ३८ ॥

अन्वीपुर्वा, एवजातीयकाः स्तोभाः। न हि वयमिन्द्ररूपं प्रत्यक्षमुपलभामहे। यच्च वाक्यशेषवचनं, सोऽर्थवादः ॥ ३८ ॥

(स्तोभाना लक्षणाधिकरणम् ॥ ११ ॥)

[११] अधिकं च विवर्णं च जैमिनिः स्तोभशब्दत्वात् ॥ ३९ ॥ सि०

अथ कः स्तोभो नाम, तस्य लक्षणं कर्तव्यम्। उच्यते। य ऋगक्षरेभ्योऽधिकः, न च तैः सवर्णः स स्तोभो नाम। ईदृशे हि लौकिकाः स्तोभशब्दमुपचरन्तीति। तद्यथा, देवदत्तेन सभायां परं प्रलपता बहुस्तोभं कथितमिति। यदर्थवचनेभ्योऽधिकं विवर्णं च, तदालोच्यैवं वक्तारो भवन्ति। लक्षणकर्मणः प्रयोजनं न वक्तव्यम्। लक्षणकर्मणो हि तदेव प्रयोजनं, यल्लक्षितो भविष्यतीति। किमर्थमुभयं सूत्रितम्। नन्वन्यतरस्पर्याप्तम्, अधिकमिति वा विवर्णमिति वेति। नेत्याह। प्रव-

पकुर्वतो दृष्टेन साहाय्य कुर्वन्तः स्तोभा उपकुर्वन्ति। तदतिदेशे च यदि स्तोमा नाऽऽगच्छेयुस्तत्कृत उपकारोऽपि हीयेत। तस्मादतिदिश्यन्ते ॥ ३५ ॥ [३६ ॥ ॥ ३७ ॥ ३८ ॥

1 विनिवर्तते—पा०।

ति हि किंचिदधिकं, न त्रिवर्णम्। यथा, अभ्यासः, श्वाद्रिः श्वाद्रिरिति। तथा किंचिद्विवर्णं नाधिकम्। यथा, विकारः, ओ ग्रा ई, इति। तस्मादुभयं सूत्रयितव्यमिति ॥ ३९ ॥

(प्राकृतव्रीह्यादिस्थानापन्नेषु नीवारादिषु व्रीह्यादिधर्माणामूहेनानुष्ठानाधिकरणम् ॥ १२ ॥)

[१२] धर्मस्यार्थकृतत्वाद्द्रव्यगुणविकारव्यतिक्रमप्रतिषेधे चोदनानुबन्धः समवायात् ॥ ४० ॥ सि०

वाजपेये श्रूयते। बार्हस्पत्यं चरुं नैवारं सप्तदशशरावं निर्वपतीति। अस्ति च प्रकृतौ व्रीहिषु प्रोक्षणम्। तन्नीवारेषु भवति, न वेति संशयः। तथा, उद्गीथा वा एतर्हि वाग्भवति यर्हि पृष्ठ्यः षडहः संतिष्ठते, न बहु वदेत्, नान्यं पृच्छेत्, नान्यस्मै ब्रूयात्। संस्थिते षडहे मध्वाशयेत्, घृतं वा—इति मध्वशने घृताशने च षडहधर्मा भवन्ति वा, न भवन्तीति संशयः। तथा, राजसूये श्रूयते, नैर्ऋतं चरुं नखावपूतानां परिवृत्त्यै गृहे, इति। अस्ति प्रकृतावुलूखलमुसलयोः प्रोक्षणम्। प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्तीति। तन्नखेषु भवति, न भवतीति संशयः। तथा चातुर्मास्येषु श्रूयते, परिधौ पशुं नियुञ्जीतेति। परिधौ यूपधर्माः कर्तव्या न कर्तव्या इति संशयः। तथा, न गिरा गिरेति ब्रूयाद्यदि गिरा गिरेति ब्रूयादात्मानं तदुद्गातोद्गिरेदैरं कृत्वोद्गेयमिति। इरापदे गिरापदधर्मा भवन्ति, न भवन्तीति संशयः। किं तावत्प्राप्तम्। व्रीह्यादिषूक्ता धर्माः, न नीवारादिषु। तस्मात्तेषु न भवेयुरिति।

एवं प्राप्ते, ब्रूमः। नीवारादिषु चोदनानुबन्धः स्यात्। समवैति हि

३९ ॥]
यद्यप्यपूर्वप्रयुक्ता धर्मा इति स्थितं, तथाऽपि कार्यापत्त्या विनोहसिद्धिर्नास्तीत्यनेनाधि-

१ तस्मादुभयमिति। एवं च ऋगक्षरेभ्योऽधिकत्वे सति, ऋगक्षरविलक्षणत्वं स्तोमानां लक्षणमुक्तं भवति। अत्र च—ऋगक्षरविलक्षणत्वं यदि, अर्थानभिधायकत्वं विवक्ष्यते, तदाऽर्थाभिधायकेषु 'अभिष्ट्वनि' इत्यादिस्तोभेष्वव्याप्तिः। प्रकारान्तरं च दुर्निर्वचम्। अतः स्तोभपदवाच्यत्वप्रकारकाभियुक्तप्रसिद्धिविशेष्यत्वमेव स्तोभत्वमिति सुवचम्। वाच्यतावच्छेदकं च स्तोभत्वमखण्डोपाधिरित्यखण्डोपाधिवाच्यतावच्छेदकाप्रसिद्धिरित्यादिदोषानवकाश इति ज्ञेयम्। २ स्थितमिति—प्रथमपाद इति शेषः।

तेषु स प्राकृतो धर्मः । प्रकृतो तावद्दर्शपूर्णमासप्रयुक्तोऽसौ, न व्रीह्यादिप्रयुक्तः । येनापूर्वस्य विशिष्टोऽयं साधनविशेषस्तत्रैव धर्मो न व्रीह्यादाविति समधिगतमेतत् । नीवारादयश्च व्रीह्यादिकार्यकारिण इत्यवगम्यते । नीवारस्य तावच्चोदना, नैवारश्चरुः कर्तव्य इति । स च नान्येन प्रकारेण नीवारो यागस्योपकरोति वर्जयित्वा तण्डुलनिर्वृत्तिम् । स प्रत्यक्षेणावगम्यते व्रीहिकार्ये वर्तत इति । तस्माद्व्रीहिधर्मा नीवारे भवेयुरिति ।

एवं, षडहेनोपासीतेति चोदनायां सत्यां यदा षडहः संतिष्ठते, न षडहेनोपास्यत इत्यर्थः । मधुघृताभ्यामशनेनोपासीतेति गम्यते । यस्य

करणेन कार्यापत्ति प्रतिपाद्यते । सा च पञ्चधा भवति । वास्तवी सा द्विविधा, प्रत्यक्षानुमानाभ्याम् । शब्दात्त्रेधा । स्वशब्दात्, प्रतिषेधेन स्वशब्दानुमान, सत्यथा प्रतिषेधानुमान, प्रतिषेधाच्च शब्दः । तत्र प्रत्यक्षात्तावत् ' नैवारो बार्हस्पत्यश्चरु ' । ननु स्वशब्देनैव नीवारा व्रीहिकार्ये विनियुज्यन्ते ।

उच्यते । नीवारशब्दो नीवारान्वदति, तद्धितो विकार, देवतां बार्हस्पत्यशब्द, चरुशब्दो द्रव्यम् । क्वतर कार्यापत्तिपर । तस्मात्प्रत्यक्षेणात्र कार्यापत्ति । व्रीहय पुरोडाशाद्यहविर्निर्वृत्त्या यागार्था । नीवारा अपि तन्निर्वृत्त्या यागसाधनार्था एव प्रत्यक्षमुपलभ्यन्ते । तस्माद्व्रीहयो यथाऽपूर्वार्था इति धर्मान्प्रयुञ्जते तथा नीवारा अपि । ' नखावपूतानां चरु ' इत्यवहननस्य तुषकणविप्रमोक फल दृष्ट्वाऽनुमान भवति, नूनमुलूखलमुसलकार्ये नखा वर्तन्त इति ।

'परिधौ पशु नियुञ्जन्ति' इति स्वशब्देनैव यूपकार्ये परिधिर्वर्तते । 'न गिरागिरेति ब्रूयात्' इति, गिरापद प्रतिषेधन् तत्कार्यं लक्षयति । तत्र लक्षित इरापदविधि । तच्च शब्दादृते न शक्य विधातुम् । अत उच्यते प्रतिषेधात्स्वशब्दानुमानम् । लक्षणयोऽत्र स्वशब्द । ' उद्गीथा वा एतर्हि साम भवति, यर्हि पृष्ठ्य षडह संतिष्ठते ' इति

---

१ तावद्दर्शपूर्णमासप्रयुक्तोऽसौ—पा० । २ मावचोदना—पा० । ३ मधुघृताभ्यामुपासीत—पा० । ४ शब्द इति-स्वशब्द कल्प्यत इत्यर्थ । तथा च तत्कार्यकारिस्वरूपा स्थानापत्ति पञ्चधा भवति-प्रत्यक्षात्-अनुमानात्-श्रुतस्वशब्दात्—प्रतिषेधानुमितस्वशब्दात्-अभावे विध्यनुमतप्रतिषेधकल्पितस्वशब्दादिति मूलतात्पर्यं ज्ञेयम् ५ लक्षणये ति—अत एव परिध्युदाहरणादस्य विशेष । परिध्युदाहरणे हि स्वशब्दः श्रुतः । अत्र तु लक्षणया स्वशब्द इत्यर्थ ।

भावे, यस्य निवृत्तिस्तस्य स्थानेऽवगम्यते । षडहनिवृत्तौ मध्वशनं ब्रुवन् षडहकार्ये वदतीति गम्यते । तस्मात्षडहधर्मो व्रतं नियमो वा मध्वशने भवतीति । यागाभावात्तन्निमित्ता ग्रहा न प्रवर्तन्ते । ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोतीति ग्रहचमसाभावात्स्तोत्राभावः[1] । स्तुतमनुशंसतीति स्तोत्राभावाच्छस्त्राभावः । सवनाभावात्सवनीया न प्रवर्तन्ते, इत्येवमादि न प्रवर्तते । व्रतानि नियमाश्च प्रवर्तन्त इति । यच्चान्यदनर्थलुप्तं, नखावपूतानामिति । नान्यथा नखावपूता भवन्ति । यदि न तैस्तुषा विपूयन्ते, तस्मात्तुषविमोचने नखाः श्रुता इति गम्यते । अतश्चोलूखलमुसलधर्मैः संबध्यन्त इति ।

तथा, परिधिर्यूपकार्ये वर्तत इति विस्पष्टमेव वचनं, परिधौ पशुं नियुञ्जीतेति[2] । तस्मात्तद्धर्मकः परिधिः स्यादिति । तथा, न गिरा गिरेति ब्रूयादैरं कृत्वोद्गेयमिति नैतौ द्वावपि विधीयेते—प्रतिषेध[3] इरापदं च । तथा हि वाक्यं भिद्येत । न चेरापदमप्राप्तत्वादनूद्यते । प्रतिषेधे ह्यनुवादः संभवति । यदा, इरापदं तदा न्यक्तं गिरापदं न भवतीति । एकवाक्यरूपं च गम्यते । यस्माद्गिरापदस्यायं दोषस्तस्मादिरापदं ब्रूयादिति । भिन्नवाक्यरूपे त्वाश्रीयमाणे भूयसी अदृष्टानुमान-

---

संख्यया प्रतिषेधः । तेन तत्कार्यम् । तस्मिन्मध्वशनघृताशने । एवमत्र लक्षितलक्षणया स्वशब्दः ।

तदेतदयुक्तम् । कथम् । यदि मध्वशनघृताशने षडहकार्ये वर्तेयातां तथा फलसाधके स्याताम् । तत्र ' द्वादशाहेन प्रजाकामं याजयेत् ' इति वचनं विरुध्येत । यागा ह्यनेन फले विधीयन्ते । ते च द्वादशसंख्याविशिष्टाः । न मध्वशनघृताशने यागौ । ताभ्यां फलवद्वचां चतुर्दशसंख्योपजायेत । राजसूयवदिति चेत् । तन्न । 'षट्त्रिंशदहो वा एष यद्द्वादशाहः ' इत्येवमादीनि लिङ्गानि विरुध्येरन् । यदि चानयोस्तत्कार्यापत्तिः स्यात्तथा सति षडहं निवर्तयेताम् । तत्राऽस्योत्पत्तिरनर्थिका स्यात् । लिङ्गविप्रतिषेधस्तु स्थित एव । कर्तृसंस्कारकेऽवगम्यमाने कथं फलसाधिके इत्यभ्युपगम्येते । सर्वं चैतदन्याय्यम् ।

तत्र वर्णयन्ति । द्वयमिहा[4]स्ति फलसाधनत्वं साधनत्वं च । तत्र न फलसाधन-

---

[1] स्तोत्राभावाद्स्याभावः—पा० । [2] नियुञ्जन्तीति—पा० । [3] प्रतिषेध इति—स्पष्ट इति शेषः । [4] इह—पक्षे ।

कल्पना स्यात् । न ह्यात्मानं गिरेदिति दोषो विधीयते । शरीरं गिरे-रुपसंभवः । परमात्मन्यदोषः । वाक्यभेदस्तु स्थित एव । तस्माद्गि-रापदोच्चारणमिरापदस्य तत्कार्यापत्तिप्रदर्शनार्थं, न गिरा गिरेति कृत्वो-द्गायेदिति । तस्माद्गिरापदधर्मा इरापदे भवेयुरिति । सर्वत्र पर्यवसितम् । परिधावनेनन्तरा कथा वर्तिष्यते ॥ ४० ॥

(परिधौ यूपधर्माणामाक्षेपसमाधानाधिकरणम् ॥ १३ ॥)

[१३] तदुत्पत्तेस्तु निवृत्तिस्तत्कृतत्वा-त्स्यात् ॥ ४१ ॥ पू०

चातुर्मास्येष्वाम्नायते । मध्यमे पर्वणि परिधौ पशुं नियुञ्जीतेति । तत्रोक्तं, यूपधर्माः परिधौ कर्तव्या इति । तद्विपरिवर्तते । ते न कर्तव्याः । तदुत्पत्तेः—परिधेराहवनीयपरिधानार्थोत्पत्तेर्यूपधर्मा निवर्तेरन् । तत्कृता हि तेऽपूर्वमयुक्तपशुबन्धनद्वारेणापूर्वं गच्छन्ति । तत्र यद्बन्धनस्याङ्गभूतमिति श्रुतं तद्बन्धनार्थमेव द्रव्यमुत्पन्नम् । यच्चाऽऽहवनीयपरिधा-

त्वाद्धर्मलाभः । किंतु साधनत्वात् । तदप्ययुक्तम् । यद्येते षडहकार्यं कुरुतः, ततस्तद्धर्मैः संबध्येयातां, यथा नीवाराः । न चैते षडहकार्ये वर्तन्त इत्युक्तमेव । तदङ्गत्वाद्धर्मलाभो न भवति । किं तर्हि । कार्यापत्त्या । तस्मादन्यदुदाहरणमुदाह्रियते, ' सँ प्रत्यामनेत् स्थानात् ' इति द्रव्यविनाशात्कर्मविनाशः । कर्मविनाशेव प्रतिषेधो लक्ष्यते । प्रतिषेधाच्च स्वशब्दः । अयमप्यस्मिन्नधिकरणे नैव सिद्धान्तः । तस्मादेतत्सदृशमन्यदुदाहरणं मृग्यम् ॥ ४० ॥

१ न गिरा गिरेति ब्रूयादैरं कृत्वोद्गायेदिति—पा० । २ परिधावुत्तरा कथा—पा० । ३ नियुञ्जन्तीति—पा० । ४ साधनत्वादिति—मध्वशनघृताशनयोः षडहाङ्गत्वेन क्रतूपकारकत्वात्साधनत्व-सामान्येन षडहधर्मप्राप्तिरिति केचिद्वर्णयन्तीत्यर्थः । ५ (अ० ६ पा० ४ अ० १० सू० ३०) । ६ नैव सिद्धान्त इति—सांनाय्यद्रव्यनाशे सांनाय्यफलार्थं तत्स्थाने पञ्चशरावयागो नैव विधीयते । सांनाय्यफलस्य सांनाय्ययागेनैव सिद्धेः साधनान्तरानपेक्षत्वात् । न हि द्रव्यनाशे यागलोपे प्रमाण-मस्ति । हविरन्तरोत्पत्त्या, आज्येन वा समापनसंभवात् । अतो द्रव्यविनाशप्रयुक्तवैगुण्यपरिहारा-र्थत्वेन सांनाय्याहुत्यैव पञ्चशरावयागो विधीयत इति ' अङ्गविधिर्वा निमित्तसंयोगात् ' इति सू-त्रेण सिद्धान्तितत्वादित्यर्थः । ७ मृग्यमिति—तत्रोदाहरणं ' यदि सत्राय दीक्षिताना सम्युत्तिष्ठेरन्, 'सोममपभज्य विश्वजिता यजेत' 'यः सत्रायाऽऽगुरते स विश्वजिता यजेत' इत्यादि षष्ठदेवोक्तमनुसं-धेयम् ।

नार्थमुत्पन्नं, तस्मिन् पराङ्गभूते बन्धनं कृतं भवति । न तद्धर्माणां द्वारं भवितुमर्हति । न हि तत्र क्रियमाणाः पशोः कृता भवन्ति, न पाशुकस्य । अपि च, सत्त्वकः परिधिरनुच्छ्रयश्च यूपधर्मैः परिधित्वाद्धीयेत । यूपायाज्यमानायेति च शब्द ऊह्येत । तत्रायं बाधितः स्यात् । तस्मा परिधौ यूपधर्मा न स्युरिति ॥ ४१ ॥

आवेश्येरन् वाऽर्थवत्त्वात्संस्कारस्य तदर्थत्वात् ॥ ४२ ॥ सि०

आवेश्येरन् वा यूपधर्माः परिधौ । बन्धनोपकारसाधने हि विधीयन्ते । यश्च परार्थो बन्धनं नयति निष्पादयति, करोत्यसौ बन्धनोपकारम् । अयं च संस्कारो बन्धनं निष्पादयति, तदर्थोत्पत्तिमतदर्थोत्पत्तिं वा नापेक्षते । तस्मात्परिधौ यूपधर्माः कर्तव्या इति । यदुक्तम्, अनुच्छ्रयश्च सत्त्वकश्च परिधिरिति । अत्रोच्यते, ये परिधित्वाविरोधिनो यूपधर्मास्ते करिष्यन्ते, न विरुद्धा इति ॥ ४२ ॥

आख्या चैवं तदावेशाद्विकृतौ स्यादपूर्वत्वात् ॥ ४३ ॥

अथ यदुक्तं, यूपायाज्यमानायेति शब्द ऊहितव्यः स्यादिति । अत्रोच्यते । नोहितव्यो भविष्यति । धर्मावेशादाख्याऽपि यूप इति भविष्यति । धर्मनिबद्धा हि सा यथैव यूपे, तथा परिधावपि भवितुमर्हति । तस्मान्नोहिष्यते यूपशब्द इति ॥ ४३ ॥

(अभ्युदयेष्टौ दधिपयसोः प्रणीताधर्मानुष्ठानाधिकरणम् ॥ १४ ॥)

[१४] परार्थे न त्वर्थसामान्यं संस्कारस्य तदर्थत्वात् ॥ ४४ ॥ पू०

वि वा एनं प्रजया पशुभिरर्धयति, वर्धयत्यस्य भ्रातृव्यं, यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति, स त्रेधा तण्डुलान् विभजेत्, ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत् । ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं, ये क्षोदिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुम् । शृते चरुं दधंश्चरुमित्येतदुदाहरणम् । तत्रायमर्थः सांशयिकः । किं शृते दध्नि प्रणीताधर्माः कर्तव्या उत न कर्तव्या इति ।

[४१ ॥ ४२ ॥ ४३ ॥

१ पर्यायेन—इति तृतीयान्तः पाठोऽर्थानवबोधादुपेक्षितः । २ अभ्युदियात्—पा० । ३ मध्यमाः स्युः—पा० । ४ येऽणिष्ठाः—पा० ।

किं प्राप्तम् । न कर्तव्या इति । परार्थमेतत्प्रदानार्थमिति, न प्रणीतार्थम् । दधि च तण्डुलविभागश्चैको भाग इन्द्राय प्रदात्रे दातव्यः । शृतं च तण्डुलविभागश्च विष्णवे शिपिविष्टाय । न श्रपणार्थं दधि पयो वा विधीयते । तत्र हि सप्तमीसंयोगोऽनुवाद एव । न च[1] प्रणीताकार्ये विधीयते दधि पयो वा । तस्मात्प्रणीतानां धर्मैर्न संयुज्येते । न हि प्रणीतानां दध्नश्चार्थसामान्यं किंचिदस्ति । तदर्थश्चायं संस्कारः श्रपणद्वारकः । तस्मान्न प्रणीताधर्माः पयसि दधनि वा भवेयुरिति ॥ ४४ ॥

क्रियेरन् वाऽर्थनिर्वृत्तेः ॥ ४५ ॥ सि०

न चैतदस्ति, प्रणीताधर्मा दधिपयसोर्न कर्तव्या इति । श्रपणसाधने हि ते विधीयन्ते, न श्रपणार्थमुत्पन्ने द्रव्ये । येनार्थो निवर्तेत । तत्र तेऽपूर्वमयुक्तत्वात्क्रियन्ते । क्रियते च दधिपयोभ्यां श्रपणम् । तस्मात्तद्धर्मैः संयोगः स्यात् ॥ ४५ ॥

(बृहद्रथंतरधर्माणां व्यवस्थया तत्तत्सामगानकालेऽनुष्ठानाधिकरणम् ॥ १५ ॥)

[१५] एकार्थत्वादविभागः स्यात् ॥ ४६ ॥ पू०

ज्योतिष्टोमे समामनन्ति, बृहत्पृष्ठं भवति, रथंतरं पृष्ठं भवतीति । व्यक्तो हि बृहद्रथंतरयोर्विकल्पः । यस्मिन् कार्ये रथंतरं प्रवर्तते, तस्मिन्नेव कार्ये बृहत्पृष्ठसिद्धिद्वारेण धर्मा विहिताः । तस्माद्बृहद्धर्मा रथंतरधर्माश्चोभयत्र कर्तव्या इति । बृहद्ग्रहणं रथंतरग्रहणं च लक्षणार्थं भविष्यति ॥ ४६ ॥

निर्देशाद्वा व्यवतिष्ठेरन् ॥ ४७ ॥ सि०

---

४४ ॥ ४६ ॥

पृष्ठशब्दः स्तुतेरभिधाता । सा चाद्दष्टार्थेत्युक्तम्[2] । तस्माद्वचनाद्विकल्पः । 'बृहद्वा पृष्ठं, रथंतरं वा' इति । तत्र स्तुतिरदृष्टाय, साम, ऋगक्षराभिव्यक्तया दृष्टोपकारि । तस्माद्ये साम्न्युपनिबद्धा धर्मा उच्चैर्गेयत्वादयस्तेषामुभयत्र संबन्धो न व्यवस्था । यथा व्रीहिसंबद्धं प्रोक्षणं न व्रीहिष्वेवावतिष्ठते, एवमिहापि ॥ ४६ ॥

---

1 न चेत्प्रणीताकार्ये—पा० । 2 प्रणीताधर्मा—...

एवः ।

निर्देशाद्वा, रथंतरे रथंतरधर्माः कर्तव्याः । नोच्चैर्गेयं, न च बलवद्गेयम् । रथंतरे प्रस्तूयमाने संमीलयेत्, स्वर्दृशं प्रतिवीक्षेतेत्येवमादयः । बृहद्धर्माश्च, बृहति उच्चैर्गेयं, बृहति गीयमाने समुद्रं मनसा ध्यायेदित्येवमादयः । एवं निर्देशोऽर्थवान् भविष्यति । इतरथा रथंतरग्रहणं च बृहद्ग्रहणं च प्रदर्शनार्थं स्यात् । तथा लक्षणा भवेत् । न च श्रुतिसंभवे लक्षणा न्याय्या । यदुन्यते, अर्थैकत्वाद्बृहद्रथंतरयोरिति ।

सत्यमेकोऽर्थः पृष्ठसिद्धिः । एतदप्यस्ति । अन्यथा बृहता साध्यते पृष्ठम् । अन्यथा रथंतरेणेति । यथा पर्वणि विभज्यमाने द्वावप्युपायौ । यथा, द्वौ पुरुषावन्तयोर्गृहीत्वाऽऽकर्षतः । यद्वा तीक्ष्णेन शस्त्रेण छेदनम् । तत्र यच्छस्त्रस्य तीक्ष्णीकरणं द्रव्यं तच्छेदनाभ्युपाये संवध्यते, नाऽऽकर्षणाभ्युपाये तदर्थापन्नेऽपि । एवं बृहद्धर्मा रथंतरे तदर्थापन्ने भवेयुर्वा न वेति जायते विचारणा । तत्र निर्देशसामर्थ्यादिदमवगच्छामः । अन्यथा बृहत्साधयति । अन्यथा रथंतरमिति । प्रत्यक्षं खल्वप्यन्यद्वुपलभामहे । रथंतरं शूरादिकां संस्तुतिं कुर्वत् पृष्ठं साध-

---

अन्यथा बृहता साध्यते पृष्ठमन्यथा रथंतरेणेति । नन्वेवं ब्रुवता व्रीहियवयोरपि धर्मव्यवस्थेत्युक्तं भवति । अन्यथा व्रीहयः साधयन्त्यन्यथा वा यवा इति ।

उच्यते । व्रीहयस्तण्डुलनिर्वृत्तिं कुर्वन्ति । ततः पिष्टानि, तेभ्यः पुरोडाशा, यागो, यागादपूर्वम् । यवेष्वेतत्तुल्यं सर्वम् । किमतः । एतदतो भवति । व्रीहियवयोरत्यन्तदृष्टार्थत्वान्नापूर्वभेदः । तस्मादपूर्वं यागसाधनद्वारेण धर्माभिलाषि । उभौ च व्रीहियवौ यागसाधनम् । अत उभयत्र धर्माः । नास्ति व्यवस्था । व्रीहिस्थानीयं साम, प्रोक्षणस्थानीया उच्चैर्गेयत्वादयः । तत्र यद्यपि साम दृष्टोपकारि, तथाऽपि यस्योपकारि (तत्पृष्ठनिवर्तकम्)[2] । ते च स्तुती भेदेन चोदिते । अदृष्टार्थत्वाच्च तयोरपूर्वभेदः । अपूर्वप्रयुक्ताश्च धर्माः । नन्वेकस्मिन्नेवापूर्वे द्वे अपि स्तुती चोद्येते । एकार्थत्वाच्च तयोर्विकल्पो व्रीहियवयोरिव । तस्मान्न व्यवस्था ।

उच्यते । न निष्पन्नमपूर्वमास्ते, यत्रैते चोद्येते । किंत्वाभ्यामेवापूर्वं जन्यते । तत्रादृष्टार्थत्वात्स्तुत्योः, यदेव शूरादिकया जन्यते तदेव चित्रादिकयेति कुत एतत् ।

---

१ स्तूयमाने—पा० । २ चिह्नितस्थाने 'तत्पृष्ठमदृष्टनिर्वर्तकम्' इति पाठ आवश्यक ।

यति । बृहत् चित्रादिकाम् । तस्माद्रथंतरधर्माः शूरादिकायां स्तुतौ निबद्धा रथंतरे प्रस्तूयमाने भवेयुर्न बृहति । बृहद्धर्मा अपि चित्रादिकायां स्तुतौ निबद्धा बृहति भवेयुः, न रथंतरे । तस्माद्व्यवस्था धर्माणामिति ॥ ४७ ॥

(कण्वरथंतरेऽविरुद्धानां बृहद्रथंतरधर्माणां समुच्चयाधिकरणम् ॥ १९ ॥)

[१६] अप्राकृते तद्विकाराद्विरोधाद्व्यवतिष्ठेरन् ॥ ४८ ॥ सि०

अस्ति वैश्यस्तोमः, वैश्यो वैश्यस्तोमेन यजेतेति । तत्रेदमाम्नायते, कण्वरथंतरं पृष्ठं भवतीति । तत्रायमर्थः सांशयिकः । किं कण्वरथंतरेऽन्यतरस्य, रथंतरस्य बृहतो वा धर्माः कर्तव्या उतोभयोरपीति । किं प्राप्तम् । अन्यतरस्येति । कुतः । एवं ह्युक्तम् । रथंतरस्य राथंतरा भ-

तस्माच्चित्रादिका यथा साधयति, येन साधनेनोपगृहीता । शूरादिकाऽपि तैः साधयिष्यतीति नास्त्येतत् । अत एव वचनाद्विकल्पः । अनेकार्थ्यात् । तस्माद्यथा, श्रयणानामपूर्वभेदाद्व्यवस्था, एवमिहापि । व्रीहियवौ न साक्षादपूर्वस्य साधकौ । यागादपूर्वम् । स चाऽऽग्नेयादिभिरुत्पादितो व्रीहियववाक्ययोर्द्रव्यविधानायानूद्यते । न तु ताभ्यां यागोत्पत्तिः क्रियते । येन यागभेदोऽपूर्वभेदश्च स्यात् । तस्मात्तत्रापूर्वस्य भिन्नत्वाद्युक्ता व्यवस्था ।

अन्ये त्वाहुः । यद्यपि साम दृष्टोपकारि, स्तोमास्त्वदृष्टोपकारिणः । तस्मात्स्तोमयुक्ता उच्चैर्घोषत्वादयः । अतो व्यवस्था । तथा च वक्ष्यति । 'साम्नाऽपि दृष्टमदृष्टं च क्रियते' इति ।

तदयुक्तम् । रथंतरशब्दः स्तोमलक्षणार्थः स्यात् । अपि च स्तोमाश्चोच्चैर्घोषत्वादयश्च साम्नि गुणभूताः । गुणानां च परार्थत्वादसंबन्ध इत्युक्तम् । अरुणान्यायोऽपि नास्ति, स्तोमानामुच्चैस्त्वादीनां च परस्परनिराकाङ्क्षत्वात् । यत्तु 'साम्नाऽपि दृष्टमदृष्टं चेति' ऋगक्षराभिव्यक्त्या दृष्टं, येन पुनरदृष्टार्थां स्तुतिमुत्पादयति तेनादृष्टम् ॥ ४७ ॥

१ साधयतीति—स्वापूर्वमिति शेषः । २ श्रयणानामिति—'पयसा मैत्रावरुणं श्रीणाति' 'सक्तुभिर्मन्थिनम्' इत्यादाविति शेषः । ३ वक्ष्यतीति—एकन्वरिताधिकरणे भाष्यकार इति शेषः । ४ रथंतरशब्द इति—'रथंतरे प्रस्तूयमाने' इत्यादिविधाविति शेषः । ५ इत्युक्तमिति—(अ० ३ पा० १ अ० १२ सू० २२) इत्यत्रेति शेषः । ६ अरुणान्याय इति—(अ० ३ पा० १ अ० ६ सू० १२) भवत्विति शेषः ।

वन्ति । बृहतो बृहद्धर्माः । निर्देशसामर्थ्यादिति । तद्विशेषेऽनुपपद्यमाने यावदुक्तं तावत्प्राप्स्यमिति । तस्मादन्यतरस्य धर्माः कर्तव्या इति ।

एवं प्राप्ते, ब्रूमः । अप्राकृते कण्वरथंतरे तद्विकारात् । यस्मात्कण्वरथंतरमुभयोः कार्ये वर्तते, तस्मादुभयधर्माँल्लँभेत । न हि विकृतौ निर्देशोऽस्ति, यथा प्रकृतौ । अर्थापत्त्येह धर्मा भवन्ति, न चोदकेन । कण्वरथंतरमुभयोरर्थापन्नम् । तस्मादुभयधर्माँल्लँभेत । ये तु विरुद्धा धर्माः, तद्यथा, क्रौञ्चे गेयं बलवद्गेयमित्येवंजातीयका विरोधाद्व्यवतिष्ठेरन् । अविरुद्धेषु समुच्चयः ॥ ४८ ॥

(बृहद्रथंतरोभयसामके क्रतौ रथंतरादिधर्माणां प्रकृतिवद्व्यवस्थाधिकरणम् ॥१७॥)

[१७] उभयसाम्नि चैवमेकार्थापत्तेः ॥४९॥ पू०

सन्त्युभयसामानः क्रतवः । संसव उभे कुर्यात्, गोसव उभे कुर्यात् । अपवितावप्येकाहे उभे बृहद्रथंतरे कुर्यादिति श्रूयते । सन्ति तु प्रकृतौ बृहद्धर्मा रथंतरधर्माश्च । त इह चोदकेन प्राप्यन्ते । तत्र संशयः । किमुभयसाम्नि, उभयधर्माः कर्तव्या अथवेहापि तथैव व्यवतिष्ठेरन्निति । किं प्राप्तम् । उभयसाम्नि चैवं स्यात् । यथा कण्वरथंतरे । उभे ह्यत्र सामनी पृथक्कार्ये वर्तेते, नैकैकम् । तस्मान्नैकैकधर्माँल्लँभेत । उभे ह्यत्र संहते, उभे धर्मैः संयुज्येयाताम् । उभे हि ते संहते, एकार्थापत्तेः पृथक्कार्ये वर्तेते इति ॥ ४९ ॥

स्वार्थत्वाद्वा व्यवस्था स्यात्प्रकृतिवत् ॥ ५० ॥ सि०

वाशब्दः पक्षं व्यावर्तयति । न चैतदस्ति बृहद्रथंतरयोः संहतयो-

द्वेधा कर्मणां प्राप्तिः, चोदकेन कार्यापत्त्या च । कण्वरथंतरं चोभयोः कार्यापन्नम् । अत उभयधर्मग्राहकम् । अर्थापत्त्येह धर्मा भवन्ति, न चोदकेनेति कार्यापत्तिमाह ।

तदेतदयुक्तम् । कथम् । बृहद्रथंतरयोरग्निष्टोमे समुच्चयः । किमतः । एतदतो भवति, यद्यप्यग्निष्टोमस्य बृहद्रथंतरे पृष्ठसाधनत्वेनावगते, तथाऽपि तयोर्वैकल्पिकत्वादेकस्यैवेदं कण्वरथंतरमापद्यते । एवं चोदकस्यैव धर्मान्ग्रहीष्यतीति ॥४८॥[४९॥]

---

१ बृहद्धर्मा इति—पा० । २ एकार्थपत्ते—पा० । ३ कार्यापत्तिमाहेति—कार्यापत्तिमेवार्थापत्तिमाहेत्यर्थः ।

रुभये धर्माः कर्तव्या इति । रथंतरे रथंतरधर्मा बृहति बृहद्धर्माः । कुतः। स्वार्थत्वाद्धर्माणाम् । रथंतरधर्मा रथंतरार्थाः, बृहद्धर्मा बृहदर्थाः । साम्नोर्थेते धर्माः, न पृष्ठस्य । तच्च साम प्रयुज्यते रथंतरं बृहद्वा । रथंतरे प्रयुज्यमाने तद्धर्माः प्रयोक्तव्याः । बृहत्यपि प्रयुज्यमाने बृहद्धर्माः । सामप्रयुक्ता एवैते धर्माः । साम्नाऽपि हि दृष्टमदृष्टं च क्रियते । तस्मात्सामापि धर्मप्रयोजने समर्थम् । अतो व्यवस्था धर्माणां प्रकृतिवत् । तथा प्रकृतौ रथंतरे प्रयुज्यमाने तदङ्गं प्रयुज्यते । बृहति तदङ्गम् । एवमिहापीति ॥ ५० ॥

(पार्वणहोमयोर्विकृतावनतिदेशाधिकरणम् ॥ १८ ॥)

[१८] पार्वणहोमयोस्त्वप्रवृत्तिः समुदायार्थसंयोगात्तदभीज्या हि ॥ ५१ ॥ सि०

स्तो दर्शपूर्णमासौ । तत्रेदं समामनन्ति । स्रुवेण पार्वणौ जुहोतीति । सौर्यादिषु वैकृतेषु कर्मसु भवति संदेहः । किं तेषु पार्वणहोमौ कर्तव्यौ, न वेति । तत इदं तावत्परीक्ष्यम् । किं कालाभीज्या पार्वणहोमौ, उत समुदायाभीज्येति । कालाभीज्यायां तयोः प्रवृत्तिः । समुदायाभीज्यायामप्रवृत्तिः । कुतः संशयः । उभयत्र प्रसिद्धेः । उभयत्र हि पर्वशब्दो लोके प्रसिद्धः । काले समुदाये च, आ हिमवत आ च कुमारीभ्यः । किं तावत्प्राप्तम् । कालाभीज्येति । ततः कालगता प्रसिद्धिर्व्यपदिश्यते ।

एवं प्राप्ते, ब्रूमः । पार्वणयोर्वैकृतेषु कर्मस्वप्रवृत्तिः । कुतः । समुदायार्थसंयोगात् । ततः समुदाये प्रसिद्धिर्व्यपदिश्यते । काले प्रसिद्धिं परिहरिष्याम इति । अतः समुदायवाचित्वात्पर्वशब्दस्य समुदायस्याभिप्रष्टव्यत्वाद्वैकृतेष्वप्रवृत्तिरिति ॥ ५१ ॥

पृष्ठानुवादेन कण्वरथंतरविधिः । यत्पृष्ठं तत्कण्वरथंतरमिति । बृहद्रथंतरे च न पृष्ठानुवादेन विधीयेते । चोदकेन विकल्पेन प्राप्नुवती वचनेन समुच्चीयेते । तस्माद्यथाप्राप्ते प्रयोक्तव्ये । यद्यपि च पृष्ठशब्दो नोच्चारितस्तथाऽपि पृष्ठसाधने प्रकृतौ दृष्टे इति विकृतावपि पृष्ठसाधने एव भवतः । नान्यस्मिन्देशे प्रयोक्तव्ये इति ॥५०॥ [५१ ॥

---

१ 'उभे बृहद्रथंतरे भवतः' इत्यादौ पृष्ठानुवादेन सामद्वयं कण्वरथंतरवद्विधीयते । तथा च रथंतरस्य कार्ये पृष्ठस्तोत्रे तदुभाभ्यां साध्यते । एवं बृहत्कार्येऽपि । अतः कार्यप्रयुक्ता धर्माः कण्वरथंतरदेशोभयहोमये स्युरित्येवं पूर्वपक्षे प्राप्ते सिद्धान्तमाह—पृष्ठानुवादेनेति ।

कालस्येति चेत् ॥ ५२ ॥

इति चेत्पश्यसि, कालस्य पर्वशब्दो वाचकः। तस्मात्कालाभीज्येति। तत्परिहर्तव्यम् । आभाषान्तं सूत्रम् ॥ ५२ ॥

प्रकरणेन विशेष्यते—

नाप्रकरणत्वात् ॥ ५३ ॥

नास्ति कालस्य प्रकरणम् । अस्ति तु समुदायस्य। तस्मात्प्रकरणेन विशेषेण समुदायवाची गृह्यते, न कालवाची । अत्राऽऽह । न प्रकरणेन शक्यते पर्वशब्दस्य कालवाचितां बाधितुम् । दुर्बलं हि लिङ्गात्प्रकरणम् । उच्यते । नायमुभयत्र पर्वशब्दो वर्तते । यदि कालवचनः, तत्संबन्धात्समुदाये गम्यते । यदि वा समुदायवचनः, तत्संबन्धात्काले। अन्यतरवचनो युक्तो नोभयवचनः । तत्र समुदायवचने कल्प्यमाने प्रकरणमनुगृहीतं भवति। अपि च, पृणातेः पर्वशब्दः । पृणातिश्च दाने प्रसिद्धः । दानानि च समुदायाः । तस्मात्समुदायाभीज्या। एवं शब्दावयवप्रसिद्धिरनुगृहीता भवतीति । तस्माद्वैकृतेषु पार्वणयोरप्रवृत्तिः ॥५३॥

मन्त्रवर्णाच्च ॥ ५४ ॥

मन्त्रवर्णाच्च फलवदनुवादो भविष्यति । ऋषभं वाजिनं वयं पूर्णमासं यजामहे। अमावास्या सुभगा सुशेवा, इति च । तस्मादपि समुदायाभीज्येति ॥ ५४ ॥

तदभावेऽग्निवदिति चेत् ॥ ५५ ॥

नैतदस्ति, यदुक्तं वैकृतेष्वप्रवृत्तिरिति । तदभावेऽपि—यद्यपि समुदायवचनोऽयम् । न च वैकृतेष्वयमस्ति समुदायः। तथाऽपि पार्वणहोमौ भवेतामेव । कुतः । अन्या एवंशब्दिका देवता भविष्यन्ति । समुदायो वाऽसंनिहितोऽपि वक्ष्यते, सौर्यानुपकारार्थेन । यथा, अग्निमग्न आवह—इति । संनिहितोऽसंनिहितो वाऽग्निर्यागार्थेनाऽऽवाह्यते । एवमिहापीति ॥ ५५ ॥

नाऽऽधिकारिकत्वात् ॥ ५६ ॥

नैतदेवम् । आधिकारिकं हीदं वचनम् । अधिकारे भवं, यस्या-

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

१ परेण—पा० । २ भवति—पा० । ३ भविष्यति—पा० ।

धिकारस्तस्य गुणं विदधातीति । आग्नेयादीनां चाधिकारः । ते चात्र देवताः । तेषां होमो देवतार्थः । एव यत्र सा देवता नास्ति, तत्र त दर्यौ होमौ न करिष्यते। तस्मात्पार्वणहोमयोर्वैकृतेभ्यो निवृत्तिः ॥५६॥

(पार्वणहोमयोरन्यतरस्यैव तत्तत्समुदायोपकारकस्य दर्शपूर्णमासयोरनुष्ठानाधिकरणम् ॥ १९ ॥)

[१९] उभयोरविशेषात् ॥ ५७ ॥ पू०

इदमिदानीं सदिह्यते । किमुभौ होमौ पौर्णमास्याममावास्यायां च, उत पौर्णमासीहोमः पौर्णमास्याम्, अमावास्याहोमोऽमावास्यायामिति । किं प्राप्तम् । उभावप्युभयत्र । कुतः । उभयोर्हि प्रकरण उभावप्याम्नातौ । तस्मादुभयत्र भवितुमर्हतः ॥ ५७ ॥

यदभीज्या वा तद्विषयौ ॥ ५८ ॥ सि०

---

१९ ॥]

किमुभौ होमौ पौर्णमास्याममावास्यायां चेत्येतदयुक्तम् । यदा समुदायस्य संस्कारको होमाववगतौ तदा य पौर्णमासीलिङ्गः स पौर्णमास्यामेव प्राप्नोति । इतरोऽपि तत्रैवेति, नास्त्यनियम । तस्मादन्यथा वर्ण्यते । प्रयोजनसूत्रे[1] एते । यदि पर्वशब्द कालवचनस्तथा सति कालस्यासंस्कार्यत्वादारादुपकारकौ स्याताम् । कथम् । यद्यपि कालस्य कर्माङ्गताऽवगम्यते, तथाऽपि सकृदेव वेदिते कर्म प्रस्तूयते । न तस्य भूयो भूय स्मृत्या प्रयोजनम् । यथाऽन्यान्यङ्गानि भूयो भूयः स्मारकमपेक्षन्ते, नैव काल । तस्मात्कालवचने पर्वशब्देऽदृष्टार्थौ होमौ प्राप्नुत । अत आह—कालाभीज्याया विकृतिषु प्रवृत्तिरिति । न च प्रकरणादुत्कृष्य कालस्य संस्कारकौ कल्प्येते[2] । फलकल्पनाप्रसङ्गात् । तस्माद्यदि कालवचन पर्वशब्दस्तथा सत्याराद्उपकारकत्वान्न लिङ्ग व्यवस्थां करोति । अत आह—'उभयोरविशेषात्' इति। समुदायवाचकत्वेन तस्य संस्कार्यत्वाद्भवति व्यवस्थाकरणे लिङ्गम् । अत आह—'यदभीज्या वा तद्विषयौ' इति ॥ १७ ॥

---

१ प्रयोजनसूत्रे इति—'उभयोरविशेषात्' 'यदभीज्या वा तद्विषयौ' इति सूत्रद्वयं नाधिकरणान्तरं, किं तु पूर्वाधिकरणप्रयोजनपरमित्यर्थः । २ कल्प्येते इति—तथा च पर्वशब्दस्य कालवाचित्वेऽपि कालस्य कर्माङ्गत्वावगमात्, तस्य च '[illegible]' इत्यादिस्मृतिबलेन कर्मादौ स्मरणसत्त्वात् पुनरुक्तिरूपसंभावनानिमित्ताश्रद्धापरिहारार्थं कर्मवदेव स्मरणोपपत्तेः [illegible] कालसंस्कारकत्वाभावात् कथमारादुपकारकत्वमिति प्रश्नाशयः ।

वाशब्दः पक्षं व्यावर्तयति । नैतदस्ति, उभयमुभयत्रेति । यद्धर्मेज्या, स तत्र भवेत् । तस्य हि स उपकारकः । अनुपकारक इतरस्य । न चानुपकारकः कर्तव्यः । समुदायप्रधानावत्र होमावित्युक्तम् । तस्माद्धर्मेज्या, तद्विषयौ भवेतामिति ॥ ५८ ॥

(समिदादिपदानां नामधेयत्वेन प्रयाजानामारादुपकारकत्वाधिकरणम् ॥ २० ॥)

[२०] प्रयाजेऽपीति चेत् ॥ ५९ ॥ पू०

दर्शपूर्णमासयोः प्रयाजा आम्नाताः—समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजतीति । तत्र संशयः क्रियते । किं समिधो यजतीत्यादिशब्दैः समिदादयो देवताविशेषा विधीयन्ते, एतान्समिदादीन् यजतीति । किंवा न प्रकृतैः समिदादिभिः संबन्ध उपादीयते, एवंशब्दिका देवता न प्रकृताबुपदिश्यन्त इति । किं तावत्प्राप्तम् । प्रकृतानां समिदादीनां यागो विधीयते । समिदादयश्च देवता वाक्यसंबन्धादिति । एवं प्रकृतैः समिदादिभिः संबन्धे क्रियमाणे प्रकरणानुग्रहो भविष्यति । तस्मात्प्रयाजेऽपि प्रकृता देवता भवितुमर्हतीति । देवताप्राधान्यं च यथा पार्वणहोम इति ॥ ५९ ॥

नाचोदितत्वात् ॥ ६० ॥ सि०

नैतदेवम् । नात्र समिदादयश्चोद्यन्ते देवतात्वेन । कुतः । द्वितीयानिर्देशात् । तद्धितनिर्देशेन वा देवता चोद्यते, चतुर्थ्यन्तनिर्देशेन वा । तत्र हि तादर्थ्यं गम्यते । तादर्थ्ये च सति देवता भवति । न देवता नाम काचित् कस्यचित् । सैव कस्यचिद्द्रव्यस्य देवता, सैव नान्यस्य । यस्य यो भवति तादर्थ्यं, सा तस्य देवता । द्वितीया हीप्सिततमे कारके भवति । तत्र न द्रव्यस्य तादर्थ्यं गम्यते । तस्मान्न द्वितीयान्तेन देवताविधानम् ।

अत्राऽऽह । तादर्थ्यं कल्पयिष्यामः । यथा, विष्णुं यजति, वरुणं यजतीति । अत्र न विष्णुर्वरुणो वा यागः । नापि यागाद्यर्थान्तरं, या-

---

[५८ ॥ ५९ ॥]

अथ सिद्धान्ते ग्रन्थः । ' विष्णुं यजति, ' वरुणं यजति' इति परिचोदना । अचोद्यते । वाक्यान्तरेण देवता [illegible] विहितः । तत्पादमनवादः । यदि वा यागे

गस्य कारकं यदीप्सितं, तद्द्वितीययाऽभिधीयते । तेन तत्र कल्प्यते तादर्थ्यम् । शब्दान्तरेण वा विहितं गम्यते । इह तु न शब्दान्तरविहितम् । न चैवं शक्य परिकल्पयितुम् । न च यागस्य कारकत्वेन समवैति । समिदादिशब्दकत्वात्तु यजीनां समिदादय शब्दा वाचका उपपद्यन्ते । क्रियायां चेप्सितायामिष्यते द्वितीया । यथा पाकं पचतीति ।

तस्मात्, समिधो यजतीत्ययमर्थ[1], समिद्याजिः कर्तव्य इति । यदा च याजिं मत्युत्थान चोद्यते, तदा याजिरुपदिष्टो भवति । यदि पुनरत्र देवतोपदिश्येत, उपदिष्टे यजौ देवतोपदिश्येत । तत्रोपदिष्टोपदेशे वाक्यं भिद्येत । तस्मान्न देवतोपदेशः । यदा न देवतोपदेशस्तदा मान्त्रवर्णिको देवताविधिः । तदा चोपादेयत्वादेवशब्दिका देवताश्रीयन्ते । तस्मान्मान्त्रवर्णिको देवताविधिः ॥ ६० ॥

इति श्रीशबरस्वामिकृते मीमांसाभाष्ये नवमाध्यायस्य
द्वितीय पादः ॥

अथ नवमेऽध्याये तृतीयः पादः ॥

(सौर्यादिविकृतावतिदिष्टमन्त्रे वैकृतद्रव्यादिवाचकपदोहाधिकरणम् ॥ १ ॥)

[१] प्रकृतौ यथोत्पत्तिवचनमर्थानां तथोत्तरस्यां ततौ तत्प्रकृतित्वादर्थे चाकार्यत्वात् ॥ १ ॥ सि०

वैकृतानि कर्माण्युदाहरणम् । सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति ।

एवात्र विधीयते । तस्य प्रकरणसंनिधिभ्यां मान्त्रवर्णिको विष्णु माप्त । तस्यायमनुवादो यागस्तुत्यर्थ । न चात्र नामधेय विष्णु । द्वितीयान्तस्य यजतिसामानाधिकरण्याभावात् । यथाग्नेय्वपि च मान्त्रवर्णिको देवताविधि । अग्निसमिदादिष्वेवमेवानूद्यते । संज्ञारूपा वा । यद्यपि सामानाधिकरण्यमस्ति । न च सा भेदिका, किंत्वभ्यास एव भेदक । टुप्टुक द्वितीये ॥ ६० ॥

इति श्रीभट्टकुमारिलविरचितायां मीमांसाभाष्यव्याख्यायां
टुप्टीकायां नवमाध्यायस्य द्वितीय पाद ॥

मन्त्रविषय इदानीमूहश्चिन्त्यते । स च त्रेधा । पदादपरा मात्रा, मुख्यार्थ-

---

1 द्वितीये—टी । (अ० २ पा० २ अ० २ पृ० २) ऽनुसंधेयम् ।

ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इति । चित्रया यजेत पशुकाम इति । वैश्वदेवीं सांग्रहणीं निर्वपेद्ग्रामकाम इति । अस्ति तु प्रकृतौ निर्वापमन्त्रः, अग्नये जुष्टं निर्वपामीति । तथा, इन्द्राय मरुत्वते नैवारमेकादशकपालं निर्वपेदिति । अस्ति तु प्रकृतौ व्रीहिलिङ्गो मन्त्रः, स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि । तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति । तत्रैतच्च विकृतौ चोदकप्राप्तं संदिह्यते । किमविकारेण प्रयोक्तव्यमुतोहेनेति । किं प्राप्तम् । अविकारेणेति । तथा, आर्षमनुगृह्यते । यत्प्रकृतौ कर्तव्यं, तद्विकृताविति । प्रकृतौ चाग्निव्रीहिशब्दौ प्रयुक्तौ । तस्माद्विकृतावपि तावेव प्रयोक्तव्याविति ।

एवं प्राप्ते, ब्रूमः । सत्यं, प्रकृतौ यथोत्पत्ति वचनमर्थानां कृतं मन्त्रे, तथोत्तरस्यामपि ततो विकृतौ तेनैव मन्त्रेण वचनं कर्तव्यम् । तत्प्रकृतित्वात् । तथा प्राप्त इदमुच्यते । नैतदेवम् । अर्थे चाकार्यत्वादिति । एतावर्थौ, अग्निव्रीहिशब्दौ सूर्यं नीवारं च नाभिदध्यातान् । च-

शब्दोऽत्र तुशब्दस्यार्थे । मन्त्राणां चार्थवचनं कार्यं, न स्वरूपम् । स्वरूपे ह्यदृष्टं कल्पयितव्यम् । अर्थवचनेन दृष्ट उपकारः । तस्मादूहितव्याविति ॥ १ ॥

लिङ्गदर्शनाच्च ॥ २ ॥

लिङ्गं खल्वप्यस्मिन्नर्थे भवति । न माता वर्धते न पिता न भ्राता न सखा, इति । प्रत्यक्षं भ्रातरं सखायं च वर्धमानं पश्यामः । अतो नार्थवृद्धिप्रतिषेधसंवादोऽयम् । शब्दवृद्धिप्रतिषेधस्तु— न भ्रातृशब्दो वर्धते, न सखिशब्द इति । का च तयोर्वृद्धिः । वर्णान्तरोपजननम् । सा, एकस्मिन् भ्रातेति, द्वयोर्भ्रातराविति । एतदुक्तं भवति । न भ्रातृशब्द ऊह्यते, न सखिशब्दश्चेति । अतोऽवगम्यते, अन्य ऊह्यन्त इति । यथा, न भवन्तः समाजं गच्छन्ति, न भवन्तः मेखला भवन्तीत्युक्ते नूनमन्ये गच्छन्तीति गम्यते । एवमिहापि, न भ्रातोह्यते, न सखा, इत्युक्ते नूनमन्य ऊह्यन्त इति लिङ्गदर्शनम् ॥ २ ॥

(सौर्ये चरौ आग्नेयबर्हिःस्तरणमन्त्रे हरितपदस्थाने रक्तपदोहाधिकरणम् ॥२॥)

स्थितं तावदपर्यवसितमेवान्तरा चिन्तान्तरं वर्तिष्यते—

[२] जातिनैमित्तिकं यथास्थानम् ॥ ३ ॥ सि०

इदमामनन्ति । सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति । तत्रेदं विधीयते । पौण्डरीकाणि बर्हींषि भवन्तीति । अस्ति प्रकृतौ मन्त्रः । स्तृणीत बर्हिः परिधत्त वेदिं जामिं मा हिंसीरमुया शयाना । दर्भैः स्तृणीत हरितैः सुवर्णा निष्का इमे यजमानस्य ब्रध्न इति । इह चोदकेन प्राप्तः । अत्र दर्भैरिति जातिशब्दः । हरितैरिति नैमित्तिको गुणशब्दः । तत्र संशयः । किं जातिशब्द ऊहितव्यः नैमित्तिकोऽविकारेण प्रयोक्तव्य उताभावपि यथास्थानमूहितव्यौ, जातिशब्दः स्तरणे, नैमित्तिकः स्तरणसाधने द्रव्य इति ।

तत्र एवं तावत्परीक्ष्यम् । किमयं हरितशब्दो हरितगुणविवक्षया प्रयुज्यते उत स्तरणद्रव्यगुणाभिधित्सयेति । कश्चात्र विशेषः । यदि

वचनात् । अर्थाभिधानाय हि शब्दप्रयोगः क्रियते, न [illegible], अदृष्टकल्पनाभयात् । [illegible]निर्देशः । [illegible]मिति ॥ १ ॥ [२ ॥

१ [illegible]—[illegible] ।

दर्भाणां हरितगुणसंबन्धो वक्तव्यः, व्यक्तमसावदृष्टोऽर्थः । तदा पुण्डरीकाणामप्यदृष्टायैव हरितसंबन्धो वचनीयो भवतीत्यविकारेण प्रयोक्तव्यः । अथ स्वरणद्रव्यगुणविवक्षया प्रयुज्यते, तत्र पुण्डरीकाणामपि स्वगुणो वक्तव्यो भविष्यति । तदेतद्द्वयमपि हरितशब्दादवगम्यते । किंतु विवक्षितमिति संशयः ।

किं तावत्प्राप्तम् । अविकारेण प्रयोक्तव्य इति । तत एतचावधिन्त्यते । हरितगुणविवक्षया प्रयुज्यत इति । कुतः । हरितशब्दस्य मन्त्रे भावात् । न हि यो यो द्रव्यगुणः सोऽवश्यवचनीयो भवति । यस्य यस्य तु वाचको मन्त्रे शब्दोऽस्ति, स गुणो वक्तव्य इति गम्यते । हरितगुणस्य वाचको मन्त्रोऽस्ति । तस्माद्धरितगुणो वक्तव्य इति ।

ननु स एव स्वरणद्रव्यगुणस्य वाचकः । नेत्याह । न ह्यसौ स्वरणद्रव्यगुण इत्यनेन कारणेन हरितशब्देनोच्यते । कथं तर्हि । हरितत्वयोगाद्धरितशब्देनोच्यते । स एव हारित्यं श्रुत्याऽभिदधाति, लक्षणया स्वरणद्रव्यगुणम् । श्रुतिश्च लक्षणाया ज्यायसी । तस्माद्धरितगुणाविवक्षया प्रयुज्यते, विकृतौ नोहितव्य इति ।

एवं प्राप्ते, ब्रूमः । जातिशब्दो नैमित्तिकयोभावप्यूहितव्यौ । तत एतद्वर्ण्यते । स्वरणद्रव्यस्य गुणविवक्षया प्रयुज्यत इति । यद्यपि हारित्यं श्रुत्या हरितशब्दोऽभिवदति, तथाऽपि हरितगुणवचनमनर्थकम् । अदृष्टं हि तत्र कल्पनीयं स्यात् । तथाश्रयं दृष्टं संभवति । स्वरणद्रव्यगुणं तु लक्षणयाऽभिवदति । तद्वचने तु दृष्टं प्रयोजनं, स्वरणद्रव्यप्रत्यायनम् । एवं चेदिहापि स्वरणद्रव्यस्य पुण्डरीकस्य गुणः प्रत्याययितव्यः । तस्मात्तद्वाचक ऊहितव्यो रक्तशब्द इति ॥ २ ॥

तत एवान्तरागर्भिणीन्यायो भवतीत्यन्यथा सूत्रं वर्ण्यते—

लिङ्गदर्शनाच ॥ २ ॥

जातिनैमित्तिकं यथास्थानम् ॥ ३ ॥

इति । इतश्च पश्यामो विकृतावूहः कर्तव्य इति । कुतः । लिङ्गं दृश्यते । किं लिङ्गं भवति । एवमाह । विश्वेषां देवानामुस्राणां वपानां

मेदसोऽनुब्रूहीति । जातिशब्दानामूहितानां समुच्चारणं भवति । तन्मन्त्राणामर्थवचनपक्ष एव कल्प्यते । ऊहेऽक्रियमाणेऽनर्थपरत्वेऽग्निच्छागशब्दावेव प्रयुज्येयाताम् । तत्रामीषामक्रियार्थानां वचनमनर्थकमेव स्यात् । न चात्रैते शब्दा विधीयन्ते, विधायकस्याभावात् । ननु प्रयोगवचनेन विधायिष्यन्ते । एवं तर्ह्यदृष्टार्थता दोषः । तस्मादस्ति, ऊह इति ॥२॥३॥

अविकारमेकेऽनार्षत्वात् ॥ ४ ॥

एके पुनराचार्या अविकारमनुमन्यन्ते । अस्मिन्नर्थे लिङ्गं वक्ष्यति । तस्येयं प्राप्तिः क्रियते । यदि ब्रूहेत, आर्षश्चोदको बाध्येत । तस्मादनूह इति ॥ ४ ॥

लिङ्गदर्शनाच्च ॥ ५ ॥

लिङ्गमस्मिन्नर्थे दृश्यते । आग्नेये वैकृते पशावाम्नायते, अग्नये छागस्य वपाया मेदसोऽनुब्रूहीति । ऊहपक्षे न विधातव्यं स्यात् । विधीयते तु । तस्मादनूह इति । अपि चेदमपरं लिङ्गमग्नीषोमीये पशौ श्रूयते, यद्येकं यूपमुपस्पृशेत्, एष ते वायो इति ब्रूयात् । यदि द्वौ, एतौ ते वायू इति । यदि बहून्, एते ते वायव इति । यद्यूहो भवेदेवंदपि प्राप्तत्वान्न विधातव्यं स्यात् । विधीयते तु । तस्मादप्यनूह इति ॥ ५ ॥

विकारो वा तदुक्तहेतुः ॥ ६ ॥

वाशब्देन पक्षो व्यावर्त्यते । यदुक्तमविकार इति । तन्न । ऊहः स्यात् । अस्मिन्नर्थे पूर्वोक्तो हेतुः । अर्थे चाकार्यत्वादिति । मन्त्रार्थमनुरुध्यते चोदको न मन्त्राक्षराणि । अर्थपराणि हि तानि, न स्वरूपप्रधानानि । तस्मादूहः स्यात्पूर्वेणैव हेतुना । केवलं लिङ्गपरिहारो वक्तव्यः ॥ ६ ॥

लिङ्गं मन्त्रचिकीर्षार्थम् ॥ ७ ॥

यल्लिङ्गमुक्तम्, अग्नये छागस्य वपाया मेदसोऽनुब्रूहीति, तन्मन्त्रचिकीर्षया विधीयते । इतरथा, ऊहितत्वादमन्त्रः स्यात् । तस्मात्पुनर्वचनम् ॥ ७ ॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

---

१ तित्तिरीये—प्र० १२ (अ० ३ प्र० ३ अ० ९ पृ० १)।

नियमो वोभयभागित्वात् ॥ ८ ॥

यल्लिङ्गमुक्तम्, एष ते वायो इति । तत्परिहियते । यदि ह्येतन्नो-च्येत, यदि द्वावुपस्पृशेत्, यदि बहूनिति, सर्वे इमे मन्त्रा एकयूपे भवेयुः। उभयमपि मा प्रकृतौ भूदिति नियमः क्रियते । यदि द्वावुपस्पृशेद्, एतौ ते वायू इति ब्रूयात् । यदि बहून्, एते ते वायव इति ब्रूयात् । तस्मा-देतदप्यलिङ्गमिति ॥ ८ ॥

(लौकिकयूपस्पर्शे पुरुषार्थतया प्रायश्चित्तविधानाधिकरणम् ॥ ३ ॥)

[३] लौकिके दोषसंयोगादपवृक्ते हि चोद्यते निमित्तेन प्रकृतौ स्यादभागित्वात् ॥ ९ ॥ सि०

अस्ति ज्योतिष्टोमः । तत्राग्नीषोमीये पशावाम्नायते । यद्येकं यूप-मुपस्पृशेदेष ते वायो इति ब्रूयात् । यदि द्वावेतौ ते वायू इति । यदि बहूनेते ते वायव इति । तत्रैषोऽर्थः सांशयिकः । लौकिके वैदिके च यूपोपस्प-र्शने प्रायश्चित्तमुत वैदिके, अथवा लौकिके, इति । किं प्राप्तम् । लौ-किके वैदिके वाऽनियम इति । कथम् । विशेषानाश्रयणात् ।

न हि विशेष आश्रीयते लौकिके वैदिके वेति । तस्मादनियम इति । वैदिके वा । तथा हि । अस्य मन्त्रस्य समीपगतेन प्रयोजनाभिसंबन्धो भविष्यति । इतरथा दूरगतेनाप्रकृतेन परोक्षः संबन्धः स्यात् । तस्माद्वै-दिके यूपोपस्पर्शन इदं प्रायश्चित्तमिति ।

एवं प्राप्ते, ब्रूमः । लौकिक उपस्पर्शने भवितुमर्हति, न वैदिके । कुतः । दोषसंयुक्तं हि श्रूयत इदं प्रायश्चित्तम्-यूपो वै यज्ञस्य दुरिष्टमा-मुञ्चते, यद्यूपमुपस्पृशेद्यज्ञस्य दुरिष्टमामुञ्चते । तस्माद्यूपो नोपस्पृश्य इत्यभिधाय, यद्येकं यूपमुपस्पृशेदिति समाम्नायते । तस्माद्यत्र दोष-स्तत्र प्रायश्चित्तमिति । लौकिके च दोषो न वैदिके । वैदिके हि, अञ्जन-मुच्छ्रयणं च कर्तव्यमुक्तम् । न तत्कर्तव्यं सदकर्तव्यं भविष्यति । तस्मात्तत्र चोपस्पर्शनप्रतिषेधवचनं लौकिकेऽविरुद्धं भविष्यति ।

॥ ८ ॥]

---

१ चाविदम इति—पा० । २ एवं दोषसंयुक्तं—पा० ।

अपि च, अप्रकृते कर्मणि चोद्यते निमित्तेन। कथम्। यूपो वै यज्ञस्य दुरिष्टमामुञ्चत इति। यत्किल यज्ञे दुरिष्टं तद्यूप आमुञ्चते, यत्सुकृतं तद्यजमान इति। सर्वमिदं प्रशंसार्थं, न विधिपदान्तरेण संबध्यते। इष्टशब्द एवैको विधिपदैः संबन्धमुपैति। प्रशंसापदैरपि संबध्यमान इह संनिहितो भवति। संनिहितत्वाच्च पदान्तरैः संबध्यते। यथा, दण्डो मनोहरो रमणीयश्च, प्रहर शीघ्रमिति रमणीयमनोहरसंबन्धेऽपि सति संनिहितत्वात्प्रहर शीघ्रमित्येतैः पदैः संबध्यते। एवमिष्टशब्दोऽपि संनिहितत्वात्संबध्यते। इष्टे यदि यूपमुपस्पृशेदेष ते वायो इत्येवमादि ब्रूयादिति। सोऽयमिष्ट इत्यपवर्गस्य वक्ता शब्दः। अप्रकृ-

येयं सूत्रावयवव्याख्या, अप्रकृते हि चोद्यत इति, 'यूपो वै यज्ञस्य दुरिष्टम्' 'यद्येकमुपस्पृशेत्' इति वाक्ययोरेकवाक्यतया, सा न युक्ता। अर्थैकत्वादेकवाक्यत्वमिति' ह्युक्तम्। अर्थभेदाद्भिन्ने एते वाक्ये। स्तुतिस्तुत्यभेदाच्चार्थभेदः। 'यूपो वै यज्ञस्य' इत्येतया निन्दया प्रतिषेधः संबध्यते, 'तस्मान्नोपस्पृश्यः' इति। 'यद्येकम्' इत्यस्यापरा स्तुतिः। न च दुरिष्टशब्दः समाप्तिवाचकः। इष्टशब्देन सोच्येत वा न वा। सोपपदस्तु समुदायप्रसिद्ध्या पापवचनः। दुरिष्टं पापमित्यर्थः। यथा दुष्कृतम्। न चोपस्पर्शनं निमित्तत्वेनानूद्यमानं दुरिष्टेनोपपदेन विशेषयितुं न्याय्यम्। आर्तिवत्।

तस्मादन्यथा वर्ण्यते। अप्रकृते हि—प्रतिषेधे सति, चोद्यते मन्त्र उपस्पर्शनेन निमित्तेन। प्रतिषेधो ह्युपरमोऽनितिकर्तव्यतारूपो न प्रयोगाङ्गम्। यद्धेतिकर्तव्यतारूपं तत्प्रकरणेन गृह्यते। प्रतिषेधस्तु पुरुषार्थः। स हि स्वभावाद्विचरन् कदाचिदुपस्पृशेदपि, कर्ममध्यगतो वा। तत्र प्रतिषिध्यते नोपस्पृशेदिति। तत्र हि पापमावद्धमिति। यस्य च प्रतिषेधस्तस्य निमित्ते प्रायश्चित्तं, ब्रह्महण इव। तत्रैवं वचनव्यक्तिर्भवति, 'यद्येकमुपस्पृशेत्, एवं ब्रूयादिति'। प्रकरणात् 'यूपम्' इत्यनुवादः। न च श्रुत्या संस्पृश्योपस्प्रष्टुमित्यर्थाच्च यूपानुवादः। यूपस्तु निमित्तभूतो [illegible] सं-

१ इतीति—इत्यस्य भाष्यकारैः कृतेति शेषः। २ इति ह्युक्तमिति—(अ० २ पा० १ अ० १४ पृ० ४९) इत्यत्रोक्तमित्यर्थः। ३ इत्यस्यैति—प्रायश्चित्तविधेरप्यपरा स्तुतिः कल्पनीया युक्ता। पूर्वस्मात् स्तुतेर्निषेधशेषत्वादित्यर्थः। ४ यस्य चेति—यस्यैव पुरुषस्य प्रतिषेधोऽस्ति, तस्यैव प्रतिषेधातिक्रमणरूपे निमित्ते सति [illegible] प्रायश्चित्तविधाने [illegible] युज्यते। [illegible] प्रतिषेधस्य पुरुषार्थत्वे प्रायश्चित्तस्यापि पुरुषार्थत्वं [illegible]। ५ यूपस्य [illegible]—[illegible]।

क्ते चेदुपस्पर्शनं मन्त्रस्य निमित्तं, व्यक्तं न वैदिकम् । तस्माल्लौकिके यूपोपस्पर्शने प्रायश्चित्तं, न प्रकृतौ वैदिके, अभागित्वात्—प्रतिषेधस्याप्रवर्गस्य च, वैदिके न संभवतीति ॥ ९ ॥

(द्विपाशिकायां विकृतावेकवचनान्तबहुवचनान्तपाशमन्त्रयोर्द्विवचनान्तेनोहाधिकरणम् ॥ ४ ॥)

[४] अन्यायस्त्वविकारेणादृष्टप्रतिघातित्वादविरोधाच्च तेनास्य ॥ १० ॥ सू०

अस्ति पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभत इति । तत्र पाशैकत्वाभिधायी मन्त्रः, अदितिः पाशं प्रमुमोक्त्वेतमिति । तथा पाशबहुत्वाभिधायी, अदितिः पाशान् प्रमुमोक्त्वेतानिति । प्रकृतौ तयोः समुच्चयं वक्ष्यति । अस्ति द्विपशुर्विकृतिः । मैत्रं श्वेतमालभेत, वारुणं कृष्णमपां चौषधीनां च संधावन्नकाम इति । तत्र चोदकेन पाशाभिधायिनौ मन्त्रौ प्राप्तौ । तयोः संशयः । किं बहुवचनान्तोऽविकारेण प्रवर्तते, एकवचनान्तस्य निवृत्तिः, उत बहुवचनान्तो निवर्तते, एकवचनान्त ऊहितव्यः, उतोभयोरपि प्रवृत्तिरभिधानविप्रतिपत्तिश्च, उतैकवचनान्त ऊहितव्यो बहुवचनान्तोऽपि न निवर्तेत । किं प्राप्तम् । अन्यायस्त्वविकारेण । अन्यायनिगदो बहुव-

---

स्यया विशेषयितुं प्रहवत् । इदमेवास्याः स्मृतेर्मूलं, 'यूपचित्याद्युपस्पर्शने स्नायात्' इति । ननु प्रतिषेधोऽपि प्रकरणात्कर्माङ्गं, 'नानृतं वदेत्' इतिवदिति चेत् ।

उच्यते । हिंसासाधनके कर्मणि अहिंसार्थं संकल्प्य पवमयो न देय इत्युक्तम् । इह तु न द्वौ प्रयोगौ । सोपस्पर्शनकोऽनुपस्पर्शनकश्च । यत्रानुपस्पर्शनके स्पर्शप्रतिषेधोऽङ्गं स्यात् । यत्तु तक्षणाद्युपस्पर्शनं तद्वाचनिकं, तक्षणादिकर्तॄरि च । इदमविकरणमुदाहरणप्रसङ्गेन । पूर्वश्चोहः प्रातिपदिकविषयः । इतःप्रभृति वचनविषय एव । पाशौ, पाशं, पाशानितिवत् ॥ ९ ॥

तयोः समुच्चयं वक्ष्यति । प्रकृतावुभयोर्निवेश इत्यर्थः । नन्वयं पाशमन्त्रः

---

१ 'तयोः समुच्चयं वक्ष्यति' इति भाष्ये यथाश्रुतेऽनुपपन्नार्थम् । कुतः । एकवचनान्तबहुवचनान्तपाशमन्त्रयोः पाशप्रकाशनार्थत्वेन इत्यर्थतया समुच्चयासंभवात् । अतस्तदभिप्रायमाह—प्रकृतावित्ति । २ ननु पाशमन्त्रस्य करणमन्त्रत्वाद्द्विपाशिकायां विरुद्धो प्रत्येकस्मिन् पाश आहत्यैव प्रयोगात्तेनोभयोरपि मन्त्रयोरूहेन प्रयोगमिति यदुक्तं—नन्वित्यादिना ।

चनान्तोऽविकारेण प्रवर्तते। एकवचनान्तो निवर्तितुमर्हति। कुतः। नास्यैकस्मिन् पाशे प्रवर्तमानस्य दृष्टः प्रतिघातः। यथैवैकस्मिन् पाशे प्रवर्तते, तथा द्वयोरपि प्रवर्तितुमर्हति। नासावेकस्य वाचकः, न द्वयोः। एवमार्थवादिकोऽनुगृहीतो भविष्यति। इतरथा हि, ऊह्यमाने यथाप्रकृति मन्त्रो न कृतः स्यात्। न द्वयोः पाशयोः, एकस्मिंश्च पाशे कश्चिद्विशेषोऽस्ति। तस्मादविकारेण बहुवचनान्तः प्रयुज्यते, एकवचनान्तस्य निवृत्तिरिति ॥ १० ॥

विकारो वा तदर्थत्वात् ॥ ११ ॥

वाशब्दः पक्षं व्यावर्तयति। विकारो वा स्यात्। एकवचनान्त ऊहेन प्रवर्तेत, बहुवचनान्तनिवृत्तिरिति। कुतः। तदर्थत्वात्। यौ पाशौ विकृतौ वक्तव्यौ, तौ च प्रयोगवचनानुग्रहाद्यौगपद्येन, न पर्यायेण। तत्र न गम्यते विशेषः, पाशशब्द उच्चारिते कस्य पाशस्याभिधानं, कस्य नेति। अविशेषाद्द्वयोरपि पाशयोः। तत्र तयोः कर्मत्वाभिसंबन्धं द्वितीयाद्विवचनमेव शक्नोति वदितुं, नान्यत्। तस्माद्द्विवचनमूह्येत। बहुवचनमेकवचनं च निवर्तितुमर्हत इति ॥ ११ ॥

अपि त्वन्यायसंबन्धात्प्रकृतिवत्परेष्वपि यथार्थं स्यात् ॥ १२ ॥

अपि त्विति पक्षो व्यावर्त्यते, न बहुवचनं निवर्तेत। यथा प्रकृतौ बहुवचनान्तमेकवचनान्तं च प्रवृत्तम्। अन्यायसंबन्धाद्बहुवचनान्तम्। एवं विकृतावप्येकवचनान्तं द्विवचनान्तमूह्येत। अन्यायसंबन्धाच्च बहुवचनान्तं प्रवर्तेत। यदि प्रकृतौ प्रातिपदिकार्थमात्रं पक्षे प्रकाशितं, विकृतावपि तत्पक्षे प्रकाशयितव्यम्। अथ बहुवचनान्तेनैकत्वमुक्तम्, इहापि बहुवचनान्तेन द्वित्वं वक्तव्यम्। तस्मादभिधानविप्रतिपत्तिः कर्तव्येति ॥ १२ ॥

करणत्वात्पर्यायेण स्यान्। नार्थ ऊहेनेति। नपोऽयं, पाशोन्मोचनशाले क्रियमाणानुवाद एव वा। अर्थान्योत्तराधिकरणं, प्रकृतौ विचारितायां विकृतेर्विषयः ॥ १० ॥ ११ ॥ १२ ॥

1 त्विति—पा०। 2 निवर्तेत—पा०।

यथार्थं त्वन्यायस्याचोदितत्वात् ॥ १३ ॥ सि०

तुशब्दस्तमपि पक्षं व्यावर्तयति । नाभिधानविप्रतिपत्तिः कर्तव्येति । किं तर्हि । यथार्थं द्विवचनमूहितव्यं, बहुवचनमेकवचनं च निवर्तयाताम् । तद्धि द्विपाशाभिधायिनः पाशशब्दात्परं बहुवचनमेकवचनं वा न शक्नोति कर्मसंबन्धं वदितुम् । लोको हि शब्दार्थावगमे प्रमाणम् । न च लोके द्वयोरर्थयोर्बहुवचनान्त एकवचनान्तो वा प्रवर्तमानो दृश्यते । तस्मादूहेन द्वयोः पाशयोर्बहुवचनान्त एकवचनान्तो वा प्रयोक्तव्यः ॥ १३ ॥

कथं प्रकृतावेकस्मिन् पाशे बहुवचनान्त इति चेत्—

छन्दसि तु यथादृष्टम् ॥ १४ ॥

यावद्दर्शनं प्रामाण्यमभ्युपगन्तव्यं छन्दसि, न दर्शनमतिक्रामितव्यम् । यो हि दर्शनमतिक्रम्यान्यदपि कल्पयेत्, न तेन छान्दसं कृतं स्यात्, न लौकिकं, नापि लक्षणसिद्धम् । यदुक्तं, चोदकेनाभिधानविप्रतिपत्तिश्चोद्यत इति । नैतदेवम् । अन्यायस्याचोदितत्वात् । न हि चोदकोऽन्याय्यामभिधानविप्रतिपत्तिमभिप्रापयति । किं कारणम् । प्रकृतावेकत्वात्पाशस्य, प्रयुक्तत्वाच्च बहुवचनान्तस्य, प्रत्यक्षाऽभिधानविप्रतिपत्तिः । केयमभिधानविप्रतिपत्तिर्नाम । यदन्यथाभिधानम्, अन्यथाऽभिधेयम् । न च प्रकृतावेकस्मिन् बहुवचनान्तं प्रयुक्तमभिधानविप्रतिपत्तिं कर्तुम् । किं तर्हि । यत्नेन शक्यते, तत्कर्तुम् । किं चानेन शक्यते । अस्य सिद्धे प्रयोगेऽर्थमन्विच्छन्तो यदवगम्यते तदर्थः शब्द इत्यवधारयामः । अस्माच्च पाशद्रव्यस्य मोचनेन संबन्धोऽवगम्यते । तदर्थता शब्दस्य भवितुमर्हति । नैकत्वेन बहुत्वेन वा प्रयोजनम् ।

इह तु विकृतौ पाशस्य च पाशस्य च यौगपद्येन मोचनेन संबन्धो वदितव्यः । बहुवचनं च द्वयोः पाशयोरन्याय्यम् । कर्माभिधाने इह पुनर्न प्रयोगः सिद्धः । किंतु प्रयोग एव चिन्त्यते, कः शब्दः प्रयो-

॥ १४ ॥

---

१ तुशब्द एतमपि—पा० । २ अन्यत्रापि—पा० । ३ प्रकृतत्वाच्च—पा० । ४ तस्याभिधाने, इह न प्रयोग —पा० ।

कर्तव्य इति । तत्र प्रयोगेऽसमवायत्वे किमित्यवाचकं प्रयोक्ष्यामहे विद्यमाने वाचके । न चायं द्वयोश्छन्दसि दृष्टो बहुवचनान्तः । सोऽयं मन्त्रः प्रयुज्यमानोऽपभ्रंश एव स्यात्, न छान्दसः । न च बहुवचनं द्वित्वमत्ययार्थं लभ्यते लौकिके वैदिके वा । न चाभिधित्सिते द्वित्वे द्वयोर्बहुवचनं भवति । तद्यथा, देवदत्तयज्ञदत्ताभ्यां कर्तव्यमिति देवदत्तयज्ञदत्तशब्दद्वयादेव द्वित्वं प्राप्तं, न विभक्त्याऽभिधास्यते । तथाऽपि द्विवचनमेव भवति, न बहुवचनम् । तस्माद्विकृतावूहितव्यमिति ॥१४॥

(बहुवचनान्तपाशमन्त्रस्य विकल्पेन प्रकरण एव निवेशाधिकरणम् ॥ ९ ॥)

[५] विप्रतिपत्तौ विकल्पः स्यात्समत्वाद्गुणे त्वन्यायकल्पनैकदेशत्वात् ॥ १५ ॥ सि०

अस्ति पशुरग्नीषोमीयः । यो दीक्षितो यदग्नीषोमीयं पशुमालभत इति । तत्र पाशैकत्वाभिधायी पाशबहुत्वाभिधायी च मन्त्रौ समाम्नातौ । तयोः किमेकत्वाभिधायी प्रकरणे निविशते, बहुत्वाभिधायी प्रकरणादुत्कृष्यत उतोभावपि प्रकरणमभिनिविशेते इति । किं प्राप्तम् । बहुत्वाभिधायी उत्कर्ष्टव्य इति । कुतः । बहूनां हि स पाशानां मोचकः । न च प्रकरणे बहवः पाशाः सन्ति । तस्मात्प्रकरणेऽसंबध्यमानो यत्र बहवः पाशास्तत्र नीयेत । यथा, युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यादिति । एते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्यः प्रतिपदं कुर्यादिति प्रतिपद्विधानमुत्कृष्यते । यथा च, पौष्णसावित्रसारस्वतत्वाष्ट्रद्यावापृथिवीयाद्यनुमन्त्रणान्युत्कृष्यन्ते, एवं पाशबहुत्वाभिधाय्यपीति ।

एवं प्राप्ते, ब्रूमः । विप्रतिपत्तावेतस्यां, का विप्रतिपत्तिः । यत्प्रकृतावेकः पाशः, पाशबहुत्वाभिधायी च मन्त्रः । एतस्यां विप्रतिपत्तौ किं मन्त्र उत्कृष्यते, नेति । उच्यते । नोत्कर्ष्टव्यः । ननु प्रकृतावन्यो मन्त्रः । उच्यते । तेन सह विकल्पो भविष्यति । कुतः । पाशप्रतिपादि-

॥ १४ ॥

१ वैदिके च—पा० । २ विधित्स्यते—पा० । ३ अस्ति सोमे पशु—पा० । ४ बहुत्वाभिधायी यत्र बहवः पाशास्तत्रोत्कर्ष्टव्य इति—पा० ।

कार्थस्य प्रकृतौ विद्यमानत्वादुत्कर्षो न न्याय्यः । ननु बहुपाशवचन एष मन्त्रः । प्रकृतौ त्वेकः पाशः । तस्मात्तत्र न संभवतीति । उच्यते । बहूनप्यसौ पाशान् वदन् बहुत्वाधिष्ठानं द्रव्यं प्रकाशयत्येव । यदि न प्रकाशयेत्, न पाशविशिष्टं बहुत्वं गम्येत । प्रकाशयति चेत्, तावता नः प्रयोजनम् । तस्य ह्युन्मोचनं क्रियते, न बहुत्वस्य, पाशाकृतेर्वा । तस्मात्तस्य प्रकाशनं कर्तव्यम् । तत्प्रातिपदिकेन करिष्यते, नोत्कृष्यते ।

अथोच्यते । अस्त्येव ह्येकवचनान्तं प्रातिपदिकम् । तत्तस्य प्रकाशनं करिष्यतीति । अत्रोच्यते । न हीदं तस्मादन्यत् । यद्येकवचनान्तं प्रातिपदिकं नोत्कृष्यते, प्रकरणादित्युच्यते, सिद्धस्तर्ह्यनुत्कर्षस्तदेवेदमिति । ननु बहुवचनस्य बहुपाशकप्रयोगेऽर्थवत्ता । तस्मादुत्कष्टव्यम् । तदुत्कृष्यमाणमेकदेशत्वात्प्रातिपदिकमुत्कर्षतीति । उच्यते । गुणे त्वन्याय्यकल्पना स्यादिति, न प्रधाने । गुणश्च विभक्त्यर्थः । प्रधानं प्रातिपदिकार्थः । प्रातिपदिकार्थविशेषो विभक्त्याऽभिधीयते । सति प्रातिपदिकार्थे विभक्त्यर्थेन भवितव्यम् । न च विकृतौ प्रातिपदिकमस्ति । अनारभ्याप्यभिहितं[1] प्रकृतिं प्रविशति । किमङ्ग पुनः प्रकृतावेवाभिहितम् । तस्माद्यत्र प्रातिपदिकार्थस्तत्र विभक्त्यर्थो भविष्यति ।

ननु विकृतावपि चोदकेन प्राप्तं प्रातिपदिकं, प्रातिपदिकार्थश्चोच्यते । बाढम् । विप्रकृष्टस्तु चोदकः । बहुवचनसमर्थकं प्रातिपदिकं चोदको नोत्कक्ष्यति । तस्मात्प्रातिपदिकमेकदेशत्वाद्बहुवचनमाकर्ष्यतीति । न च प्रकृतावनर्थकमेव बहुवचनं, पाशाकृतिकस्य हि तदुन्मोचने कर्मसंबन्धं करोति । तस्माद्गुणे बहुवचनेऽन्याय्यकल्पना, न प्रधाने प्रातिपदिकार्थे, इति । किं पुनरन्याय्यम् । यद्बहुत्वं गम्यमानमविवक्षितमित्युच्यते । तत्कल्पना, न तु प्रकृतौ प्रातिपदिकस्य प्रातिपदिकार्थाभिधानमन्याय्यं कल्पयितव्यम् । अस्य हि गुणस्यान्नाच्यमेव वैकृतं बहुत्वं, संनिधानाभावात् । तस्मात्प्रकृतौ बहुवचनान्तस्यापि निवेश इति ॥ १५ ॥

॥ १९ ॥

१ आनरभ्यापीतं हि—पा० ।

प्रकरणविशेषाच्च ॥ १६ ॥

प्रकरणविशेषाच्चैतदध्यवसीयते, प्रातिपदिकं बहुवचनमाकर्षति, न प्रातिपदिकं बहुवचनेनोत्कृष्यत इति । प्रकृतौ हि प्रातिपदिकार्थो विद्यतेऽग्नीषोमीये पशौ । बहुवचनार्थो विकृतिषु । तस्मादपि बहुवचनान्तस्य प्रकृतौ निवेश इति ॥ १६ ॥

उत्कर्षो वा द्वियज्ञवदिति यदुक्तं, तत्परिहर्तव्यम्—

अर्थाभावात्तु नैवं स्याद्गुणमात्रमितरत् ॥ १७ ॥

युक्तं यत्प्रतिपद्विधानमुत्कृष्यते, नास्ति प्रकृतौ यजमानद्वित्वं यजमानबहुत्वं वा । तत्र न भवेद्विषय एतयोः प्रतिपदोः । इह तु गुणमात्रं नास्ति बहुत्वम् । अन्यत्तु बहुवचनस्य प्रयोजनं, मुखिना संबन्धः । न चानेकप्रयोजनमन्यतमेन प्रयोजनेन न प्रयुज्यते । न हि, उल्का प्रकाशनेनाप्रयुज्यमाना भस्मना न प्रयुज्यते । तस्माद्विषमं प्रतिपन्नयामिदमिति ॥ १७ ॥

यावोस्तथेति चेत् ॥ १८ ॥

अथ यदुक्तं, द्यावापृथिव्यादीनामनुमन्त्रणानां यथोत्कर्षस्तथाऽस्येति । तत्परिहर्तव्यम् ॥ १८ ॥

नोत्पत्तिशब्दत्वात् ॥ १९ ॥

नैतदनुमन्त्रणेन तुल्यम् । न हि दर्शपूर्णमासयोर्द्यावापृथिव्यादीनामुत्पत्तौ शब्दोऽस्ति । अस्ति त्विह पाशयोरुत्पत्तौ शब्दः । तस्माद्विषममनुमन्त्रणेनेति ॥ १९ ॥

(दर्शपूर्णमासयोर्द्विबहुपत्नीकप्रयोगे पत्नीमन्त्रस्यानूहाधिकरणम् ॥ ६ ॥)

[६] अपूर्वे त्वविकारोऽप्रदेशात्प्रतीयेत ॥ २० ॥ सि०

दर्शपूर्णमासयोरामनन्ति, प्रोक्षणीरासादयेध्माबर्हिरुपसादय, स्रुवं च स्रुचश्च संमृड्ढि, पत्नीं संनह्याऽऽज्येनोदेहीति । तत्र, पत्नीं संनह्येति चिन्त्यते । अस्ति हि यजमान एकपत्नीको बहुपत्नीकश्च । तत्र सर्वस्य

१६ ॥ १७ ॥ १८ ॥ १९ ॥]

यदि पत्नी प्रातिपदिकार्थः प्रधानं भवेत्, तत एकद्विबहुपत्नीकेषु प्रयोगेषु

१ अप्रकृतौ हि बहुवचनार्थ –पा० ।

प्रयोगमधिकृत्य पत्नीशब्द उच्चारित इत्येतत्पाशाधिकरणेनैव निर्णीतम् । इदं तु संदिह्यते । किं द्विपत्नीके बहुपत्नीके च प्रयोग ऊहितव्यः पत्नीशब्द उत नेति । किं प्राप्तम् । अभिधानार्थत्वान्मन्त्राणामूहितव्य इति ।

एवं प्राप्ते, ब्रूमः । अपूर्वे तु—अप्रकृतिपूर्वके कर्मणि, अविकारेण प्रयुज्येत । कुतः । ईकारान्तं हीदं पत्नीमात्रस्य वाचकम् । तत्र द्विपत्नीके बहुपत्नीके च प्रयोगे पत्नीशब्द उपादीयमाने द्विवचनं बहुवचनं च सामर्थ्यात्प्राप्नोति संनहनसंबन्धं कर्तुम् । समाम्नानसामर्थ्यात्त्वेकवचनेन क्रियते । न चात्र द्वित्वं बहुत्वं वा विवक्ष्यते । लक्षणत्वेन हि पत्नीशब्दस्य श्रवणात् । न चैकपत्नीकात्प्रयोगाद्द्विबहुपत्नीके प्रयोगेऽतिदेशो भवति । यथा, तत्र संख्योक्ता तद्वदिहापीति । तस्मादविकारेण पत्नीशब्दस्य प्रयोगः । अथापि कथंचिदेकत्वं विवक्ष्येत, तथाऽपि द्विबहुपत्नीके प्रयोगे संप्रतिपत्त्यभावादेकवचनार्थमेकवचनम् । तदनेकपत्नीके प्रयोगेऽविरुद्धमित्यविकारेण प्रयुज्यत इति ॥ २० ॥

(विकृतावपि द्विबहुपत्नीकप्रयोगे पत्नीमन्त्रस्याविकाराधिकरणम् ॥ ७ ॥)

[७] विकृतौ चापि तद्वचनात् ॥ २१ ॥ सि०

(प्रातिपदिकार्थे इत्येतयोः पाशाधिकरणे वर्णितं)अथापि कथंचिदेकवचनं विवक्षितमिति—अदृष्टार्थमेकवचनमुच्चारितं, न समवेतसंख्याभिधानार्थं, द्विबहुत्वस्यानभिधानात् । यत्र चान्यत्राभिधानविप्रतिपत्तिस्तत्र पाशान्यायः । यत्र त्वेक एव मन्त्रः, तत्र पत्नीन्यायः, 'पवित्रे स्थः' इति यथा । ननु ' पवित्रयोरुपादीयमानत्वाद्विवक्षितं द्वित्वम् । उपादीयमानता च ' पवित्राभ्यामुत्पुनाति ' इत्यादौ तयोरिति । न वयं द्वित्वविवक्षां वारयामः । किं तर्हि । समवेतं वदति न वदतीति । समवेतवचनस्य ऊहो विवक्षितः प्रयोजनमिति ॥ २० ॥

---

१ (अ० ९ पा० ३ अ० ५) । २ कुण्डलिनस्थान एवं पाठ आवश्यक इति तन्त्ररत्नेनानुमीय प्रकाश्यते । ' प्रातिपदिकार्थोऽस्तीति तद्द्वारेण विभक्तिरप्येकवचनं त्रिष्वपि प्रवर्तमानमाकृतिविवक्ष्याभिप्रायं स्यात् । अथ विभक्तिः प्रधानं ततो यत्र सा स्वार्थं लभते तत्रैव पर्यवसितः प्रातिपदिकार्थं इति द्विबहुपत्नीके मन्त्र एव न स्यात् ' इत्येतयोः पक्षयोः किं न्याय्यमित्येतत्पाशाधिकरणे वर्णितम् । इति । ३ (अ० ९ पा० ३ अ० ५) इत्यत्रेति शेषः ।

अथेदानीं विकृतौ पत्नीशब्दश्चिन्त्यते। किं द्विपत्नीके बहुपत्नीके च प्रयोग ऊहितव्यो नेति। किं प्राप्तम्। द्विवाची बहुवाची वा पत्नीशब्दो द्विवचनं बहुवचनं चोपाददानः प्रकृतौ समाम्नानेन बाधितः। इह समाम्नानाभावात्ते उपादातुमर्हतीति।

एवं प्राप्ते, ब्रूमः। विकृतावप्यविकारेण प्रयोक्तव्य इति। कुतः। तद्वचनात्। यत्प्रकृतौ तद्विकृतौ कर्तव्यमिति तद्वचनम्। प्रकृतौ चैकत्वमविवक्षितम्। इहापि द्वित्वं बहुत्वमेकत्वं च न विवक्षितव्यमिति। तस्मादविकारः। अथवा, तदेव विवक्षितम्। तदनेकपत्नीकेऽप्यविरुद्धमित्यविकार एवावसीयते ॥ २१ ॥

(पशुधर्मसामानविध्यपक्षे मास्मा इत्यध्रिगुप्रैषस्याविकाराधिकरणम् ॥ ८ ॥[1])

[८] अध्रिगौ सवनीयेषु तद्वत्, समानविधानाश्चेत् ॥२२॥ सि०

अस्ति सोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभत इति। तत्राध्रिगाविदं समाम्नायते। मास्मा अग्निं भरत, स्तृणीत बर्हिरन्वेनं माता मन्यतामनु पिताऽनु भ्राता, इत्येवमादि। यदा त्वग्नीषोमीयः सवनीयाश्च समानविधानाः, तत्रेदं विचार्यते। किमध्रिगौ, मास्मे, इत्येवमादिपदमूहितव्यमुत नेति। किं प्राप्तम्। ततोऽतिदेशः क्रियते। अध्रिगौ तद्वदिति। तत्र यः पत्न्यधिकरणे पूर्वपक्षः स इह पूर्वपक्षः। यः सिद्धान्तः स इह सिद्धान्तः। ऊह इति पूर्वपक्षः। अविकार इति सिद्धान्तः ॥ २२ ॥

(नीवारादिसदृशप्रतिनिधिप्रयोगे व्रीह्यादिमन्त्रस्याविकारेण प्रयोगाधिकरणम् ॥ ९ ॥)

[९] प्रतिनिधौ चाविकारात् ॥ २३ ॥ सि०

अस्ति प्रतिनिधिः। श्रुते द्रव्येऽपचरति, आगमो वा चोदनार्थाविशेषादिति। स च सदृशः, सामान्यं तच्चिकीर्षेति। तद्यदा व्रीहिष्वपचरत्सु नीवारा उपादीयन्ते प्रतिनिधित्वेन, तदा व्रीहिमन्त्रो यः समाम्नातः,

[२१ ॥ २२ ॥

[1] अध्रिगु--पा०। २ (अ० ६ पा० ३ अ० ४ सू० १५)। ३ (अ० ६ पा० ३ अ० ११ सू० २७)।

स्योनं ते सदनं कृणोमि । घृतस्य धारया सुशेवं कल्पयामि, तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति । तं प्रति संदेहः । किं नीवारेषु व्रीहिशब्दस्योहेन प्रयोग उताविकारेणेति । किं प्राप्तम् । अविकारेण व्रीहिशब्दः प्रयुज्यमानः कार्यवतो नीवारान् न शक्नोति प्रकाशयितुमिति तेषु प्रकाशयितव्येषु नीवारशब्दः प्रयोक्तव्यो भवति । तस्मादूहः कर्तव्य इति ।

एवं प्राप्ते, ब्रूमः । प्रतिनिधौ[1] चाविकारात् । प्रतिनिधौ चेति, किं- ऊहो न कर्तव्य इत्यनुकृष्यते । किमेवं भविष्यति । एवमविकारो भविष्यति । तत्राऽऽर्षमनुग्रहीष्यते । तस्मादनूहः ॥ २३ ॥

अनाम्नानादशब्दत्वमभावाच्चेतरस्य स्यात् ॥ २४ ॥

न[2] चैतदस्त्यनूह इति । एवमनूहो भवेत् । यदि तस्मिन् मन्त्रे व्रीहि- शब्दोऽनाम्नातः स्यात् । अभावाच्चेतरस्य, यदि च नेदं द्रव्यान्तरं नीवा- राख्यं स्यात् । न चेदमुभयमस्ति । तस्मादभिधानसिद्ध्य ऊहितव्यो नीवारशब्द इति ॥ २४ ॥

तादर्थ्याद्वा तदाख्यं स्यात्संस्कारैरविशिष्ट- त्वात् ॥ २५ ॥

वाशब्दः पक्षं व्यावर्तयति । नैतदस्त्यूह इति । अविकारेण प्रयोगः । कुतः । तादर्थ्यात् । तादर्थ्यं, व्रीह्यर्थता नीवाराणाम् । ये व्रीहौ प्रोक्षणा- दयः संस्कारास्ते तल्लक्षितेषु विशेषेषु कर्तव्याः । तेषां च विशेषाणां केचि- न्नीवारेषु विद्यन्ते । तदर्थेन प्रोक्षणादयः संस्काराः क्रियन्ते । संस्कारै- रविशिष्टत्वायं व्रीहिशब्दो यथाऽन्येषु[3] व्रीहिलक्षितेषु भवति, एवमेते- ष्वपि नीवारेषु । तस्मादविकारेण प्रयोक्तव्य इति ॥ २५ ॥

उक्तं च तत्त्वमस्य ॥ २६ ॥

कथं पुनर्ज्ञायते, यो यो व्रीहिगतो विशेषः स नीवारेष्विति ।

---

२३ ॥ २४ ॥ २५ ॥]

व्रीह्याकृतिव्यक्तिसादृश्यानां च व्याख्यानं तत्रैवोक्तम् । ' व्रीहीणां मेध ' इत्यस्य

---

१ प्रतिनिधौ चेति, ऊहो—पा० । २ न चैतदस्ति प्रतिनिधावनूह इति—पा० । ३ यथा धान्येषु—पा० ।

षक्तं च तत्त्वमस्य । उक्तोऽस्य विशेषस्य तद्भावः षष्ठेऽध्याये, सामान्यं तच्चिकीर्षा, इति । तस्मादप्यविकारः ॥ २६ ॥

(पशुगणेऽध्रिगुप्रैषगताना संसर्गिद्रव्यवाचकचक्षुरादिपदाना- मनूहाधिकरणम् ॥ १० ॥)

[१०] संसर्गिषु चार्थस्यास्थितपरिमाणत्वात् ॥२७॥ सि०

सन्त्यध्रिगुप्रैषे संसर्गिणोऽर्थाः । तद्यथा, चक्षुः प्राण इत्येवमादयः । सूर्यं चक्षुर्गमयतात्, वातं प्राणमन्ववसृजतादिति । द्विपश्वादिषु पशुगणेषु किमूहितव्य उत नेति । उच्यते । नन्वन्यायनिगदत्वादेवायं नोहितव्यः । द्वयोश्चक्षुषोरेकवचनान्तो यतः श्रूयते । उच्यते । नायमध्रिगावधिष्ठानयोः सूर्यगमनमाह । न ह्यधिष्ठाने सूर्यं गच्छतः । तेजोरश्मिवचनस्त्वयम् । एकं च तत्तेजः । तस्मान्नायमन्यायनिगदः । द्विपश्वादिषु च वैकृतेषु प्रयोगेषु, मैत्रं श्वेतमालभेत, वारुणं कृष्णमपां चौषधीनां च संधावन्नकाम इत्येवमादिषु पशुभेदात्तेजसो भेदे गम्यमान ऊहः स्यादिति प्राप्नोति । नन्वेकस्मिन्नपि पशावधिष्ठानभेदेन भिन्ने एव तेजसी । नेत्युच्यते । सूर्यमस्य चक्षुर्गमयतादिति, यत्पशोस्तेजस्तद्विवक्षितम् । नाधिष्ठानभेदः । पश्वन्तरेषु पशुतेजोभेदादूह इति ।

एवं प्राप्ते, ब्रूमः । संसर्गिषु चार्थस्यास्थितपरिमाणत्वात् । संसर्गिष्वर्थेषु यद्यपि पशुभेदस्तथाऽपि रश्मीनां संसर्ग एवैकीभूतास्तेषां रश्मयः । यथैव पानीयस्य तैलस्य घृतस्य वा स्तोका नानादेशेषु भिन्नाः समानदेश एकीभूता भवन्ति तद्वद्रश्मयः । तस्मादेकवचनान्तस्तेषां वाचक इत्यनूहः स्यात् ॥ २७ ॥

लिङ्गदर्शनाच्च ॥ २८ ॥

लिङ्गं खल्वपि भवति, यथा संसर्गिणो नोह्यन्त इति । न माता वर्धते, न पिता, न नाभिः, प्राणो हि सः—इति प्राणस्य सिद्धमनूहं

मेषत्वादिषु कथं प्रयोग इति चेत् । यदि व्रीहीणां विकारस्तत ऊहः, यदि यवानां, ततोऽनभिधानमेवेति प्राप्ते, ब्रूमः । कण्वरथंतरवदुभयविकारोऽयं, उभयधर्माणां ग्राहक इति ॥ २९ ॥ [२७ ॥

---

१ (अ० ९ पा० २ अ० ११ सू० २०) । २ भेदो गम्यते । तेनोह–पा० । ३ न मरमा–पा० ।

हेतुत्वेनोपदिशति । तस्मात्संसर्गिणो नोह्यन्त इति ॥ २८ ॥

(पशुगणेऽध्रिगुप्रैषगतैकधाशब्दस्य यावत्त्वचमभ्यासाधिकरणम् ॥ ११ ॥)

[११] एकधेत्येकसंयोगादभ्यासेनाभिधानं स्यात् ॥ २९ ॥ सि०

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभत इति । तत्राध्रिगुप्रैषे समाम्नायते, एकधाऽस्य त्वचमाच्छ्यतादिति । तद्विकृतौ द्विपश्वादिषु संदिह्यते । किमेकधाशब्दोऽभ्यसितव्य उताविकारेण प्रयोक्तव्य इति । किं प्राप्तम् । एकधेत्ययमभ्यसितव्यः । कुतः । एकसंयोगात् । एकस्त्वचः प्रकार आच्छ्यता कर्तव्य इति । तत्र द्वयोर्बहीषु वा त्वक्षूत्कृत्यमानासु नैकः प्रकारो भवति । पर्यायेण हि पशुभ्य आच्छ्यन्ति । एकस्यां त्वच्याच्छ्यमानायामेकेन प्रकारेणाऽऽच्छ्येयुः । तस्मादसर्वविषयो भवति, अविकृतः शब्दः प्रयुज्यमानः । तस्मादभ्यसितव्य इति ॥ २९ ॥

अविकारो वा बहूनामेककर्मवत् ॥ ३० ॥

वाशब्दात्पक्षो विपरिवर्तते । नैतदस्ति, अभ्यसितव्य इति । अविकारेण प्रयोक्तव्य इति । कुतः । ऐकध्यवचन एष शब्दः । ऐकीकुर्वेषां त्वच इति ।

किं तत्रैष्यम्, एककालोपदेशो वा, एकदेशोपदेशो वा । बहूनामेककर्मवत् । यथा बहूनामेककाले कर्माणि भवन्ति, एकधा गाः पाययतीति । एवमिहापि, ऐकध्यं त्वचः कुर्विति । बहूनां त्वेकीकरणं शक्यते कर्तुं, नैकस्यास्त्वचः । तस्माद्बह्वीषु त्वक्ष्वेकीकरणमेकधाशब्दो वदतीत्यध्यवसेयम् ॥ ३० ॥

सकृत्त्वं त्वैकध्यं स्यादेकत्वात्त्वचोऽनभिप्रेतं तत्प्रकृतित्वात्परेष्वभ्यासेन विवृद्धावभिधानं स्यात् ॥ ३१ ॥

---

२८ ॥ २९ ॥ ३० ॥

---

१ आच्छ्यता तस्य—रा० । २ त्वच्याच्छ्यमानायां—पा० ।

तुशब्दः पक्षं व्यावर्तयति। नाविकारः। अभ्यसितव्यः शब्द इति। एककाले कर्मण्यभिधीयमाने सहत्वं त्वचामभिहितं भवति। तत्प्रकृतावेकस्यां त्वच्यसंभवादनभिप्रेतम्। तत्प्रकृतित्वादुत्तरासां ततीनां परेषु वर्धमानेषु पशुष्वभ्यासेनाभिधानं स्यात् ॥ ३१ ॥

(अध्रिगुप्रैषगतमेधपतिशब्दस्य देवतापरत्वाधिकरणम् ॥ १२ ॥)

[१२] मेधपतित्वं स्वामिदेवतस्य समवायात्सर्वत्र च प्रयुक्तत्वात्तस्य चान्यायनिगदत्वात्सर्वत्रैवाविकारः स्यात् ॥ ३२ ॥ पू०

अस्ति ज्योतिष्टोमेऽग्नीषोमीये पशावध्रिगुप्रैषे मेधपतिशब्द एकवन्निगदः। परेषां शाखिनां द्विवन्निगदः। तं प्रति संशयो भवति। द्विपश्वादिषु पशुगणेषु किमविकारेणैतरश्चेतरश्च प्रयोक्तव्य उत स्वामिपरः, ऊहः कर्तव्य उत देवतापर इति। किं प्राप्तम्। अविकारः। कुतः। मेधपतित्वं स्वामिदेवतस्य, स्वामी मेधपतिर्देवता च। स्वामिना पशुर्देवताभ्यां दत्तः संकल्पितः। मेधपतये स्वामिनेऽप्यसौ भवति। तस्य कार्यं करिष्यतीति। देवताभ्यामपि ताभ्यामुत्सृष्टयत इति। त्रयाणामपि हि तं मेधं प्रति, आधिपत्येन समवायोऽस्ति। सर्वत्र चाऽऽधिपत्ये पतिशब्दः प्रयुक्त आ हिमवत आ च कुमारीभ्यः। स एष त्रयाणामेकवचनान्तो वाचको द्विवचनान्तश्च। यथा प्रकृतावविवक्षितैकत्वोऽविवक्षितद्वित्वश्च संबन्धमात्रनिबन्धनः, एवं सर्वासु विकृतिषु। तस्मान्न विक्रियेत ॥ ३२ ॥

---

११ ॥]

'मेधम्' इत्यत्र चत्वारः पक्षाः। अविकारेणोभयोः प्रयोगः। व्यवस्थया वा—द्विवन्निगदो देवतायाम्, एकवन्निगदो यजमाने। उभौ वा स्वामिपरौ। द्विवन्निगदः पत्न्यपेक्षया। उभौ वा देवतापरौ। संघातापेक्षयैकवन्निगद इति। तत्र [1]तृतीये पक्षे दोषमाह—'उत्कर्षो देवताया स्यात्' इति। यस्य देवतावचनः, तस्योत्कर्षः प्राप्नोति, एकवन्निगदोऽप्यनेकदेवत्येषु पशुष्विति। तत्पाशान्यायमनालोच्य। यत्रास्ति प्रधानभूतः प्रातिपदिकार्थस्तत्र गुणभूतं वचनं नीयत इति। संघातस्य देवतात्वमदृष्टेव ॥ ३२ ॥

---

१ तृतीये पक्षे दोषमाहेति—तृतीयपक्षे स्थित्वा चतुर्थपक्षस्य दोषमाहेत्यर्थः। २ पाशन्यायं दूषयति—यत्रेति। ३ किं चैकवन्निगदस्योत्कर्षं निराकर्तुं कारणान्तरमाह—संघातस्येति।

अपि वा द्विसमवायोऽर्थान्यत्वे यथासंख्यं प्रयोगः स्यात् ॥ ३३ ॥

अपि वा, नैतदेवम् । तयोरिह समवायः, एकवन्निगदस्य, द्विवन्निगदस्य च । तयोरेकवन्निगदः स्वामिनि प्रयोक्ष्यते, येषां समाम्नातः । येषां द्विवन्निगदः समाम्नातस्तेषां स देवते वक्ष्यति । तस्माद्विकृतौ बह्वीषु देवतासु द्विवन्निगद ऊहेन प्रवर्तिष्यते । बहुयजमानेष्वेकवन्निगद ऊहिष्यते । एवं यथासंख्यं प्रयोगो भविष्यति ॥ ३३ ॥

स्वामिनो वैकशब्द्यादुत्कर्षो देवतायां स्यात्पत्न्यां द्वितीयशब्दः स्यात् ॥ ३४ ॥

वाशब्दः पक्षं व्यावर्तयति । स्वामिदेवतयोरुभयोर्वाचक इति नैतदेवम् । एक एव मेधपतिशब्दः, यस्माद्द्विवचनं, यस्मादेकवचनं, स एव न स्वामिदेवतयोर्वाचको भविष्यति । नन्वेकोऽपि मेधपतिरपरोऽपि प्रतीयते । कथमवाचक इत्युच्यते । यदा स्वामिनस्तदा, मेधपतये यो मेधस्तं मेध्या दुर उपनयतेति संबन्धः । यदा देवतावचनस्तदा, मेधपतये उपनयत मेध्या दुर इति संबन्धः । स एष सकृदुच्चरित उभाभ्यां पदाभ्यां न संबन्धुमुत्सहते । वचनव्यक्तिभेदाद्वाक्यभेदः प्रसज्यते । तस्मात्स्वामिनो वाचक इत्यध्यवसीयते । अथ किमर्थं न देवतावचनः कल्प्यते । तथा हि कल्प्यमान एकवन्निगद उत्कृष्येत, [1]एकदेवत्ये क्रतौ । तत्र प्रकरणं बाध्येत । यजमानवचने पुनः कल्प्यमाने न द्विवन्निगद उत्कृष्येत । तत्रैव यजमानयोर्दंपत्योर्वाचको भविष्यति । तस्मात्प्रकरणानुग्रहाय स्वामिवचनः कल्प्यते । स्वामिपरस्योहो भविष्यतीति ॥ ३४ ॥

देवता तु तदाशीष्ट्वात्संप्रात्तत्वात्स्वामिन्यनर्थिका स्यात् ॥ ३५ ॥ सि०

तुशब्दः पक्षं व्यावर्तयति । न स्वामिवचनः । देवतापरो भविष्यति ।

[३१ ॥ ३४ ॥]

सिद्धान्तस्तु देवतावादिपक्षः । स्वामिपक्षे वाक्यार्थ एव तावन्न घटते । आशासा-

---

1 एकदेवत्यं कर्तुं—पा० ।

कृतः। तदाशीष्ट्वात्। आशासाना मेधपतये मेधम्, इति देवताभ्यां हविराशास्यते। मेधपतिभ्यां मेधमाशासाना उपनयत ताभ्यामिति। यजमानं प्रत्याशासनानुकीर्तनमनर्थकम्, अकर्तव्यं च। स प्राप्त एव स्वामित्वं मेधः, किमर्थमाशास्यते। न[2] च तेन नित्यमेव स्वामिसंबद्धेन प्रयोजनम्। याग एव हि न संवर्तेत। तस्माद्देवतावचनो मेधपतिशब्द इति ॥ ३५ ॥

उत्सर्गाच्च भक्त्या तस्मिन् पतित्वं स्यात् ॥ ३६ ॥

उत्सृष्टं च यजमानेन नायं ममेति। केवलं परकीयो रक्ष्यते। कालेन देवतया संभन्त्स्यत इति। कः पुनरस्य देवतया संबन्धः। यत्तामुद्दिश्य परिग्रहोऽस्य त्यज्यते। स च यागः प्राक् कृतः। तस्माद्यागात्परार्धं द्रव्यं नाऽऽत्मीयं, परित्यज्याऽऽस्ते। आत्मप्रधानं यत्तदात्मीयं, न यं प्रत्यात्मा गुणभूतः। तादृशे तु भक्त्या पतित्वं भवति। तस्माद्देवतयोरेव तत्र मुख्यं मेधपतित्वं, भाक्तं स्वामिन इति ॥ ३६ ॥

उत्कृष्येतैकसंयुक्तो द्विदेवतेऽसंभवात् ॥ ३७ ॥

इति यदुक्तं, तत्परिहर्तव्यम् ॥ ३७ ॥

एकस्तु समवायात्तस्य तल्लक्षणत्वात् ॥ ३८ ॥

अत्रोच्यते। यौ हि तौ द्वावग्नीषोमौ तयोर्गणे मेधपतिशब्दः। स चात्र देवतासमवेतः। तस्मिन् कर्मण्येकस्मै गणाय मेधमुपनयत, इत्युच्यते। तस्मादेकवचनान्तो गणवाची मेधपतिशब्दो नोत्कृष्यत इति॥३८॥

नपदानर्थक्यात्। अपि च, यजमानाय मेधपतये यो मेधस्तं मेध्या[4] दुरः—यज्ञद्वारं[5], उपनयत। किमर्थमिति प्रयोजनाय्यित्वादसमर्थो[6] वाक्यार्थः। न च मेधमनूद्य किंचिद्विधीयत इति। इतरथा[7] मेध्या दुर उपनयत, मेधपतये मेधं कर्तुमित्येवमाशासाना इत्युपपन्नो वाक्यार्थः। न च परकीयो देवतायै कर्तुं शक्यत इत्यर्थाद्योऽयं यजमानस्येति[8] ॥ ३५ ॥ [३६ ॥ ३७ ॥ ३८ ॥

---

१ स्वामिनो—पा०। २ न चानेन—पा०। ३ मेध.—रघुः। ४ मेध्या.—ऋत्विजः। ५ यज्ञद्वारं—चात्वालोत्करयोर्मध्यदेशम्। ६ असमर्थ.-अपरिपूर्णः। ७ इतरथेति-मेधपतिशब्दस्य देवतापरत्वपक्षे, इत्यर्थः। ८ यजमानस्येति-देवतापरत्वपक्षेऽपि मेधस्य पशोर्यजमानसंबन्धित्वमर्थ्यमिति निराकाङ्क्षो वाक्यार्थः संभवत्येवेत्यर्थः।

संसर्गित्वाच्च तस्मात्तेन विकल्पः स्यात् ॥ ३९ ॥

अयं चान्यः परिहारः। संसर्गी अयमर्थो देवता नाम। द्वावर्थौ संसृष्टौ कदाचिदेका देवता भवति। यदि द्वयाय परिकल्पितं किंचिद्द्रव्यं, तत्र द्वयं देवता भवति। द्वावर्थौ संसृष्टावेकतां यातः। तस्मादेकवचनान्तोऽपि प्रकरणमभिनिविशते, पूर्वेण च सह विकल्प्यते इति ॥ ३९ ॥

एकत्वेऽपि गुणानपायात् ॥ ४० ॥

अन्वाचय वचनमिदम्। मा तावद् भूदिहैकत्वमर्थः। तथाऽपि प्रकरणमनुप्रविशेत्तैवैकवचनान्तः। प्रातिपदिकं हि तस्य विधमानार्थम्। एकवचनं चोपनयनसंबन्धार्थम्। एकत्वं वाऽविवक्षितम्। तस्मान्न प्रकरणादुत्कृष्येतेति। अथोच्यते। एकत्वविशिष्टस्य विभक्तिः संबन्धं ब्रवीतीति। तथाऽप्यस्मत्पक्ष उपपद्यतेतराम्। सर्वोऽपि ह्येकत्वं संबद्ध इति। अथ संबन्धं करोति, एकत्वं च ब्रवीतीति। न तेन विशिनष्टि, अविवक्षितत्वादविरुद्धं भविष्यतीति। अथोच्यते। अविवक्षितेऽपि वचन एकत्वसंबन्ध एकवचनं भवति, नान्यत्रेति। तथा मेषपतिगतमेकत्वमस्य भविष्यति। ततः सोऽनुवदिष्यते। तस्माददोष इति ॥४०॥

(बहुदेवत्ये पशावेकवचनान्तमेषपतिशब्दस्य द्विवचनान्तेन विकल्पाधिकरणम् ॥ १२ ॥)

[१३] नियमो बहुदेवते विकारः स्यात् ॥ ४१ ॥ पूं०

अस्ति बहुदेवत्यः पशुः। स एतान् पशूनादित्येभ्यः कामायाऽऽलभत इति। तथा वैश्वदेवं धूम्रमालभेतेति। अस्ति तु प्रकृतावग्नीषोमीये द्विवान्निगद एकवान्निगदश्च मेषपतिशब्दः। अत्र चोदकप्राप्तः संविद्यते। किं द्विवान्निगद ऊहितव्यः। एकवान्निगदो निवर्तेत, उतोभावपि

---

१९ ॥ ४० ॥]

सिद्धेऽपि पूर्वाधिकरणेऽस्य पूर्वपक्षो परिक्रियते, तदसङ्गतेः।

---

१ मा नाम भूत्—पा०। २ एकत्वपंमद्वेऽर्थे—पा०।

परस्परेण विकल्पमानौ निर्विशेषात्तामिति । किं तावत्प्राप्तम् । द्विवन्निगदः समवेताभिधायित्वादूहितव्यः । एकवन्निगदोऽशक्नुवन्नभिधातुमित्येतावता दर्शनेन निवर्तते । एष नियमः । आह । ननु प्रकृतौ द्वित्वस्याविवक्षितत्वादविकारेण प्रयोगः प्राप्नोतीति । उच्यते । अविशेषकमत्र द्वित्वं, न तु तत्र समवेतं न गम्यते । न च गम्यमानं निष्प्रयोजनम् । अन्यसंख्यापरिच्छेदेन पुनः संख्येयमुपस्थापयति । तदस्य दृष्टमेव प्रयोजनम् । तस्माद्बहुष्वप्यूहो भवतीति ॥ ४१ ॥

विकल्पो वा प्रकृतिवत् ॥ ४२ ॥ सि०

यदुक्तं द्विवचनान्त ऊहितव्य इति । तद्गृह्णीमः । यत्त्वेकवचनान्तो निवर्तेतेति । तन्न । एकवचनान्तोऽपि प्रकृतिवदिह द्विवचान्तेन विकल्पितुमर्हति । उक्तं हि गणाभिप्रायं तत्प्रकृतौ । संसर्गित्वाद्वा देवतानामिति । तद्वदिहापि गणाभिप्रायात्, संसर्गित्वाद्वा देवतानां विकल्पेन निवेक्ष्यत इति ॥ ४२ ॥

(पशुगणे, एकवचनान्तमेधपतिशब्दस्योहाधिकरणम् ॥ १४ ॥)

[१४] अर्थान्तरे विकारः स्याद्देवतापृथक्त्वादेकाभिसमवायात्स्यात् ॥४३॥ सि०

अस्त्येकादशिनी, मैत्रावरुणमाग्नेयेन वापयति, मिथुनं सारस्वत्या करोति, रेतः सौम्येन दधाति, प्रजनयति पौष्णेन, इत्येवमादि । अस्ति च प्रकृतावग्निषुमेधे, एकवन्निगदो द्विवन्निगदश्च मेधपतिशब्दः । तस्येह चोदकप्राप्तिश्चिन्त्यते । द्विवन्निगद ऊहितव्य एव । अथैकवन्निगदः किमविकारेण प्रवर्तेत, उत निवर्तेतेति । किं प्राप्तम् । विकल्पो वा प्रकृतिवदिति ।

एवं प्राप्ते, ब्रूमः । विकार एवैकादशिन्यां, न विकल्पः । तत एवैक-

---

ननु प्रकृतौ द्वित्वस्याविवक्षितत्वादिति—अयमपि चार्थः प्रायेण गतः । 'एकत्वेऽपि गुणानपायात्' इति । किंतु तत्रैकत्वस्याविवक्षोक्ता, स एव हेतुर्विवक्षायामपीति । तस्मात्पूर्वस्यैवैतत्प्रयोजनाधिकरणमुत्तरस्योपोद्घातिकमिति ॥४१॥ [४२॥

च इह चोदकप्राप्तिश्चिन्त्यते—पा० । २ (अ० ९ पा० १ अ० १३ सू० ४०)

घनान्तेन निवर्तितव्यम् । कुतः । देवतापृथक्त्वात् । पृथगत्र देवता । अन्यस्य पशोरन्या देवता, अन्यस्यान्येत्येवं, नात्र गणो देवतात्वेन । तदभावात्संसर्गित्वमपि नास्ति । प्रकृतौ चैतद्‌द्वयं कारणं, एकवचनान्तस्य निवेशे । न तदभावादिहास्ति मन्त्रचिः । यच्चोक्तम्, एकत्वेऽपि गुणानपायादिति । परपक्षमन्वारुह्य तद्वचनं, न स्वपक्षः । तस्माददोष इति ॥ ४३ ॥

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये नवमस्याध्यायस्य तृतीयः पादः ॥

अथ नवमाध्यायस्य चतुर्थः पादः ॥

(पशुगणेऽध्रिगुप्रैषे समस्तषड्‌विंशत्याप्रकाशनार्थं समस्य वचनाधिकरणम् ॥ १॥)

[१] षड्विंशतिरभ्यासेन पशुगणे तत्प्रकृतित्वाद्गुणस्य प्रविभक्तत्वादविकारे हि तासामकार्त्स्न्येनाभिसंबन्धो विकारान्न समासः स्यादसंयोगाच्च सर्वाभिः ॥१॥ पू०

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभत इति । तत्राध्रिगुप्रैषे इदमाम्नायते—षड्विंशतिरस्य वङ्क्रय इति । तथोदर्केण द्विपश्वादीन् पशुगणान् संप्रमम् । मैत्रं श्वेतमालभते, वारुणं कृष्णमपां चौषधीनां च संधावन्नकाम इत्येवमादिषु ।

---

४२ ॥]

इति श्रीमट्टकुमारिलविरचितायां मीमांसाभाष्यव्याख्यायां टुप्टीकायां नवमाध्यायस्य तृतीयः पादः ॥

अस्मिन्नधिकरणे पंच पक्षाः । पक्षस्य वैचनव्यक्तिर्निरूप्यते । षड्विंशतिरिति

---

१ पंच पक्षा इति—षड्विंशतिरस्येत्यनयोः पदयोरभ्यास इति प्रथमः । अविकार इति द्वितीयः । षड्विंशतिपदे वचनोह इति तृतीयः । अस्यपदस्योह इति चतुर्थः । समास इति पञ्चमः । इति पंच पक्षा ज्ञेया इत्यर्थः । २ वचनव्यक्तिः—तात्पर्यम् ।

अयमर्थः सांशयिकः । किं षड्विंशतिशब्दोऽभ्यसितव्यः, किमविकारेण प्रयोक्तव्यः, किं वचनमात्रमूहितव्यम्, अथवाऽस्यपदाभ्यासः, उत समस्य वचनमिति ।

किं प्राप्तम् । षड्विंशतिशब्दोऽभ्यसितव्यो द्विपश्वादिषु पशुगणेषु । किं कारणम् । प्रकृतावेकस्य पशोः षड्विंशतिर्वङ्क्रय उक्ताः । इह स गुणः प्रविभक्तः । पशौ पशौ षड्विंशतिर्वङ्क्रय इति । तत्र यद्यविकारेण प्रयुज्येत, न कृत्स्ना वङ्क्रीरभिवदेत् । अथ समस्य वचनं क्रियेत, तथा षड्विंशतिशब्दो निवर्तेत । तत्राऽऽर्थं बाधितं स्यात् । न च सर्वाभिर्वङ्क्रिभिः पशोः संबन्धोऽस्ति । पशुद्वयस्य ताभिः संबन्धः । न च पशुद्वयं पशुः ।

ननु पशोः कार्ये यः पशोः स्थाने, स वङ्क्रिभिः संबन्धयितव्यः । तथा हि प्रकृतौ वचनं कृतम् । समस्ताभिर्वङ्क्रिभिः पशुद्वयस्य संबन्धे कृत एकैकस्य षड्विंशत्या संबन्धः प्रत्यायितः स्यात् । अत्रोच्यते ।

त्रिपदं वाक्यम् । तत्राऽऽद्यः पक्षः संबन्धप्रधानः । षड्विंशतिरस्येत्यनयोर्यः संबन्धः, तस्य शब्दो नास्ति वाचकः । येनासावुच्येत । यत्प्रधानं, स प्रकाश्यः । तत्रार्थसंबन्धिनावश्यापेते । एवमस्त्वप्राकृतं भविष्यतीति । वङ्क्रिशब्दश्च षड्विंशत्यर्थो द्रष्टव्यः ।

द्वितीयः पक्षः । अकरणोऽयं मन्त्रः, प्रमाणान्तरेण प्रकाशितमर्थं प्रकाशयति । न प्रकाशितस्य प्रकाशान्तरेण प्रयोजनमस्ति । एवं च यत्प्रकृतौ कृतं तद्विकृतौ भवति, न किंचिद्बाधितम् ।

तृतीयः पक्षः । षड्विंशतिशब्द उभाभ्यां विशेष्यते । सोऽत्र प्रधानभूतः । (तदोषेनैव द्वितीयः प्रकाश्यते । न चाविकृतेन षड्विंशतिशब्देन पक्ष. प्रकाशयितुम् ।) तस्माद्वचनोहः । एवमस्त्वं विकृतं भविष्यति । ननु षड्विंशतिशब्दप्राधान्ये वङ्क्रीणां प्रथमा न प्राप्नोतीति—कोऽभिप्रायः । द्वेधा हि संख्याशब्दाः । प्राग्विंशतेः संख्या·

---

१ किं प्राप्तं—इति क्वचित्पाठः । २ पशोरभिर्संबन्ध.—पा० । ३ षड्विंशत्यर्थः—षड्विंशतिशब्दविशेषणत्वं । ४ प्रयोजनमस्तीति—इत्यधिकं क्वचित् । अतोऽस्त्यर्थोपादानविचार इति द्वितीयपक्ष इत्यर्थः , ५ विकृतिप्रधानेऽर्थं पाठ आवश्यक इति भाति—' तदोषेण वङ्क्रिशब्दोऽर्थं प्रकाश्यते । न चाविकृतेन षड्विंशतिशब्देनाशक्यं प्रकाशयितुम् । ' इति ।

नैवं[1] प्रकृतौ क्लृप्तम् । प्रकृतौ च साक्षात्षड्विंशत्या पशुसंबन्धः । इह पर-संख्यया संबन्धे क्रियमाणे परोक्षयाऽवयवसंख्यया संबन्ध आनुमानिकः स्यात् । न च नियोगतः षड्विंशत्या, एकैकस्य संबन्धः प्रत्यायितः स्यात् । पञ्चविंशतिरेकस्य सप्तविंशतिरेकस्येदृशमपि तत्र गम्यते । न

प्रधानाः । ऊर्ध्वं विंशतेरुभयप्रधानाः । तत्र यदा संख्याऽऽत्मानमुपसर्जनीकृत्य संख्येये वर्तते, तदा विना षष्ठ्या सामानाधिकरण्यं भवति । यथा विंशतिर्गाव इति । यदा संख्या प्रधानभूता, तदा षष्ठीमन्तरेण संख्येयशब्देन सामानाधिकरण्यं नास्ति । विंशतिर्गवामिति यथा । इह च संख्या प्रधानभूता, बह्वकयश्च प्रथमान्ताः । कथं विना षष्ठ्या सामानाधिकरण्यमित्यभिप्रायः परिचोदयतः[2] । अत्र लक्षणया सामानाधिकरण्यं, वाक्येनेत्यर्थः । दृश्यते च प्रयोगः, यथा, इन्द्राग्नी देवतेति । यदा देवतात्वेन गुणो विवक्षितो भवति, न च प्रधानभूतस्तदाऽपि विनैव षष्ठ्या सामानाधिकरण्यं दृश्यते । तथा, देवदत्तविष्णुमित्रयज्ञदत्ताः पर्यगादित्यत्र पर्यच्छब्दश्च प्रधानभूतः । इतरे देवदत्तादयः शब्दास्तद्विशेषणत्वेन, तथाऽपि विना षष्ठ्या सामानाधिकरण्यम् । तथा वेदेऽपि 'पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः' इत्यत्र संख्या प्रधानभूता, तथाऽपि विनैव षष्ठ्या सामानाधिकरण्यम् । ननु संख्या संवत्सरविशेषणार्था । तथा सति पञ्चशब्दोऽकिंचित्करो भवति । पञ्चाशच्छब्दस्तु विशेषयन्नप्यर्थवान् । तस्मात्संख्या प्रधानभूता ।

चतुर्थपक्षः । वङ्क्रिशब्दोऽस्यपदविशेषणम् । संख्याऽपि । अस्यशब्दः षष्ठ्या परार्थः कथं प्राधान्यं प्रतिपद्यते । आह—यथा 'इन्द्रस्य नु वीर्याणि प्रवोचम्' इतीन्द्रे षष्ठी साऽस्ति । न च परार्थः । लोके च यथा, चित्रगुरानीयतामित्युक्ते षष्ठीनिर्दिष्टोऽपि[3] प्रधानम् । एवमिहापि । यत्र द्वौ पशू विधेते तत्र द्वयोः प्रकाशनं कर्तव्यम् । तथाऽस्यशब्देन[4] न क्रियते । पशुश्चोदितः । स च प्रकाशयितव्यः ।

सिद्धान्तस्तु—उभाभ्यां वङ्क्रीयत्ता परिच्छिद्यते, एतावत्योऽस्य वङ्क्रय इति । अस्यशब्दस्य षष्ठ्यन्तत्वात्संख्याशब्दस्य संख्येयप्राधान्यात् । तद्यत्र द्वौ पशू, तत्र वङ्क्रीयत्तापरिच्छेदकः शब्द उच्चारयितव्यः । न च समासमन्तरेणेयत्ता शक्या

---

१ नैवम् । प्रकृतौ च—पा० । २ परिचोदयत इति—'आम्नातस्त्वविकारात्संख्यासु सर्वगामित्वात्' इति सूत्रे 'ननु षड्विंशती इत्यभिधाने बह्वीणां प्रथमा न प्राप्नोति' इति भाष्येण परिचोदयत इत्यर्थः । ३ षष्ठीनिर्दिष्टोऽपीति—चित्रा गावो यस्येति विग्रहे षष्ठ्या निर्दिष्टोऽपि पुरुषः समासे प्रधानं भवतीत्यर्थः । ४ अस्यशब्देनेति—अनभ्यस्तेनेति शेषः ।

चैवं प्रकृतावभिधानं कृतम् । तस्मादभ्यसितव्य इति ॥ १ ॥

अभ्यासेऽपि तथेति चेत् ॥ २ ॥

इति चेद्भवान् पश्यति, समासवचनेऽप्राकृतः शब्द उच्चरितो भवतीति । अभ्यासेऽपि, अनभ्यस्तं प्रकृतौ वचनम् । इह साभ्यासमप्राकृतं स्यात् ॥ २ ॥

न गुणादर्थकृतत्वाच्च ॥ ३ ॥

नैष दोषः । गुण एष शब्दस्याभ्यासो नाम । स मत्पक्षेऽप्राकृतः । त्वत्पक्षे पुनः शब्द एव । अङ्गगुणविरोधे च तादर्थ्यादित्युक्तम् । अर्थाच्च मयैतदश्रुतमुपादीयते, मविभक्तं गुणं वक्तुम् । यच्च श्रुतचिकीर्षयाऽश्रुतं क्रियते, इष्यत एव तदस्माभिः । तस्माददोषः ॥३॥

समासेऽपि तथेति चेत् ॥ ४ ॥

इति चेत्पश्यसि, अभ्यासवचने चोदकोऽनुगृहीतो भविष्यति । कार्त्स्न्येन वङ्क्रयो वक्ष्यन्त इति । समासेऽपि चोदकानुग्रहः । कार्त्स्न्येन वङ्क्रीणामभिधानात् । अपि च समासवचने यौगपद्यवचनात्प्रयोगवचनोऽनुगृहीतो भविष्यति । तस्मात्समसितव्या वङ्क्रय इति ॥ ४ ॥

नासंभवात् ॥ ५ ॥

नैतदेवम् । मम चोदकोऽनुगृहीतः, षड्विंशतिशब्दप्रयोगात् । तव

वदितुम् । पॅत्तावत्पशुप्राधान्यं, तद्यज्ञपतिशब्देन प्रत्युक्तम् । यज्ञपतेः परविशेषणतया न प्राधान्यम् । सङ्ख्याप्राधान्ये लक्षणया सामानाधिकरण्यम् । स एव दोषः । अदृष्टार्थता वा । न च सर्वं प्राकृतमदृष्टार्थम् । ॅअदृष्टार्थत्वे, अदृष्टार्थतैव दोषः, सत्या दृष्टार्थतायाम् । नॅ च संबन्धो वचनेन चोदितः, यः स प्रकाश्यते । अदृष्टार्थताऽवस्थितैव । प्राकृतशब्दबाधश्च । ' ता अनुष्ठचोच्यावयतात् ' इति । च सर्वनामशब्दो वङ्क्रिप्रत्यवमर्शकः । यद्यस्य पदाभ्यासः, तानिति प्राप्नोति । यदि संॅख्यायाः, तामिति ॥ १ ॥ [२ ॥ ३ ॥ ४ ॥

---

१ (अ० १२ पा० २ अ० ९ सू० २७) । २ अधुना पूर्वपक्षचतुष्टये प्रातिलोम्येन दूषणमनुसंदधाति—यत्तावदित्यादिना । ३ चतुर्थपक्षे दूषणमभिधाय तृतीयपक्षे दूषणमाह—संख्येत्यादिना । ४ द्वितीयपक्षं दूषयति—अदृष्टार्थत्वे, इत्यादिना । प्रसक्तस्येति शेषः । ५ आद्यपक्षे दूषणमाह—न चेत्यादिना । ६ संख्याया इति—संख्यायाः प्राधान्यमिति तृतीयपक्षे संख्याया एकत्वात्, ' तामनुष्ठय ' इति स्यात् । प्रकृते च ' ता अनुष्ठय ' इति निर्देशाद्वङ्क्रीणामेव प्राधान्यं गम्यत इत्यर्थः ।

प्रयोगवचनः, समस्य वचनात् । न च संभवति चोदके प्रयोगवचनमत्यादर्तव्यम् । बलीयान् हि चोदकः । स हि धर्माणामुत्पादकः प्रापकश्च । प्रयोगवचनः प्राप्तानामुपसंग्राहकः । स उत्तरकालोऽर्थविप्रकर्षाद्दुर्बलः । तस्मादभ्यसितव्यं वचनमिति ॥ ५ ॥

स्वाभिश्च वचनं प्रकृतौ तथेह स्यात् ॥ ६ ॥

स्वाभिश्च वङ्क्रिभिः पशुरुपलक्षितः प्रकृतौ । इहापि तथैवोपलक्षयितव्यः । सोऽभ्यासवचने शक्यते । समासवचने हि परसंख्या समुदायस्योक्ता भवति । तया न स्वाभिः पशव उपलक्षिता भवन्ति । तस्मादसदेतत् ॥ ६ ॥

वङ्क्रीणां तु प्रधानत्वात्समासेनाभिधानं स्यात्प्राधान्यमध्रिगोस्तदर्थत्वात् ॥ ७ ॥ सि०

तुशब्दः पक्षं व्यावर्तयति । नैतदेवम् । अभ्यसितव्यः षड्विंशतिशब्द इति । किं तर्हि । समस्य वदितव्या वङ्क्रय इति । कुतः । तत्र वङ्क्रीणां प्रधानत्वात् । प्राधान्यं हि तासाम् । प्रकृतौ षड्विंशतिरेता वङ्क्रय इत्यभिसंबन्धस्तत्रेप्सितः । षड्विंशतिरस्येति वङ्क्रयो गणिताः । न ताभिर्गणिताभिः पशुरुपलक्षितः । किं कारणम् । वङ्क्रीभिर्गणिताभिर्दृष्टं प्रयोजनं, कृत्स्नं पार्श्वमुद्धरिष्यत इति । न तु वङ्क्रीभिर्गणिताभिः पशावुपलक्ष्यमाणे किंचिद्दृष्टमभ्यधिकं भवति । तस्मान्न पशुसंबन्धो विवक्षितः । एवं प्राधान्यं वङ्क्रीणाम् । अध्रिगोर्वङ्क्र्यर्थत्वान्न तस्य संख्यापशुसंबन्धः प्रयोजनम् । तस्मात्समस्य वचनं कर्तव्यम् । एतावत्त्वं प्रकृतावुक्तमिति विकृतावेतावच्चैव वक्तव्येति । तस्मात्समस्य वचनं कर्तव्यमिति ॥ ७ ॥

तासां च कृत्स्नवचनात् ॥ ८ ॥

तासां च वङ्क्रीणामिदं कार्त्स्न्यमुच्यते, न पशूनाम् । ता अनुष्ठ्योच्च्यावयतात्—इति, षड्विंशतिवङ्क्रयस्ताः प्रयत्नेनोद्धर्तव्या इति । इतरथा षड्विंशतिरस्य वङ्क्रयस्त प्रयत्नेन किंचित्कुर्यादित्येवमभिसंबन्धो भवेत् । यद्धि लक्ष्यते, तद्धि कार्यसंबन्धार्थं प्रतिनिर्दिश्यते । यदिह

॥ ५ ॥ ६ ॥ ७ ॥

षड्विंशतिरस्य वङ्क्रयस्ता इति वङ्क्रीणां प्रतिनिर्देशः कार्यः। तस्माच्चासां प्राधान्यमिति ॥ ८ ॥

अपि त्वसंनिपातित्वात्पत्नीवदाम्नातेनाभिधानं स्यात् ॥ ९ ॥

अपि त्विति पक्षव्यावृत्तिः। नैतदेवं, समसितव्या वङ्क्रय इति। किं तर्हि। अविकृतः षड्विंशतिशब्दः प्रयोक्तव्यः। कुतः। असंनिपातित्वात्। असंनिपाती ह्यध्रिगुः। न करणत्वेन निर्दिश्यते। यदि हि करणत्वेन निर्दिश्येत, ततोऽनेन प्रकाशितं कर्तव्यम्, न ध्यानादिनेति मन्त्रान्तेन कर्मसंनिपातः स्यात्। तत्राशक्यमविकृतेन यौगपद्यं कर्तुमिति विक्रियेत, अभ्यस्येत वा। अथ पुनरेतदकरणं क्रियमाणानुवादि नयनकालमध्रिगुवचनमनेकस्मिन् पशौ चोदकेनात्र निपतितम्। तत्रैषां स्वसंख्यावतीर्वङ्क्रीरभिवदितुमशक्तं विप्रतिपन्नरूपं तत्। तस्मान्न वङ्क्रीणामियत्ता वदितव्या। किं तर्हि। षड्विंशतिसंख्याया संबन्धः कर्तव्यः। यथा, द्विपत्नीके बहुपत्नीके वा प्रयोगे पत्नीशब्द एकवचनान्तो न संख्यया पत्नीः परिच्छिनत्ति। किं तर्हि। एकत्वेन संबध्नाति। एवमिहापि। तस्मादविकारेण प्रयोगः। एवमविकारे, आर्षमनुग्रहीष्यत इति ॥ ९ ॥

विकारस्तु प्रदेशत्वाद्यजमानवत् ॥ १० ॥

तुशब्दात्पक्षो विपरिवर्तते। नाविकारः। ऊहः कर्तव्य इति। यथा परसंख्येष्वाहृत्य तत्संख्योच्चार्यते, तत्र वचनप्रामाण्याद्विप्रतिपन्नसंख्या-

॥ ८ ॥]

अकरणेनाध्रिगुणा प्रकरणे समाम्नानात्प्रकरणिन उपकर्तव्यम्। तत्कथं, यथा शक्नुयात्। किं नु शमोरर्थमिति, क्रियाप्रधानेन यथा समाम्नातैः पदैरभिधानम्। तत्र वङ्क्रिषड्विंशत्यभिधानादृष्टं यथा प्रकृतौ, तथा विकृतावपीति ॥ ९ ॥

उच्यते। यदि वङ्क्रिषड्विंशत्योः समवेतार्थता नाभविष्यत्ततोऽदृष्टार्थतामवकल्प-

१ ध्यानेन–पा०। २ तस्मान्न वङ्क्रीणां–पा०। ३ विप्रतिपत्तिसंख्याकरर–पा०। ४ अयमिति–प्रोक्षयामिति शेषः। ५ अभिधानमिति–अभिधानक्रियामात्रं शक्यं कर्तुं न प्रकाशनं, अकरणमन्त्रत्वादित्याशयः।

कस्य शब्दस्य प्रयुज्यमानस्याऽदृष्टोऽर्थोऽभ्युपगम्यते । यथा, प्रकृतौ पत्नीशब्दस्य । न त्विहाऽऽहत्य षड्विंशतिशब्दोऽनेकस्मिन् पशौ प्रयुज्यते । किंतु चोदकेनेह प्राकृतवचनं प्राप्यते । तत्र यन्न्याय्यं तच्चोदकः प्रापयिष्यति, नाऽऽहत्य षड्विंशतिशब्दम् । किं तन्न्याय्यम् । यत्प्रकृतौ विवक्षितम् । प्रकृतौ च वङ्क्रीणामियत्ता कथिता । तस्मादिह सा प्रदिश्यते ।

नन्वेतदुक्तं नाध्रिगोः करणत्वेन निर्देश इति । यदा च न करणं, तदा कथमयं वङ्क्रीयत्तावचनः । श्रुत्या षड्विंशतिसंख्यावचन एव भवितुमर्हतीति । उच्यते । यद्यपि नास्य तृतीयया निर्देशः, तथाऽपि प्रयोगवचनेनोपगृहीतः साधको भवन् कमन्यं दृष्टमुपकारं करिष्यत्यन्यतोऽवदानप्रकाशनात् । अत्रोच्यते । नास्यावदानैरभिसंबन्धः प्रकृतयागप्रयोगवचनो यागेन संबध्नाति । तत्र च हविःसंकीर्तनं दृष्टं प्रयोजनम् । षड्विंशतिशब्दोऽपि तत्स्तुतये भविष्यतीति ।

नैतदेवमिति ब्रूमः । प्रकरणाद्यागमात्रेणाभिसंबन्धे सति ऋत्विजां प्रैष इति गम्यते । लिङ्गात्तु शमितृप्रैषमेनमध्यवस्यामः । तथारूपाणि ह्यत्र वाक्यानि, दैव्याः शमितार उत मनुष्या आरभध्वमिति । तथा, षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठ्योच्च्यावयतादिति । तस्माद्वङ्क्रीयत्तावचन एषः, न षड्विंशतिसंख्यावचनः । यथा, यजमानशब्द एकयजमानवाचिनि स्वसंख्यावाच्येकवचनमिति कृत्वा द्वियजमानके च प्रयोगे स्वसंख्यावचनप्रदेशादूहः क्रियते, एवमिहापीति ॥ १० ॥

अपूर्वत्वात्तथा पत्न्याम् ॥ ११ ॥

यदुक्तं पत्नीवदिति । युक्तं पत्न्यां, न ह्येकपत्नीके यजमाने पत्नीशब्दः समाम्नातः । द्विपत्नीके बहुपत्नीके च प्रदेशाद्भवति । यथा, एकस्याः पत्न्याः स्वसंख्यावचनः, एवं द्वयोर्बहूनां च स्वसंख्यावचन इति । तस्माद्वैषम्यं पत्न्याम् ॥ ११ ॥

येन । अस्ति तु समवेतोऽवदानसंबद्धो वङ्क्र्यर्थः । स च स्वभावात्षड्विंशत्यैव परिच्छिन्नः । तस्यावदानु. संस्कारो दृष्टार्थमेव प्रस्मरणम् । एवं तासामपि गुणानां प्रकाशनं प्रकृतौ, तद्वदपीति ॥ १० ॥ [११]

---

१ प्रतिविधान—पा० । २ उद्धृत्वा—पा० ।

आम्नातस्त्वविकारात्संख्यासु सर्वगामित्वात् ॥ १२ ॥

तुशब्दोऽन्यं पक्षमवतारयति, न समस्य वचनं, संख्योहः स्यादिति। यथासमाम्नातषड्विंशतिप्रातिपदिकं प्रयोक्तव्यम् । एवमविकारे, आम्नानुग्रहो भविष्यति । प्रविभक्तं गुणमभिवदितुं वचनमुद्दिश्यते । षड्विंशती एतयोर्वङ्क्रय इति । ननु षड्विंशती इत्यभिधाने वङ्क्रीणां प्रथमा न प्राप्नोति ।

उच्यते । यदा षड्विंशतिगुणः प्राधान्येन विवक्षितो भवति, तद्विशेषणार्थं संख्येयमुच्चार्यते, तदा प्रथमान्तेनापि लक्षणया संख्या विशेष्यते । यथा, इन्द्राग्नी देवतेति । यदा द्वित्वैश्वर्यकर्मणोऽर्थो गुणो विवक्षितो भवति, तदेकवचनान्तं द्विवचनान्त एवेन्द्राग्नी इति शब्दो लक्षणया विशिनष्टि । तथा च प्रयोगो दृश्यते, पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः, पञ्चपञ्चाशतः पञ्चदशाः, पञ्चपञ्चाशतः सप्तदशाः, पञ्चपञ्चाशत एकविंशा इति संख्यावचनः शब्दस्त्रिवृत इत्यनेन लक्षणया विशेष्यते। यथा देवदत्तयज्ञदत्तविष्णुमित्राः पर्षदिति । एवं षड्विंशती वङ्क्रय इति । एवमविकारश्च भविष्यति । सर्ववङ्क्रिगामी च षड्विंशतिशब्दो भविष्यतीति ॥ १२ ॥

संख्या त्वेवं प्रधानं स्याद्वङ्क्रयः पुनः प्रधानम् ॥ १३ ॥

सत्यमुपपद्यत एव वचनं, षड्विंशती वङ्क्रय इति । संख्याप्रधान-

ननु षड्विंशती इत्यभिधाने वङ्क्रीणां प्रथमा न प्राप्नोति। कोऽर्थः ।गुणवचनो हि कश्चित्संसृष्टगुणवचनो भवति द्रव्येण । यथा शुक्लः पट इति । कश्चिदसंसृष्टगुणवचनः । यथा शौक्ल्यं पटस्येति । तत्र प्राणिजातेः संसृष्टगुणवचनाः । यथा गावो दश गाव इति । विंशत्यादयस्त्वसंसृष्टगुणवचनाः । यदीह द्रव्यं प्रधानं, 'वङ्क्रयः' इति प्रथमाबहुवचननिर्देशात्षड्विंशतिशब्देनापि प्रथमाबहुवचनान्तेन भवितव्यम् । 'गुणवचनानि चाश्रयतो लिङ्गवचनानि भवन्ति' इति । दुष्परिहरश्चायम् । अतोऽन्यः पक्ष आश्रीयते । निष्कृष्टो गुणः प्रधानभूतः षड्विंशतिरित्यभिधीयते । नन्वेवं वङ्क्रय इति प्रथमा न प्राप्नोति । षष्ठ्या भवितव्यम् । उच्यते । तत्परिहारार्थमिदं भाष्यम् । तस्यापीदं व्याख्यानेन ॥ १२ ॥

'संख्या त्वेवं प्रधानं स्याद्वङ्क्रयः पुनः प्रधानम्' इत्युक्तम् । नन्वेवं सति

१ षड्विंशती क—पा० । २ इतीति—[illegible] ये प्रतिपादिताः, ते [illegible]वचनः [illegible] । ३ [illegible]—[illegible] [illegible] ।

स्त्वेवं निर्देशः कृतो भवति। षड्विंशतिगुणः प्राधान्येन विवक्षितः। तद्विशेषणत्वेन वङ्क्रीणामुच्चारणम्। वङ्क्रयः पुनः प्रकृतौ प्रधानं, न संख्या। तदुक्तं, प्राधान्यमव्रिगोस्तदर्थत्वात्। तासां च कृत्स्नवचनादिति। तदेवं न प्रकृतिवदभिधानं कृतं भवेत्। तत्र चोदक एव बाध्येत। तस्मात्समसितव्यमेव वचनमिति ॥ १३ ॥

अनाम्नातवचनमवचनेन हि वङ्क्रीणां स्यान्निर्देशः ॥ १४ ॥

न खल्वप्यस्मिन् पक्षे सर्वमेवाऽऽम्नातमुच्यते, अनाम्नातवचनमपि प्रतीयत इति, षड्विंशती षड्विंशतय इति। अथ द्विवचनं बहुवचनं वाऽनार्षतया न क्रियते, नैवं तासां वङ्क्रीणां कारत्स्न्येनाभिधानं स्यात् ॥ १४ ॥

अभ्यासो वाऽविकारात्स्यात् ॥ १५ ॥

वाशब्दः पक्षं व्यावर्तयति। न समासवचनम्। अभ्यासः स्यात्। एवमविकारो भविष्यति। तत्राऽऽर्षचोदकावनुग्रहीष्येते। सर्वं समाम्नातं कृतं भविष्यति। केवलमस्यशब्दोऽभ्यसिष्यते। कृत्स्नाश्च वङ्क्रयोऽभिहिता भविष्यन्ति ॥ १५ ॥

षड्विंशतौ बहुवचनं प्राप्नोति। उच्यते। उभयत्र प्रत्ययेन प्रातिपदिकेनोपात्तं बहुत्वं, विशेषश्च। तत्र वङ्क्रय इति यत्तद्गतं बहुत्वं, यच्च विंशतिप्रातिपदिकगतं विशेषरूपं, तयोरेकं वङ्क्रिद्रव्यमधिकरणम्। अतस्तयोर्विशेषणविशेष्यभावो युक्तः। यत्तु षड्विंशतावेकवचनं तद्युक्तं विशेषणस्यैकत्वात्। स्वभावाद्विंशत्यादीनां स्वाभिधेयसंख्याग्राहित्वमेव, न तु द्रव्यसंख्याग्राहित्वम्। तद्यथा विंशतिर्गावो गच्छन्तीति द्रव्यमेव प्रधानं, बहुवचननिर्देशात्। संख्याप्राधान्ये हि तस्यैकत्वाद्गच्छतीति प्राप्नोति। स्वपक्षेऽपि तुल्यम्। संख्याप्राधान्ये हि वङ्क्रिषु बहुवचनं न स्यात्। संख्याविशेषणत्वात्। अथ बहुवचनान्विताभिर्वङ्क्रिभिः पश्चात्षड्विंशतिसंख्या लक्ष्यते। ममाप्येकवचनान्विता षड्विंशतिर्वङ्क्रिविशेषणम्। अथवा, षड्विंशतिप्रातिपदिकेनोक्तत्वाद्बहुवचनं निवृत्तम्। निर्देशार्थमेकवचनमेव युक्तमिति। ननु द्वौ बहव इत्यादौ प्रातिपदिकेनोक्तत्वाद्द्विवचनबहुवचने न प्राप्नुतः। उच्यते। अन्यत्र तद्वक्ष्यामः, नेहातिप्रसङ्ग इष्यते ॥ १३ ॥ [१४ ॥ १५ ॥

---

१ (अ० ९ पा० ४ अ० १ सू० ७)। २ (अ० ९ पा० ४ अ० १ सू० ८)। ३ अनार्षतया—पा०। ४ न तासां–पा०। ५ गच्छतीति प्राप्नोतीति—गच्छतीत्येकवचनं प्राप्नोति। तस्माद्द्रव्य एव प्रधानं तथाऽपि विंशतावेकवचनमेव। तद्वत्प्रकृतेऽपीति ग्रन्थपूरणम्। ६ नेहातिप्रसङ्ग इष्यत इति–नेह प्रपञ्च्यत इत्याशयः।

पशुस्त्वेवं प्रधानं स्यादभ्यासस्य तन्निमित्तत्वात्तस्मात्समासशब्दः स्यात् ॥ १६ ॥

तुशब्देनावधार्यते । नैतदेवम् । समस्य वचनमेवेति । कथम् । एवं सति पशुः प्राधान्येनात्र निर्दिष्टः स्यात् । पशोः पशोः षड्विंशतिः षड्विंशतिर्वङ्क्रयो न कश्चिदषड्विंशतिवङ्क्रिः पशुरिति पशोः संख्यासंबन्धेऽभिधित्सित एवं वचनं भवति । न च पशुसंख्यासंबन्धः प्रकृतौ विवक्षित इत्युक्तम् । इयत्ता वङ्क्रीणां प्रकृतौ वक्तव्या । इहापि सैव चोदकेन प्रदिश्यते । तेन नाभ्यासः । स हि पशुनिमित्तकः । तस्मात्समस्य वचनं वङ्क्रीणां कर्तव्यमिति ॥ १६ ॥

(अश्वमेधेऽश्वविषये वङ्क्रीयत्ताप्रकाशनार्थं वैशेषिकमन्त्राकरणपक्षे त्रयाणां पशूनामर्थे, षडशीतिरेषां वङ्क्रय इति समासवचनाधिकरणम् ॥ २ ॥)

[२] अश्वस्य चतुस्त्रिंशत्तस्य वचनाद्वैशेषिकम् ॥१७॥ पू०

अस्त्यश्वमेधः । तत्र सवनीयः पशुः, अश्वस्तूपरगोमृगौ च । अस्ति तु प्रकृतावग्नीषोमीये, षड्विंशतिरस्य वङ्क्रय इति वचनम् । तदिह चोदकेन प्राप्तम् । तत्राश्वस्य चतुस्त्रिंशद्वङ्क्रयः । तूपरगोमृगयोः षड्विंशतिः । अस्ति तु ऋक् समाम्नाता—चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति । अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या विशस्त, इति । तदिदं संदिह्यते । किमश्वस्य वैशेषिकमिदं वचनं कर्तव्यं, तूपरगोमृगयोः समासेन, उत सर्वेषामेव समासवचनम्।

॥ १९ ॥]

अयं तावत्सिद्धान्त एव । 'चतुस्त्रिंशद्वाजिनः' इत्यनयाऽवश्यं वङ्क्रीयत्ता प्रकाशयितव्या । आम्नर्थवमयात्प्रकरणानुमितेन वाक्येन प्रापितत्वात् । ननु प्रतिषिद्धेयं 'न चतुस्त्रिंशत्' इति । उच्यते । विधिपूर्विकेयं प्राप्तिरिति विधिप्रतिषेधयोर्विकल्पः षोडशिवदिति पक्षे तावदनया प्रकाशनम् । यत्तर्हि प्राप्नोति तत्प्रतिषेधेन बाध्यते । यथा, नान्येऽहनि मधुपर्काशने.।

१ ऋ. सं. (अष्ट० २ अ० ३ व० १०) । २ आनर्थक्यमभयादिति-मन्त्रस्य प्रकरणाम्नानर्थक्यभयादित्यर्थः ।

किं प्राप्तम् । अश्वस्य चतुस्त्रिंशद्वङ्क्रयस्तस्य वैशेषिकमिदं वचनं कर्तव्यम् । कस्मात् । वचनात् । एवं, चतुस्त्रिंशद्वाजिनो देवबन्धोरित्येतद्वचनमर्थवदिति । इतरथा, एतद्वचनमनर्थकं स्यात् । तस्माद्वैशेषिकमश्वस्येति ॥ १७ ॥

तत्प्रतिषिध्य प्रकृतिर्नियुज्यते सा चतुस्त्रिंशद्वाच्यत्वात् ॥ १८ ॥ सि०

तत्प्रतिषिध्य प्रकृतिर्नियुज्यते, प्रकृतौ यदुक्तं वचनं तत्कर्तव्यमिति । कथम् । न चतुस्त्रिंशदिति ब्रूयात्, षड्विंशतिरित्येव ब्रूयादिति । सा नियुज्यमाना चतुस्त्रिंशद्वाच्यत्वाद्वारयति शब्दम् । तस्मात्प्रतिषिद्धत्वाद्वैशेषिकं वचनं न कर्तव्यं, सामासिकं वचनं कर्तव्यम् ।

ननु, षड्विंशतिरित्येव ब्रूयादिति वचनात्प्रतिषिद्धेऽपि वैशेषिकमेव वचनं कर्तव्यमिति । नेत्युच्यते । न ह्ययं षड्विंशतिशब्दो विधीयते । किं तर्हि । यथाप्राप्तं वचनमनूद्यते । कथमवगम्यते । एवकारकरणात् ।

नन्विहाऽऽनुमानिको विधिः प्रत्यक्षेण प्रतिषेधेन बाध्यते । उच्यते । न विधिर्यदि बाध्येत । अपि चान्यदेतदानुमानिकम्, इदं तु प्रत्यक्षमिति । विधिश्चेत्र बाधितुं शक्यते । एवमुभयपाठो स्थितायामुत्तरा चिन्ता । न चैतत्पूर्वपक्षसूत्रं, समाम्नायस्य प्रबलत्वात् । तथा पक्षव्यावर्तकस्य तुशब्दस्य चोत्तरत्राभावात् ॥ १७ ॥

तत्प्रतिषिध्य ॥ इदं श्रूयते, न चतुस्त्रिंशदिति ब्रूयात्, षड्विंशतिरित्येव ब्रूयात्' इति । तत्र संशयः । किं समस्ता ऋक् प्रतिषिध्यते, अश्वस्यापि समस्य वचनं, उत चतुस्त्रिंशत्पदप्रतिषेधः । अश्वस्य वैशेषिकवचनं षड्विंशतिरिति । तत्र सिद्धान्तेनोपक्रमः 'तत्प्रतिषिध्य' इति । ननु षड्विंशतिरिति ब्रुवन् निगदे षड्विंशतिरिति शब्दस्य विधिं बोधयति पूर्वपक्षवादी । तस्य कर्मानुष्ठाने, तूपरगोमृगयोः सामासिकव-

---

१ यथा प्रातिवचनं—पा० । २ बाध्यत इति—इदं तावदुपलक्षणम् । यदि विधिर्न स्यात्, तदा मानवगावासप्रतिषेधोऽपि दुःस्थितः स्यादिति । ३ एवं शब्दार्थे प्रकारान्तरमनारभ्य स्वयं प्रथमसूत्रमपि प्रकरणान्तरपरतया व्याख्याय 'तत्प्रतिषिध्य' इत्यादिसूत्रान्तरैरधिकरणान्तरं व्याचिख्यासुरधिकरणविषयं संशयप्रदर्शनादि—इदं श्रूयत इत्यादिना । ४ समस्य वचनमिति—पाठे समस्य वचने पदे वैशेषिकमित्यर्थः । ५ वैशेषिकेति—अधिगिरे 'षड्विंशतिरस्याश्विनो देवबन्धो' इत्येवं विरुद्धो वैशेषिकमन्त्रः । तूपरगोमृगयोस्तु 'द्विपञ्चाशद्वयोः' इति समासवचनमित्यर्थः ।

यथाप्राप्त एवकारकरणम् । न च षड्विंशतिशब्दः प्राप्तः । षड्विंशतिसंख्याभिधानं भक्तो कृतम् । इहापि तदेव प्राप्तम् । षड्विंशतिशब्देन तत्पक्तो लक्षितमिहापि षड्विंशतिशब्दस्तल्लक्षणार्थमेवोच्चारितः । षड्विंशतिसंख्यापरेऽनेकोऽर्थो विधीयते । चतुस्त्रिंशत्प्रतिषेधः । षड्विंशतिसंख्यावचनं च । तत्र वाक्यं भिद्येत । भिद्यमान एकवाक्यत्वं बाध्येत । किं तत् । साकाङ्क्षत्वम् । न चतुस्त्रिंशदिति ब्रूयात्, षड्विंशतिरित्येव ब्रूयादिति । एतद्धि वचनं चतुस्त्रिंशद्वचनाभावे प्राप्तमेव सत्कर्तव्यतया प्रतिषेधं प्रशंसितुमुच्चार्यते । तदेवमेकवाक्यतामापद्यते । सैकवाक्यता संख्यापरे बाधिता स्यात् । अनेकार्थविधानं चान्याय्यम्, एकार्थविधाने संभवति । भूयसी हि तत्रादृष्टकल्पना स्यात् । तस्माद्यथाप्राप्तवचनं कर्तव्यमिति ॥ १८ ॥

ऋग्वा स्यादाम्नातत्वादविकल्पश्च न्याय्यः ॥ १९ ॥ पू०

आम्नाता हि ऋक्, अप्रतिषिद्धा च । तस्मादश्वस्य वैशेषिकं वचनं स्यात् । तथा चाविकल्पो भविष्यति । अविकल्पश्च न्याय्यः । विकल्पे

वचनमन्यत्, 'द्विपञ्चाशदनयोर्वङ्क्रयः' इति । अश्वस्य तु, वैशेषिकं वचनमन्यत् 'षड्विंशतिरस्य वङ्क्रयः' इति । तदितरः प्रत्याह । नह्ययं विधीयत इति ।

उभयथाप्यन्यतरानुवादः । यदि तावत्प्रतिषेधो विधीयते, ऋचि प्राकरणिकायाः प्रतिषिद्धाया यदन्यच्चोदकप्राप्तमियत्तावचनं तत्स्वयमेव भवति । षड्विंशतिवचनमनुवादः सहैवकारेण । षड्विंशतिरितीयत्ता विधीयते । न सा ऋक्, चोदकप्राप्तत्वात् । एवकारोपबद्धत्वाच्च । एवकारस्त्वप्राप्तः स विधीयते । तस्य परिसंख्यारूपोऽर्थः । यदन्यत्प्राकरणिकं प्रतियोगि तत्र भवति । एवमन्यतरस्यानुवादत्वेऽवश्यंभाविनि, ऋचः प्रतिषेधविधानं, मुख्यत्वात् । इतरस्य चानुवादः, जघन्यत्वात्प्रतिषेधस्तुत्यर्थ इति ॥ १८ ॥

पाठक्रमात्पक्षान्तरम् । आम्नाता हि ऋगप्रतिषिद्धा चेति । ननु प्रतिषिद्धा वाक्येन । उच्यते । पदविकारं वक्ष्यामः । तस्यां तु वचनादिरवत् । ननु श्रुत्या

१ षड्विंशतिशब्देन च स्वसंख्याभिधानं—पा० । २ प्राप्तं षड्विंशति शब्देन । ननु प्रदे— पा० । ३ प्रतियोगीति—'चतुस्त्रिंशद्वाजिनः' इति मन्त्र इत्यर्थः । तथा च प्राकरणिकमन्त्रानिवृत्तौ ह्येवकारार्थविधानादेव निषेधस्य प्रसक्त्यात् 'न चतुस्त्रिंशदिति' निषेधोऽनुवादो भवतीत्यर्थः । ४ वाक्येन इति—मनन्तरसूत्रेणेति शेषः ।

विरुद्धं वचनमन्योन्येन भवति । भवतीति चेत्, न प्रतिषेधः । नेति चेत्, न विधिः । तस्माद्वैशेषिकं वचनं कर्तव्यम् ॥ १९ ॥

तस्यां तु वचनादैरवत्पदविकारः स्यात् ॥ २० ॥

अथ यदुक्तम्, ऋक् तत्र प्रतिषिध्यत इति । नैतदेवम् । तस्यां वचनात्पदविकारः स्यात् । वचनं हि भवति, न चतुस्त्रिंशदिति ब्रूयात्, षड्विंशतिरित्येव ब्रूयादिति । तत्र चतुस्त्रिंशत्पदं श्रुत्या प्रतिषिध्यते। ऋग् लक्षणया प्रतिषिध्यते । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या । तस्माद्वैशेषिकं वचनं कर्तव्यमिति ॥ २० ॥

सर्वप्रतिषेधो वाऽसंयोगात्पदेन स्यात् ॥ २१ ॥ सि०

सर्वस्या एव वा ऋचः प्रतिषेधोऽयं, न चतुस्त्रिंशत्पदस्य । कस्मात् । पदेनासंयोगात् । चतुस्त्रिंशत्पदेन ऋचः संयोगो न स्यात् । विना तस्मात्पदान्नैव ऋक्शेषो वङ्क्रिगणनं कुर्यात् । अथ षड्विंशतिपदेन संबध्येत, तथाऽपि नाश्ववङ्क्रिसंख्यां ब्रूयात् । तत्र दृष्टोऽर्थो नावकल्पेत । ऊनं च वाक्यमर्थं न साधयेत् । ऊने च वाक्ये दोषश्रवणात् । मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति । चतुस्त्रिंशत्पदं चेहानर्थकं स्यात् । तस्मात्समस्य वचनं कर्तव्यम् । ऋचश्च विध्यन्तरेण विहितत्वाद्वैशेषिकं वचनमिति ॥ २१ ॥

षड्विंशतिविधानेऽनेकार्थविधानादिदोषः स्यात् । उच्यते । ऐरवत्प्रतिषेधः कार्यप्राप्तिप्रदर्शनाय भविष्यति । अस्य 'षड्विंशतिर्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य' इति ॥ १९ ॥ [२० ॥]

ऐरवदिति विषम उपन्यासः । यत्राऽऽद्यपदं गृह्यते, तत्र अन्त्यं लक्षयति सर्वां, संबन्धेनाऽऽद्यत्वादेव 'अयं सहस्रमानवः' इतिवत् । यत्र स्वनाद्यं गृह्यते, तत्र शक्नोति पराणि लक्षयितुम्, अर्थेनासंबन्धात् । तथा पूर्वाण्यपि पर्यावृत्तिमप्राप्तत्वमेव तत्पदं कार्येण प्रयुज्यते । अतश्च 'अश्वस्य चतुस्त्रिंशत्' इति पूर्वपक्षसूत्रं, नियमेन ऋगेव वक्तव्येति । 'तत्प्रतिषिध्य' इति सिद्धान्तो नियममेव वारयति ॥ २१ ॥

---

१ वैशेषिकमिति—'चतुस्त्रिंशद्वाजिनो' इति प्रकरणाम्नातस्य वैशेषिकमन्त्रस्य 'न चतुस्त्रिंशदिति' वचनेन प्रतिषेधात्प्राप्तप्रतिषिद्धे न विकल्पः । तथा च, अश्वविषये वैशेषिकमन्त्रकरणपक्षे, तूपरगोमृगविषये, द्विपशावदनयोर्वङ्क्रयः—इति समाम्नातवचनं प्रयोक्तव्यमिति । २ चतुस्त्रिंशत्पदमात्रप्रतिषेध इति पूर्वपक्षेऽनुष्ठानविशेषं दर्शयति—अश्वेत्यादिना ।

(अध्रिगुप्रैषगतोरूकशब्देन वपाभिधानाधिकरणम् ॥ ३ ॥)

[३] वनिष्टुसंनिधानादुरूकेण वपाभिधानम् ॥ २२ ॥ सि०

ज्योतिष्टोमेऽग्नीषोमीये पशावध्रिगौ वचनं, वनिष्टुमस्य मा राविष्टोरूकं मन्यमाना इति । तत्रोरूकशब्दं प्रति विचारः । किं वनिष्टुमस्य मा राविष्टोलूकसदृशं मन्यमानाः, उतोरूकं वपां मन्यमाना वनिष्टुं मा राविष्टेति । किं प्राप्तम् । वनिष्टुमुलूकं मन्यमाना इति । कथमुरूकशब्द उलूकवचनः । रलयोः समानवृत्तित्वात् । पर्यङ्कः पल्यङ्कः, रोमाणि लोमानि, अङ्गुरिः अङ्गुलिः । उलूकसदृशत्वाच्च वनिष्टोः, वपायां चाप्रसिद्धेः ।

एवं प्राप्ते, ब्रूमः । उरूकशब्देन वपाभिधानं स्यात् । वपां मन्यमाना वनिष्टुं मा राविष्टेत्येषा बुद्धिः क्रियमाणा दृष्टार्था । भवति हि वनिष्टुसंनिधानाद्वपाभेदेन वनिष्टोर्लवनप्रसङ्गः । तं च निवर्तयन्नेष शब्दो दृष्टप्रयोजनो भवति । न हि वनिष्टुर्न लवितव्य एव । वपोद्धरणकाले वपां मन्यमानैर्न लवितव्यः । इतरस्मिन् पक्षे, वनिष्टुं मा राविष्टेति लवितव्ये वनिष्टावनर्थकः प्रतिषेधः । उलूकसदृशवचनं चादृष्टार्थम् । कथं पुनर्वपायामप्रयुक्तो वपां प्रत्याययिष्यत्युरूकशब्द इति । उच्यते । अवयवप्रसिद्ध्या, उरुशब्दस्तावद्विस्तीर्णवचनो दृष्टः । तद्यथा, उरु राजाङ्गणम्, उरु वेदिकाङ्गणमिति । तथा, उरुं[1] हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ, इति । तथा, उरु विष्णो विक्रमस्व, इति । इहापि स विस्तीर्णवचन एव । तथा, कशब्दो मेदसि प्रसिद्धः । यथा, कशवाहिनो रथाः । मेदोवाहिन इति गम्यते । तस्यैकदेशः कशब्दः संमुदाय[2]स्यार्थमादधाति । मेदस्विनी तस्य वपा । न विस्तीर्णं मेदो मन्यमानेन तत्संनिकृष्टो वनिष्टुर्लवितव्य इति वपावचनता सिद्धा भवति । किं भवति प्रयोजनम् । वनिष्टुवचनपक्षे, उपमानस्योरूकशब्दस्यानूहः । वपावचनपक्षे, उरुशब्द ऊहितव्यः, कशब्दश्चेति उरुणी के, उरूणि कानि । अथवा, उरूके, उरूकाणि, यदि समासाभिप्रायः ॥ २२ ॥

[२२ ॥

१ ऋ० सं (अष्ट० १ अ० २ व० १४)। २ समुदाये-पा०।

(अध्रिगुप्रैषगतप्रशसाशब्दस्य बाहुप्रशंसापरत्वाधिकरणम् ॥ ४ ॥)

[४] प्रशसाऽस्याभिधानम् ॥ २३ ॥ पू०

तस्मिन्नेवाध्रिगावाम्नायते, प्रशसा बाहू इति । तत्र संदेहः । किं प्रशसा बाहू कृणुतात्, प्रशसेति तृतीयान्तः । प्रशसा बाहू ग्रहीतव्याविति, उत प्रशसेति द्विवचनम्, आकारे विभक्तेः कृते प्रशस्तौ बाहू कर्तव्याविति । किं प्राप्तम् । प्रशसाऽस्याभिधानम् । असौ हि शासशब्दः प्रसिद्धः । तथा हि तमनुवदति । दश प्रयाजानिष्ट्वाऽऽह शासमाहरेति । असिं वै शासमाचक्षत इति । अनर्थिका च बाह्वोः स्तुतिः । स्तुतौ बाहू किमप्यदृष्टं कुरुत इति मान्त्रवर्णिकं तयोर्देवतात्वं कल्पितं स्यात् । तथायुक्तमन्यस्मिन् पक्षे सति । तथा शौनःशेपे भवति दर्शनम् । अतस्त्वामग्ने शासहस्तं शासेन विशसनस्यात्र द्रष्टुमुत्सहे, इति । तस्मादसिना प्रशसेति गम्यते ॥ २३ ॥

बाहुप्रशंसा वा ॥ २४ ॥

अथवा बाहुप्रशंसैषा । प्रशसा बाहू कृणुतात्—प्रशस्तौ बाहू छेत्तव्याविति । तथा प्रशसाशब्दस्य दृष्टार्थता भविष्यतीति । कार्त्स्न्येन हि बाह्वोः प्रशस्तता । कृत्स्नौ बाहू उद्धरतेत्यर्थः । कृत्स्नौ च बाहू उद्धर्तव्याविति । इतरस्मिन् पक्षे स्वधितिना विशसनं क्रियते, असेश्च वाचकः शब्द उच्चार्यते । यदि वा मान्त्रवर्णिकं द्रव्यं विधीयते, असिना बाहू छेत्तव्याविति । तच्चायुक्तं, विधिविहिते स्वधितौ सति । न च न प्रशस्तौ बाहू । ताभ्यां पशुर्हि गच्छति । अवनम्य च शमीशरीरं भक्षयति । तस्माद्बाहुप्रशंसा । किं भवति प्रयोजनम् । अश्वमेधे, यशं राजता हरितस्सस्वोऽसयः । तत्रासिपर ऊहो भवति, यथा पूर्वः पक्षः । यथा तर्हि सिद्धान्तः, तथा बाहुपरेणोहेन भवितव्यम् ॥ २४ ॥

(अध्रिगुप्रैषगतश्येनशलाकश्यपादिशब्दानां कार्त्स्न्येनोद्धरणपरता-प्रकत्वाधिकरणम् ॥ ५ ॥)

[५] श्येनशलाकश्यपकवषस्रेकपर्णश्वाकृतिवचनं प्रसिद्धसंनिधानात् ॥ २५ ॥ पू०

---

११ ॥ १४ ॥

---

१ शासमाहर—पा० । २ शमीशरीरे—पा० ।

अग्निमश्वेवाग्निगाविदमाम्नायते, श्येनमस्य वक्षः कृणुतात् , शला दोषणी, कश्यपेवांसो, कवषोरू, स्रेकपर्णाऽष्ठीवन्ता इति। एषु संशयः। किमाकृतिवचनमेषु भवति, उत कार्त्स्न्योंद्धरणमिति। किं प्राप्तम्। प्रसिद्धसंनिधानादाकृतिवचनम्। इह प्रसिद्धस्य संनिधौ यदभिधीयते किंचिदिदं कर्तव्यमिति, तत्राऽऽकृतिवचनं गम्यते। यथा, अपो पिष्टपिण्डाः सिंहाः क्रियन्तामिति, अर्जुनवदरा मेखलाः क्रियन्तामिति, सिंहाकृतिवचनं मेखलाकृतिवचनं च गम्यते। एवं श्येनाकृतिवक्षः कर्तव्यं, शलाकृती दोषणी, कश्यपाकृती अंसौ, कवषाकृती ऊरू, करवीरपर्णाकृती अष्ठीवन्ताविति॥ २५॥

कार्त्स्न्यं वा स्यात्तथाभावात्॥ २६॥

वाशब्दः पक्षं व्यावर्तयति। न चैतदस्ति, आकृतिवचन इति। किं तर्हि। कृत्स्नोद्धरणं विवक्षितम्। कृत्स्नान्युद्धृतान्येतान्येतदाकृतिकानि भवन्ति। यथा श्येनाद्याकृतिकानि भवन्ति। तथैतानि कुरुत, कृत्स्नान्युद्धरतेत्ययमर्थोऽवगम्यते। लक्षणयेदं चोद्यमानं दृष्टार्थं भवति। कृत्स्नोद्धृतैर्हि तैः प्रयोजनम्। तथा हि तदाकृतिकानामवचनं भवति। इतरथाऽनदाकृतिकानामवद्यात्। तस्मात्कार्त्स्न्यमवगम्यत इति॥ २६॥

अध्रिगोश्च तदर्थत्वात्॥ २७॥

अध्रिगुश्चाङ्गानामुद्धरणार्थः। अङ्गानां कार्त्स्न्येनोद्धरणं कथं स्यादित्येवमर्थः। कथम्। एवं हि भवति वचनम्, गात्रं गात्रमस्यानूनं कृणुतादिति। तस्मादपि श्येनादिभिः कृत्स्नोद्धरणं गम्यत इति। प्रयोजनं पक्षोक्तम्॥ २७॥

(दर्शपूर्णमासार्थोद्धृताग्निनाशे ज्योतिष्मतीष्टेरननुष्ठानाधिकरणम्॥ ६॥)

[६] प्रासङ्गिके प्रायश्चित्तं न विद्यते परार्थत्वात्तदर्थे हि विधीयते॥ २८॥ सि०

अस्त्यग्निहोत्रम्। य एवं विद्वानग्निहोत्रं जुहोतीति। तत्रेदमाम्नायते। अग्नये ज्योतिष्मतेऽष्टाकपालं निर्वपेत्, यस्याग्निरुद्धृतोऽहुतेऽग्नि-

२९॥ २६॥ २७॥]

दर्शार्थमग्न्युद्धृतेऽनुगते, इष्टिः कार्या न वेति। कुतः संशयः। वाक्यात्पदाद्वा।

होत्र उद्धापयेदिति। यदि तु दर्शार्थेन पौर्णमासार्थेन वाऽग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्वायेत्, किं ज्योतिष्मती कर्तव्या, नेति । किं प्राप्तम् । कर्तव्येति । कुतः । उपसंप्राप्तं हि निमित्तम् । भवितव्यं नैमित्तिकेनेति । अग्निरसावुद्धृतोऽहुतेऽग्निहोत्र उद्वातः । एतावच्च निमित्तं ज्योतिष्मत्याः । तस्मात्सा कर्तव्येति । न चात्र शब्दोऽस्ति, अग्निहोत्रार्थमुद्धृत उद्वाते कार्येति । तस्मादपि कर्तव्या ।

एवं प्राप्ते, ब्रूमः । प्रासङ्गिके-एवं लक्षणकेऽग्नावनुगते प्रायश्चित्तं न कर्तव्यम् । परार्थं हि तदुद्धरणं कृतम् । दर्शपूर्णमासार्थम् । अग्निहोत्रार्थे चोद्धृते व्यापन्ने तदाम्नातम् । तस्मान्न कर्तव्यम् । आह । नन्वुक्तं, नास्त्यत्र शब्दः, अग्निहोत्रार्थमुद्धृतेऽनुगते प्रायश्चित्तमिति । अत्रोच्यते । यद्यपि नास्त्येवंजातीयकः शब्दस्तथाऽप्यग्निहोत्रार्थमेवोद्धृतेऽनुगते प्रायश्चित्तं गम्यते । कथम् । अग्निहोत्रप्रकरण एतदाम्नातमिति । आह । अग्निहोत्रप्रकरण आम्नानात्तस्योपकारकमिति गम्यते । नाग्निहोत्रविशिष्टमुद्धरणम् । स्वार्थे हि सर्वं क्रियते, न परविशेषणार्थेन ।

अत्रोच्यते । अग्निसंबद्धमेतत्प्रायश्चित्तमुच्यते, नोद्धानसंबद्धम् । किमतो

किमुद्धानमग्निविशिष्टं निमित्तं, अथवाऽग्निरुद्धानविशिष्ट इति । तत्रोद्धाने निमित्त आश्रीयमाणे तत्तया क्रिया निमित्तं स्यात् । अन्यैकदेशे वर्तमाना, पटदाहवत् । न च शाट्यादयोऽप्यग्नियुक्तेषु कदाचिदुद्धानं नास्तीत्यविशेषणमेव । अग्निस्तु निमित्तं विशेष्यः । क्रियया व्याप्यमान एव, पटो रक्त इतिवन्निमित्ततां बिभर्ति, नाव्याप्यमानः । स कदाचिद्व्याप्यमानः (स कदाचिद्व्याप्यते) इति युक्ता निमित्तता । यद्यपि, प्रकृत चेदं कर्म प्रकरणादग्निहोत्रस्योपकुर्वदुद्धाननिमित्तकमारादुपकारकं प्रयाजादिवत्स्यात् । न विशेषणस्याग्नेस्तद्भवितुमर्हति । सामवायिकं वा, विशिष्टद्रव्यद्वारयेणाग्न्यर्थम् । विशेष्य. प्रधानं तदाऽग्निः, शक्य सबन्धयितुमुद्धानेनेष्टया न । एवं संदेहे, उद्धानं निमित्तम्, आरादुपकारित्वात्: । दर्शार्थेन कर्मवदिति पूर्व. पक्षः । आरादुपकारकेभ्यः साम-

---

१ उद्धापयेत्—पा० । २ एतावतैव संदेहस्तदा दर्शयति—किमित्यादिना । ३ अग्न्येकदेशे—अंशत इति शेषः । ४ आरादुपकारिणी—नैमित्तिकं च कर्म, आरादुपकारि—आरादुपकारकर्मिवत्स्यात्. ।

पद्येवम् । यद्युद्वानसंबद्धं भवेत्, उद्वानस्यानङ्गत्वान्नैनदुद्वानार्थमिति गम्यते । प्रकृतेनाग्निहोत्रेण प्रयोजनेन संबध्यते । अग्निसंबन्धे पुनर्गुणत्वादग्नेस्तेनैव प्रायश्चित्तस्य प्रयोजनसंबन्धः । तत्रैवमुद्धृतो व्यापन्नो भवति, यदि स प्रयोजनं नाभिनिर्वर्तयति । तत्राग्निहोत्रार्थस्योद्धरणस्याग्निहोत्रनिर्वृत्तिः प्रयोजनम् । दर्शपूर्णमासार्थस्य दर्शपूर्णमासनिर्वृत्तिः । उद्धृतं चानुगतं स्वस्मै प्रयोजनायायोग्यं प्रायश्चित्तेन योग्यं क्रियते । तच्च योग्यं कुर्वत् प्रायश्चित्तमग्निहोत्रस्योपकरोति । यस्तूद्धृतो दर्शपूर्णमासप्रयोजनः, तं योग्यं कुर्वन्नाग्निहोत्रस्योपकुर्यात् । यस्त्वग्निहोत्रार्थमुद्धृतः, तं योग्यं कुर्वदग्निहोत्रायोपकरोति । तस्मादग्निहोत्रार्थमुद्धृते प्रायश्चित्तम् ।

कथं पुनर्ज्ञायते, अग्निना प्रायश्चित्तस्य संबन्धो नोद्वानेनेति । अग्निविशिष्टेनोद्वानेन संबन्ध इति श्रुत्या गम्यते । उद्वानपरीतेनाग्निनेति वा क्येन । श्रुतेर्वाक्याद्बलीयस्त्वादुद्वानसंबन्धः प्राप्नोतीति । उच्यते । उद्वानसंबन्धस्यापरिहार्यत्वात्, यस्योद्वायादित्यविवक्षितमेव प्राप्नोति । अदृष्टार्थत्वान्न, अनाकाङ्क्षितेन संबन्धः । तदुद्वानपरीतेऽग्नौ प्रायश्चित्तेन संबध्यमाने व्यापत्तौ सत्यामाकाङ्क्षितेन संबन्धो दृष्टार्थता च । तस्मादुद्वानपरीतोऽग्निः प्रायश्चित्तेन संबध्यत इति ।

दर्शपूर्णमासार्थमुद्धृतो यत्रानुगच्छति, तत्राग्निहोत्रस्य परकीयोऽग्निर्व्यापन्नः । परकीयं चोद्धरणमिति । तत्र प्रायश्चित्तं न स्यात् । अपि च लिङ्गं भवति । किमिति । यस्याग्निरुद्धृतोऽग्निहोत्र इत्यनुवादः । विधौ ह्येतस्मिन् सति वाक्यभेदप्रसङ्गः । यद्यग्निहोत्रप्रयोजनमुद्धरणं, ततोऽकृतप्रयोजनमिति विवक्षायाम्, अहुतेऽग्निहोत्र इति वचनमनुवदितुमुपपद्यते । तस्मादप्यग्निहोत्रप्रयोजन उद्धृतेऽनुगते प्रायश्चित्तं भवितुमर्हतीति । किं तर्हि तदा कर्तव्यम् । अविशेषविहितमग्नेरुपशमे प्रसज्यादिति ॥ २८ ॥

वायिशानि गरीयांसीति, उद्वानव्याहस्याग्निहोत्रार्थस्याऽऽहवनीयस्योत्पत्यर्थमिति सिद्धान्तः ॥ २८ ॥

---

१ कृतमिति—पा० ।

(धार्याग्निनाशे ज्योतिष्मतीष्टेरननुष्ठानाधिकरणम् ॥ ७ ॥)

[७] धारणे च परार्थत्वात् ॥ २९ ॥ सि०

इदमाम्नायते, धार्यो गतश्रिय आहवनीय इति । अस्त्यग्निहोत्रस्यानुगमे प्रायश्चित्तम्, अग्नये ज्योतिष्मतेऽष्टाकपालं निर्वपेद्यस्याग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्वायेदिति । तत्रैषोऽर्थः सांशयिकः । यदा धार्योऽग्निरनुगच्छति, तदा किमिदं प्रायश्चित्तं कर्तव्यं, नेति । किं प्राप्तम् । कर्तव्यमिति । उपसंप्राप्तं हि निमित्तम् । एतावदिह निमित्तम् । अग्निरग्निहोत्रार्थमुद्धृतोऽकृतप्रयोजन उद्वातीति । तच्चेह सर्वं प्राप्तम् । तस्मात्कर्तव्यं प्रायश्चित्तमिति ।

ननु सर्वकर्मार्थमेतत्, न केवलायाग्निहोत्राय । उच्यते । यद्धि सर्वकर्मसमुदायार्थं तत्केवलस्यार्थे न भवतीत्युच्यते । यत्त्वेकैकस्मा इत्येवं सर्वार्थं, तत्सर्वेभ्योऽपि प्रयुक्तमग्निहोत्राय प्रयुक्तं भवति । न चेदं सर्वकर्मसमुदायार्थम् । समुदायस्याचोदितत्वात्साधनानि प्रत्याकाङ्क्षाभावः । एकैकं तत्र कर्मोद्धरणमाकाङ्क्षति । तस्मात्सर्वार्थमपि सदग्निहोत्रार्थं भवति । एवं चेदनुगमनप्रायश्चित्तं प्राप्नोतीति । यथा, पर्युक्षणं परिसमूहनं तृणापचय इत्येवमादयः पदार्था धार्येऽग्नावहन्यहनि क्रियन्ते, एवं प्रायश्चित्तमपि क्रियेत ।

एवं प्राप्ते, ब्रूमः । धारणे च, गतश्रियोऽनुगमन इदं प्रायश्चित्तं न कर्तव्यम् । कुतः । परार्थत्वात् । न हि तदाऽग्निहोत्रार्थमुद्धरणं, यस्मिन् काले भवत्यसौ गतश्रीः । तत्रान्यार्थमुद्धृतोऽग्निः सर्वार्थं धार्यते । उद्-

---

पूर्वं पाक्षिकस्योपकारलक्षणं तादर्थ्यमिति कृत्वा प्रत्येकसमुदायसंबन्धाभिप्रायः, देवदत्तयज्ञदत्तभोजनवत् । यद्धि तैः संबद्धं तदन्यतमेनापि । यत्तु समुदायार्थं, पर्यंभोजनमिव तदन्यतरार्थमिति न शक्यते वदितुम् । न चासौ विधीयते । तस्मात्प्रत्येकं समुदायाग्निहोत्रार्थं तदुद्धरणमिति ।

सिद्धान्तस्तु—श्रुत्यादिलक्षणं तादर्थ्यं, गतश्रीश्च नोद्धरणं प्रयोजयति । धारणं हि तस्य नैमित्तिकम् । तत्तावत्प्रतीक्षते, यावत्कर्मण उद्देशेनोद्धरणं कृतम् । तदर्थ-

---

१ उद्वायात्—रा० । २ यदि सर्वकर्मार्थं, समुदायार्थं तत्, न केवलस्यार्थेन भवतीत्युच्यते—पा० ।

रणं तु तदेकस्मा एव प्रयोजनाय। धारणं तु सर्वकर्मार्थम्। न च धारणेऽग्निहोत्रार्थेऽनुगमने प्रायश्चित्तं विहितम्। किं तर्हि। उद्धरणे। परकीयं चात्रोद्धरणं, परार्थमुद्धरणम्। यदर्थमुद्धरणं तदर्थमुद्धृतेऽपि तत्प्रायश्चित्तम्। तस्मान्न तत्रेदं प्रायश्चित्तमिति ॥ २९ ॥

क्रियार्थत्वादितरेषु कर्म स्यात् ॥ ३० ॥

अथ यदुक्तं, परिसमूहनं, पर्युक्षणमित्येवमादयः पदार्था धार्येऽपि क्रियन्ते, एवं प्रायश्चित्तमपीति। अत्रोच्यते। युक्तं तत्परिसमूहनादीनि क्रियन्ते। चोदितानि हि तानि संस्कारार्थत्वेन, शक्यानि च, अकृतप्रयोजनानि च। उद्धरणं तु कृतप्रयोजनत्वान्निवृत्तम्। नियतदेशकालत्वाच्चाशक्यम्। तस्मादिदमतुल्यं प्रायश्चित्तेन ॥ ३० ॥

(दर्शपूर्णमासार्थोद्धरणकालेऽग्निहोत्रार्थोद्धरणाङ्गमन्त्राननुष्ठानाधिकरणम् ॥ ८ ॥)

[८] न तूत्पन्ने यस्य चोदनाऽप्राप्तकालत्वात् ॥ ३१ ॥सि०

अस्त्यग्निहोत्रे, उद्धरणमन्त्रः, वाचा त्वा होत्रा प्राणेनोद्गात्रा, इत्येवमादिः। तत्रायमर्थः सांशयिकः। यद्दर्शपूर्णमासार्थेनोद्धरणं क्रियते, किं तत्रैव मन्त्रः कर्तव्यो नेति। किं प्राप्तम्। दर्शपूर्णमासार्थमप्युद्धृतेऽप्यग्निहोत्रं हूयत एव। तत्र चेन्मन्त्रो न क्रियते, अमन्त्रोद्धृतेऽग्निहोत्रं प्रवर्तते। तस्मान्मन्त्रेण तदुद्धरणं कर्तव्यम्। अथोच्येत। कालाभावे विगुणत्वादुद्धरणं नाग्निहोत्रस्येति। तन्न। कालमात्रं ह्यपगतम्। उद्धरणं तु विगुणमप्यग्निहोत्रस्य भविष्यतीति। एवं चेत्समन्त्रकं कर्तव्यमिति।

एवं प्राप्ते, ब्रूमः। परार्थमुत्पन्नेऽग्नौ यस्याग्निहोत्रं प्रवर्तते। चोदनेति

मेव भवतु, प्रसङ्गादन्यस्योपकरोति। तस्मान्नान्यार्थ उद्धृतेऽग्निहोत्रार्थं प्रायश्चित्तमिति।

यदि पुनः सायमग्निहोत्रार्थमुद्धृते गतश्रियो धारणं भवति। प्रातरग्निहोत्रकाले चोद्धानं, ततः किं प्रायश्चित्तं भवति न वा। भवतीति ब्रूमः। सकलनिमित्तभावात्। न वा[1]। न ह्यसावग्निहोत्रमात्रायोद्धृतः। किं तर्हि। व्यक्त्यपेक्षया। या व्यक्तिमग्निस्योद्धृतोऽग्नौ, सा समाप्तैव। प्रातः प्रयोगः प्रसङ्गात्तत्रेति। न चैतत्कर्मार्थं धारणं, पुरुषधर्मोऽयम्। गतश्रीयोगात् ॥ २९ ॥ [३० ॥

---

१ नवा—भवतीति शेषः।

कर्म भूयः । न तत्र मन्त्रः कर्तव्य इति । न तदग्निहोत्रस्योद्धरणम् । अतः परकीय उद्धरणे न कर्तव्यमिति । उच्यते । ननूक्तं, विगुणमुद्धरणमग्निहोत्रस्यैव भविष्यति, न गुणाभावे प्रधानाभावोऽपीति । अत्रोच्यते । न गुणः कालः । निमित्तमसौ भवतीत्येतदुक्तम् । अतो निमित्ताभावे क्रियमाणमश्रुतं कृतं भवति । तस्मान्न तदुद्धरणमग्निहोत्रस्येति । न चेदुद्धरणमग्निहोत्रस्य, तस्मादत्र मन्त्रो न कर्तव्यः । कृतोऽपि ह्यसाधनर्थक इति ॥ ३१ ॥

(प्रायणीयेष्टौ पयसि प्रदेयधर्मानुष्ठानाधिकरणम् ॥ ९ ॥)

[९] प्रदानदर्शनं श्रपणे तद्धर्मभोजनार्थत्वात्संसर्गाच्च मधूदकवत् ॥ ३२ ॥ पू०

ज्योतिष्टोमे समाम्नायते, आदित्यः प्रायणीयः पयसि चरुरिति । तत्र संदेहः । किं प्रदानार्थाः पयोधर्माः पयसि कर्तव्या उत नेति । यदि प्रदानार्थमेतत्पयः, ततः कर्तव्याः । अथ श्रपणार्थं, न कर्तव्याः । कथं संशयः । सप्तमीनिर्देशाच्छ्रपणार्थं पय इति गम्यते । देवतासंबन्धस्य तु चरोरधिकरणे पयसि श्रूयमाणे वाक्यभेदाशङ्का । अतः संशयः ।

किं तावत्प्राप्तम् । प्रदानार्थमिति । कथम् । आदित्यश्चरुर्भवति । स च पयसीत्येवमनेकार्थविधाने वाक्यं भिद्येत । द्वावपि चेमावर्थावितो वाक्यादवगम्येते । यद्यन्यतरदेतयोर्विधीयते, तदाऽन्यतरदविधीयमानं गम्यते । अतो न वाक्यभेदः । यथा च न वाक्यभेदस्तथाऽऽश्रयितव्यम् । तत्राधिकरणसंबन्धे विधीयमाने देवतासंबन्धावगतिर्नावकल्पेत, प्रमाणान्तरेणाप्राप्तत्वात् । देवतासंबन्धे विधीयमाने हि ये निर्दिश्येते चरुपयसी, तयोर्निर्देशसामर्थ्याद्वाक्येन संसृष्टं गम्यते । तच्च देवतया संबध्यते । तत्रार्थात्पयोऽप्याधारश्चरुर्भवति ।

आह । वाक्येन द्वे चरुपयसी गम्येते । न तयोः संसर्गः । उच्यते । यदा द्वे गम्येते, तदा प्रयोगवचनेन यौगपद्यमेतयोर्गम्यते । तत्रार्थात्संः

॥ ३१ ॥

---

१ चेदार्थौ—पा० ।

सर्गः। एकत्वाच्च वाक्यस्य समुच्चयः । तेनात्र निर्देश एव विवक्षितो नाधिकरणसंबन्धो गम्यमानोऽपि विधीयते। एवं नु निर्देशः क्रियते, संसृष्टे चरुपयसी कथं गम्येयातामिति । तत्र चरुसंसृष्टं पयश्चरौ त्यज्यमाने नियतं त्यज्यते। तदस्य प्रदानदर्शनं भवति। पयसा श्रप्यमाणस्य तस्य प्रदानं कथं स्यादिति सप्तमी निर्दिश्यते। तस्माद्भोजनार्थं यागार्थमेतत्पयः। भोजनमिति सारूप्याद्यागमाह। तस्माच्च पयः प्रदानार्थं पयोधर्मैः संबध्यते।

आह। न त्यागमात्रं यागः। देवतामुद्दिश्य यस्त्यागः स यागो भवति। उच्यते। अयमप्यदितिदेवतामुद्दिश्य त्यागः क्रियत इति। आह। न पयसोऽदितिर्देवता। न ह्युद्देशमात्रेण देवता भवति। या यस्य श्रूयते सा तस्य देवतेति। चरोश्चैषा श्रूयते, न पयसः। उच्यते। उभयस्य निर्देशात्। उभयेन देवता संबध्यते संसृष्टेन, मधूदकवत्। यथा, दधि मधु घृतं धाना उदकं तत्संसृष्टं प्राजापत्यमिति भवति। एवमेवेदं द्रष्टव्यम्। यद्यपि सप्तमीनिर्दिष्टं, सप्तम्यर्थस्याविधित्सितत्वान्निर्देशमात्रस्य विवक्षितत्वात्। यथौदने दधि दत्त्वाऽभ्यवहर्तव्यमिति, ओदनस्य निर्देशमात्रं विवक्ष्यते, नाधिकरणत्वम्। एवमिहापि द्रष्टव्यम्। तस्मात्प्रदानार्थं पयः। प्रदानार्थाश्च पयोधर्माः कर्तव्या इति ॥३२॥

संस्कारप्रतिषेधश्च तद्वत् ॥ ३३ ॥

एवं च कृत्वा प्रदेयसंस्काराणां केषाचित्प्रतिषेध उपपन्नो भवति। अयजुषा वत्सानपाकरोति, अपवित्रवति गां दोहयतीति। प्राप्ते हि प्रतिषेधो न्याय्य इति ॥ ३३ ॥

तत्प्रतिषेधे च तथाभूतस्य वर्जनात् ॥ ३४ ॥

तत्प्रतिषेधे-पयःप्रतिषेधे, तथाभूतमपि लोके वर्ज्यते। पयसा सिक्तं, पयः शृतं च। न चैष श्रपणार्थस्य[1] द्रव्यस्य धर्मः। यथा श्रपणार्थं[2] पानीयम्। तत्प्रतिषेधे, तैले पीते पानीयं न पातव्यमिति विलेप्यं यवागूश्च

॥ ३२ ॥ ३३ ॥

१ श्रपणार्थस्य—पा०। २ श्रपणार्थं-पा०।

पीयते । न च तथाभूतस्य वर्जनादयो लोक एवं भवति । भोजनार्थं हि तत् । यथा हि लोके पयः, तद्वदिहापि भवितुमर्हतीति सामान्यतो दृष्टं व्यपादिष्टम् ॥ ३४ ॥

अधर्मत्वमप्रदानात्प्रणीतार्थे विधानादतुल्यत्वादसंसर्गः ॥ ३५ ॥ सि०

अधर्मत्वं तु पयसः । नास्य प्रदेयपयोधर्मा भवेयुरित्यर्थः । कुतः । अप्रदानात् । न हीदं प्रदीयते । ननु चरौ प्रदीयमाने प्रदास्यिष्यत इत्येवमर्थं पयसि श्रपणमुच्यते । नेत्याह । शृतश्चरुः कथं स्यादित्येवमर्थं हि तज्ज्ञायते । शृतैस्तण्डुलैः प्रयोजनमस्ति । न ह्यन्यथा चरुर्भवतीति । न तु प्रचेन पयसा नैतद्दातव्यं श्रूयते । कथम् । प्रणीतार्थे विधानात् । ननु वाक्यभेद एवं भवतीति परिहापित एष पक्षः । संसृष्टमत्र हविर्भवतीत्युक्तम् । उच्यते । अतुल्यत्वादसंसर्गः । अतुल्ये चरुपयसी । प्रत्यक्षतोऽधिकरणत्वेन पयः श्रूयते । प्रदेयत्वेन चरुः । पयसो यद्वाक्येन प्रदेयत्वं गम्यते, तदधिकरणश्रुत्या बाध्यते । यत्तु वाक्यभेदप्रसङ्ग इति । तन्न । न हि पयसि चरुरिति संबन्धो भविष्यति । कथं तर्हि । पयसि आदित्य इति । उभावादित्यशब्देन संभन्त्स्येते । आदित्यः पयसि, आदित्यश्चरुरित्युभौ चरुपयःशब्दावादित्यप्रधानावित्येकं वाक्यं भविष्यति, न वाक्यभेदप्रसङ्गः । पय-आधार आदित्यो भविष्यति । तस्मान्न पयसि प्रदेयधर्मा भवितुमर्हन्ति ॥ ३९ ॥

परो नित्यानुवादः स्यात् ॥ ३६ ॥

अथ यच्छिङ्गमुक्तम्, अयजुषा वत्सानपाकरोति, अपवित्रवति गां दोहयतीति । नैतदेवं संति, अस्यार्थस्य साधकं भवति । किं तर्हि । एतन्नित्यानुवादकम् । नित्यमेतमर्थं सन्तमनुवदति । नैवाप्रदेयत्वादयजुषा वत्सा अपाक्रियन्ते । न पवित्रवति गौर्दुह्यते । ननु नित्यानुवादोऽनर्थकः । उच्यते । न वयं प्रयोजनवचामप्रयोजनवचां वा विचारयामः । किमेतस्माद्वाक्याद्गम्यत इति परीक्षामहे । अस्माच्च वाक्या-

॥ ३४ ॥ ३९ ॥

१ अधर्मत्वं तु पयः—पा० । २ प्रदेयधर्मा—पा० । ३ श्रपणं—पा० । ४ सत्त्वस्यार्थस्य—पा० ।

न्दिदं गम्यते, न यजुषा वत्सा अपाक्रियन्ते, न पवित्रवति गौर्दुह्यत इति । तथास्यामदेयत्वादप्राप्तं यजुः पवित्रं चेति ॥ ३६ ॥

विहितप्रतिषेधो वा ॥ ३७ ॥

अथवा, विहितस्यैव प्रतिषेधो द्रष्टव्यः । विहितं केषांचित्, यजुषा वत्सानपाकरोति, पवित्रवति गां दोग्धीति । तस्य प्रतिषेधोऽर्थवानेव भवतीति ॥ ३७ ॥

वर्जने गुणभावित्वात्तदुक्तप्रतिषेधात्स्यात्कारणात्केवलाशनम् ॥ ३८ ॥

अथ यदुक्तं, पयःप्रतिषेधे, पयसा सिक्तं, पयसा संसृष्टं च वर्ज्येत इति । तत्र ब्रूमः । युक्तं हि लोके परसंसृष्टस्य वर्जनं, तदेव हि तत्र प्रतिषिध्यते । नित्यं ह्युपसर्जनीभूतं भोजने पयः प्रचरति । यत्र प्रचरति, तत्प्रतिषेधोऽर्थवान् । यत्र प्रचरति, तस्य ह्यप्रसङ्गात्प्रतिषेधोऽनर्थकः । ननु केवलमपि लोके पय उपभुज्यते । उच्यते । कारणात्केवलाशनं, व्रतमौषधं वा यस्य स केवलमुपभुङ्क्ते । न त्वेतत्प्रचुरम् । तस्मात्प्रायेण गुणभूतत्वात्पयसः पयोयुक्तमेव न भक्षयितव्यमित्येवमर्थः पयःप्रतिषेध उच्यते ॥ ३८ ॥

व्रतधर्माच्च लेपवत् ॥ ३९ ॥

अथ कस्मान्नायमन्यः परिहार उच्यते । व्रतवदेतद्द्रष्टव्यमिति । यथा, ब्रह्मचारिणा मांसं न भक्षयितव्यमित्युक्ते दर्विगतमपि लेपं वर्जयन्ति, एवमिहापि पयो न पातव्यमित्युक्ते पयसा सिक्तं पयसा संसृष्टं वर्जयिष्यन्तीति ॥ ३९ ॥

रसप्रतिषेधो वा पुरुषधर्मत्वात् ॥ ४० ॥

न चैष परिहारः । परिहारान्तरनिवृत्त्यर्थो वाशब्दः । कुतः । पुरुषधर्मत्वाद्व्रतस्य । अदृष्टार्थं ब्रह्मचारिणो मांसाभक्षणम् । तत्र तावदपि यो भक्षयति, यावति मांसरसमात्रं विदित भवति तस्यापि दोषः, न श्लेष्मप्रकोपादि किंचिद्दृष्टमपेक्षते । न तु पयःप्रतिषेधे तथा । तस्मात्पूर्व एव परिहार इति ॥ ४० ॥

॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥]

१ मांसमार्ग—पा० ।

(अभ्युदितेष्टौ दधिशृतयोः प्रदेयधर्मानुष्ठानाधिकरणम् ॥ १० ॥)

[१०] अभ्युदये दोहापनयः स्वधर्मा स्यात्प्रवृत्तत्वात् ॥४१॥ सि०

इदं समाम्नायते, वि वा एनं प्रजया पशुभिरर्धयति, वर्धयत्यस्य भ्रातृव्यं, यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति, स त्रेधा तण्डुलान् विभजेद्ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्, ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं, येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमिति । शृते चरुं, दधंश्चरुमित्येतदुदाहरणम् । तत्रैषोऽर्थः सांशयिकः । किं शृते दधनि चेज्यार्थाः पयोधर्माः कर्तव्या उत नेति । किं प्राप्तम् । न कर्तव्या इति । कुतः । अपदानार्थत्वात् । प्रणीतार्थे विधानादतुल्यत्वाच्च चरुणा न संसर्ग इति ।

एवं प्राप्ते ब्रूमः । अभ्युदये निमित्ते योऽयं दोहो देवताया अपनीतः स स्वधर्मा स्यात् । इज्यार्थाश्च तत्र पयोदधिधर्माः कर्तव्याः । कुतः । इज्यार्थमेव हि तत्पयो दधि च प्रवृत्तम् । यतश्चेज्यार्थम्, अतोऽस्येज्यार्थाः प्रवृत्ता एव धर्माः । तद्धर्माणां प्रवृत्तावस्ति कारणं, निवृत्तौ नास्ति । ननु प्रणीतार्थे दधिपयसी विधीयेते । नेत्याह । वाक्यं हि तदा भिद्येत । चरौ देवतार्थे, चर्वर्थयोश्च दधिपयसोः ।

आह । ननु चरोरपि देवतासंबन्धो दधिपयसोरपि तथा । न भविष्यति वाक्यभेद इति । नैवं शक्यम् । विभागः कर्तव्य इति पूर्ववाक्यं वृत्तम्, त्रेधा तण्डुलान् विभजेदिति । तदनन्तरं विभागविशेषपरमिदं

एते द्वे सूत्रे[1] तुशब्दवाशब्दरहिते पूर्वपक्षे धर्मवती दधिपयसी प्रतिपादयतः । उत्तरे[2] द्वे सूत्रे वाशब्देनैतं पक्षं व्यावर्तन[3]प्रदानधर्मैर्युज्येते दधिपयसी इति स्थापयतः ।

एवं सूत्रकारप्रस्थानमपास्य वृत्तिकारः पक्षाविरोधिनीं व्याख्यां चकार । तत्र ह्युक्तं प्रेरेवेदमामावास्यं कर्म, केवलं तद्द्रव्यं देवतातो[4]ऽपनीतं देवतान्तरेण युज्यते, अमपनीतयागार्थत्वमेव सतस्य कथं यागधर्मा न स्युरिति । अतः पूर्वाधिकरणसिद्धान्तेव पूर्वपक्षस्य कृतस्यैते सिद्धान्तसूत्रे । उत्तरे अप्येवमेव । एवं पूर्वस्य पूर्वस्य न्यायस्या-

---

१ द्वे सूत्रे इति—'अभ्युदये दोहापनयः स्वधर्मा स्यात्प्रवृत्तत्वात्' 'श्रुतोपदेशाच्च', इत्येते इत्यर्थः । २ उत्तरे इति—'अपनयो वाऽर्थान्तरे विधानाच्चरुपयोवत्' 'लक्षणार्था शृतश्रुतिः' इति द्वे सूत्रे इत्यर्थः । ३ व्यावर्तनेति-व्यावर्तनपूर्वकेत्यर्थः । ४ देवतातः—पूर्वदेवतातः ।

भवति वाक्यम् । ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं, येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमिति । अत्राविशेषाद्दधिपयसोरपि विभागो वक्तव्यः । यदि च दधिपयसी विभक्तव्ये सति प्रणीतार्थे अभ्युच्चयेयातां, ततो भिद्येत वाक्यम् । अतो नैतयोः प्रणीतार्थे विधानम् ।

अविधीयमाने च सप्तम्यर्थे प्रातिपदिकार्थो देवतया संभन्त्स्यते । वाक्यसामर्थ्यादुभे च दधिपयसी देवतया संभन्त्स्येते चरुणा सह । दधनि चरुरेको भाग इन्द्राय प्रदात्रे भवतीति । यथा विभज्यमानेषु नानाद्रव्येषूच्येत, रुक्मपात्र्यां[1] समाहार्या मणयः । एको भागो देवदत्तस्य । रजतपात्र्यां सुवर्णं निहितम् । अपरो भागो विष्णुमित्रस्येति, सह पात्रीभ्यां द्वौ भागौ गम्येते । विभागविशेषपरत्वाद्वाक्यस्य । पात्र्योश्च विभक्तत्वादनुवादश्च[2] सप्तम्यर्थो गम्यते । एवमिहापि विभागपरत्वादेव वाक्यस्य, विभक्तत्वाच्च दधिपयसोरेको भाग इति गम्यते । अर्थप्राप्तत्वाच्च सप्तम्यर्थोऽनुवादो भविष्यति । तस्मात्प्रदानार्थे दधिपयसी । प्रदानार्थाश्च दधिपयसोर्धर्माः कर्तव्याः ॥ ४१ ॥

शृतोपदेशाच्च ॥ ४२ ॥

इतश्च प्रदानार्थे दध्नि पयसि चेज्यार्था धर्माः कर्तव्या इति । कुतः । सिद्धवच्छृतोपदेशो भवति । शृते चरुं, दधंश्चरुमिति । स सत्सु धर्मेषूपपद्यते । इतरथा श्रपणं[3] न क्रियेतेति । तत्र सिद्धवच्छृतोपदेशो नावकल्पेत । तस्मादपि पश्याम इज्यार्था दधिपयसोर्धर्माः कर्तव्या इति ॥ ४२ ॥

पश्चादतश्चोत्तरोत्तरमधिकरणमिति युक्ततर आरम्भः । इतरथाऽभ्युदयोदाहरणं हेयमेव स्यात् । न्यायस्तु स[4] एवेति ॥ ४१ ॥ [४२ ॥

---

१ रुक्मपात्र्यां महामणय —पा० । २ तदनुवादश्च—पा० । ३ श्रयणं—पा० । ४ स एवेति—य एव पठे 'अपनयो वा विद्यमानत्वात् ' इति सूत्रेण सिद्धान्त कथित, स एव 'अभ्युदये दोहापनयः—' इत्यादिसूत्रद्वयेन, एतत्पूर्वाधिकरणसिद्धान्तमनिताग्रहस्य बुद्धि व्यावर्तयितुं स्पष्टीक्रियते । 'अपनयो वाऽर्थान्तरे '—इत्यादिसूत्रद्वयं त्वधिकरणान्तरमित्यर्थः ।

(पशुकामेष्टौ दधिशृतयोः प्रदेयधर्माननुष्ठानाधिकरणम् ॥ ११ ॥)

[११] अपनयो वाऽर्थान्तरे विधानाच्चरुपयोवत् ॥ ४३ ॥ सि०

अस्ति पशुकामेष्टिः, यः पशुकामः स्यात्सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात्। ये स्रोदिष्ठास्तानग्नये सनिमतेऽष्टाकपालं निर्वपेत्, ये मध्यमास्तान् विष्णवे शिपिविष्टाय शृते चरुं, ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुमिति। शृते चरुं, दधंश्चरुमित्येतदुदाहरणम्। अत्र संदेहः। किं शृते दधनि चेऽर्यार्थाः दधिपयोधर्माः कर्तव्या उत नेति। किं प्राप्तम्। पूर्वेणाधिकरणेन कर्तव्या इति। समाना हि श्रुतिर्भवतीति। सिद्धवच्च शृतोपदेशः, सत्सु प्रदानार्थेषु धर्मेपूपपद्यते।

एवं प्राप्ते, ब्रूमः। अपनयो वा धर्माणां भवेत्। अर्थान्तरे ह्येतत्पयो विधीयते दधि च, श्रपणार्थे न प्रदानार्थे। सप्तमीसंयोगात्। चरुपयोवत्। यथा, प्रायणीये चरौ पयसि प्रदेयधर्मा न क्रियन्ते, सप्तमीसंयोगात्। एवमिहापि ॥ ४३ ॥

लक्षणार्था शृतश्रुतिः ॥ ४४ ॥

अथ यदुक्तं सिद्धवच्छृतोपदेशो भवतीति। नैष दोषः। श्रपणेन द्रव्यं लक्षयिष्यति। अर्थप्राप्तं हि चरौ श्रपणं, तत्संबद्धं लक्ष्यते। श्रपणवति द्रव्ये चरुरिति। तस्मात्प्रदेयधर्मा न भवेयुरिति ॥ ४४ ॥

(ज्योतिष्टोमे श्रयणार्थेषु पयआदिषु प्रदेयधर्माननुष्ठानाधिकरणम् ॥ १२ ॥)

[१२] श्रयणानां त्वपूर्वत्वात्प्रदानार्थे विधानं स्यात् ॥ ४५ ॥ पू०

ज्योतिष्टोमे श्रूयते, पयसा मैत्रावरुणं श्रीणाति, सक्तुभिर्मन्थिनं, धानाभिर्हारियोजनं, हिरण्येन शुक्रम्, आज्येन पात्नीवतम्। तत्र संशयः। किं श्रयणानां प्रदेयधर्मा भवन्ति, उत नेति। कुतः संशयः। यदि प्रदेयानि श्रयणानि, तत एषु प्रदेयधर्मा भवन्ति, अथ न प्रदेयानि, न भवन्तीति। किं प्राप्तम्। प्रदेयानि[1], प्रदेयधर्मैः संबध्येरन्निति।

---

४३ ॥ ४४ ॥

---

१ प्रदेयानि श्रयणानि—पा०।

श्रयणाद्धि द्रव्यं जायते । पयोमिश्रश्च सोमो भवति । संमिश्रे च हूयमाने पयोऽपि होमेन संबध्यते । यदि पयोमिश्रश्च सोमो भवति, तत्र सोमस्य पयसा मिश्र्यमाणस्य न कंचिदुपकारं पश्यामः । यागस्य तूपकारो भवति निर्वृत्तिर्नाम । यदि होमेन संभन्त्स्यत इति मिश्रणाभिप्रायः । तत्र उपकारकं मिश्रणं दृष्टेनोपकारेण । श्रुतो हि गुणवान् यागः प्रत्यक्षः पयसा निर्वर्त्येत इति । सोमोपकारः कल्प्यः स्यात् । तस्मात्पयसा सोमो मिश्र्यते । स मिश्रितः प्रयोगवचनेन कथं संबध्यत इति । न च प्राकृतं मिश्रणं केनचिद्द्रव्येण प्राप्तम् । यत्रेदं द्रव्यान्तरं पयो विधीयत इति । अपूर्वत्वात्सोमस्य । तस्मात्प्रदानार्थस्य पयसो विधानं स्यात् । प्रदेयपयोधर्माश्चात्र कर्तव्या इति ॥ ४५ ॥

गुणो वा श्रयणार्थत्वात् ॥ ४६ ॥ सि०

। वाशब्दः पक्षं व्यावर्तयति । गुणभूतं पयः स्यात्सोमस्य, न प्रदेयद्रव्यम् । प्रदेयत्वेनाश्रवणात् । सोमार्थेन च श्रुतत्वात् ॥ ४६ ॥

अनिर्देशाच्च ॥ ४७ ॥

न होमेन प्रयोगवचनेन वाऽस्य संबन्धः । अनिर्देशः, परार्थत्वात् । न च प्रत्यक्षेणापि पयस्त्यागे यागनिर्वृत्तिः पयसा । प्रत्यक्षदेवतासंबद्धो हि त्यागो यागः । न चात्र पयसो देवतासंबन्धः । मैत्रावरुणं ग्रहं गृह्णातीति वचनं, न मैत्रावरुणं पय इति । तस्माद्दृष्टोपकाराभावाददृष्टः सोममिश्रणे सोमसंस्कारोऽभ्युपगम्यते । तस्मान्न प्रदेयधर्मैः संबध्यत इति ॥ ४७ ॥

श्रुतेश्च तत्प्रधानत्वात् ॥ ४८ ॥

इतश्च सोमार्थं पयः । कुतः । श्रुतिर्हि सोमप्रधाना भवति । द्वितीयाविभक्तिः श्रूयते । तस्माच्छ्रयणेन सोम एवेप्स्यत इति ॥ ४८ ॥

अर्थवादश्च तदर्थवत् ॥ ४९ ॥

अर्थवादश्च श्रयणस्य सोमार्थस्य भवति । स मित्रोऽब्रवीत्, पयसैव मे सोमं श्रीणाथेति । न हि भवति पयो मे दधुरिति । कथं तर्हि । सोमं पयसा संस्कुर्युरिति । तस्मादपि सोमार्थं श्रयणम् ॥ ४९ ॥

४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

संस्कारं प्रति भावाच्च तस्मादप्रधानं स्यात् ॥ ५० ॥

संस्कारं प्रति श्रवणवचनं भवति । यत्र संस्काराः श्रूयन्ते तत्रेदं श्रूयते, पयसा मैत्रावरुणं श्रीणातीत्येवमादि । तस्मात्संस्कारभावे श्रवणादयमपि संस्कार एवेति गम्यते । भवति हि प्रायोवृत्त्या तद्बुद्धिः । यथाऽप्रमायै लिखितोऽप्य इति गम्यते । तस्मात्प्रदेयधर्मेनं संबध्यत इति ॥ ५० ॥

(परस्वद्यागे पर्यग्निकरणान्ताङ्गरीतिविधानेन तदुत्तराङ्गप्रतिषेधाधि-करणम् ॥ १३ ॥

[१३] पर्यग्निकृतानामुत्सर्गे तादर्थ्यमुपधानवत् ॥५१॥ पू०

अश्वमेधे समामनन्ति, ईशानाय परस्वत आलभेतेति । तत्प्रकृत्य श्रूयते, पर्यग्निकृतानारण्यानुत्सृजन्तीति । तत्र संशयः । किमारण्यानामालम्भ उत्सर्गार्थ एव, द्रव्योत्सर्गश्चायं, किं कर्मशेषप्रतिषेधः, पर्यग्निकरणान्तैः संस्कृता उत्स्रष्टव्या इति । किं प्राप्तम् । द्रव्योत्सर्गोऽयम्, आलम्भश्चोत्सर्गार्थ एवेति । कुतः । एवमुत्सर्गमप्राप्तं विदधत्स्य सत्तां ब्रुवन् श्रुत्या वक्ष्यति । इतरथा, उत्सर्गं प्राप्तमनुवदेत् । वाक्यार्थस्य प्रतिषेधस्य सत्तां ब्रूयात्प्रत्ययः । श्रुतिश्च वाक्याद्बलीयसी । एवं च सति देवतासंबन्धो ग्रहणे । ईशानमुद्दिश्य परस्वन्त आलब्धव्याः । पर्यग्निकरणं कृत्वा त्यक्तव्या इति । उपधानवत् । यथा, एतत्खलु साक्षादन्नं, य एष चरुर्य एनं चरुमुपदधातीत्युपधानार्थमेव चरोरुपादानम् । एवमिहाप्युत्सर्गार्थं एवाऽऽलम्भो भविष्यति ॥ ५१ ॥

शेषप्रतिषेधो वाऽर्थाभावादिडान्तवत् ॥ ५२ ॥ सि०

कर्मशेषप्रतिषेधो वाऽस्मिन् वाक्य उच्यते । कुतः । अर्थाभावात् । ईशानाय परस्वत आलभेत, इत्यस्य वाक्यस्य न कश्चिदर्थो भवेत्, यद्युत्सर्गार्थ आलम्भः स्यात् । कथम् । आलम्भकाल एवाध्वर्युर्जानीयात्, नेम ईशानाय दास्यन्त इति । तस्यैवं जानतो नैवं संकल्पो भवति, ईशानाय दातुं ग्रहीतव्या इति । अशक्यार्थत्वादनर्थकमिदं वाक्यं भवति ।

॥ ६० ॥]

पर्यग्निकृतानामुत्सर्गे तादर्थ्यमुपधानवत् ॥ ११ ॥

---

* उत्सर्गार्थः, १,२ । २ यदन्नमिति—पा० ।

स एष संकल्प एवमवकल्पते, यदीशानाय दातव्याः । तस्मादालम्भवचनेन शब्देन दानमेव विधीयत इति गम्यते । यदा च दानं विधीयते, तदा–पर्यग्निकृतानुत्सृजन्तीति, उत्सर्गमनूद्य, एवमुत्सृजन्तीति विशेषविधानार्थं भवति शास्त्रम् ।

कथं पुनरत्र विशेषो विधीयते, किं कालः पर्यग्निकरणे । एतस्मिन् काल उत्सृजन्तीति । नेत्याह । नात्र कालवचनः शब्दः श्रूयते । काले च विधीयमाने कालान्तरं प्रतिषिध्यते, नाङ्गान्तराणि । अथ किं पर्यग्निकरणवदुत्स्रष्टव्यामिति । तदपि नास्ति । न ह्यत्र पर्यग्निकरणभावना कीर्त्यते । तस्यां च सत्यां पर्यग्निकरणात्प्राञ्चः पराञ्चश्च पदार्थाः सर्वे प्रतिषिध्येरन् । कथं तर्हि । निर्वृत्ते पर्यग्निकरण उत्स्रष्टव्य इति । किमेतस्यामवस्थायामिति । नेत्याह । चोदकादेवैतत्प्राप्तम् । एतदवस्थः पशुरुत्सर्जनीय इति । अवस्थान्तरप्रतिषेधस्य च नायं शब्दो वाचकः । चोदकप्राप्ते हि काल उत्सृज्यमाने कृतपर्यग्निकरण एवासौ भवति । यदि त्ववस्थायाः प्रतिषेधः स्यात्, पर्यग्निकरणादूर्ध्वमुत्सर्गात्प्राक् पदार्थाः प्रतिषिध्येरन्, न पराञ्चः ।

कस्तर्ह्यर्थः । पर्यग्निकरणे कृते यादृशो भवति तादृशस्त्याज्य इति । ननु चोदकेनैव तदङ्गोऽसौ प्राप्तः । उच्यते । पुनरस्यैतदङ्गवत्ता श्रूयते, अङ्गान्तरपरिसंख्यार्थम् । एतैरेवाङ्गैरङ्गवानुत्स्रष्टव्यः । एवं चोदकप्राप्तानि परिसंख्यायन्ते, नान्यान्यङ्गानि भवन्तीति । कथमेष शब्द एवं परिसंख्यातुं शक्नोतीति चेत् । शक्नोतीति ब्रूमः । कथम् । प्रत्यक्षेण वाक्येन तैरङ्गैर्निराकाङ्क्षीकृते प्रधाने शेषैरङ्गैः सह चोदकेन परोक्षा सत्येकवाक्यता न भविष्यतीति । तस्मात्कर्मशेषप्रतिषेध इति ॥ ५२ ॥

पूर्ववत्त्वाच्च शब्दस्य संस्थापयतीति चाप्रवृत्ते नोपपद्यते ॥ ५३ ॥

पूर्ववांश्च भवति शब्दो यागप्रवृत्तिपूर्वकः । आज्येन शेषं संस्थापयतीति । यदि याग एष प्रारब्धस्ततः संस्थापयतीति समाप्तिसादृश्या-

[१२ ॥]

१ पराचधार्या —पा० ।

दुपपद्यते । यागस्य हीदं यागान्तरं समाप्त्या सदृशम् । यदि हि पूर्वो न यागः प्रवृत्तः स्यादुत्सर्गमात्रं, न तस्य यागः समाप्त्या सदृशः । तत्र संस्थापयतीति नोपपद्यते । तस्मादपि शेषकर्मप्रतिषेधः ॥ ५३ ॥

प्रवृत्तेर्यज्ञहेतुत्वात्प्रतिषेधे संस्काराणामकर्म स्यात्तत्कारित्वाद्यथा प्रयाजप्रतिषेधे ग्रहणमाज्यस्य ॥ ५४ ॥

इदं प्रयोजनसूत्रम् । यदि द्रव्योत्सर्गो विधीयते ततः संस्काराणामकर्म स्यात् । कुतः । संस्कारप्रवृत्तेर्यज्ञहेतुत्वात् । तत्प्रतिषेधे यज्ञाभावे, किमिति संस्काराः क्रियेरन् । यज्ञकारिता हि ते । यथा प्रयाजाभावे तदर्थमाज्यं न गृह्यते, ग्रहणमाज्यस्य न क्रियते । अप्रयाजास्ता अननुयाजा इति यत्र श्रूयते, तत्र प्रयाजाभावे तदर्थमाज्यं न गृह्यते । एवमिहापि संस्कारा न कर्तव्या इति ॥ ५४ ॥

क्रिया वा स्यादवच्छेदादकर्म सर्वहानं स्यात् ॥ ५५ ॥

'शेषं संस्थापयति' इति लिङ्गदर्शनमेतदुपरितनाधिकरणव्याख्यानेन शुध्यति । तत्कथमिति । आरण्योत्सर्गसमानश्रुतिकं त्वन्यत्पात्नीवतं कर्म । तत्रैतच्छ्रुतम् 'आज्येन शेषं स्थापयति' इति । तत्र, परिसमाप्तत्वात्त्वाष्ट्रकर्मणः शेषशब्दोऽनुपपन्नः । तदभावाच्च संस्थापयतिरप्यनुपपन्नार्थ एव धातुः । प्रत्ययस्तु शुद्धोऽवशिष्यते । शेषसंस्थयोरभावात्करणार्थोऽप्यनुपपन्नार्थ एव 'आज्येन' इति । परिशिष्टमाज्येनेति । एतयोः संबन्धे कर्तव्यतावचनेन स्पृश्यमानमाज्यमीप्सिततमं भवति, आज्यं कुर्यादिति । न चैतत्केवलाज्योत्पत्तिविधायकम् । आनर्थक्यात् । अतः प्रयोगवचन उपपदान्तराभिधानात् ... सन्निहितेन पर्यग्निकरणवाक्यगतेन पात्नीवतपदेन संबध्यते । तदेवं संजातं पात्नीवतमाज्यं कुर्यादिति । द्रव्यदेवतासंयोगाच्च यागः । स चाऽऽरम्भवान् समाप्तिपर्यवसानः स्यात्तदङ्गभावेनाव्यभिचारसंस्थाधातुरुपादीयते । निर्वपतिवत्सौर्ये । स पशुयागादन्योऽपि । स पशुयागादस्मेतिकर्तव्यताकस्तदनन्तरं च क्रियमाणस्त्वाष्ट्र इवेति शेषशब्दोऽर्थवान् । तत्संबन्धात्तृतीया युक्तैव । शेषसंस्थोपपत्ता युक्ता । यदि पूर्वोऽपि याग एव । अथ द्रव्योत्सर्गस्ततो न युज्यते । तद्वच्चाऽऽरण्येष्वपीति सिद्धम् ॥ ५३ ॥ [१४ ॥

---

१ लिङ्गदर्शनमुत्तराधिकरणादौ स्पष्टं स्यात्—सर्वत्रादिना । २ अज्येति—आज्यमित्यादिक्रमात्रनिरर्थः । ३ एवमुत्तराधिकरणविचारं परिसमाप्याधुना पूर्वाधिकरणस्थं लिङ्गदर्शनमनुकर्षति—दीपेरनादिना ।

यदा तु कर्मशेषप्रतिषेधपक्षस्तदाऽपि किं न कर्तव्याः संस्कारा इति । नैतदेवम् । क्रिया स्यादवच्छेदपक्षे । यागो हि तदा भवति । तस्मात्सर्वे यागपदार्थाः कर्तव्याः । यदि न यागो भवेत्ततोऽकर्म । संस्काराणां सर्वहानं स्यात् । यागस्तु तदा भवति । तस्मात्कर्मशेषप्रतिषेधपक्षे सर्वं कर्तव्यमिति ॥ ५५ ॥

(आज्येन शेषं संस्थापयतीति वाक्ये कर्मान्तरविधानाधिकरणम् ॥ १४ ॥)

[१४] आज्यसंस्था प्रतिनिधिः स्याद्द्रव्योत्सर्गात् ॥ ५६ ॥ पू०

पर्यग्निकृतं पात्नीवतमुत्सृजति, इति प्रकृत्य श्रूयते । आज्येन शेषं संस्थापयतीति । तत्र संदेहः किमाज्यं पूर्वस्मिन् प्रतिनिधीभूतम्, अथवाऽऽज्यद्रव्यकं पूर्वस्मात्कर्मान्तरं विधीयत इति । किं प्राप्तम् । प्रतिनिधिरिति । कुतः । पात्नीवतमिति द्रव्यमुच्यते । उत्सृजतीति तत्रैवोत्सर्गः श्रूयते । शेषमित्युपयुक्तेतरद्वियमानं गम्यते । तत्, आज्येन संस्थापयतीति पशोः कार्यं आज्यं श्रुतं भवतीति । ननु पूर्वकर्म परिसमाप्तमित्युक्तम् । अत्रोच्यते । द्रव्योत्सर्गवचने प्रत्यक्षे, शेषशब्दे वाऽपरिहृते पुनरसमाप्तं पूर्वकर्मेत्याशङ्क्यते । तस्मात्प्रतिनिधीयत आज्यमित्याशङ्कामहे संस्थापयतीति चापूर्वे नोपपद्यते ॥ ५६ ॥

इतश्चाऽऽशङ्कामहे—

समाप्तिवचनात् ॥ ५७ ॥

समाप्तिवचनमिदं भवति, संस्थापयतीति । तेन मन्यामहे, यत्पूर्वं पशुनाऽऽरब्धं तदुत्सृष्टे पश्चादाज्येन परिसमाप्यत इति । अपूर्वस्यात्र कर्मण उच्यमानस्याऽऽरम्भ एव वक्तव्यो भवति । यतस्त्वनभिधायाऽऽरम्भं परिसमाप्तिरेवोच्यते, ततोऽवगच्छामः पूर्वस्यैव परिसमाप्तिः, नापूर्वकर्म चोद्यत इति ॥ ५७ ॥

चोदना वा कर्मोत्सर्गादन्यैः स्यादविशिष्टत्वात् ॥ ५८ ॥ सि०

कर्मान्तरचोदना वा । कुतः । पूर्वस्य कर्मणः परिसमाप्तत्वात् । ननूक्तं द्रव्योत्सर्गे शेषवचने वाऽपरिहृते पूर्वकर्मणोऽसमाप्तिराशङ्किता भवति । अत्रोच्यते । इदं द्वयमपि परिहियते । संस्थापयतीति प्रकृतेन पात्नी-

११ ॥ ११ ॥ १० ॥

व्रतशब्देन संबध्यते। तत्रायमर्थः। पात्नीवतं संस्थापयतीति। स एव यागो विधीयते। संपूर्वश्च स्थापयतिः प्रयुज्यते। अवश्यं कश्चिद्धातुः पूर्वो भावनावचनस्य प्रयोक्तव्य इति, तत्राविरुद्धो भावनायामुच्यमानायामर्थप्राप्तः संस्थापयतिरालभतिरिव प्रयुज्यते शेषशब्दैश्चैवं सादृश्यात्म युज्यते। द्रव्योत्सर्गश्चाविरुद्ध एव याग उच्यमाने। तस्माद्यथाऽन्ये निर्वपत्यादयः कर्मान्तरविधाने भवन्ति, एवं तैरविशिष्टत्वात्संस्थापयतिरपि भवितुमर्हतीति ॥ ५८ ॥

अनिज्यां च वनस्पतेः प्रसिद्धां तेन दर्शयति ॥ ५९ ॥

प्रसिद्धां वनस्पतेरनिज्यामत एव दर्शयति। कथम्। यत्त्वष्टारं च वनस्पतिमावाहयसि। अथ चैतौ यक्ष्यसि। त्वाष्ट्री नवमी प्रयाजेज्या, वानस्पत्या दशमी। अत्रैवैतावेष्टौ विधावु, इत्यङ्गान्तरेणानुग्रहं ब्रुवन् वनस्पतीज्याया अभावं दर्शयति। शेषपरिसमाप्तौ सत्यां, वनस्पतिं जुहोतीति वनस्पतीज्या क्रियते। अथ परिसमाप्तं पूर्वं कर्म, ततो लुप्ता स्यात्। तत्राभावदर्शनमुपपद्यते। तस्मात्पूर्वकर्म परिसमाप्तम्। इदमपि कर्मान्तरमिति ॥ ५९ ॥

संस्था तद्देवतत्वात्स्यात् ॥ ६० ॥

अथ यदुक्तं, संस्थापयतीति चापूर्वे नोपपद्यत इति। तत्परिहर्तव्यम्। अत्रोच्यते। असंस्थायां संस्थावचनमेतत्—तदपि पूर्वं पात्नीवतमिति समानदेवतत्वात्समाप्तिसादृश्यं ज्ञायते। तत्र तत्पात्नीवतमारब्धमिह परिसमाप्तमिति। स एव सादृश्यात्संस्थापयतीति शब्दोऽवकल्पत इति ॥ ६० ॥

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये नवमस्याध्यायस्य चतुर्थः पादः ॥

संपूर्णश्च नवमोऽध्यायः ॥

—:o:—

५८ ॥ ५९ ॥ ६० ॥]

इति श्रीमद्भट्टकुमारिलविरचितायां मीमांसाभाष्यव्याख्यायां टुप्टीकायां नवमाध्यायस्य चतुर्थः पादः ॥

समाप्तश्च नवमोऽध्यायः ॥

१ संपूर्वो भाववचनश्च—पा०। २ पठति—पा०। ३ परिसमाप्तमिति, सादृश्यात्—पा०।

इति नवमोऽध्यायः ॥

अथ दशमेऽध्याये प्रथमः पादः।

(विकृतौ लुप्तार्थकानां प्राकृतानामङ्गानां बाधाधिकरणम् ॥ १ ॥)

[१] विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात् ॥ १ ॥ पू०

ऊहो वृत्तः। बाधाभ्युच्चयमिदानीं वर्तयिष्यामः। बाधो नाम यदेवेदमिति निश्चितं विज्ञानं कारणान्तरेण मिथ्येति कल्प्यते। तथा, अभ्युच्चयो यदिदमिह भवतीति विज्ञातेऽपरमपि भवतीति विज्ञानम्। तत्रायमर्थः प्रथमं परीक्ष्यते। किं सर्वं प्राकृतं विकृतौ कर्तव्यमुत किंचिद्बाध्यत इति। किं तावत्प्राप्तम्। विधेः प्राकृतस्य प्रकरणान्तरे विकृतौ यतो भवत्यविशेषेणातिदेशः, अतो यच्च यावच्च प्राकृतं धर्मजातं तत्सर्वं विकृतौ कर्तव्यं, यदप्यर्थलुप्तम्। कुतः। वचनेन हीदं सर्वं प्राप्यते। न च वचनस्यातिभारोऽस्ति प्रापयतः। कथं वचनमिति गम्यते। सर्वास्वेव वैकृतीषु देशनासु प्राकृतं धर्मजातमपेक्ष्यते वाक्यशेषत्वेन। यथैव प्राकृत्यां देशनायामनुपज्यते, एवं वैकृत्यामपि। न कश्चिद्विशेषोऽस्ति। तत्र यथा, कृष्णलानां पाकोऽप्राकृतार्थोऽपि वचनप्रामाण्यात्क्रियते, एवमवहन्त्याद्यप्राकृतार्थमपि सर्वं कर्तव्यमिति ॥ १ ॥

अपि वाऽभिधानसंस्कारद्रव्यमर्थे क्रियेत तादर्थ्यात् ॥ २ ॥ सि०

अपि वेति पक्षव्यावृत्तिः। नैतदस्ति। सर्वं प्राकृतं विकृतौ कर्तव्यमिति। कचिदभिधानसंस्कारद्रव्यं निवर्तितुमर्हति यल्लुप्तार्थम्। कुत एतत्। अभिधानसंस्कारद्रव्यं हि प्रयोजने सति क्रियते, नाप्रयोजनम्। अन्यस्मै प्रयोजनाय तदाम्नायते, न स्वार्थम्। ननु चोक्तं लुप्तार्थमपि क्रियते, वचनप्रामाण्यात्। यथा कृष्णले पाकः। नेत्याह। नास्ति

सप्तमेनातिदेशसत्ता व्याख्याता। दशमेनेदानीं किमतिदिश्यत इति व्याख्यायते। यत्प्रकृतौ विद्यते तदतिदिश्यते। तस्यां च शास्त्रपदार्थोपकारा विद्यन्ते। अतस्तेऽतिदिश्यन्ते। तस्माल्लुप्तार्थमपि प्रवर्तते ॥ १ ॥

अर्थलुप्तं न प्रवर्तते। कथंभावोऽयं लौकिको वैदिकश्चोपकारमेवापेक्षते। उपकारद्वारेणोपकारकप्रवृत्तिः। तस्माल्लुप्तार्थस्य निवृत्तिः।

१ कल्प्यते—पा०। २ उपकारमपेक्षते—पा०।

लुप्तार्थस्य देशकं वचनम् । न वैकृतं कर्म प्राकृतैरङ्गपदार्थैः सहैकवाक्यतां याति । नैवं विज्ञायते, यागेन फलं कुर्यात्, कथम्, प्राकृतैरङ्गैरिति । कथं तर्हि । यथा प्राकृतेन यागेन फलं साधितमभूत्तथेति ।

कुत एतत् । यागगतो हि व्यापारविशेषस्तेनापेक्ष्यते, न व्यापारमात्रम् । यागगतश्च व्यापारः प्राकृते यागे प्रयोगवचनेन कल्पितः, संगृहीतश्च विद्यते । स शक्योऽपेक्षितुम् । स चाऽऽकाङ्क्षितो निराकाङ्क्षं शक्नोति कर्तुमिति । अङ्गेष्वप्यपेक्ष्यमाणेषु न यागगतो विकृतौ व्यापारविशेषः कल्प्यः स्यात् । इतरथा लक्षणा स्यात् । यथा, दण्डेन युध्येत इति वचने न दण्डरूपं शब्देनाभिहितम् । यदि तु तेन लक्षितेन प्रयोजनं स्यात्, शक्यते तेन लक्षयितुम् । एवमिहाप्यङ्गत्वरवं यागगतो विशेषो नाङ्गेष्वपेक्ष्यमाणेषु शब्दाभिहितो भवति । लक्षणया तु कल्प्यते । लक्षणायां च शब्दो बाध्येत ।

अथ शब्दो मा बाधीति यागगतो विशेषो नैवापेक्ष्येत, अङ्गान्येवापेक्ष्येरन् । ततः, कथमिति—इतिकर्तव्यताविशेषं प्रति वैकृतस्य कर्मणश्चोदकशब्दोऽनिवृत्ताकाङ्क्ष एवावतिष्ठेत । अङ्गैरपि चापरेतिकर्तव्यताऽऽकाङ्क्ष्येत । गम्यमाना च प्राकृतयागेतिकर्तव्यतोत्सृज्येत । प्राकृतानां चाङ्गानां प्रकरणेऽर्थवता दुर्लभो वैकृतेन कर्मणैकवाक्यभावोऽभ्युपगम्येत । सर्वं चैतदन्याय्यम् । तस्मादेवमभिसंबन्धः क्रियते । यथा प्राकृतेन यागेन फलं साध्यते, तथैवैतेनापीति । कियतो यद्येवम् । एतद्वतो भवति । प्राकृतान्यङ्गानि यस्मै प्रयोजनाय प्रकृतौ भवन्ति,

---

ननूक्तं प्रकृतौ शास्त्रपदार्थोपकारा विद्यन्त इति । तत्र कथमुपकारोऽतिदिश्यते । उच्यते । सोऽर्थ उपमानेनाऽऽग्नेयविध्यन्तं गृह्णाति । आग्नेये चोपकारा अनन्तराः । व्यवहिताः पदार्थाः । व्यवहिततराणि शास्त्राणि । अतः कथंभावोऽनन्तरानुपकारान् पश्यति । तांश्च गृह्णाति । पदार्था उपकारैर्व्यवहिताः । न चापेक्षिताः । ननु प्रकृतौ पदार्था एवानन्तराः, शाब्दत्वात् । प्रथमं ते गृह्यन्ते । पश्चात्तूपकाराः कल्पिताः । विकृतावपि तथैव युक्तमिति । सत्यम् । प्रकृतौ पदार्था गृह्यन्ते, न तु

---

१ निराकाङ्क्षं च—पा० । २ उपमानेनेति—सादृश्यकल्पितातिदेशेनेत्यर्थः । ३ आग्नेयविध्यन्तमिति—आग्नेयाद्यवदानमित्यर्थः ।

नासति तस्मिन् प्रयोजने विकृतौ चोदितानि भवन्ति । तस्माल्लुप्तपाक-
प्रयोजनं न चोदकश्चोदयतीति ॥ २ ॥

तेषामप्रत्यक्षशिष्टत्वात् ॥ ३ ॥

अथ यदुक्तं, यथा कृष्णलेषु लुप्तप्राकृतप्रयोजनोऽपि पाको वचनप्रामाण्यात्क्रियते, एवमन्यदपि क्रियेतेति । तत्र । न हि कृष्णलेषु पाकश्चोदकेन प्राप्नोति । प्रत्यक्षं हि तत्र वचनम्, घृते श्रपयतीति । न तत्प्राकृतप्रयोजनं पाकमाह । तत्र वचनप्रामाण्याददृष्टार्थः पाकः । यदि च तत्र प्रत्यक्षवचनं नाभविष्यत्, तेषामप्रत्यक्षशिष्टत्वात्पाकोऽपि नाभविष्यदेव । तस्मादनुपवर्णनं पाकवदिति ।

किं भवति प्रयोजनम् । कतरद्वा वैकृतमुदाह्रियत इति । क्वचिच्छ्रूयते, स्वयं दिनं बर्हिर्भवतीति । तत्र प्राकृतं द्रव्यं निवर्तते । स्वयं कृता वेदिर्भवतीति । उद्धननखननपरिलेखनानि निवर्तन्ते । स्वयं शीर्णा शाखा भवतीति, असिद्रव्यं निवर्तते । मन्त्राश्चैतेषु निवर्तन्ते ॥ ३ ॥

(अथवा—कृष्णलचरावघातबाधाधिकरणम् ॥ १ ॥)

एवं वा—

[१] विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात् ॥ १ ॥ पू०

अस्ति प्राजापत्यश्चरुः, प्राजापत्यं चरुं निर्वपेच्छतकृष्णलमायुष्काम इति । तत्रैतद्विशिष्टमुदाहरणमङ्गीकृत्यैतदेव सर्वं चिन्त्यते । किं कृष्णलेष्ववहन्तिः कर्तव्यो नेति । विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यादिति पूर्वः पक्षः । कर्तव्यः, यथा तेषामेव पाक इति ॥ १ ॥

अपि वाऽभिधानसंस्कारद्रव्यमर्थे क्रियेत
तादर्थ्यात् ॥ २ ॥ सि०

इति सिद्धान्तः, न कर्तव्य इति ॥ २ ॥

तेषामप्रत्यक्षशिष्टत्वात् ॥ ३ ॥

इत्युपवर्णनापरिहारः ॥ ३ ॥

पदार्थापेक्षया । क्रतूपकारापेक्षया । स एष कर्मभावः श्रुत्योपकारान् गृह्णाति, लक्षणया पदार्थान् । श्रुतिश्च लक्षणाया गरीयसी ॥ २ ॥ [३ ॥]

---

१ 'तेषामप्रत्यक्षविशिष्टत्वात्' इति मुद्रितपुस्तकेषु पाठः । २ स्वयं दत्तं—पा० ।

(अथवा—वैश्वदेवीयदेवतावाहनकाले विष्णोरुरुक्रमस्याऽऽवाहना-नुष्ठानाधिकरणम्॥ १ ॥)

एवं वा—

विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात् ॥१॥ पू०

वैश्वदेवं चरुं निर्वपेद्भ्रातृव्यवान् । तं बर्हिषदं कृत्वा शम्यया स्फ्येन व्यूहेत्, इदमहममुं चामुं च व्यूहामीति । यं द्विष्यात्तं ध्यायेत् । यदपोऽवमृद्येत्, यच्च स्फ्य आश्लिष्येत्, तद्विष्णव उरुक्रमायावद्योदिति । तत्र संशयः। किं विष्णुरुरुक्रम आवाहयितव्य उत नेति। किं प्राप्तम् । विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात् ।

आवाहयितव्यः । ननु स्फ्ये कदाचिन्नाऽऽश्लिष्यंदपि, न वाऽपोऽवमृद्येत। तत्राऽऽवाहनं कृतमनर्थकं स्यात्। न च वचनबलादाश्लेषयितव्यमवमर्दयितव्यं वा । न ह्युपादेयत्वेनाऽऽश्लिष्टमवमृदितं वा श्रूयते । न च विष्णोरुरुक्रमस्य यागोऽर्थकर्म । किं तर्हि । आश्लेषणेनावमर्दनेन च लक्षितमनेन प्रकारेणाऽऽहवनीये प्रतिपाद्यते । तथा हि दृष्टमपनयने तस्य प्रयोजनं भवति स्फ्यादिसंशोधनम् । इतरथा हि यागाददृष्टं कल्प्येत ।

ननु यागाददृष्टमवश्यं कल्पनीयम् ।सत्यं कल्पनीयम् । द्रव्यप्रतिपादनद्वारं तत् । अत्रोच्यते । लुप्तार्थमपि कर्तव्यम् । यथा कृष्णले चरौ पाकः । अपि च, कदाचिदाश्लिष्येत्, अपश्चावमृद्येत । तत्रान्तरित आवाहने वैगुण्यमापद्येत । तत्रामन्त्रिकाद्भिरावाहयितव्या देवता, यदि स्फ्य आश्लेक्ष्यते, अपश्चावमर्दिष्यते । नाऽऽवाहनमङ्गमन्तरेष्यते । स्वकाले ह्यावाहनेन देवता स्मर्यमाणा साध्वी भवतीति, न स्वकालोत्तरकाले । तत्र ह्यर्थमात्रममन्त्रकं स्मरणम् ।

अथ स्फ्येनोपश्लेक्ष्यते, न वाऽपोऽवमर्दिष्यते तदा कृतेऽप्यावाहने न किंचिद्दुष्यति । नैवं मन्तव्यम् । यथा राजा, अमात्यो वा, ब्राह्मणो वा परिचरितुं निमन्त्रित आहूतोऽपरिचर्यमाणोऽवमानितमात्मानं मन्यमानोऽपचरिष्यतीत्यावद्यते । एवं देवताऽपीति । न तत्र देवताऽऽहूयते । आहूता सती हविरुपयोक्ष्यते, तर्प्स्यति च । तृप्ता

प्रसेत्स्यति । प्रसभा सती फलेन संयोक्ष्यतीति । तदेतत्प्रथमे सिद्धम् । तस्मान्न दोष आवाहितायामनिज्यमानायाम् ॥ १ ॥

अपि वाऽभिधानसंस्कारद्रव्यमर्थे क्रियेत तादर्थ्यात्॥ २ ॥ सि०

अपि वेति पक्षव्यावृत्तिः । एषोऽभिधानसंस्कारो निवर्तते । कुतः । अभिधानसंस्कारो द्रव्यं वा, सति प्रयोजने क्रियते, नान्यथा । तद्वर्णितम् । यदप्युक्तं, कदाचित् क्लिश्येत, अवमृश्येत वा । तत्राऽऽवाहनं नान्तरेण्यत इति । नैष दोषः । अन्तरितमेतदनन्तरितेनैव तुल्यम् । यदा, आवाहनस्य कालो न तदोरुक्रमयागस्य निमित्तमापादितम् । आपादिते हि निमित्ते तस्य प्रयोगो भविष्यति । न ह्यनाक्लिष्टम्, अनवमृदितं वा तत्र प्रतिपादयितव्यम् । न चाऽऽरब्धे प्रयोगे कृतमुपकारकं भवति । तस्माद्विष्णुरुरुक्रमो नाऽऽवाहयितव्य इति ॥ २ ॥

तेषामप्रत्यक्षशिष्टत्वात् ॥ ३ ॥

इत्युपवर्णनापरिहार उक्तः ॥ ३ ॥

(ज्योतिष्टोमाद्यङ्गभूतदीक्षणीयादिविकृतावन्वारम्भणीयाया बाधाधिकरणम् ॥ २ ॥)

[२] इष्टिरारम्भसंयोगादङ्गभूतान्निवर्तेताऽऽरम्भस्य प्रधानसंयोगात् ॥ ४ ॥ सि०

अस्ति ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्र दर्शपूर्णमासप्रकृतिकानि कर्माणि दीक्षणीयादीनि, आग्नावैष्णवमेकादशकपालं निर्वपेदित्येवमादीनि । अस्ति तु प्रकृतावारम्भणीयेष्टिः, आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावारप्स्यमाणः, सरस्वत्यै चरुं, सरस्वते द्वादशकपालम्, अग्नये भगिनेऽष्टाकपालं निर्वपेत्, यः कामयेतान्नादः स्यामिति । नित्यवदेके भगिनमामनन्ति । तत्र संदेहः । किं

संकल्पो ज्योतिष्टोमस्यैव, न दीक्षणीयादीनाम् । अथोदासीन्यप्रच्युतिः, साऽपि तस्यैव । अथ प्रथमः पदार्थ आरम्भः, सोऽपि तस्यैव, प्रसङ्गेन दीक्षणीयादीनाम् । नन्वन्वारम्भणीयाज्ञानं (?) प्रथम. पदार्थो भविष्यति ।

दीक्षणीयादिष्वारम्भणीया कर्तव्या, उत नेति । किं प्राप्तम् ? सर्वं प्राकृतं विकृतौ कर्तव्यम् । विधेः प्रकरणान्तरेऽतिदेशात्सर्वंकर्म स्यादिति ।

एवं प्राप्ते, ब्रूमः । इष्टिरारम्भणीया ज्योतिष्टोमाङ्गभूताद्दर्शपूर्णमासप्रकृतिकाद्दीक्षणीयादेः कर्मराशेर्निवर्तते । किं कारणम् । योऽत्राऽऽरम्भः स ज्योतिष्टोमस्य, न दीक्षणीयादेः । कुतः । आरम्भो हि प्रथमः पदार्थः स्यात् । प्रथमं वा पुरुषस्य प्रवर्तनम् । यदि प्रथमः पदार्थः, र्त्विग्वरणमनं देवयजनजोषणं वा । तदिह ज्योतिष्टोमस्याङ्गं क्रत्वर्थेन कृतं सद्दीक्षणीयादीनामर्थं साधयति, न पुनस्तेषां कर्तव्यम् । लुप्तमेव तत् । तस्मिन् लुप्त आरम्भे तत्सिद्ध्यर्थो धर्म आरम्भणीयाख्यो लुप्येत । अथ प्रथमप्रवर्तनमारम्भः । औदासीन्याद्व्यावृत्तिः । पुरुषस्य व्यापृतता । तदा ज्योतिष्टोमं साङ्गं कर्तुमसावौदासीन्याद्व्यावृत्तो ज्यौतिष्टोमिकेन प्रथमेन पदार्थेन । स ततः प्रभृति आ साङ्गज्योतिष्टोमसमाप्तेर्व्यापृत एव न पुनरुदासीनो भवति । यतो व्यावृत्तो भवति । साङ्गज्योतिष्टोमारम्भेणैव प्रवृत्तो दीक्षणीयादिष्विति लुप्यत एवैषामारम्भः । तस्मिन् लुप्ते, आरम्भणीयापदार्थं आरम्भसिद्ध्यर्थो लुप्येत ।

नन्वङ्गभूतस्य दीक्षणीयादेरन्य आरम्भो जातः । नेत्याह । ऋत्विग्वरणमनं देवयजनजोषणादि वा, प्रथमं पुरुषस्य प्रवर्तनमारम्भः । प्रथमं प्रवृत्तोऽसौ ज्योतिष्टोमार्थमेव अथायमन्यः प्रथमः पदार्थो दीक्षणीयादेर्जात इत्युच्यते । तथाऽपि न तस्याऽऽरम्भणीया प्रकृतावुक्तेति । तस्मा-

---

उच्यते । तदपि तस्यैव । प्रसङ्गेन दीक्षणीयादीनाम् । यथा प्रासङ्गिकेषु न ज्योतिष्मती, एवमारम्भणीयाऽपि । न च प्रकृतावस्य-वाधानं प्रथमं, पाठेनैव तत्प्रथमम् । पूर्वं क्रियमाणं कर्मान्तरमस्याः प्रथमः पदार्थः प्रणयनम् । तस्य प्रकृतावियमङ्गभावेन दृष्टा । अलुप्तोपकाराश्च पदार्थाः प्राप्यन्ते । यथा यूपायाञ्जन आज्यसंस्कारा न क्रियन्ते । एवं दीक्षणीयादिष्वारम्भणीया ।

---

१ आरम्भणीया—पा० । २ न ज्योतिष्मतीति—यथैव ' प्रासङ्गिके प्रायश्चित्तं न विद्यते तार्थत्वात्तदर्थं हि विधीयते ' (अ० ६ पा० ४ अ० ६ सू० २८) इत्यधिकरणे दर्शार्थं प्रणीतस्याग्नेरग्निहोत्रकाल उद्वाने ज्योतिष्मतीष्टिरूपं प्रायश्चित्तं न क्रियतामुक्तं, तद्वत्प्रकृतेऽपीत्यर्थः ।

दङ्गभूतात्पदार्थादारम्भणीया निवर्तेत । अपि च दीक्षणीययैव ज्योतिष्टोमे, आरम्भार्थः सिध्यति । एवं हि श्रूयते । आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः, अग्निः सर्वा देवता विष्णुर्यज्ञः, देवताश्चैव यज्ञं चाऽऽरभते । अग्निः प्रथमो देवतानां विष्णुः परमः, यदाग्नावैष्णवमेकादशकपालं निर्वपति देवताश्चैव यज्ञं चोभयतः परिगृह्यावरुन्ध इति ॥ ४ ॥

(राजसूयान्तर्गतानुमत्यादीष्टावन्वारम्भणीयाया बाधाधिकरणम् ॥३॥)

[३] प्रधानाच्चान्यसंयुक्तात्सर्वारम्भान्निवर्तेतानङ्गत्वात् ॥ ५ ॥ सि०

अस्ति राजसूयः, राजसूयेन स्वाराज्यकामो यजेतेति । तत्रेष्टिपशुसोमदर्विहोमाः प्रधानभूताः । पेष्टिकेष्वनुमत्यादिषु संशयः । किमारम्भणीया कर्तव्या, नेति । किं प्राप्तम् । कर्तव्या । विधे कारणान्तरेऽतिदेशात्सर्वकर्म स्यादिति ।

एवं प्राप्ते, ब्रूमः । प्रधानाच्चापरप्रधानसंयुक्तान्निवर्तितुमर्हति । कुतः । सर्वारम्भार्थेन तत्र ज्योतिष्टोमः समाम्नायते । अग्निष्टोमं प्रथममाहरन्तीति । स प्रकृतानां प्रधानानामेकैकस्य तन्त्रेण समाम्नातो भवितुमर्हति । एकैकस्य ह्यत्र प्रधानस्य तन्त्रेण साधारणं प्रकरणम् । तेनानुमत्यादीनामारम्भार्थे सिद्धे, नाऽऽरम्भणीया भवितुमर्हतीति ॥ ५ ॥

अपि च दीक्षणीययैव ज्योतिष्टोम आरम्भार्थः सिध्यतीति— अयुक्तोऽयं ग्रन्थः । पुरुषसंस्कारद्वारेणोपकरोति दीक्षणीया । नाऽऽरम्भार्थतया । न चास्या वचनमस्त्यारम्भणीया कार्ये वर्तते दीक्षणीयेति । दीक्षासंजननपरया उत्पत्तिवाक्येनैवावगम्यते । तस्मादाग्नावैष्णवस्तुत्यर्थोऽयमर्थवाद. ॥ ४ ॥

सर्वारम्भार्थेन तत्र ज्योतिष्टोमः समाम्नायत इत्युक्तम् । कथम् । ज्योतिष्टोमः श्रुत्या फलेन संबध्यते । न चोभयार्थता युक्ता, विना वचनेन । अनुमानाद्यपि कार्यापत्तिप्रमाणं न विद्यते । तस्मादयुक्तं प्रत्याम्नानाभिधानम् । अर्थलोप एव वक्तव्यः ।

ननु ऋत्विग्वरणं सर्वप्रधानार्थम् । तत्र प्रधानत्वादिष्टीनामारम्भणीया भविष्यति । उच्यते । तथाऽपि स्वप्राकृतकार्यत्वान्निवृत्तिः । यथा यूपावटबर्हिषि प्रोक्षणस्य निवृत्तिः ॥ ५ ॥

---

१ देवताश्चैवं—पा० । २ प्राकृतानां—पा० ।

(आरम्भणीयायामारम्भणीया अननुष्ठानाधिकरणम् ॥ ४ ॥)

[४] तस्यां तु स्यात्प्रयाजवत् ॥ ६ ॥ पू०

अस्त्यारम्भणीयेष्टिः, आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावारप्स्यमाणः, सरस्वत्यै चरुम्, सरस्वते द्वादशकपालम्, अग्नये भगिनेऽष्टाकपालं यः कामयेत भग्यन्नादः स्यामिति । नित्यवदेके भगिनमामनन्ति ! तत्रैषोऽर्थः सांशयिकः। किमारम्भणीयायामारम्भणीया कर्तव्या, उत नेति । किं प्राप्तम् । तस्यां तु स्यात्प्रयाजवत् । संशयनिवृत्त्यर्थं तुशब्दः । न खलु संशयोऽस्ति । आरम्भणीयायामारम्भणीया भवितुमर्हति । कुतः । विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यादिति । यथा, प्रयाजा एवमारम्भणीयाऽपीति । आह । ननु तस्या अप्यर्थेऽन्याऽऽरम्भणीया, तस्या अप्यर्थेऽन्याऽऽरम्भणीया, तस्या अप्यर्थेऽन्येत्येवमारम्भणीया न व्यवतिष्ठेत । व्यवस्थितेन च शास्त्रार्थेन भवितव्यम्। अत्रोच्यते । सर्वास्वेवानवस्थासु सामर्थ्येन व्यवस्था भविष्यति ॥ ६ ॥

न वाऽङ्गभूतत्वात् ॥ ७ ॥ सि०

न वेति पक्षः प्रतिषिध्यते । न स्यादारम्भणीयायामारम्भणीयेति । कुतः । अङ्गभूता हि सा दर्शपूर्णमासयोः । अङ्गभूतस्य च प्रधानारम्भेणैव सिद्धिरित्युक्तम् । आरम्भणीयाप्रवृत्तेन दर्शपूर्णमासौ कर्तव्यौ । अतः प्रकृतिवदारम्भणीयाऽप्यारम्भणीयाप्रवृत्तेन कर्तव्येति । तस्मात्किलाऽऽरम्भणीयायामारम्भणीया स्यात् । तच्च नैवम् । अङ्गत्वाऽप्यन्यामारम्भणीयामारम्भणीयां कुर्वन्नारम्भणीयाप्रवृत्त एव करोतीति गम्यते । तस्मान्नारम्भणीयायामारम्भणीया स्यात् । अपि च जलबुद्बुदवदव्यवस्थाऽऽरम्भणीयायां वाक्येन गम्यमाना सामर्थ्येन

---

[1]समानेऽहनीति सामर्थ्यम् ॥ १ ॥

अङ्गभूता हि सा दर्शपूर्णमासयो. । अङ्गभूतस्य च प्रधानारम्भेणैव सिद्धिः । यद्येवं दीक्षणीयादिवन्मन्यसे । तत्र । कस्मात् । दर्शपूर्णमासप्रयोगाद्बहिरारम्भणीया क्रियते । न तु तथा दीक्षणीयादि । तस्मादयुक्तमेतत् । अङ्गं चेयं कथंभावपरिपूर्णाऽऽरम्भणीया विधीयते । सा च दर्शपूर्णमासधर्मानाकाङ्क्षति । तौ च प्राधि-

---

१ समाने ह्नव सामर्थ्यम्—इति मुद्रितपुस्तके पाठः ।

बाध्येत। असमत्वासे नाव्यवस्था, न बाधः। तस्मान्नाऽऽरम्भणीयायामारम्भणीयेति ॥ ७ ॥

एकवाक्यत्वाच्च ॥ ८ ॥

इतश्च पश्यामः, एवमेवेति। कुतः। एकं हीदं वाक्यं, यदाऽऽरम्भणीयां विदधाति, तदा नासौ दर्शपूर्णमासयोर्विहिता। तामविहितामिव दर्शपूर्णमासयोर्विदध्यात्। विहितामिव चाऽऽरम्भणीयामतिदिशेत्। नैतत्कर्तुमलं भवति सकृदुच्चरितम्। तस्मादप्यारम्भणीयायामारम्भणीया नास्ति ॥ ८ ॥

(खलेवाल्यां यूपाहुतेरननुष्ठानाधिकरणम् ॥ ९ ॥)

[५] कर्म च द्रव्यसंयोगार्थमर्थाभावान्निवर्तेत तादर्थ्यं श्रुतिसंयोगात् ॥ ९ ॥ सि०

तस्मिन्नेव ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभत इति। तत्रेदमाम्नायते, यूपमच्छेष्यता होतव्यम्। न हि दीक्षितस्याग्नौ जुहोति। आज्यं चारणिं चाऽऽदाय यूपस्यान्तिकेऽग्निं मथित्वा यूपाहुतिं जुहोतीति। साद्यस्क्रे श्रूयते, खलेवाली यूपो भवतीति। तत्रैषोऽर्थः सांशयिकः। किं साद्यस्क्रे खलेवाल्यां यूपाहुतिः कर्तव्या, नेति। किं प्राप्तम्। कर्तव्या। विधेः प्रकरणान्तरेऽविदेशात्सर्वकर्म स्यादिति।

एवं प्राप्ते, ब्रूमः। कर्म चैतद्द्रव्यसंयोगार्थं–यूप एवमादिभिः संस्कारैर्भविष्यतीति क्रियते। यूपं प्राप्तुमेष्यत एतच्छ्रूयते। तेनास्य संस्कारस्य श्रुतिसंयोगेन यूपार्थता। अच्छशब्दो हि, आप्तुमित्यस्यार्थे वर्तते। न चात्र यूपेन प्रयोजनम्। अयूपे हि खलेवाल्यां पशुर्बध्यते। तस्मादत्र यूपकरणार्था यूपाहुत्यादयः संस्कारा अर्थलोपान्निवर्तितुमर्हन्तीति। तस्मान्नास्ति खलेवाल्यां यूपाहुतिरिति ॥ ९ ॥

(साद्यस्के स्थाण्वाहुतेरननुष्ठानाधिकरणम् ॥ १ ॥)

[६] स्थाणौ तु देशमात्रत्वादनिवृत्तिः प्रतीयेत ॥ १० ॥ पू०

तस्मिन्नेवाग्नीषोमीये पशौ श्रूयते, स्थाणौ स्थाण्वाहुतिं जुहोतीति। ततः

घानादारम्भणीयाशून्यो ॥ ७ ॥ [॥ ८ ॥ ९ ॥

साद्यस्केऽपमर्थः सांशयिको भवति । किं साद्यस्के स्थाण्वाहुतिः कर्तव्या, नेति । तत्रैतत्तावत्त्रः परीक्ष्यम् । किमारादुपकारकं कर्म स्थाण्वाहुतिः, उत यूपसंस्कार इति । यद्यारादुपकारकं कर्म तदा कर्तव्या । अथ यूपसंस्कारः, निवर्तेतेति । कथमारादुपकारकं कर्म स्यात्, कथं वा यूपसंस्कार इति । यद्येवमभिसंबन्धः क्रियते, यूपमच्छेत्स्यता स्थाण्वाहुतिः कर्तव्येति, ततो यूपसंस्कारः । अथ यूपमच्छेत्स्यतेति प्रकृतेन न संबध्येत, तदाऽऽरादुपकारकं कर्मेति । किं तावत्प्राप्तम् । आरादुपकारकं कर्मेति । एतद्विज्ञातं कर्मणा प्रयोजनम् । भूतं हि तावद्दं व्यार्थमिति ।

अपि च निर्वृत्तप्रयोजनेन स्थाणुना संबध्यमानाऽऽहुतिः किमिव यूपस्योपकरिष्यति । संबद्धे हि क्रियमाण संबन्धिन्युपकुर्यात् । व्यावृत्तो हि यूपात्स्थाणुः । अपि च तन्त्रमेकादशिन्या यूपाहुतिर्भविष्यति, यद्यारादुपकारकं कर्म स्यात् । तथा हि नाभ्युतोऽभ्यासः कल्पयिष्यते । अपि च, अविशिष्टेन वाक्येन स्थाणौ स्थाण्वाहुतिः श्रूयते । सा च प्रकरणेन यूपत्रश्चनस्थाणुविशेषे कल्प्येत । तस्मादारादुपकारकं कर्म स्थाण्वाहुतिः, साद्यस्के च कर्तव्या चोदकानुग्रहायेति । एवं प्राप्तम् ॥ १० ॥

एवं प्राप्ते, ब्रूमः—

अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेत ॥ ११ ॥ सि०

अपि चेति पक्षव्यावृत्तिः । यूपसंस्कारः प्रतीयेत । कुतः । प्रकरणविशेषात् यूपमच्छेत्स्यतः स्थाण्वाहुतिर्विधीयत इति गम्यते । यो हि मन्यतेऽविशिष्टेन वाक्येन स्थाणुदेशमात्रे विधीयत इति । फलं तस्य कल्पनीयं भवति । योऽपि मन्यते प्रकरणादारादुपकारकमग्नीषोमीयस्य भवतीति । तस्यापि प्रकरणसामान्यं प्रकरणविशेषेण बाध्येत । कर्मशेषभूतश्च यूपः, प्रयोजनवत्त्वात्तेन संबध्यमानाऽदृष्टार्थाऽपि आरादुपकारिका सती कल्प्यप्रयोजना स्यात् । अतः प्रसिद्धिर्न्यायेन बाध्येत । यथा, अभ्यञ्जनं इति । निर्वृत्तप्रयोजने चापि स्थाणौ यूपाद्व्यावृत्ते च यूपीयोऽसाविति कृत्वा तत्र क्रियमाणा यूपाहुतिर्यूपसंबद्धा कृता भवतीति तदा-

१० ॥

ग्रथने क्रियते । यथा शिरसा धारितायाः स्रजः शिरसोऽवतारिताया देवदत्तीयाऽसाविति कृत्वा शुचिदेशनिधानादिः संस्कार एषितव्यो भवति । एवं स्थाण्वाहुतिरपि । एकादशिन्यां चान्तिकदेशस्याविवक्षितत्वाचन्त्रं यूपाहुतिर्भविष्यत्येव । तस्मात्संस्कारपक्ष एव ज्यायान् ॥ ११ ॥

समाख्यानं च तद्वत् ॥ १२ ॥

स्थाण्वाहुतिरिति च समाख्यानं स्थाणुप्रधानाया इवाऽऽहुतेर्भवतीति । कथम् । षष्ठीसमासोऽयम् । कर्मणि षष्ठी । ईप्सिततमं च कर्म । सप्तमीसमासो लक्षणायेत इति कृत्वा नाऽऽदर्तव्यो भवति ॥ १२ ॥

मन्त्रवर्णश्च तद्वत् ॥ १३ ॥

इतश्च पश्यामः संस्कारकर्मेति । यतो मन्त्रवर्णोऽपि तद्वद्भवति । अतस्त्वं देववनस्पते शतवल्शो विरोह, इति । यस्त्वं मया छेत्स्यः, सोऽत आव्रश्चनाद्बहुप्रकारो विरोहेति यूपमित्राऽऽद्रियमाणो मन्त्रवर्णो भवति । तस्मादपि संस्कारकर्म खलेवाल्यां न कर्तव्यमिति ॥ १३ ॥

(उत्तमप्रयाजस्य संस्कारकर्मत्वाधिकरणम् ॥ ७ ॥)

[७] प्रयाजे च तन्न्यायत्वात् ॥ १४ ॥ सि०

दर्शपूर्णमासयोराम्नायत उत्तमः प्रयाजः, स्वाहाकारं यजतीति ।

---

११ ॥]

'स्थाण्वाहुतिः' इति षष्ठीसमासोऽयं, सप्तमीसमासानुपपत्तेः । कथम् । सप्तम्यन्तस्य शौण्डादिभिः सह समासः । ननु, संज्ञायामिति समासो भविष्यति । उच्यते । तत्राऽलुक् प्राप्नोति । यथा, अरण्येतिलका इति । नैतदेवम् । हलदन्तात्स उच्यते । उकारान्तं चेदम् । तस्माल्लुगेव । एवं तर्ह्यन्यथा नियमः । अर्थप्रयुक्तो हि समासः । सप्तमीसमासेऽधिकरणप्रधानो निर्देशः । तत्राऽऽहुतिरारादुपकारिका । षष्ठीसमासे संबन्धः प्रधानम् । तत्राऽऽहुतिः संस्कारिका । आरादुपकारकाच्च सामवायिकं गरीयः । ननूभयथाऽप्यदृष्टार्था । किमत्र गरीयस्त्वम् । उच्यते । सत्यमदृष्टार्था । किंतु, समवायसंबन्धः बलवत् । आरादुपकारकत्वे कल्प्यः संबन्धः । तत्र प्रकरणेनैकवाक्यता ॥ १२ ॥ [१३ ॥]

ननु पूर्वपक्षेऽपि संस्कारकर्मैव । अन्यत्र स्वाहाकारो विहितः । तस्य स्मारको म०

---

१ इष्ट.–पा० । २ किंतु सामवायिकत्वे संबन्धः कल्प्य इति पाठ उचित इति भाति ।

तत्र संशयः । किमुत्तमः प्रयाज आरादुपकारकं कर्म, उत संस्कारकर्मेति । तत एतत्तावत्परीक्ष्यते । किमाज्यभागादिषु या देवता यष्टव्यास्ता एवात्र देवताः, उतान्यास्ताभ्यो देवताभ्य इति । कथमन्या देवताः, कथं वा प्रकृताः स्युरिति । यदि स्वाहाकारं यजतीति देवताविधानं, ततोऽन्या प्रकृताभ्यो देवता । अथ, ये यजामहे स्वाहाऽग्निमिति निगदेन मान्त्रवर्णिको देवताविधिस्ततः प्रकृता देवता इति ।

किं प्राप्तम् । आरादुपकारकं कर्मेति । तदेतद्वर्ण्यते । अन्या देवता, स्वाहाकारं यजतीत्यनेन विधीयते । एवं वचनप्राप्ता भविष्यति । इतरथा मान्त्रवर्णिकी कल्पयितव्या भवेत् । नन्वन्याऽग्न्यादिशब्देन शक्यते वदितुम् । तत्रायं, ये यजामहे स्वाहाऽग्निमिति मन्त्रवर्णोऽपि विप्रतिषिध्येत । अत्रोच्यते । नैतद्विप्रतिषिद्धम् । अनेकस्याप्येकः शब्दो भवति वाचकः । तद्यथा, मातेति मातरमपि वदति, मातारमपि । माता च परमं दैवतं, समा च पुत्रेष्वित्येतैरुपलक्ष्यमाणो जननीवचनोऽवगम्यते । माता समः, क्षिप्रश्चेत्येभिरप्यनुबध्यमानो धान्यस्य मातुर्वाचकः । एवं मन्त्रेऽप्यग्न्यादयः स्वाहाकारदेवताके यागे प्रयुज्यमानास्तद्वाचिनोऽवगम्येरन् । तथा सति प्रज्ञातं यागस्य कार्यमनुगृहीतम्, आरादुपक्रिया । तस्मादारादुपकारकं कर्मोत्तमः प्रयाज इति ।

एवं प्राप्ते, ब्रूमः । प्रयाजे च तन्न्यायत्वात् । उक्तमधस्तात्स्थाण्वाहुतिः संस्कारकर्मेति, इहापि चशब्देनान्वादिश्यते, उत्तमः प्रयाजः संस्कारकर्मेति । तत एतत्तावद्वर्णयन्ति । या आज्यभागादिषु देवता यष्टव्यास्ता एवेह देवता इति । कुतः । स्वाहाकारस्य देवतासंयोगाभावात् । तद्धितेन वा देवतासंयोगो विज्ञायते, चतुर्थ्यन्तेन वा । न चेह तद्धितो न चतुर्थी । अतो न देवताविधिः । यागसामानाधिकरण्यं च द्वितीयया गम्यते । तस्माद्यागवचनः स्वाहाकारशब्दो यथा समिद्दादय इति ।

षिष्यति । नारिष्टहोमादिषु । न शब्दपदार्थनिर्देशात् । शब्दो ह्यर्थस्य स्मारको न शब्दस्य । स च स्वाहाकारमन्त्रेणैव चोद्यते । वाचनिकोऽयं देवताविधिः । करणेन मन्त्रेण देवताऽवगम्यते । यथा 'सूक्तवाकेन प्रस्तरम्' इति । न चायं करणनिर्देशः ।

१ सप्त—पा० । २ देवता गम्यते—पा० ।

आह । यदि द्वितीयया संयोगात्तं यागवचनं मन्यसे, आरादुपकारकस्तर्हि यागः । ईप्सिततमे हि द्वितीया विभक्तिर्भवतीति । अत्रोच्यते । एवमेव मासे वदामः । तन्न्यायत्वादिति । स एव न्याय इह, यः स्वाध्यायकृतो । अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेतेति । शेषभूताश्चाऽऽज्यभागादिष्वग्न्यादयः । तदर्थो यागः सन् प्रयोजनवान् भवति । इतरस्मिन् पक्षे यागो निष्प्रयोजनः स्यात् । तदर्थं देवताभिधानमपि निष्प्रयोजनं स्यात् । सत्यां च देवतासंस्कारशङ्कायां यागप्रयोजनं कल्पयितुं न शक्यते । तथाऽग्न्यादीनां संभवति स्वार्थेऽदृष्टा स्वाहाकारवचनता न शक्या कल्पयितुम् । तस्माद्देवतासंस्कारार्थमुत्तमः प्रयाजः । देवतास्मरणसंस्कारद्वारं चादृष्टमपि तस्माद्यागाद्भवतीति ॥ १४ ॥

लिङ्गदर्शनाच्च ॥ १५ ॥

लिङ्गमप्यस्मिन्नर्थे भवति । किं लिङ्गम् । संप्रतिपन्नदेवताकत्वादुपांशुयाजस्येवोत्तमप्रयाजस्य निगदो दृश्यते । स्वाहाऽग्निं स्वाहा सोमं स्वाहा सवितारं स्वाहा सरस्वतीं स्वाहा पूषणमित्येवंलक्षणकः । स देवतासंस्कारपक्षेऽवकल्पते । इतरस्मिन्नदृष्टार्थः स्यात् । तस्मादपि देवतासंस्कार उत्तमः प्रयाजः स्यात् । प्रयोजनं विप्रतिपन्नदेवताकेषु सौर्यादिकर्मसु प्राकृतानि देवतापदानि न निवर्तन्ते पूर्वपक्षे । सिद्धान्ते तु निवर्तन्ते ॥ १५ ॥

(आग्नेयाज्यभागस्याऽऽरादुपकारकत्वाधिकरणम् ॥ ८ ॥)

[८] तथाऽऽज्यभागाग्निरपीति चेत् ॥ १६ ॥ पू०

दर्शपूर्णमासौ स्तो दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तत्रे-

---

ननु चाग्निशब्दः स्वाहाकारं न शक्नोति वक्तुम् । उच्यते । शक्ष्यति, द्वयर्थस्याम्नातृवदिति । अत्राभिधीयते न हि द्वितीयान्तेन शब्देन देवतोद्दिश्यते, प्रमाणाभावात् । अपि च स्वाहाकारः शब्दपदार्थको न शक्नोति देवता वक्तुम् । तस्मान्मान्त्रवर्णिको देवताविधिः । प्रकरणात्क्रमसहितात्करणम वोऽवगम्यते । स्मरणं च प्रधानदेवतयाऽपेक्षितम् । अतस्तेनैवांशेन संबध्यते ॥ १४ ॥ [१५ ॥

---

१ (अ० १० पा० १ अ० ६ सू० ११) । २ देवता प्रोच्यते—पा० ।

दमाम्नायते । आज्यभागौ यजतीति । इदं चापरं श्रूयते । तौ होचतुः किमावयोरततः स्यादिति । यस्यै कस्यैचिद्देवतायै हविर्निर्वपेस्तद्वान् पुरस्तादाज्यस्य यजन्निति । तस्माद्यस्यै कस्यैचिद्देवतायै हविर्निर्वपन्ति ते पुरस्तादाज्यभागावग्नीषोमाभ्यां यजन्ति, तौ न सौम्येऽध्वरे न पशौ, इति । तत्रैतत्संदिह्यते । यदाज्यभागयोरग्नीषोमाविज्येते, किं तत्राग्नियागो देवतासंस्कारार्थं उताऽऽरादुपकारक इति । किं प्राप्तम् । इति चेत्संदेहं पश्यसि, तथा, आज्यभागाग्निरपि स्यात् । यथोत्तमः प्रयाजः । अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेतेति ॥ १६ ॥

व्यपदेशाद्देवतान्तरम् ॥ १७ ॥ सि०

न चैतदस्ति, देवतासंस्कार आज्यभागयोरिति । किं तर्हि । आरादुपक्रिया । कुत. । व्यपदेशादवगम्यते । प्रधानाग्नेर्देवतान्तरमिहेज्यत इति । कोऽसौ व्यपदेशः । अग्निमग्न आवह, सोममावह, अग्निमावह, इति । कथमस्मिन्नावाहन एतावत्यश्च देवता इज्येरन्निति । एवमावाहनेन देवतास्वव्यामोहार्थं परिगण्यमानासु द्विरग्निशब्देन परिगणनं कृतम् । तद्देवतान्तरेऽवकल्पते । इतरथा हि संख्याबुद्ध्या व्यामुह्येत । गणनं चोभयोरपि पक्षयोस्तुल्यम् । अपि च स्वपक्षे सोमव्यवधानाद्गणने क्रमो बाध्येत । अपि च, असकृद्वचनं शब्देनानुबध्यमानमन्यमिव व्यपदिशति । यथा, ब्राह्मण आगतो वृषल आगतो ब्राह्मण आगत इति द्वयोरिव ब्राह्मणयोर्भवति गणनावादः । एवमिहापि द्वयोरिवाग्न्योर्भवति वादः । स एष व्यपदेशो भवति लिङ्गम् ॥ १७ ॥

प्राप्तिस्तु वक्तव्या । सोच्यते—

समत्वाच्च ॥१८॥

इयं प्राप्तिः । समोऽत्र देवतया याग. । देवताऽपि श्रुता प्रधानयागे । यागोऽपि वाक्यान्तरे । आज्यभागौ यजतीति । तदिहोभयोर्यागदेवतयोः प्रयोजनवतोर्देवताया यागार्थता न्याय्या । मन्त्राणां द्वारादुपकारकत्वं

---

१६ ॥ ॥ १७॥

आज्यभागो देवतामपेक्षते, (प्रधानयागो देवतास्मारकम् ।) तत्र यागो देवताया

---

१ देवतान्तरमिज्यते—पा० । २ कुण्डलितः पाठो लिखितपुस्तकेषु नास्ति ।

यागस्येति । न हि देवतां विना यागो भवति । तेन स देवतामाकाङ्क्षति, न तु प्रधानदेवता यागान्तरमाकाङ्क्षति । यच्च येनाऽऽकाङ्क्ष्यते तत्तदर्थं भवति । तस्माद्देवता यागार्था । अपि च, आराादुपकारकैः कर्मभिः साम्यं भवति । कथम् । अक्षी वा एतौ यज्ञस्य यदाघारौ, चक्षुषी वा एतौ यदाज्यभागौ, यत्प्रयाजा इज्यन्ते वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्यस्याभिभूत्यै, इति ॥ १८ ॥

(पशुपुरोडाशयागस्य पशुयागीयदेवतासंस्कारकत्वाधिकरणम् ॥ ९ ॥)

[९] पशावपीति चेत् ॥ १९ ॥ पू०

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः । आ सोमं वहन्त्यग्निना प्रतितिष्ठन्ति तौ संभवन्तौ यजमानमभिसंभवतो वरुणपाशाभ्यां वा एषोऽभिधीयते, यो दीक्षितो यदग्नीषोमीयं पशुमालभते, वरुणपाशाभ्यामेव मुच्यत इति । तत्रेदं समामनन्ति । अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमनुनिर्वपतीति । तत्र संदेहः । किं पुरोडाशयाग आरादुपकारक उत देवतासंस्कारार्थ इति ।

किं तावत्प्राप्तम् । ततः प्रयाजाधिकरणे पराजितोऽपि हेतुः केनचिदपरेण विशेषेण पुनरनुमाण्यत इति पुनरुपदिश्यते, पशावपीति चेत् ।

विना न भवतीति । न तु प्रधानदेवताऽऽज्यभागस्मारकमपेक्षते । तस्माददृष्टार्थ आज्यभागः । अस्मिन्व्याख्याने स्वाहाकारोऽप्येवमेवाऽऽपद्यते । यदि कश्चिद्ब्रूयात्, तस्मिन् मन्त्रे वक्ष्यमाणा देवता विद्यन्ते । तस्मात्तत्संस्कारकोऽयं, न त्वाज्यभागे । सत्यं विद्यते, निर्वर्त्यांशेनैव यागो गुणभूता देवतामाकाङ्क्षति । तस्मादाज्यभागस्वाहाकारयोस्तुल्यत्वात्कथं स्वाहाकाराधिकरणम् ।

उच्यते । यागो हि निर्वृत्तः सन्निपरिवृत्य देवताप्रकाशनद्वारेणैवोपकरोति । तस्याः प्रकाशनमपूर्वेणैवापेक्ष्यते । तदस्य दृष्टमेव प्रयोजनं न त्वाज्यभागेऽपीदृशमेव प्राप्नोति । तत्त्वं विधानात्तादृशमपूर्वेण नापेक्ष्यते । आज्यभागाविति च द्विसंख्या श्रूयते । सा च केनचित्समानयोगेन प्रवर्तते । तत्र सोमस्तावदारादुपकारकः । यद्यपरोऽप्यारादुपकारक एव द्विसंख्या युज्यते, नान्यथा ॥ १८ ॥

अपि च यस्य प्रधानभूता देवता तस्य धर्मा एव न प्राप्नुवन्ति । तत्र ' अग्नि-

---

१ तस्मिन्—पा० । २ विषमात्प्रत्यनेनापूर्वेण—पा० ।

इति चेत्पश्यसि, किमारादुपकारको देवतासंस्कार इति । पशावप्यारादुपकारकः स्यात् । एतद्धि कर्मणा प्रसिद्धं कार्यम् । अग्नीषोमीयमिति च गुणभूतदेवताकस्तद्धितशब्दो भवति । पशावपि तद्धित एव शब्दो वाक्यशेषेण बलवता व्यक्तवचनो व्यपदिश्यते, न नियोगतस्तद्वचनः पशुपुरोडाशे । अतः प्रसिद्धेरारादुपकारकत्वम् ॥ १९ ॥

न तद्भूतवचनात् ॥ २० ॥ सि०

(नेति प्रतिषेधकः शब्दः । आ सोमं वहन्त्यग्निना प्रतितिष्ठन्तीत्यर्थवादवचन एषः । यद्यर्थवादवचनादन्या पशौ देवता, अन्या पुरोडाशयाग इति गम्यते । अर्थवादवचनादेव सैषेत्यवगन्तव्या । एवं ह्याह । यद्देवत्यः पशुस्तद्देवत्यः पशुपुरोडाश इति । तस्मादर्थवादसामर्थ्ये दैवतासंस्कार इति गम्यते ॥ २० ॥

लिङ्गदर्शनाच्च ॥ २१ ॥

इतश्च पश्यामः संस्कारकर्म पशुपुरोडाश इति । कुतः । लिङ्गमप्येतमर्थं दर्शयति । इन्द्राय वज्रिणे वृषभमालभेतेत्यस्य पशोः पुरोडाशस्य क्रमे संप्रतिपन्नदेवताकं याज्यानुवाक्याद्वयं समाम्नानम् । इन्द्रं स्तुहि वज्रिणं स्तोमपृष्ठं, स्तुहि शूर वज्रिणं सुप्रतीतमिति च । तत्संस्कारपक्षेऽवकल्पते, नान्यथा । तस्मात्पशुदेवतासंस्कारार्थं पुरोडाशयाग इति ॥ २१ ॥

गुणो वा स्यात्कपालवद्गुणभूतविकाराच्च ॥ २२ ॥

विशेषविवक्षया पुनरतमेव हेतुं व्यपदिशति । वाशब्देन पक्षं व्यावर्तयति । गुण स्याद्देवता । एवमारादुपकारकत्वप्रसिद्धिरनुग्रहीष्यते । अनेकगुणभावश्च कपालवद्भविष्यति । यथा कपालं श्रपणेऽपि तुषोपवपनेऽपि । एवमग्नीषोमावप्यभिन्नौ पशुयागे पुरोडाशयागे च गुणभूतौ भविष्यतः । एवं च सति दार्शपौर्णमासिकयोरग्नीषोमयोर्गुणभावेन

...कः स्विष्टकृत्' इति दर्शनं नोपपद्यते । कथं धर्मा न प्राप्नुवन्ति । उच्यते । विकृतौ सादृश्येन धर्मप्राप्तिः । (विपदृशयोस्त्वग्नीषोमयोः) प्रकृतौ गुणभूतयोरग्नीषोमयोर्धर्मा विहिताः, विकृतौ प्रधानभूतयोरित्येतद्वैसादृश्यम् । अयमभिप्रायः पूर्वपक्षोदयनः ॥ १९ ॥ [२० ॥ २१ ॥

---

१ तद्धित एव—पा० ।

यामे द्वारभूतयोर्धर्म आम्नातः । इह गुणभूतयोरेवाविरोधेन भविष्यति । इतरथा प्रधानभूतयोरन्यकार्ययोर्न प्राप्नुयात् । दृश्यते च, अनिरुक्तः स्विष्टकृदिति । तस्मादप्याराद्उपक्रिया । अपि च सौत्रामण्यामाश्विनसारस्वतसुत्रामदेवताकेषु पशुषु, ऐन्द्रवरुणसावित्राः पुरोडाशाः पशुप्रकरणान्नोत्कृष्यन्ते । संस्कारपक्ष उत्कृष्येरन् । छिद्रापिधानार्थतायाश्चोक्तमर्थवादत्वम् । तस्मादप्याराद्उपक्रिया ॥ २२ ॥

अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेत स्वाहाकारवदङ्गानामर्थसंयोगात् ॥ २३ ॥

अपि वेति पक्षव्यावृत्तिः । नाऽऽराद्उपकारकं कर्म । तत्संस्कारः प्रतीयेत, देवतासंस्कार इति । कुतः । शेषभूतत्वाद्देवतायाः प्रयोजनवत्त्वम् । तस्माद्यथा स्वाहाकारयजिर्निष्प्रयोजन इति देवतासंस्कारः प्रतीयते, एवमिहापि । अङ्गानामर्थसंयोगात् । अर्थेन-प्रयोजनेन संयोग इह गम्यते वाक्येन । तेन नाऽऽराद्उपकारकम्, आराद्उपकारकेभ्यः सामवायिकान्यङ्गानि बलीयांसि भवन्तीति । यदुक्तम् । गुणभूतदेवताकेन तद्धितशब्देन निर्देश इति । प्रधानभूतदेवताकेनाप्येवंजातीयकेन शब्देन संबन्धे विधीयमाने निर्देशो भवति । अपि च, दृष्टकार्यपदृशाद्दोषः । तस्मात्संस्कारकर्मेति ॥ २३ ॥

व्यृद्धवचनं च विप्रतिपत्तौ तदर्थत्वात् ॥ २४ ॥

इतश्च संस्कारकर्मेति । सौत्रामण्यां पशुपुरोडाशदेवताविप्रतिपत्तौ व्यृद्धवचनं देवतासंस्कार एवावकल्पते । यद्वै सौत्रामण्यां व्यृद्धं तदस्याः समृद्धं, यदन्यदेवत्याः पशुपुरोडाशा भवन्ति, अन्यदेवत्याः पशव इति ॥ २४ ॥

गुणेऽपीति चेत् ॥ २५ ॥

एवं चेत्पश्यसि, संस्कारपक्षे व्यृद्धवचनमवकल्पत इति । तन्न । संस्कारपक्षेऽपि व्यृद्धवचनं नावकल्पते । न हि तत्र किंचिद्व्यृद्धं, विप्रतिपन्नदेवताकेनैव पुरोडाशेनैतत्कर्म समृद्धतरं भवति । एवं प्राप्ते ।

---

२२ ॥ २३ ॥ २४ ॥

यदन्यदेवत्याः पुरोडाशा भवन्ति, अन्यदेवत्याः पशव इति, तदस्यां समृद्धं भवतीति। यश्चोभयोः पक्षयोर्दोषः, न तमेकश्चोद्यो भवति। यथैव हि संस्कारपक्षे व्यृद्धवचनमर्थवाद एवमितरस्मिन्नपि पक्षेऽर्थवादो भविष्यति ॥ २५ ॥

नासंहानात्कपालवत् ॥ २६ ॥

नैतदेवं, भवदीये पक्षे न किंचिदपि हीनम्। यथैवैकेन कपालेन तुषेपूप्यमानेष्वन्येषां कपालानां न किंचिद्धीयते। एवमन्यया देवतया पशुपुरोडाशयागे निर्वर्त्यमाने न किंचित्पशुदेवतायां हीयते। तत्राव्यृद्ध एव व्यृद्धवचनं भवति। मदीये तु पक्षे देवताप्रकाशनमङ्गभूतं हीयते। अन्यदेतदुच्यते, यद्व्यृद्धमपि समृद्धं भवतीति। अहीने तु व्यृद्धशब्द उच्चरिते न शब्दार्थो गृहीत इति ॥ २६ ॥

ग्रहाणां च संप्रतिपत्तौ तद्वचनं तदर्थत्वात् ॥ २७ ॥

इतश्च संस्कारकर्मेति। सौत्रामण्यां संप्रतिपन्नदेवताकेषु ग्रहेषु तद्वचनं भवति। पुरोडाशवचनम्। नैतेषां पशूनां पुरोडाशा विद्यन्ते, ग्रहपुरोडाशा ह्येते पशव इति न तावन्न विद्यन्ते। विप्रतिपन्नदेवताकेषु संस्काराभावमालोच्यैवमुच्यते। ग्रहा एषां पुरोडाशाः, ग्रहपुरोडाशा ह्येते, इति। किं तेषां पुरोडाशैः सामान्यम्। यद्येते देवतासंस्कारार्थाः। यदि पुरोडाशा अपि देवतासंस्कारार्था एवमेतदवकल्पते। तस्मात्संस्कारपक्ष एव श्रेयान् ॥ २७ ॥

ग्रहाभावे च तद्वचनम् ॥ २८ ॥

एवं श्रूयते, नैतस्य पशोर्ग्रहं गृह्णन्ति, पुरोडाशवानेष पशुरिति। पशुपुरोडाशवचनहेतुकं ग्रहाभावं ब्रुवन् ग्रहपुरोडाशयोरेकार्थतां दर्शयति। तत्र ग्रहस्य देवतासंस्कारार्थता विज्ञाता, यदि पुरोडाशोऽपि देवतासंस्कारार्थः, एवमेतदवकल्पते ॥ २८ ॥

देवतायाश्च हेतुत्वं प्रसिद्धं तेन दर्शयति ॥ २९ ॥

इतश्च पश्यामः संस्कारकर्मेति। एवं ह्याम्नायते, अग्निभ्यः कामेभ्यः पशव आलभ्यन्ते, कामा वा अग्नयः, आग्नेयाः पुरोडाशा भवन्ति, आग्नेया हि पशव इति। पशुदेवताहेतुकान् पुरोडाशान् ब्रुवन् देवतासंस्कारार्थतां पुरोडाशानां दर्शयति ॥ २९ ॥

---

२५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

अविरुद्धोपपत्तिरर्थापत्तेः शृतवद्गुणभूतविकारः स्यात् ॥ ३० ॥

अथ यदुक्तं, गुणभूतयोर्धर्मः प्रधानभूतयोरग्नीषोमयोर्न स्यादिति । उच्यते । अविरुद्धा प्रधानभूतयोरप्यग्नीषोमयोर्धर्माणामुपपत्तिः[1] कुतः । अर्थापत्तेः प्रधानभूतावपि प्राकृतं कार्यं यागनिर्वृत्तिं कुर्वाणौ द्वारभूताविति धर्मैर्योक्ष्येते, शृतवत् । यथा, शृते चरुं, दधश्वत्कमिति प्रदानार्थे दधिशृते प्रणीताकार्यं कुर्वाते इति धर्मैर्युज्येते । न च दोषो भवति ॥ ३० ॥

स द्व्यर्थः स्यादुभयोः श्रुतिभूतत्वाद्विप्रतिपत्तौ ताद-
र्थ्याद्विकारत्वमुक्तं तस्यार्थवादत्वम् ॥ ३१ ॥

अथ यदुक्तम्, ऐन्द्रवारुणसावित्राणां पुरोडाशानां सौत्रामणीप्रकरणादुत्कर्षः प्राप्नोति । तत्रेदमुच्यते । स द्व्यर्थो यागो देवतासंस्कारार्थश्छिद्रापिधानार्थश्च । उभयोरर्थयोः श्रुतिभूतत्वात् । अतो विप्रतिपन्नदेवताकेषु छिद्रापिधानार्थतया प्रकरणादुत्कर्षो न भविष्यति । तत्प्रकरणगत एवायं विकारो भविष्यतीति ॥ ३१ ॥

तस्याप्युक्तमर्थवादत्वमिति यदुक्तं, तत्रेदमुच्यते—

विप्रतिपत्तौ तासामाख्याविकारः स्यात् ॥ ३२ ॥

एवं तर्ह्यनेन प्रकारेण प्रकरणादनुत्कर्षः । देवतासंस्कारस्तावदेवंकरणादुत्कर्षेण न शक्यते बाधितुम् । तत्र सौत्रामण्यां संप्रतिपन्नदेवताका एव चोदकेन पुरोडाशाः प्राप्ताः । तत्रेन्द्रादयः शब्दाः पशुदेवतानामेव वाचकाः । कथम् । एकदेशा हि तेषामिमे वर्णान्तरसहिता उच्चारिता इति गम्यते । शक्नुवन्ति ह्येकदेशाः समुदायिनः समुदायं प्रत्याय्य समुदायार्थान् गमयितुम् । यथा गाव्यादयः । यथा च, सरस्वतीदेवताके निगदे, सरस्वति देवनिदो निबर्हय प्रजां विश्वस्य बृसयस्य मायिन इति[2], बृसयशब्दो बृहच्छब्दार्थं गमयति । किमर्थं पुनरेवं कल्प्यते । यतो देवतान्तराणि पशुदेवतासंस्कारार्थेषु यागेषु प्रत्याय्यमानान्यनर्थ-

१० ॥ ३१ ॥

[1] ऋ० सं० (अष्ट० ४ अ० ८ व० १०) । [2] बृसयशब्द इति—वेदभाष्ये परं, 'बृसय इति त्वष्टुर्नामधेयम्' इति विद्यारण्यस्वामिनः ।

कानि भवेयुः । तस्मात्पशुदेवतानामाख्याविकाराः पुरोडाशदेवताशब्दा इति ॥ ३२ ॥

अभ्यासो वा प्रयाजवदेकदेशोऽन्यदेवत्यः ॥ ३३ ॥

संस्कारपक्ष एव वाशब्दो युक्तिं व्यावर्तयति, न पक्षम् । न घाऽऽख्याविकारः । संस्कारपक्षेऽन्यथानुपपद्यमान आख्याविकारा भवन्ति । अनाख्याविकारेष्वपि संस्कारपक्षोऽवकल्पत एव । कथम् । अभ्यास एव पुरोडाशयागस्य भविष्यति । तत्र हि चोदकेन पशुदेवता च प्राप्नोति, पुरोडाशश्च । पशुदेवताया अन्यद्द्रव्यं विधीयते ग्रहः । पुरोडाशस्यान्या देवता । यागस्त्वविकृत एव तिष्ठति । स पशुदेवतासंबद्धश्चैव कर्तव्यो ग्रहसंबद्धश्च । तदुभयमनभ्यस्ते यागे न संभवतीत्यर्थादभ्यस्यते यागः । तस्यैकदेशोऽन्यदेवत्यः, प्रयाजवत् । तद्यथा पशौ पञ्चानां प्रयाजानां चोदकेन प्राप्तानामेकादशसंख्या विधीयते । सा चान्तरेणाभ्यासं नावकल्पत इत्यभ्यस्यन्ते प्रयाजाः ।

---

३२ ॥]

अस्या चोदकेन पशुदेवता प्राप्नोति, पशुपुरोडाशश्च । तत्र पशुदेवताया द्रव्यान्तरं विधीयते । पशुपुरोडाशस्य च देवतान्तरम् । यागस्त्वविकृत एवावतिष्ठते । यथाऽभ्युदितेष्ट्या सोऽभ्यस्यते । यथा सोमयाग इति ।

इमे सूत्रभाष्ये अयुक्ते । अस्यां सौत्रामण्यां पशुयागा आम्नायन्ते । देवतासंस्कारद्वारेण च पशुपुरोडाशाः प्राप्नुवन्ति । तत्र वाचनिकोऽयं देवताविधिः । तस्मादप्राकृतकार्यः पुरोडाशयागः । वचनसामर्थ्यात् । यो ग्रहो देवतासंबद्धः, स पशुपुरोडाशयागेन न संबध्यते । कथम् । अविशारवर्तमानत्वात् । कथं न विपरिवर्तते । अविधानात् । कथमविधानम् । अत्रोपकारा अतिदिश्यन्ते । यत्र प्रकरणं तत्र विपरिवृत्तिः । एतच प्रकृतौ ।

अभ्युपेत्य ब्रूमः । अस्ति प्रकरणं, विपरिवृत्तिश्च । तथाऽपि न संपद्यते । नेतरसोमधर्मिणा द्रव्यम् । तत्र 'सोमेन यजेत' इति सोमविशिष्टो यागो विधीयते । ऐन्द्रवायवादीनि ग्रहणानि सोमयागद्रव्यस्यैव संस्कारकाणि । तानि च ग्रहणानि प्रकरणेन गृह्यन्ते । अर्थात्तत्र यागाभ्यासः । इह पशुपुरोडाशयागद्रव्यस्य ग्रहदेवतया न कश्चित्संस्कारः क्रियते । तस्माद्यागान्तरम् । नाभ्युदितेष्टिवदभिधानि । नेतर-

---

१ ग्रहदेवताया वा—पा० ।

वेषामभ्यस्यमानानामेकदेशोऽन्या देवताः, दुरउपासानक्तेत्येवमादयः । एवमिहाप्यभ्यासः पुरोडाशयागस्य । तस्मादनुत्कर्षः संस्कारपक्षेऽपीति ॥ ३३ ॥

(सौर्ययागे चरुशब्दवाच्यौदनेन प्राकृतहविर्बाधाधिकरणम् ॥ १० ॥)

[१०] चरुर्हविर्विकारः स्यादिज्यासंयोगात् ॥ ३४ ॥ सि०

चरुः श्रूयते । सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति । सौर्य आग्नेयविकार इत्येतत्समधिगतम् । ऐकार्थ्याद्धिं नियम्येत पूर्ववत्त्वाद्विकारो हि, इति । तत्रैषोऽर्थः सांशयिकः । किं चरुः कपालविकारः, हविर्विकार इति । यदा हविर्विकारस्तदा किं स्थाल्या हविर्विक्रियत उतौदनेनेति । किं तावत्प्राप्तम् । हविर्विकारः स्यादिति । कुतः । इज्यासंयोगात् । तद्धितार्थो विधीयते चरोः, सौर्यं चरुं निर्वपेदिति । एवमिज्यार्थश्चरुः । तस्माद्धविर्विकार इति ॥ ३४ ॥

प्रसिद्धग्रहणत्वाच्च ॥ ३५ ॥ पू०

भ्युदितेष्ट्या तुल्यम् । तत्र निमित्ते सति विभागो विधीयते । यागस्तु विद्यत एव । न त्विह तथा विभागवचनं, येनाभ्युदयेष्ट्या तुल्यं स्यात् ।

ननु प्रत्यक्षः पशुपुरोडाशयागः । आनुमानिकस्तु देवतासंबन्धेन यागः । तस्मात् यागान्तरम् । नैतदेवम् । यद्यस्मिन्यागे येन केनचित्प्रकारेण निवेशः स्यात् । तद्यदि यागान्तरं न लभ्येत । यदि च प्रत्यक्षे यागे सत्यानुमानिको न लभ्येत, तदा दीक्षणीयादीनि सर्वाण्यकर्मान्तराणि भवेयुः । यदि चैको यागस्तदैक एव विध्यन्तः प्राप्नोति । द्वितीयस्य द्रव्यस्य चोदकवत्प्राप्नोति । एकेन प्रधानं भवतु । द्वितीयस्य तु प्रोक्षणादिविशिष्टार्थत्वेन प्राप्नोति । देवतयोस्तु यदि निवेशः स्यात् । प्रधानानुवादेन तु संख्या विधीयते । तत्र यागान्तराशङ्कैव नास्ति ॥ ३३ ॥

चरुशब्दस्योभयत्र प्रयोगः । स्थाल्यामोदने च प्रयोगमात्रेणैव शब्दार्थो भवति । अशब्दार्थे हि प्रयोगो दृश्यते । कथं खलु नियमः । ओदने च संस्मरणं, न स्थाल्याम् ॥ ३४ ॥

---

१ (अ० ८ पा० १ सू० १८) । २ सामान्याद्वा नियम्येत—पा० । ३ प्रकरणे—पा० ।

एवं स्थिते विशेष उच्यते । हविर्विकारः । प्रसिद्धग्रहणत्वाच्च स्थाल्या हविर्विकार. क्रियते । प्रसिद्धस्य ग्रहणं न्याय्यम् । प्रसिद्धश्च स्थाल्यां चरुशब्द', आ हिमवत', आ च कुमारीभ्यः प्रयुज्यमानो दृष्टः । तस्मात्स्थाल्या हविर्विक्रियत इति ॥ ३५ ॥

ओदनो वाऽन्नसंयोगात् ॥ ३६ ॥ सि०

ओदनेऽपि चरुशब्दः प्रयुज्यते । तत्रौदनस्यैव ग्रहणं न्याय्यं, न स्थाल्याः । कुतः । अदनीयसंयोगात् । अदनीयेन हि द्रव्येण देवतायागमाचरन्ति शिष्टाः, नानदनीयेन । तत्रभवतामाचारात्तेषां स्मृतिरनुमीयते । स्मृतेः श्रुतिः । तस्मादोदनेन हविर्विक्रियत इति ॥ ३६ ॥

न द्व्यर्थत्वात् ॥ ३७ ॥

न ओदनस्य वाचकश्चरुशब्दः । कुतः । द्व्यर्थ एवं स भवेत् । स्थाल्यां हि स प्रसिद्धः समधिगतः । तस्मादोदने लक्षणाशब्दस्तत्संयोगादित्येवं प्रत्तव्यम् । अन्याय्यो ह्येवंजातीयकेष्वनेकार्थभावः । तस्मात्स्थाल्या हविर्विक्रियत इति । यदुक्तम्, अदनीयेन शिष्टा देवतायागमाचरन्तीति ध्रुवमेषां स्मृतिरिति । उच्यते । अनुमानमेतत्प्रत्यक्षेण वचनेन बाध्यते । वचनादवगम्यते स्थाल्या यागः कर्तव्य इति । कथम् । तस्यां हि चरुशब्दः प्रसिद्ध' । नासावाचारानुरोधेन लक्षणाशब्दः कल्पनीयः । कल्प्यमाने वाऽऽचारेण शब्दो बाध्येत । न चैतन्न्याय्यम् । शब्दानुरोधेन हि व्यामोहादाचार इति कल्पयितुं न्याय्यम् । यथा, शूलैश्च मासरेण चावभृथमभ्यवयन्तीति । प्राजापत्यं चरुं निर्वपेच्छतकृष्णलमायुष्काम इति च ॥ ३७ ॥

कपालविकारो वा विशयेऽर्थोपपत्तिभ्याम् ॥ ३८ ॥

हविर्विकारपक्षो न सिध्यति । स्थाल्या विकारे स्मृतिहेतुराचाराद्दुर्विराशङ्क्यते । ओदनेन विकारे स्थालीसंयोगाल्लक्षणाशब्द आश्रयः । अस्ति चान्या गतिः । कपालविकारो भवेदिति । तस्माद्वाशब्देन पक्षं व्यावर्त्य कपालविकारश्चरुरिति ब्रूमः । कपालविकारोऽप्यर्थः सूर्यस्य । तेन सौर्य इति शक्यते व्यपदेष्टुम् । उपपत्तिश्चास्ति । शक्यते स्थाल्यां श्रपयितुम् । तस्माद्धविर्विकारपक्षे संशये कपालविकार आश्रयणीयः ॥ ३८ ॥

–[३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

गुणमुख्यविशेषाच्च ॥ ३९ ॥

अस्ति च गुणमुख्ययोर्विशेषः। गुणो बाधितव्यो न्याय्यो न मुख्यः। तदुक्तम्, अङ्गगुणविरोधे च तादर्थ्यादिति ॥ ३९ ॥

तच्छ्रुतौ चान्यहविष्ट्वात् ॥ ४० ॥

चरुश्रुतौ चान्यद्धविर्दर्शयति। प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्काम इति। शतकृष्णलानि हविः। चरुरेषां संबन्धी। चत्वारि चत्वारि कृष्णलान्यवद्यतीति कृष्णलानां हविष्ट्वम् ॥ ४० ॥

लिङ्गदर्शनाच्च ॥ ४१ ॥

एवं ह्याह। मारुतं चरुं निर्वपेत्पृश्नीनां दुग्धे प्रैयङ्गवं ग्रामकाम इति। मृण्मयो हि चरुर्न प्रियङ्गुविकारः। तस्मादन्यद्धविः। चरुरपि कपालविकार इति ॥ ४१ ॥

ओदनो वा प्रयुक्तत्वात् ॥ ४२ ॥

हविर्विकार एवात्र चरुस्तद्धितसंयोगादवगम्यते। सौर्यश्चरुः कर्तव्य इति। यदि पुरोडाशं उत्सृजेत्, चरुरसम्बन्ध्योऽवगम्यमानो बाध्येत। सूर्यसंबद्धो हि चरुः कर्तव्यः। तस्मिन्नशक्ये सौर्यसंबद्धः क्रियेत, न शक्येत। यदा च हविर्विक्रियते, तदौदनेन। ओदने हि चरुशब्दः प्रसिद्धः, आ हिमवतः, आ च कुमारीभ्यः। तस्मादनीयसंयोगो युक्तो भविष्यति।

यत्तु, द्व्यर्थत्वमन्याय्यमिति। अन्याय्यमेव द्व्यर्थत्वम्। तत्र कुत एतत्स्थालीसंयोगेनौदने भविष्यतीति, न पुनरोदनसंयोगात्स्थाल्यां स्यात्। स्मरन्ति च पाके चरुशब्दम्। अनवस्रावितान्तरूष्मपक्को विशदसिद्ध ओदनश्चरुरिति। तदुक्तं, न पक्तिनामत्वादिति। आचाराच्च स्मृतिर्बलीयसी। तस्मादोदने चरुशब्दः। ओदनेन हविर्विक्रियत इति। तत्रापमप्यर्थोऽदनीयेन यागो भविष्यतीति। अपि च सूर्यस्यान्यद्द्रव्यं नैवास्ति, येन चरुः संबध्येत। चोदकप्राप्तः पुरोडाश इति चेत्। नैतदेवम्। कर्मचोदनायां हि निष्पन्नायां चोदको भवति। प्राक् चरुशब्दवचनाच्च यजतिचोदना। द्रव्यदेवतासंबन्धो हि यज्यर्थः। तेन

३९ ॥ ४० ॥ ४१ ॥

१ (अ० १२ पा० २ अ० ५ सू० २१)। २ (अ० ३ पा० ३ अ० १४ सू० ३८)।

चोदनाविधिशेषश्चरुशब्दो न पुरोडाशविशेषणं भवति । जघन्यत्वाच्चो-दकस्येति ॥ ४२ ॥

अपूर्वव्यपदेशाच्च ॥ ४३ ॥

इतश्च पश्यामः, ओदनेन हविर्विक्रियत इति । कुतः । अपूर्वव्यपदेशो भवति । एवं ह्याह, पुरोडाशेन वै देवा अस्मिँल्लोक आर्ध्नुवंश्चरुणाऽमुष्मिँल्लोक इति । पुरोडाशेनाऽऽर्ध्नोति, चरुणाऽमुष्मिन्निति । यदि स्थाल्यां चरुशब्दः, कपालविकारश्चरुः । ततो यस्मिन्नेव पक्षे पुरोडाशस्तस्मिन्नेव पक्षे चरुः । पुरोडाशेन वै देवा अस्मिँल्लोक आर्ध्नुवन्निति चरुणाऽस्मिँल्लोक इति गम्यते । तत्र, चरुणाऽमुष्मिन्नित्यन्यवद्व्यपदेशो नावकल्पते । तस्मादप्योदनेन हविर्विक्रियत इति ॥ ४३ ॥

तथा च लिङ्गदर्शनम् ॥ ४४ ॥

एवं च कृत्वा लिङ्गदर्शनमप्युपपन्नं भविष्यति । कथम् । आदित्यः प्रायणीयश्चरुः, आदित्य उदयनीय इति । तत्रैतच्छ्रूयते । आज्यस्यैव चरुमभिपूर्य चतुर आज्यभागान् यजति । पथ्यां स्वस्तिमिष्ट्वाऽग्नीषोमौ यजति । अग्नीषोमाविष्ट्वा सवितारं यजति । अदितिमोदनेनेति । चतुर्षु आज्यभागेषु विधिः । अदितेः, आदित्यश्चरुरिति प्राप्तत्वादनुवादः । तत्र चरुमोदनशब्देन ब्रुवन् ओदनेन हविर्विक्रियत इति दर्शयति । तथा, इदमपरं लिङ्गं भवति । यदि तण्डुलो विद्यत आमं तद्धविः स्यादिति । तण्डुले हविःशब्दं ब्रुवन्नोदनेन हविर्विक्रियत इति दर्शयति ॥ ४४ ॥

(सौर्यचरौ स्थाल्यामेव पाकाधिकरणम् ॥ ११ ॥)

[११] स कपाले प्रकृत्या स्यादन्यस्य चाश्रुतित्वात् ॥ ४५ ॥ पू०

अस्ति चरुः, सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति । अत्रैषोऽर्थः समधिगतः । ओदनेन हविर्विक्रियत इति । स इदानीमोदनः क पक्तव्य इति भवति संशयः । किं तावत्प्राप्तम् । न नियमः स्यात्क-

४२ ॥ ४३ ॥ ४४ ॥

पालेष्वेवेति । अर्थप्राप्ते यस्मिन् कस्मिंश्चिद्द्रव्ये पच्येत । यदि हि कपालं चोदकेन प्राप्येत, कपालवच्चोदकेन संख्याऽपि प्राप्येत । न हि प्रकृतौ कपालेषु श्रपयितव्यमित्येवं चोदना । किं तर्हि । अष्टाकपालो भवतीति । संख्यायां प्राप्यमाणायामष्टाकपालताऽस्य चोदिता भवति, नान्यथा । न चैवं संख्या प्राप्यते । न हि बहुषु कपालेषु पुरोडाशवदोदनः पक्तुं शक्यः । केवले च कपाले प्राप्यमाणे याऽसावष्टाकपालता चोदिता सा नैव प्राप्येत । अतो यस्मिन् कस्मिंश्चिदर्थप्राप्ते द्रव्ये पक्तव्यश्चरुरिति ।

एवं प्राप्ते, ब्रूमः । स कपाले प्रकृत्या स्यादन्यस्य चाश्रुतित्वात् । स एष चरुः कपाल एव स्यात् । एवं प्रकृतिवच्छब्दोऽनुगृहीतो भवति । न चान्यत्किंचिद्द्रव्यमाम्नायते । तस्मान्नियमः ॥ ४५ ॥

संख्या चापि कपालवदिति यदुक्तं, तत्परिहर्तव्यम् ।

एकस्मिन् वा विप्रतिषेधात् ॥ ४६ ॥

यदि बहुषु कपालेषु न शक्यते चरुः पक्तुं, विप्रतिषेधादेकस्मिन् पक्तव्यः । यदेतदुच्यते, अष्टाकपालो भवतीत्येतदुक्तं भवति—अष्टसु कपालेषु श्रपयितव्य इति । तन्न । यदष्टत्वं विरोधान्न प्राप्यते, तत्कपालमविरोधात्प्राप्येत ॥ ४६ ॥

न वाऽर्थान्तरसंयोगादपूपे पाकसंयुक्तं धारणार्थं चरौ भवति तत्रार्थात्पात्रलाभः स्यादनियमोऽविशेषात् ॥ ४७ ॥

न वा कपालेषु पक्तव्यः । कुतः । अर्थान्तरसंयोगात् । अपूपपाके यत्कपालमुपादीयते, तद्गतेनोष्मणाऽपूपस्य निर्वर्तक. पाको यथा स्यादिति । तत्र कपालं चरावुपादीयमानमुदकधारणार्थं भवति । यदूष्मणोदकगतेनौदनपाको निर्वर्त्यते, स ओदनपाको न कपालगतेनोष्मणा निर्वर्तते । तत्रोदकधारणार्थं कपालमुपादीयमानं न प्राकृतकार्यं स्यादि-

४५ ॥ ४६ ॥

१ अष्टाकपालता भवति—पा० ।

ति चोदको नैवानुगृह्यते । तस्मादर्थात्पात्रलाभः स्यादिति । [तदविशे-षान्न निषम्येत, किं तदिति ॥ ४७ ॥

चरौ वा लिङ्गदर्शनात् ॥ ४८ ॥ सि०

स्थाल्यां वा श्रपणं क्रियेत । लिङ्गं हि भवति । यासु स्थालीषु सोमाः स्युस्ते चरवः स्युरिति । सोमस्थालीषु चरुं पक्तव्यं ब्रुवन्नविशेषेण स्थालीं चरुसाधनार्थां दर्शयति । आह, दर्शनमिदं व्यपदिश्यते प्राप्तिरूपतामिति । अत्रोच्यते । स्थाल्यां स चरुसंज्ञकः पाको निर्वर्त्यते, न कटाहे, कपाले वा । तस्मात्स्थाल्यां चरुः पक्तव्य इति ।

किं भवति प्रयोजनं, यदि कपालविकारश्चरुर्यदि वौदनेन हविर्विक्रियत इति । यदि कपालविकारः, तस्मिन् पेषणमनर्थलोपात्कर्तव्यम् । अथ, ओदनेन हविर्विक्रियते, अक्रिया पेषणस्य, अपूपहेतुत्वात् । पिण्डार्थत्वाच्च संयवनं पूर्वपक्षे कर्तव्यं, न सिद्धान्ते । संवपनमप्येवम् । संतापनं चाधस्ताच्छ्रपणार्थं पूर्वपक्षे कर्तव्यं, न सिद्धान्ते । उपधानं चैवमेव । पृथुश्लक्ष्णे च पूर्वपक्षे कर्तव्ये न सिद्धान्ते । अध्यूहनाङ्गाराणां पूर्वपक्षे कर्तव्यो न सिद्धान्ते । उपरिपाकार्थत्वात् । अभ्यज्वलनमप्येवमेव । व्युद्धृत्याऽऽसादनं पूर्वपक्षेऽर्थात्कर्तव्यम् । अर्थो नास्तीति न सिद्धान्ते । अर्थोत्कृतं हि व्युद्धृत्याऽऽसादनं न शब्दप्राप्तम् । अर्थाच्च कृतं न चोदकः प्रापयति ॥ ४८ ॥

(सौर्यचरौ पेषणबाधाधिकरणम् ॥ १२)

एवं वा ।

[१२] तस्मिन् पेषणमनर्थलोपात्स्यात् ॥ ४९ ॥ पू०

पृथगधिकरणानि पेषणादीनि । अस्ति चरुः, सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति । ओदनेन हविर्विक्रियत इत्येतत्समधिगतम् । तत्रैतत्संदिह्यते । किं चरौ पेषणं कर्तव्यं, नेति । किं प्राप्तम् । तस्मिन् पेषणमर्थलोपात्स्यात् । शक्यते हि तण्डुलेषु पेषणं कर्तुम् ॥ ४९ ॥

अक्रिया वाऽपूपहेतुत्वात् ॥ ५० ॥ सि०

---

४७ ॥ ४८ ॥ ४९ ॥

---

१ चरुस्थापनार्थां—पा० ।

यद्यपि शक्यते, तथाऽपि न क्रियते । अपूपः पेषणेन विना न निर्वर्तते । ओदनस्तु विनैव पेषणेन भवति । कामं पेषणेन व्याहन्यते । पिष्टकं यवागूर्वा स्यात्खलिर्वा । तस्माच्चरोः पेषणं निवर्तेत ॥ ५० ॥

(सौर्यचरौ संयवनबाधाधिकरणम् ॥ १३ ॥)

[१३] पिण्डार्थत्वाच्च संयवनम् ॥ ५१ ॥ सि०

चरुरेवोदाहरणम् । प्रकृतौ श्रूयते, मरुतामिर्हर्वींषि संयौतीति । तदिह चरौ संयवनं कर्तव्यं, नेति । कर्तव्यम् । शक्यते हि कर्तुमिति । एवं प्राप्ते, ब्रूमः । शक्यमपि न क्रियते । पिण्डार्थं हि तत् । पिण्डेन चापूपस्य प्रयोजनं, न चरोः ॥ ५१ ॥

(सौर्यचरौ संवपनबाधाधिकरणम् ॥ १४ ॥)

[१४] संवपनं च तादर्थ्यात् ॥ ५२ ॥ सि०

सौर्ये एव चरुरुदाहरणम् । प्रकृतौ श्रूयते, सवितृप्रसूत इत्येवैनं देवताभिः संवपतीति । इह चरौ संदेहः । संवपनं कर्तव्यं, नेति । किं प्राप्तम् । शक्यत्वाच्चोदकानुग्रहाय कर्तव्यमिति । एवं प्राप्ते, ब्रूमः । संयवितुं हि तत्प्रकृतौ क्रियते, न चरोः संवप्तव्येन प्रयोजनम् ॥ ५२ ॥

(सौर्यचरौ संतापनबाधाधिकरणम् ॥१५॥)

[१५] संतापनमधःश्रपणात् ॥ ५३ सि०

चरावेव च संदेहः । प्रकृतौ संतापनं कपालानामस्ति, वसूनां रुद्राणामादित्यानां भृगूणामङ्गिरसां धर्मस्य तपसां तप्यध्वमिति । चरौ संतापनं कर्तव्यं, नेति संदेहः । प्रकृतिवद्वचनात्कर्तव्यमिति प्राप्तम् । अधःपाकार्थं हि तत् । तस्मान्न चरौ चोदकः प्रापयति ॥ ५३ ॥

(सौर्यचरावुपधानबाधाधिकरणम् ॥ १६ ॥)

[१६] उपधानं च तादर्थ्यात् ॥ ५४ ॥ सि०

चरावेव कपालोपधानं प्रति संदेहः । कर्तव्यं, नेति । प्रकृतिवद्वचनात्प्राप्तम् । अधःपाकार्थत्वान्निवर्तेत इति ॥ ५४ ॥

(सौर्यचरौ प्रथनश्लक्ष्णीकरणयोर्बाधाधिकरणम् ॥ १७ ॥)

[१७] पृथुश्लक्ष्णे वाऽनपूपत्वात् ॥ ५५ ॥ सि०

पृथुश्लक्ष्णे च प्रति चरोरेव संदेहः । प्रकृतौ श्रूयते, उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयति । सं ते तन्वा तनूः एज्यतामिति त्रिः

---

१० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥

परिमार्ष्टि । तदुभयं चरौ कर्तव्यं, नेति । चोदकानुग्रहाय कर्तव्यमिति प्राप्ते, अनपूपत्वात्तन्निवर्तते ॥ ५५ ॥

(सौर्यचरौ भस्माङ्गाराध्यारोपबाधाधिकरणम् ॥ १८ ॥)

[१८] अभ्यूहश्चोपरिपाकार्थत्वात् ॥ ५६ ॥ सि०

प्रकृतौ श्रूयते, वेदेन भस्मनाऽङ्गारानभ्यूहतीति । तत्सौर्ये चरौ कर्तव्यं, नेति संदेहः । प्रकृतिवद्वचनात्कर्तव्यमिति प्राप्ते, ब्रूमः । उपरिपाकार्थं हि तत्पुरोडाशस्य पाचकत्वते, न चरोरिति, निवर्तते ॥ ५६ ॥

(सौर्यचरावज्वलनबाधाधिकरणम् ॥ १९ ॥)

[१९] तथाऽवज्वलनम् ॥ ५७ ॥ सि०

दर्शपूर्णमासयोः श्रूयते, दर्भपिञ्जूलैरवज्वलयतीति । सौर्ये चरौ संदेहः । किं तत्कर्तव्यं, नेति । किं प्राप्तम् । प्रकृतिवद्वचनात्कर्तव्यम् । उपरिपाकार्थत्वान्निवर्तत इति ॥ ५७ ॥

(सौर्यचरौ व्युद्धरणबाधाधिकरणम् ॥ २० ॥)

[२०] व्युद्धृत्याऽऽसादनं च प्रकृतावश्रुतित्वात् ॥ ५८ ॥ सि०

प्रकृतौ श्रूयते, अन्तर्वेद्यां हवींष्यासादयतीति । तत्प्रकृतौ कपालेभ्यो व्युद्धृत्याऽऽसादनं क्रियते । सौर्ये चरौ संदेहः । किं स्थाल्या व्युत्थाप्य चरुरासादयितव्य उत व्युत्थानं न कर्तव्यमिति । प्रकृतौ कृतत्वाच्चरावपि कर्तव्यमिति प्राप्तम् । तदुच्यते । व्युद्धृत्याऽऽसादनं च प्रकृतावश्रुतित्वात् । प्रकृतौ न श्रूयते । कपालेभ्यो व्युद्धृत्याऽऽसादयितव्यः पुरोडाश इति । अर्थात्स व्युद्ध्रियते । यथार्थीकृतं न स चोदनार्थः । तस्माच्चरौ व्युद्धरणं न कर्तव्यम् । अपि चोद्धरणे क्रियमाणे कथिरथवत्वेरिन्ध्योद्धियेत । तत्र पात्रभेदः स्यात् । तस्माद्व्युद्धृत्याऽऽसादनं चरौ न कर्तव्यमिति ॥ ५८ ॥

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये दशमस्याध्यायस्य प्रथमः पादः ॥

---

५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥]

इति श्रीमद्कुमारिलविरचितायां मीमांसाभाष्यव्याख्यायां टुप्टीकायां दशमाध्यायस्य प्रथमः पादः ॥

१ ऽरितोऽम्य—पा० ।

अथ दशमेऽध्याये द्वितीयः पादः ॥

(कृष्णलचरौ पाकानुष्ठानाधिकरणम् ॥ १ ॥)

[१] कृष्णलेष्वर्थलोपादपाकः स्यात् ॥ १ ॥ पू०

प्राजापत्यं चरुं निर्वपेद्घृते शतकृष्णलमायुष्काम इति । तत्र संदेहः। किं चोदकेन पाकः प्राप्यते कर्तव्यश्च, उत न प्राप्यते, न कर्तव्य इति। किं तावत्प्राप्तम्। कृष्णलेषु पाको न स्यात्। प्रकृतौ हि पुरोडाशार्थः पाकः। इहान्तरेणापि पाकं, कृष्णलानि कृष्णलान्येव भवन्ति। तस्मान्न प्राप्यते। अतो न कर्तव्य इति ॥ १ ॥

स्याद्वा प्रत्यक्षशिष्टत्वात्प्रदानवत् ॥ २ ॥ सि०

स्याद्वा पाकः। चोदकेन तु न प्राप्यते। प्रत्यक्षं त्वस्य शासनं, घृते श्रपयतीति। प्राकृतस्य कार्यस्यार्थे न भवति, वचनप्रामाण्याददृष्टार्थो भवति। यथा तेषामेवानदनीयानां प्रत्यक्षशासनात्प्रदानम्। एवं पाकोऽपीति ॥ २ ॥

(कृष्णलचरावुपस्तरणाभिघारणयोर्लोपाधिकरणम् ॥ २ ॥)

[२] उपस्तरणाभिघारणयोरमृतार्थत्वादकर्म स्यात् ॥ ३ ॥ सि०

कृष्णलचरावेव संदेहः। ये प्रकृतावुपस्तरणाभिघारणे, यदुपस्तृणाति, अभिघारयति, अमृताहुतिमेवैनां करोतीति। ते उपस्तरणाभिघारणे कृष्णलचरौ कर्तव्ये, नेति, एष संशयः। किं प्राप्तम्। उपस्तरणाभिघारणयोर्न क्रिया। कुतः। अमृतार्थत्वात्। अमृतार्थत्वेन हि ते क्रियेते। यदुपस्तृणात्यभिघारयति, अमृताहुतिमेवैनां करोतीति, अमृतेनोपमिमानः स्वादुभावार्थतां तयोर्दर्शयति। न च कृष्णलेषु स्वादुभावः संभवति। तस्मादक्रियेति ॥ ३ ॥

क्रियेत वाऽर्थवादत्वात्तयोः संसर्गहेतुत्वात् ॥ ४ ॥

क्रियेत वा, उपस्तरणमभिघारणं च। विधेः प्रकरणान्तरेऽविदेशात्सर्वकर्म स्यादिति। यदुक्तं, स्वादुत्वाय ते क्रियेते इति। न स्वादुतार्थः

[१ ॥ २ ॥ ३ ॥

१ (अ० १० पा० १ अ० १ सू० १)।

प्रकृतौ श्रुतः । स्यादुः कर्तव्य इति । तस्मादर्थवादः, अमृताहुतिमेवैनां करोतीति । संसर्गमात्रमाज्यस्य नियतं हविषश्च । तच्च कृष्णलेष्वपि शक्यं कर्तुम् । तस्मादनिष्टाचिः ॥ ४ ॥

अकर्म वा चतुर्भिराप्तिवचनात्सह पूर्ण पुनश्चतुरवत्तम् ॥ ५ ॥

वाशब्दः पक्षं व्यावर्तयति । अक्रिया तयोरिति । कुतः । चतुर्भिराप्तिवचनात् । चत्वारि कृष्णलान्यवद्यतीति । कोऽभिप्रायः । चत्वारि कृष्णलानि, चत्वार्यवदानानि । एकैकं कृष्णलमेकैकस्यावदानस्य स्थाने । तेनोपस्तरणाभिघारणयोर्निवृत्तिः[१] । तथा चाऽऽप्तिवचनं भवति । चत्वारि कृष्णलान्यवद्यति चतुरवत्तस्याऽऽप्त्यै, इति । अविद्यमानस्यार्थान्तरेणानुग्रहो भवति । तस्मान्निवृत्तिरेतयोः । सह पुनरुपस्तरणाभिघारणाभ्यां पूर्णं चतुरवत्तमेव स्यात् । तत्राऽऽप्तिवचनं व्याहन्येत ॥ ५ ॥

क्रिया वा मुख्यावदानपरिमाणात्सामान्यात्तद्गुणत्वम् ॥६॥[१]

क्रिया वा तयोश्चोदकानुग्रहाय । मुख्यावदानस्य हि प्रकृतौ परिमाणमुक्तम् । अङ्गुष्ठपर्वमात्रं देवतानामवद्यतीति । इहापि कृष्णलशब्दः परिमाणवचनः श्रूयते । स चतुःसंख्ययाऽनुबध्यते, चत्वारि कृष्णलान्यवद्यतीति । न यानि चत्वार्यवदानानि तानि कृष्णलपरिमाणानि भवन्तीति । हिरण्यपरिमाणवचन एव कृष्णलशब्दो नाऽऽज्यस्य परिमाणं वदितुमुत्सहते । तच्च परिमाणं न द्रव्यं निवर्तयति । न हि द्रव्यकार्येषु गुणो वर्तितुमर्हति । परिमाणं यत्प्राकृतं तस्य कार्ये वर्तमानं तन्निवर्तयेत् । यथा, इदं दधि घृतं शाकमिमे शालयः, देवदत्तो भोज्यतां, देवदत्तवयस्यदत्तस्तैलेनेति । तैलं हि भोजने स्नेहनेनोपकरोति, तत्स्नेहनार्थं प्राकृतं निवर्तयितुमर्हति घृतं, न शाकं दधि चौदनं वा । एवमिहापि परिमाणं मुख्यावदानं परिच्छिनत्ति, न द्रव्यं निवर्तयेत् । प्रकरणात्तु मुख्यपरिमाणं स्यात्, नोपस्तरणाभिघारणयोः । तस्मात्तयोरनिवृत्तिरिति ॥ ६ ॥

---

४ ॥ ५ ॥ ६ ॥

---

१ मुख्यपरिमाणमिति—मुख्यस्य हविरवदानस्य चतुःसंख्याकृष्णलपरिमाणं स्यादित्यर्थः ।

तेषां चैकावदानत्वात् ॥ ७ ॥

चतुर्णां चैकावदानतां दर्शयति । चत्वारि कृष्णलान्येकमवदानमिति । इतरथा चत्वार्यवदानान्यभविष्यन् । तत्रैकावदानवचनमुपरोत्स्यते । तस्मादप्यानिवृत्तिरिति । ७ ॥

आप्तिः संख्यासमानत्वात् ॥ ८ ॥

अथ यदुक्तमाप्तिवचनं भवतीति । चतुःसंख्यासंस्तुतिरेषा । एवं चतुःसंख्याया माहात्म्यं यदेकस्मिन्नवदाने चत्वार्यवदानानि भवन्तीति । यथा, यद्वैश्वदेवः प्रातःसवने गृह्यते, प्रातःसवने वा एतद्वैश्वदेवयज्ञं संस्थापयतीति, वैश्वदेवसंस्तुतिर्नान्यसवननिवृत्तिः । एवमिहापि चतुःसंख्यासंस्तवो नोपस्तरणाभिघारणयोर्निवृत्तिरिति ॥ ८ ॥

सतोस्त्वाप्तिवचनं व्यर्थम् ॥ ९ ॥

तुशब्द एनं चतुःसंख्यासंस्तवं व्यावर्तयति । न हि विद्यमानयोरुपस्तरणाभिघारणयोस्तदाप्तिवचनेन कश्चित्संस्तवोऽस्ति । यद्यविद्यमानमापयतीत्युच्यते, ततो गुणवानित्युक्तो भवति । तत्र संस्तूयते । अथ विद्यमानमापयतीति, अनर्थको भवतीत्युक्तं भवति, न संस्तवः । तस्माद्विद्यमानयोरुपस्तरणाभिघारणयोराप्तिवचनं व्यर्थमेव । अन्यः परिहारो वक्तव्यः ॥ ९ ॥

विकल्पस्त्वेकावदानत्वात् ॥ १० ॥

तुशब्द आप्तिवचनान्निवृत्तिरुपस्तरणाभिघारणयोरित्येतन्निवर्तयति । यथा भवान् ब्रूते, आप्तिवचनाल्लिङ्गान्निवृत्तिरेतयोरिति, एवमेकावदानवचनाल्लिङ्गादनिवृत्तिरेतयोरिति लिङ्गविकल्पः । लिङ्गविकल्पाच्च नैकान्ततो निवृत्तिमाप्तिवचनं कर्तुमर्हति ॥ १० ॥

सर्वविकारे त्वभ्यासानर्थक्यं हविषो हातरस्य स्यादपि वा स्विष्टकृतः स्यादितरस्यान्याय्यत्वात् ॥ ११ ॥

तुशब्द आप्तिवचनं बाधते । आप्तिवचने बाधिते सति चतुर्षु कृष्णलेषु सर्वावदानविकारेष्वभ्यासोऽनर्थकः स्यात् । चत्वारि चत्वारि कृष्णलान्यवद्यति समृद्ध्यै, इति । [1]अस्मत्पक्षे पुनरिदमवृद्धिर्द्वितीयमव-

७ ॥ ८ ॥ ९ ॥ १० ॥

1 अस्मिन्पक्षे—पा० ।

दानमपेक्ष्याभ्यासोऽवक्लृप्स्यते । अथ मतम्, एतन्ममापि स्विष्टकृतमपेक्ष्याभ्यासो भवतीति । तन्नैवम् । इतरस्य स्विष्टकृतोऽपेक्षणमन्याय्यम् । प्रकरणात्प्रधानमभिसंबध्यते वचनेन । न च स्विष्टकृतः प्रकरणम् । चोदकेन हि स प्राप्यते । तस्मात्स्वपक्षेऽभ्यासोऽनर्थक एव । उपस्तरणाभिघारणे कर्तव्ये एव ॥ ११ ॥

अकर्म वा संसर्गार्थनिवृत्तित्वात्तस्मादातिसमर्थत्वम् ॥ १२ ॥

अक्रिया, उपस्तरणाभिघारणयोः । कुतः । संसर्गः स्रुचि पुरोडाशचूर्णानां सूक्ष्माणां मा भूदिति, उपस्तरणेन स्रुक् स्निग्धी क्रियते, अभिघारणेन हविः स्रुच्यसंयुक्तं कृत्स्नं यथाऽग्नौ पतेदिति । न तु विशदस्य कृष्णलस्य स्रुचि संयोगो भवति, यन्निमित्तमुपस्तरणमभिघारणं च स्नेहनार्थं सुवर्णस्य क्रियेत । तस्मात्प्राकृतस्य प्रयोजनस्य निवृत्तत्वात्कृष्णलेपूपस्तरणाभिघारणे निवर्तितुमर्हतः । एवं चाऽऽप्तिवचनमुपपन्नं भविष्यति । चत्वारि कृष्णलान्यवद्यति चतुरवत्तस्याऽऽप्त्यै, इति ॥ १२ ॥

(कृष्णलचरौ भक्षणकर्तव्यत्वाधिकरणम् ॥ ३ ॥)

[३] भक्षाणां तु प्रीत्यर्थत्वादकर्म स्यात् ॥ १३ ॥ पू०

शतकृष्णलश्चरुरुदाहरणम् । सन्ति प्रकृतौ भक्षाः, इडाप्राशित्रचतुर्धाकरणशंयुवाकाकालाः । तेषु संशयः । कृष्णलचरौ ते भक्षाः कर्तव्या उत नेति । किं प्राप्तम् । न कर्तव्याः । प्रीत्यर्थं हि प्रकृतौ ते कृताः, सामर्थ्यं जनयिष्यन्तीति । न तु हिरण्यं प्रीतिमुत्पादयति भक्ष्यमाणम् । अतो न कर्तव्याः ॥ १३ ॥

॥ ११ ॥ १२ ॥]

' भक्षाणां तु ' इत्यादिकेयं चतुःसूत्री कर्तृसंस्कारार्था भक्षा इत्येतमर्थं प्रतिपादयति । तेन कृष्णलचरौ न प्राप्नुवन्ति । असंस्कारकत्वात्[1] । तस्मादप्राप्तौ भक्षो वचनाद्विधीयते हिरण्यस्य ॥ १३ ॥

---

1 असंस्कारकत्वादिति—कृष्णलानामनदनीयत्वेन प्रीत्याख्यकर्तृसंस्कारायोग्यत्वादित्यर्थः ।

स्याद्वा निर्धानदर्शनात् ॥ १४ ॥ सि०

स्याद्वा हिरण्यस्य भक्षः। भक्षणविशेषदर्शनात्। निरवधयन्तो भक्षयन्ति चुच्छुंपाकारं भक्षयन्तीति, मान्ते भक्षे केवलं भक्षोपायं विधास्यति शब्द इति। इतरथा भक्षोपायं भक्षणं च विकृतौ विदध्यात्। तत्र वाक्यं भिद्येत। तस्माच्चोदकेन माप्यते भक्ष इति ॥ १४ ॥

वचनं वाऽऽज्यभक्षस्य प्रकृतौ स्यादभागित्वात् ॥ १५ ॥

न त्वेतदस्ति, माप्यन्ते भक्षा इति अर्थलोपादेषां निवृत्तिः। यत्तु भक्षणे विशेषवचनं भवतीति। वचनादेतदाज्यस्य भविष्यति। निर्वधयन्तो भक्षयन्त्याज्यमिति, चुच्छुपाकारं भक्षयन्त्याज्यमिति। निर्धानं चुच्छुपाकारं चार्थमाप्तं भक्ष्यमाणस्यानूद्यत इति न वाक्यभेदः ॥ १५ ॥

वचनं वा हिरण्यस्य प्रदानवदाज्यस्य गुणभूतत्वात् ॥१६॥

सत्यम्। वचनमेतद्धिरण्यस्य, न त्वाज्यस्य। कुतः। भक्षयन्तीत्येतावच्छ्रूयते। नेदं वा तद्वेति। तत्र यन्निर्दिष्टं प्रकृतं, तस्य तेन संबन्धो भवतीति। हिरण्यं चात्र निर्दिश्यते, नाऽऽज्यम्। कथम्। प्राजापत्यं चरुं निर्वपेद्घृते शतकृष्णलमिति, शतकृष्णलश्चरुरत्र कार्यसंबन्धार्थमुच्यते। तद्विशेषणार्थेन घृतं, न स्वनिर्देशार्थेन। तस्माच्चरुरेव शब्दान्तरैः संबध्यते, न घृतम्। तद्यथा, एष दण्ड इष्टकाकूटे तिष्ठति, प्रहरानेनेति, दण्डेनेति गम्यते, नेष्टकाकूटेनेति। एवमिहापि चरुर्भक्षणवचनेन संबध्यते, न घृतम्। तस्माच्चरोर्भक्षणं, प्रदानवत्। यथा तेषामेव कृष्णलानामनदनीयानां प्रदानं क्रियते, एवमत्रापि द्रष्टव्यमिति ॥ १६ ॥

(कृष्णलचरौ ब्रह्मभक्षाणा युगपत्परिहरणीयत्वाधिकरणम् ॥ ४ ॥)

[४] एकधोपहारे सहत्वं ब्रह्मभक्षाणां प्रकृतौ विहृतत्वात् ॥ १७ ॥ सि०

[१४ ॥ १५ ॥ १६ ॥]

१ चुच्छुपाकारं—इति शास्त्रदीपिकादिधृत. पाठ। २ निरवधयन्त इति—दन्तैन पीडनमकृत्वेत्यर्थः।

तत्रैव श्रूयते, एकधा ब्रह्मणे परिहरतीति । तत्र संदेहः । किमेतत्सहत्वमुत सकृत्त्वमिति । किं प्राप्तम् । सकृत्त्वं वा, सहत्वं वा, अनियम इति । कुतः । एवंप्रकारवचन एकधेति शब्दः । सकृत्त्वमप्येकप्रकारः, सहत्वमपि । तद्यथा, यः सकृद् गाः प्रापयति, स एकधा प्रापयतीत्युच्यते । योऽपि सह प्रापयति सोऽप्येकधा प्रापयतीति । तस्मात्सकृत्त्वं सहत्वं वा कर्तव्यमिति ।

एवं प्राप्ते, ब्रूमः । एकधा ब्रह्मणे परिहरतीति, सहेति गम्यते । एवं ब्रह्मभक्षस्याब्रह्मभक्षस्यापि परिहारः कृतो भविष्यति । इतरस्मिन्पक्षे कस्यचिद्ब्रह्मभक्षस्य परिहारो न क्रियते । तत्र प्राकृतः प्रयोगवचनो बाध्येत । विहृताश्चामी भक्षाः प्रकृतौ । त इह चोदकेन विहृता एव प्राप्ताः । तत्र सहत्ववचन एकधाशब्दोऽवकल्पते । ननु वाचनिक इह भक्षोऽप्राकृतः, न प्राकृता विहृताः प्राप्तुमर्हन्तीति । उच्यते । पुरुषसंस्कारार्थत्वेन न प्राप्नुवन्ति, द्रव्यसंस्कारार्थत्वेन तु प्राप्नुवन्तीति, यदि प्राप्नुवन्ति, किमर्थं तर्हि वचनमिति । भक्षोपायविधानार्थम् । ननु निर्धानं चुच्छुपाकरणं वाऽर्थप्राप्तम् । अर्थप्राप्तत्वादनुवादः । उच्यते । न नियमेन प्राप्यते । नियमार्थश्च विधीयत इति ॥ १७ ॥

ननु वाचनिक इह भक्षोऽप्राकृतः । न प्राकृता विहिताः प्राप्नुवन्तीति—कोऽभिप्रायो ग्रन्थस्य । नैते कर्तृसंस्कारकाः । भक्षणकर्ता तु गुणभूतः । प्रधानभूता भक्षाः । कथम् । प्राशित्रमिडामिति द्वितीयान्तो भक्षः क्रियां प्रति प्रधानभूतः, प्रहवत् । कर्ता क्रियायां गुणभूत उपादीयते । न कर्तुः कृत्स्नस्य संस्कारः । दृष्टार्थो च कृतप्रयोजनस्य द्रव्यस्य प्रतिपत्तिः ।

ननु कर्तृसंस्कारेऽपि दृष्टं प्रयोजनम् । सत्यम् । उक्तं तु द्रव्यस्य कृत्स्नस्य संस्कारो न कर्तव्यः । अपि च सोम उपकारो नास्ति । अपकारस्तु कदाचित्स्यात् । अपि च कृतप्रयोजनं द्रव्यं प्रतिपत्तिमपेक्षते । तच्च कर्तृषु प्रतिपाद्यते । तस्य यदि कर्तृसंस्कारोऽपि प्रयोजनमनुनिष्पादि भवेत्तथा सत्यविरोध एव । न तु स विवक्षितः । या चासौ चतुःसूत्री साऽनेन न्यायेन विरुद्धा प्रत्याख्यातव्यैव ॥ १७ ॥

---

१ पञ्चसूत्रीति—'भक्षाणां तु प्रीत्यर्थत्वात्' इत्यादिकेत्यर्थः ।

(कृष्णलचरौ सर्वभक्षाणां पुरुषान्तरेभ्योऽपनीय ब्रह्मणः परिहाराधिकरणम् ॥ ९ ॥)

[५] सर्वत्वं च तेषामधिकारात्स्यात् ॥ १८ ॥ पू०

कृष्णलचरुरेवोदाहरणम् । तत्र श्रूयते, सर्वं ब्रह्मणे परिहरतीति । तत्र संदेहः । किं ब्रह्मभक्षाणामेवैष परिहार उत पुरुषेभ्यः शेषापनय इति । कथं ब्रह्मभक्षाणां परिहारः, कथं वा शेषापनय इति । यदि, ब्रह्मणे परिहरतीत्यनूद्य सर्वमिति विधीयते, ब्रह्मणे सर्वमिति वाऽनूद्य परिहरतीति विधीयते, ततो ब्रह्मभक्षाणां परिहारः । अथ, सर्वमिति लक्षयित्वा ब्रह्मणे परिहरतीति विधीयते, परिहरतीति वा लक्षयित्वा सर्वं ब्रह्मण इति, ततः शेषापनयः । किं प्राप्तम् । सर्वत्वं ब्रह्मभक्षाणां स्यात् । कुतः । ब्रह्मणे परिहरतीति प्राप्तमेव, न विधीयते । सर्वपरिहारस्त्वप्राप्तः । तस्य विधानं भवितुमर्हति ।

अथवा, अस्त्येव ब्रह्मणे सर्वो भागः । तत्र कस्यचिद्भागस्य परिहारः प्राप्तः, कस्यचिन्न प्राप्तः । यस्य च न प्राप्तस्तस्य परिहारो विधीयते । तस्मादधिकृतानां ब्रह्मभक्षाणामेष वाद इति ॥ १८ ॥

पुरुषापनयो वा तेषामवाच्यत्वात् ॥ १९ ॥ सि०

वाशब्दः पक्षं व्यावर्तयति । पुरुषापनयः स्यात् । यद्येवमुच्येत, यद्ब्रह्मणे परिहरति, तत्सर्वमिति । सर्वमेव हि तद्विधानमनर्थकं स्यात् । अथ, यद्ब्रह्मणे, तत्सर्वं परिहरतीति । विशेष्यस्यानिर्देशान्न ब्रह्मशब्दो विशेषणम् । अथ यद्ब्रह्मणे सर्वं, तत्परिहरतीति । एवमपि विशेष्यो नैव निर्दिष्टः स्यात् । यत्सर्वं तत्परिहरतीति, नैवं वचनमर्हति । सर्वं

---

१८ ॥

यदि ब्रह्मशब्दोऽनुवादः ' सर्वम् ' इति विधीयते, तथा सति न ज्ञायते किं सर्वमिति । अथ यदि ब्रह्मपरिहारशब्दावनूद्येते, तथाऽपि ' सर्वम् ' इति न विधीयते । यदा कस्यचिद्भागस्य परिहारः प्राप्तः, कस्यचिन्न, तदा विधानमुपपद्यते । सर्वेषां तु ब्रह्मभागानां परिहारः प्राप्त एव । अथ ' ब्रह्मणे सर्वम् ' इत्यनूद्य परि-

---

१ भक्षाणामेषः—पा० ।

हि सर्वम् । तत्र विशेषयितव्यम् । तस्मात्, सर्वे ब्रह्मणे परिहरतीति, ब्रह्मसंबन्धः सर्वस्य विधीयते चरोः । एवं न किंचिदनर्थकम् । तस्मात्पुरुषेभ्य. शेषापनय इति ॥ १९ ॥

(कृष्णलचरौ युगपदुपहृतानां सर्वेषां भक्षाणां स्वस्वकाले भक्षणाधिकरणम् ॥ ६ ॥)

[६] पुरुषापनयात्स्वकालत्वम् ॥ २० ॥ सि०

तत्रैव संदेहः । समधिगते शेषापनये किमेकस्मिन् काले सर्वे भक्षा भक्षयितव्या उत स्वस्मिन् स्वस्मिन् काल इति । किं प्राप्तम् । भक्षयितुं तत्परिहरणं क्रियते । अतो यद्भक्षणाय परिहृतं तदनन्तरं भक्षयितव्यमेव ।

[1]एवं प्राप्ते, ब्रूमः, पुरुषापनयात्स्वकालत्वमिति । पुरुषापनयं कृत्वा कृतार्थः शब्दः स्वकालतां भक्षणानां न निवारयति । तस्माद्यथाकालमेव भक्षयितव्या इति ॥ २० ॥

(कृष्णलचरौ चतुर्धाकरणादीनामननुष्ठानाधिकरणम् ॥ ७ ॥)

[७] एकार्थत्वादविभागः स्यात् ॥ २१ ॥ सि०

तत्रेदं चिन्त्यते । प्रकृतौ व्यादेश आम्नातः, इदं ब्रह्मण इदं होतुरिदमध्वर्योरिदमग्नीध इति । स इह कर्तव्यो न कर्तव्य इति संशयः । चोदकप्राप्त्या कर्तव्य इति यस्य बुद्धिः स्यात्तस्य निवृत्त्यर्थं सूत्रम् । प्रकृतौ बहूनां संबन्धः कर्तव्यः । स विभागमन्तरेण न सिध्यतीति विभागो बहुसंबन्धाय क्रियते । इह तु, सर्वं ब्रह्मणे परिहरतीत्येकस्मै सर्वस्य । तत्र विभागेन न प्रयोजनम् । क्रियमाणोऽपि न प्राकृतार्थः स्यात् । अदृष्टार्थमेव क्रियेत । तस्मात्कृष्णलचरौ न व्यादेश इति ॥ २१ ॥

हारो विधीयते, तथाऽपि प्रथमपक्षे यो दोषः स तृतीये । तस्मात्सिद्धान्ते ब्रह्मपदं विधीयते ॥ १९ ॥ [२० ॥ २१ ॥

---

1 भक्षपदं विधीयत इति—' सर्वं ब्रह्मणे परिहरति ' इत्यत्र सर्वोद्देशेन ब्रह्मसंबन्धः परिहारमविवक्ष्य विधीयते । अथवा पूर्वप्रवृत्त्या परिहारोद्देशेन ब्रह्मसंबन्धो विधीयते । तत्फलं यावच्छेदकावच्छेदेन ब्रह्मसंबन्धविधानाद्भागान्तरे पुरुषान्तरस्याह सि० । तथाच सर्वपदमनुवाद इत्यर्थः ।

(ज्योतिष्टोमादौ दक्षिणादानस्य ऋत्विगानत्यर्थत्वाधिकरणम् ॥ ८ ॥)

[८] ऋत्विग्दानं धर्ममात्रार्थं स्याद्ददातिसामर्थ्यात् ॥ २२ ॥ पू०

अस्ति, ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्रेदं समामनन्ति, गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा । इदं चापरं श्रूयते, ऋत्विग्भ्यो दक्षिणां ददातीति । तत्र संशयः । किं दानं धर्ममात्रमुत ऋत्विगानमनमिति । किं प्राप्तम् । ऋत्विग्दानं धर्ममात्रं स्यात् । तस्य हि कर्तव्यता श्रूयते । ददातिकर्तव्यताऽस्माच्छब्दाद्गम्यते । ऋत्विगानमनं कर्तव्यं वाक्याद्गम्यते । श्रुतिश्च वाक्याद्बलीयसी । लोकेऽप्यदृष्टार्थतैव ददातेर्गम्यत इति सामर्थ्यादेव नाऽऽनमनादि ।

अपि च कर्माननुरूपमपि दाक्षिण्यं क्वचिच्छ्रूयते, त्रैधातवीयायां, सहस्रमूतपेये सोमचमसः । अपि च यत्रोच्चनीचपण्यपणः क्रियते स परिक्रयो भवति, न यत्र नियतपरिमाणं दानम् । तस्माद्धर्ममात्रं दानम् । अपि च नियमवन्मन्त्रवच्च क्रियते । तददृष्टार्थत्वेनावकल्पते । क्वचिच्च श्रूयते । दण्डः, उपानहौ, शुष्का दृतिः, सा हि दक्षिणा, इति । को हि दण्डेनाऽऽनमेत् । तस्माद्धर्ममात्रं दानमिति ॥ २२ ॥

परिक्रयार्थं वा कर्मसंयोगाल्लोकवत् ॥ २३ ॥ सि०

परिक्रयार्थं वा दानम् । कुतः । कर्मसंयोगात् । कर्मसंयुक्तेभ्यः श्रूयते, ऋत्विग्भ्यो दक्षिणां ददातीति । तत्र दृष्टं प्रयोजनमुत्सृज्य न शक्यमदृष्टं कल्पयितुम् । यदपि नियमाददृष्टं, तदपि दृष्टद्वारमेव । अनेन नियतेन नियतगुणकेन दानेनाऽऽनम्यमाना ऋत्विजोऽभ्युदयकारिणो भवन्ति । कथम् । आनमने गुणभूतस्त्यागश्चोद्यते, न प्रधानभूतः । वाक्यार्थश्चावश्यं ग्रहीतव्यः । इतरथा ऋत्विग्भ्य इत्येतदेव पदमनर्थकं स्यात् । अगृह्यमाणे सुतरां श्रुतिर्बाध्येत । यच्च न कर्मानुरूपं दाक्षिण्यमिति । नैतावता दृष्टोऽर्थः सन्नपह्नूयेत । नियमाददृष्टद्वारमदृष्ट-

---

२२ ॥

---

१ त्रैधातव्यायां—पा० । २ पणीपण—पा० ।

मित्युक्तमेव। वचनप्रामाण्याच्च दण्डोऽवगम्यते। अपि च भवति तत्र या च यावती चाऽऽनमनमात्रा। लोकेऽपि हि काष्ठवाहप्रभृतिभ्यो यद्दीयते, तदसंकीर्तितेऽपि परिक्रये, आनमनार्थमेव भवति। तस्मात्परिक्रयार्थं दक्षिणादानमिति ॥ २३ ॥

दक्षिणायुक्तवचनाच्च ॥ २४ ॥

दक्षिणायुक्तवचनाच्च लिङ्गात्परिक्रयार्थं दानमिति पश्यामः। दक्षिणायुक्ता वहन्ति ऋत्विज इति ॥ २४ ॥

न चान्येनाऽऽनम्येत परिक्रयात्कर्मणः परार्थत्वात् ॥ २५ ॥

इतश्च परिक्रयार्थं दानमिति। कुतः। नान्तरेण परिक्रयं परार्थे परः प्रवर्तते। ननु सामादयोऽपि प्रवर्तनोपायाः। न ब्रूमो न प्रवर्तनोपाया इति। किं तर्हि। परिक्रयः प्रत्यक्षमाम्नात इति। अतस्तेनैव परिक्रेतव्या नान्येनेति ॥ २५ ॥

परिक्रीतवचनाच्च ॥ २६ ॥

परिक्रीतवचनं भवति, तेनायमर्थो द्योत्यते। दीक्षितमदीक्षिता दक्षिणापरिक्रीता ऋत्विजो याजयन्तीति। तस्मादपि परिक्रयार्थं दानमिति ॥ २६ ॥

संनिवन्ये[1] च भृतिवचनात् ॥ २७ ॥

सनिवनिमात्तं सनिवन्यं, याच्ञामात्रमित्यर्थः। तस्मिन् भृतिवचनं भवति। यज्ञो वै देवतानां न समभवत्, तं भृत्या समभावयन्। यज्ञभृतिं वनुते, यज्ञस्य भृत्यै द्वादशरात्रीर्दीक्षितो भृतिं वन्वीतेति। यज्ञार्थं यद्भिक्षितं ऋत्विजः परिक्रेतुम्, अन्यच्च यज्ञार्थं साधयितुं, तस्मिन्नेव भृतिवचनम्। भृतिश्च कर्मकरेभ्य आनत्यर्थं यद्दीयते। तस्मादपि परिक्रयार्थमृत्विग्भ्यो दानमिति ॥ २७ ॥

नैष्कर्तृकेण संस्तवाच्च ॥ २८ ॥

नैष्कर्तृकेण च संस्तवो भवति। यथा वै दारुहारो नैष्कर्तृको

२३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

[1] सनिवन्येत—इति मुद्रितपुस्तकेषु सर्वत्र पाठः।

निष्कर्तनभूतः कर्मयोगे वर्तते, एवं वा एते यज्ञस्य ऋत्विज इति। नैष्कर्तृको दारुहारः। यथाऽसौ, एवमृत्विज इति ब्रुवन् परिक्रयार्थं दानं दर्शयति ॥ २८ ॥

(शेषभक्षाणां शेषप्रतिपत्त्यर्थत्वाधिकरणम् ॥ ९ ॥)

[९] शेषभक्षाश्च तद्वत् ॥ २९ ॥ पू०

सन्ति शेषभक्षा ज्योतिष्टोमे, दर्शपूर्णमासयोश्च। यथा, वषट्कारनिमित्ता होमाभिषवनिमित्ताश्च। तथा, इडाप्राशित्रचतुर्धाकरणशंयुवाकूकालाः। तेषु संशयः। किं ते परिक्रयार्था उत नेति। किं प्राप्तम्। शेषभक्षाश्च तद्वद्भवितुमर्हन्ति, यद्वद्दक्षिणादानम्। प्रीतिं हि करोति भक्षणं, प्रीत्या चाऽऽनमन्ति। तस्मात्परिक्रयार्थाः शेषभक्षा इति॥२९॥

संस्कारो वा द्रव्यस्य परार्थत्वात् ॥ ३० ॥ सि०

वाशब्दः पक्षं व्यावर्तयति, न परिक्रयार्थं भक्षणम्। द्रव्यसंस्कारार्थमिति। कुतः। यज्ञार्थेन हि द्रव्यमुत्पन्नं प्रयोजनवत्। यदि तस्य संस्कारार्थं भक्षणं, ततस्तदपि प्रयोजनवत्। दक्षिणाधान्मध्याधावद्यतीत्येवमादि चैकदेशवचनं प्रकृतशेषापेक्षं भवति, न द्रव्यस्योत्पादकम्। तस्माद्द्रव्यस्य भक्षणमुच्यते, न भक्षणार्थं द्रव्यमुपादीयते। प्रकृतस्य च भक्षणम्। तस्मात्संस्कारार्थमिति गम्यते ॥ ३० ॥

शेषे च समत्वात् ॥३१॥

अपि च यच्छेषं द्रव्यं, तदेवतायै संकल्पितं यजमानेन न स्वयमुपयोक्तव्यमिति। तस्मान्न तस्योपयोक्तुमृत्विज ईशते, नो खल्वपि यजमानः। साम्यमत्र यजमानस्य ऋत्विग्भिः। परिक्रीणानश्च स्वी कुर्याद्द्रव्यम्। तत्रास्य देवतार्थः संकल्प एव नावकल्पते। तस्मादपि न परिक्रयार्थं भक्षणमिति ॥ ३१ ॥

स्वामिनि च दर्शनात्तत्सामान्यादितरेषां तथात्वम् ॥ ३२ ॥

स्वामिनि च भक्षणं दृश्यते। यजमानपञ्चमाः समुपहूता इडां भक्षयन्तीति। यजमानस्यासंशयपरिक्रयः। तत्सामान्यादितरेषामपि न

---

२८ ॥ २९ ॥ ३० ॥ ३१ ॥

परिक्रयः । कथम् । एवं सति नैव विज्ञायते, इडाभक्षणेन यजमानप्रमाः परिक्रीयन्त इति । किं तत्सामान्यम् । द्वितीया विभक्तिः । तस्मादपि न परिक्रयार्थं भक्षणमिति ॥ ३२ ॥

तथा चान्यार्थदर्शनम् ॥ ३३ ॥

एवमन्यार्थदर्शनमिदमुपपन्नं भवति । कुण्डपायिनामयने, अत्सरुकैश्चमसैः सोमान् भक्षयन्तीति, प्राप्ते भक्षे विशेषः श्रूयते—अत्सरुकैरिति । एवं सत्रेषु भक्षणं दृश्यते । तत्परिक्रयार्थत्वे नावकल्पते । तस्मादपि न परिक्रयार्थं भक्षणमिति ॥ ३३ ॥

(सत्रे वरणाननुष्ठानाधिकरणम् ॥ १० ॥)

[१०] वरणमृत्विजामानमनार्थत्वात्सत्रे न स्यात्स्वकर्मत्वात् ॥ ३४ ॥ सि०

सन्ति द्वादशाहप्रभृतीनि सत्राणि, द्वादशाहमृद्धिकामा उपेयुरित्येवमादीनि । अस्ति च प्रकृतौ ज्योतिष्टोमे वरणम् । अग्निर्मे होता स मे होता होतस्त्वं मे होताऽसीति होतारमित्येवमादिभिः । तत्सत्रेषु संदिह्यते । किं कर्तव्यं, नेति । तत्रै एतावत्त्वः परीक्ष्यम् । किं प्रकृतौ धर्ममात्रं वरणमुत परिक्रयार्थमिति । यदि धर्ममात्रं प्रकृतौ, सत्रेषु कर्तव्यम् । अथ परिक्रयार्थं, न कर्तव्यमिति । किं प्राप्तम् । मन्त्रवन्नियमवचोदिति कृत्वा धर्ममात्रम् । तस्मात्सत्रेषु कर्तव्यमिति ।

एवं प्राप्ते, ब्रूमः । वरणमृत्विजां सत्रेषु न स्यात् । न कर्तव्यमिति । स्वार्थं हि तेषां कर्म । न च कश्चिदात्मानं वृणीते । प्रकृतौ चाऽऽनमनार्थं वरणं दृष्टप्रयोजनमिति न शक्यमदृष्टं कल्पयितुम् । तस्मात्सत्रेषु वरणं न स्यादिति ॥ ३४ ॥

(सत्रे परिक्रयाननुष्ठानाधिकरणम् ॥ ११ ॥)

[११] परिक्रयश्च तादर्थ्यात् ॥ ३५ ॥ सि०

परिक्रयश्च प्रकृतौ ज्योतिष्टोमे आम्नातः । गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं

---

३२ ॥ ३३ ॥ ३४ ॥

---

१ एवमेवमादीति—पा० । २ छ एतावत्र —गा० ।

दक्षिणा, इति। तद्दाक्षिण्यं सत्रे चोदकेन प्राप्तं किं कर्तव्यं निवृत्तं वेति संशयः। किं प्राप्तम्। कर्तव्यः परिक्रय, चोदकानुग्रहाय। अपि च तत्र गवादयः प्रतिषिध्यन्ते, न ह्यत्र गौर्दीयते, न वासो न हिरण्यमिति। तत्सति परिक्रयेऽवकल्पते।

एवं प्राप्ते ब्रूमः। परिक्रयश्च तादर्थ्यादिति। परिक्रयश्च न कर्तव्यः। उक्तमधस्ताद्वरणं सत्रेषु न कर्तव्यमिति। परिक्रयश्चेति चशब्देनान्वादेशः क्रियते, न कर्तव्यः परिक्रयः। कुतः। आत्मार्थत्वात्। न कश्चिदात्मानं परिक्रीणीत इति॥ ३५॥

प्रतिषेधश्च कर्मवत्॥ ३६॥

प्राप्तौ सत्यां प्रतिषेधोऽवकल्पत इति यदुक्तं, तत्परिहर्तव्यम्॥३६॥

स्याद्वा प्रासर्पिकस्य धर्ममात्रत्वात्॥ ३७॥

प्रतिषेध उपपद्यत इत्यर्थः। कस्य। प्रासर्पिकस्य दानस्येति। धर्ममात्रं हि तत्सत्रेषु चोदकप्राप्तं, तन्निवर्तते। तस्मादुपपन्नः प्रतिषेध इति॥ ३७॥

न दक्षिणाशब्दात्तस्मान्नित्यानुवादः स्यात्॥३८॥

नायं प्रासर्पिकस्य प्रतिषेधः। दक्षिणाशब्दात्। दक्षिणाशब्दो ह्यत्र भवति। अदक्षिणानि सत्राण्याहुः। न ह्यत्र गौर्दीयते, न वासो न हिरण्यमिति। दक्षिणाशब्दश्च परिक्रयार्थो भवति। तत्र हि श्रूयते। गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा, इति। ऋत्विग्दानं दक्षिणा, न प्रासर्पिकम्। तस्यैवासौ प्रतिषेधो न प्रासर्पिकस्य। तस्मान्नित्यप्राप्तस्यैवानुवादोऽसौ न सत्रेषु दक्षिणेति॥ ३८॥

(उदवसानीयस्य सत्राङ्गत्वाद्दक्षिणादानस्य ऋत्विक्परिक्रयार्थत्वाधिकरणम्॥ १२॥)

[१२] उदवसानीयः सत्रधर्मा स्यात्तदङ्गत्वात्तत्र दानं धर्ममात्रं स्यात्॥ ३९॥ पू०

३५॥ ३६॥ ३७॥ ३८॥]

१ छम दाक्षिण्यं—पा०।

अस्त्युदवसानीयः । सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन्निति । तत्रैषोऽर्थः सांशयिकः । दक्षिणादानं धर्ममात्रमुत परिक्रयार्थमिति । तथेदमपरं द्वैतम् । किं सत्राङ्गमुदवसानीयः, नेति । यदि सत्राङ्गं, धर्ममात्रं दानम् । अथ न सत्राङ्गं, परिक्रयार्थमिति । किं प्राप्तम् । सत्राङ्गमिति । कुतः । सत्रप्रकरणात् । सत्रं परिसमाप्य कर्तव्यमिति श्रूयते । सत्रप्रकरणात्सत्रं कृतवतेति गम्यते । उदवसानीयश्च सत्रस्य विधीयत इति । सत्रस्य च फलार्थत्वान्नोदवसानीयार्थता गम्यते । न च सत्रोदवसानकाल उदवसानीयः । लक्षणा हि तथा स्यात् । अनङ्गत्वे च फलं कल्पयितव्यम् । तस्मादानन्तर्यादेकवाक्यतासंबन्धाच्च सत्राङ्गमुदवसानीयः । सत्रं यथोक्तं परिसमाप्य न संस्थातव्यम् । न तावत्कृत्वा कृतिता मन्तव्या । इदमपरं तस्याङ्गं कर्तव्यमुदवसानीय इत्येवमभिसंबन्धः क्रियते । यथा, अग्निं चित्वा सौत्रामण्या यजेत, वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति । तस्मात्सत्राङ्गम् । एवं चेत्साङ्गस्य सत्रस्य स्वयं कर्तृकत्वाद्धर्ममात्रं तत्र दानम् । सत्रधर्मो उदवसानीय इति ॥ ३९ ॥

न त्वेतत्प्रकृतित्वाद्विभक्तचोदितत्वाच्च ॥ ४० ॥ सि०

तुशब्दः पक्षं व्यावर्तयति । नैतदेवं, धर्ममात्रमत्र दानमिति । किं तर्हि । परिक्रयार्थमिति । कुतः । नैतत्सत्राङ्गम् । विभक्तचोदितत्वात् । नैतद्बृहस्पतिसवेन सौत्रामण्या च तुल्यम् । तत्रैव श्रूयते । यथोक्ताङ्गं कृत्वा नैव संस्थातव्यम्, इदमपरं तस्य कर्तव्यमिति । इह पुनः सत्रमु-

'न च सत्रस्योदवसानीयाङ्गत्वम्' लक्षणा हि तथा स्यादिति—कोऽभिप्रायः । न सत्रमग्निचिन्वाक्ये विधीयते । न च (तत्र क्वचित्) सत्रे किंचिदिति, सत्रं परार्थमुपादीयते । तत्रैव लक्षणा स्यादित्ययमभिप्रायः । 'वाजपेयेनेष्ट्वा सत्रादुदवसाय' इति च तुल्यं मत्वा पूर्वपक्षं करोति । उत्तरः पक्षः, नैतयोस्तुल्यता वाक्ययोः । वाजपेयेनेष्ट्वेति निर्वर्त्य पूर्वक्रियायामन्यक्रियान्तरं विधीयते । तद्वदनया लक्षणया तु पूर्वक्रियापरिसमाप्तिरवगम्यते, न तु तत्तादर्थ्येनोच्यते । क्रियाविशेषापेक्षयाऽऽरम्भानुष्ठानपरिसमाप्तयः । तस्मान्न सत्रं तादर्थ्येनोच्यते । तत्पूर्वोऽवगम्यते. श्रुत्यैव परिसमाप्तिं गमयति । कर्तव्यत्वेन यदन्यद्विधीयते तस्य तदङ्गता नास्ति । पूर्वधर्मो निःप्रमाणत्वात् । उपदेशपादप्रवृत्तोऽनुपपन्ने, कथमङ्गत्वम् । अपाङ्गत्वमुदवसायेति भाष्यते ॥ ३९ ॥

त्सृज्य, उदवसानीयः कर्तव्य इति । सत्रादुदवसाय—इत्यायेत्यर्थः । तत्रान्योऽर्थः क्त्वाशब्दस्य । यथोदितं निर्वर्त्य न प्रहातव्यम् । तत्पूर्वस्यावपूर्वस्य स्यतेः प्रहायेत्यर्थः । प्रहाण इह क्त्वाशब्दः । तत्र पुनरनुष्ठानानन्तर्ये । तस्माद्विभक्तचोदितत्वान्न सत्राङ्गं, न च सत्रप्रकृतिकम् । तस्मादत्र दानं परिक्रयार्थमिति ॥ ४० ॥

(पृष्ठशमनीयस्य ऋत्विगन्तरसंपादनेन प्रत्येककर्तृकत्वाधिकरणम् ॥ १३ ॥)

[१३] तेषां तु वचनाद्द्वियज्ञवत्सहप्रयोगः स्यात् ॥ ४१ ॥ पू०

इदमेवोदाहरणं, सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन्निति । तत्रैषोऽर्थः समधिगतः । न सत्राङ्गं पृष्ठशमनीय इति । अथेदानीमिदं संदिह्यते । किं संहत्य तैस्तत्कर्तव्यमुतैकैकेनेति । किं प्राप्तम् । संहत्येति । कुतः । उपादेयत्वेन यागे चोद्यमानस्य बहुत्वस्य श्रवणात् । स चेदेकेन क्रियेत, बहुत्वसंयुक्तः प्रयोगो न स्यात्, द्वियज्ञवत् । यथा, एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामिति । यद्यपि राजपुरोहितौ लक्षणत्वेन श्रूयेते, एवमपि यजेयातामिति याग उपादेयत्वेन । यागे चैतत्कर्तृद्वित्वं श्रूयते, यजेयातामिति । तद्वत्, पृष्ठशमनीयेन यजेरन्निति । तस्मात्संहत्य पृष्ठशमनीयं प्रयुञ्जीरन्निति ॥४१॥

॥ ४० ॥]

' यजेरन् ' इत्युपादेयत्वे श्रुतस्य बहुवचनस्य विवक्षा । नन्वितरेतरनिरपेक्षास्तथाऽपि यागे सापेक्षा द्वियज्ञवत् । यथा राजपुरोहितौ फले प्रति प्रधानभूतौ, यागं प्रति गुणभूतौ । कथम् । यागो विधीयमानः कर्तारमाक्षिपति । तत्र संख्या श्रूयते ' सायुज्यकामौ यजेयाताम्' इति, सैव विधीयते । कर्तृगामिनि क्रियाफले क्रियामकुर्वन्क्रियाफलेन न संबध्यत इत्यर्थादाक्षेप्स्यति । अन्यथानुपपत्त्या द्विवचनं विवक्ष्यते । यदि च राजपुरोहितौ द्विवचनविशेषणार्थमुपादीयेयातां, तथा सति यागं प्रधानभूतं न कश्चित्कुर्यात् । तयोर्यागो विधीयते । सापेक्षाश्च कर्तारः । तस्माद्विवक्षितं बहुवचनम् ॥ ४१ ॥

(पृष्ठशमनीये सत्रिभ्योऽन्येषामृत्विक्त्वाधिकरणम् ॥ १४ ॥)

एवं स्थितं तावदपर्यवसितमन्तरा चिन्तान्तरस्य सूत्रं तावद्वर्णयिष्यामः—

[१४] तत्रान्यानृत्विजो वृणीरन् ॥ ४२ ॥ सि०

अस्मिन्नेवोदाहरण एषोऽर्थः सांशयिकः । किं त एव सत्रिण ऋत्विज उतान्ये वा वरीतव्या इति । किं प्राप्तम् । त एव । कुतः । समानकर्तृकता हि गम्यते, उदवसाय यजेरन्निति । य एवोदवसातारस्त एव यष्टार इति भवति प्रत्ययः । यथैव वचनप्रामाण्याच्चोदकप्रामेककर्तृकतां बाधित्वा बहुकर्तृकता भवति, एवं चोदकप्राप्तानन्यानृत्विजो बाधित्वा वचनप्रामाण्यात्त एव भवितुमर्हन्तीति ।

एवं प्राप्ते, ब्रूमः । तत्रान्यानृत्विजो वृणीरन्निति । न हि पृष्ठशमनीये ये सत्रादुदवसातारस्ते कर्तारो विधीयन्ते । न तेषामुपादेयत्वेन चोदनेत्युक्तम् । न चाविहितमङ्गं भवति । न चानङ्गे हीने विगुणता काचिद्भवति । सन्ति च चोदकप्राप्ता अन्ये ऋत्विजः । अपि चात्र यावति कर्मभिप्रायं क्रियाफलं, तावति त एव कर्तारः[1] । तदेतदुपग्रहविशेषादवगम्यते । न च ऋत्विजः प्रति यागस्य कर्त्रभिप्रायं क्रियाफलम् । तस्मात्प्राप्तार्त्विज्ये त एव कर्तारः । प्रधानयागे तावत्कर्तृनवगच्छामः । ऋत्विजः पुनरन्ये वरीतव्या इति ॥ ४२ ॥

एकैकशस्त्वविप्रतिषेधात्प्रकृतेश्चैकसंयोगात् ॥ ४३ ॥

सि० (अ० १३ ॥)

स्थितादुत्तरम् । तुशब्दः पक्षं व्यावर्तयति । न पृष्ठशमनीयं संहत्य प्रयुञ्जीरन् । किं तर्हि । एकैकशः । कुतः । अविप्रतिषेधात् । उदवसानेन हि पुरुषा लक्ष्यन्ते । ये सत्रादुदवस्यन्तीति । तत्र चैकोऽप्युदवसाता भवति । ये चोदवसानलक्षितास्तेषां याग इत्येकैकस्यापि यागो विहितो भवति । न च केनचित्प्रतिषिध्यते । तस्मादेकैकोऽपि

[४२ ॥]

इतरेतरनिरपेक्षा उदवसाने कर्तारः । कुतः । अर्थवादश्रवणात् । उदवसानमन्य भा- ·न्तयागस्य एतोपाददधीन, नास्त्येव पृष्ठशमनीये । तस्मादविप्रतिपन्नं बहुवचनम् ।

1 बहुवचनस्याभाव्यमानत्वात्—इति पा० ।

यजेत । ननु बहूनां प्रयोग उच्यते । तेनैकैकस्य न भवति । नैष दोषः । एकैकस्यापि न वार्यते । तेन चोदकसामर्थ्यादेकैकश एव यजेतेति ।

आह । बहुसंयुक्तः प्रयोग एकैकेन न शक्यते कर्तुमिति । एवमपि न दोषः । नात्र बहुवचनं विधीयते । ये सत्रादुदवसातारस्तेषामेष यागः । ते च बहवः । तेषां बहूनामत्र प्राप्तानामयमनुवादः । एकैकश्येनापि च त उदवसातारः । तस्मात्तेषां तथैव यागो भविष्यति । यथैवोदवसाने तेषामसंहतानां बहुवचनम्, एवं यागेऽप्यसंहतानामेव भविष्यति । अत्रोच्यते । न बहुवचनमनुवादः । अप्राप्तत्वात् । न हि बहुवचनं यागे प्राप्तं, यदनूद्येत । नन्विदानीमेवोक्तमुदवसातॄणां यागः । ते च बहव इति । उच्यते । बहुत्वं तेषामुदवसाने, न यागे ।

ननु वाक्यसामर्थ्याद्यागेऽपि भविष्यति । नेत्याह । परिपूर्णं हि पदं पदान्तरमाकाङ्क्षति । ततो वाक्यं भवति । अयं च यागः प्रागेव बहुवचनेन संबद्धः । न तस्यामवस्थायां वाक्येनोदवसातारः प्राप्ताः । उपादत्ते तु तदा बहुत्वम् । ततो बहुवचनसंयुक्तः पदान्तरगतानुदवसातॄनपेक्षते । तस्माद्बहुत्वसंयुक्तः प्रयोगः कर्तव्यः । यथा द्वियज्ञे सत्रेषु चेति । आह । नैतदेवम् । यत्र केनचित्प्रकारेणानुवादः संभवति तत्रानुवादो वा स्यात्, विधिर्नेति । यद्यप्यपूर्वत्वादन्यत्र विधिर्यागानुवादात् । तथाऽप्यत्रानुवाद एव बहुत्वस्य भवितुमर्हति । तथा हि यागसंबन्धो बहूनां न कृतो भवति । तत्र दृष्टमेव प्रयोजनं, इतरस्मिन् पक्षे बहुत्वस्य यागसंबन्धे दृष्टं कल्पनीयं स्यात् । तस्मादनुवाद इति ।

आह । द्वियज्ञेऽपि तदेवमेव प्राप्नोति, सत्रेषु चेति । अत्रोच्यते । अस्त्यत्र विशेषः । उदवसाय यजेरन्निति । राजपुरोहितौ यजेयाताम्, ऋद्धिकामाः सत्रमासीरन्निति । यत्र कर्त्रान्तः शब्दो भवति, तत्र द्वौ प्रयोगौ गम्येते । समानाश्च कर्तारः श्रवणादेव । तत्रोत्तरप्रयोगवचनेन

ननु राजपुरोहितवदित्युक्तम् । यजेरन्निति श्रुत्यैव बहुत्वं गम्यते । सत्यं गम्यते, न तु विधीयते । कथम् । प्राप्तत्वात् । कुतः प्राप्तिः । कर्तृप्रत्ययश्रवणाद्द्वौ प्रयोगौ

केवलो धात्वर्थो विधीयते । तदाश्रयः प्रयोगः, कर्तारश्च, तद्गता च संख्या, एवं सर्वमेतद्धात्वर्थे विधीयमाने प्राप्तमेवानूद्यते ।

द्विपञ्चे सत्रेषु च धात्वर्थो विधीयते, प्रयोगोऽपि, कर्तारः, तद्गता च संख्येति, सर्वमेव तत्राप्राप्तम् । न हि राजपुरोहितावित्येष शक्नोति प्रयोगं वदितुम्, तत्र च कर्तृत्वं तद्गतां संख्याम् । तथा ऋद्धिकामा इति । तस्मादेवंजातीयकेषु संख्योपादेयत्वेन श्रूयते । अतो द्विपञ्चादिषु नानुवादः । तेषु बहुत्वसंयुक्तः प्रयोगः कर्तव्यः । इह तु न तथा । तस्मादेकैकः पृष्ठशमनीयेन यजेतेति ॥ ४३ ॥

(कामेष्टौ दानस्यादृष्टार्थत्वाधिकरणम् ॥ १९ ॥)

[१५] कामेष्टौ च दानशब्दात् ॥ ४४ ॥ पू०

अस्ति सारस्वते सत्रे कामेष्टिः, प्लाक्षं प्रस्रवणं प्राप्याग्नये कामायाष्टाकपालं पुरोडाशं निर्वपन्ति, तस्यामश्वां पुरुषीं च धेनुके दत्त्वा प्रति यमुनामवभृथमभ्यवयन्तीति । तत्र संशयः । किं परिक्रयार्थं दानमुत धर्ममात्रमिति । पृष्ठशमनीये च सत्रस्यानङ्गभूते परिक्रयार्थं दानमित्युक्तम् । अथेदानीमङ्गभूतायां कामेष्टौ चिन्त्यते । तत्र किं तावत्प्राप्तम् । यथा पृष्ठशमनीये परिक्रयार्थम्, एवमिहापीति चशब्देनान्वादिश्यते । कुतः । दानशब्दात् । दानशब्दो भवति । तस्यामश्वां पुरुषीं च धेनुके दत्त्वा, इति । दानशब्दः कर्मकरेषु सत्सु परिक्रयार्थ इत्युक्तम् ।

गम्येते । ये च पूर्वस्मिन्प्रयोगे कर्तारस्त एवोत्तरस्मिन् । पूर्वस्मिंश्चेतरेतरनिरपेक्षास्तादृशा एवोत्तरस्मिन् । प्रयोगत. क्रियाविशेषाद्वाऽप्राप्त स विधीयते । तस्मादृत्विजो य एवोदवसाने कर्तारस्त एव पृष्ठशमनीये विधीयन्ते । कुतः । सामानाधिकरण्यात् । उदवसाय यजेरन्निति । यद्वाऽन्यकर्तार. पृष्ठशमनीये भवेयु । सामानाधिकरण्यमुपपद्यते च ॥ ४३ ॥

ननु नैवात्र दानं परिक्रयार्थं, दक्षिणाशब्दाश्रवणात् । पृष्ठशमनीये तु विद्यते दक्षिणाशब्दः । कथमेतत् । उच्यते । ' भक्ष्याश्रवणाद्दानशब्दः परिक्रये ' इत्यत्र दानं परिक्रयार्थं न्यायेन स्थापितं पूर्वपक्षे । स चात्रापि न्यायः । तथा च भाष्यं-दानशब्दश्च कर्मकरेषु सत्सु परिक्रयार्थ इत्युक्तमिति ।

---

१ (अ० ३ पा० ४ अ० ११ सू० ४८)।

न चैतत्सत्रम् । सत्रस्याङ्गभूतमेतत् । प्रकरणाच्च सत्रस्य स्वयंकर्तृकता, नाङ्गानाम् । तच्चोदकप्राप्तैर्ऋत्विग्भिः सगुणं सत्सत्रस्योपकारकं भवति । अन्यैर्ऋत्विग्भिर्विना विगुणं सत्रस्य नोपकुर्यात् । तस्मादत्र दानं परिक्रयार्थमिति ॥ ४४ ॥

वचनं वा सत्रत्वात् ॥ ४५ ॥ सि०

वाशब्दात्पक्षो व्यावर्त्यते । नात्र परिक्रयार्थं दानं, धर्ममात्रमिति । कुतः । सत्रत्वात् । सत्रेष्वानतिर्निवृत्ता । आह । नैतत्सत्रं, सत्राङ्गमित्युक्तम् । उच्यते । न सत्रम् । सत्राङ्गं तु सत्रमध्यपतितम् । सत्रस्य च साङ्गस्य स्वयं कर्तृकता । तस्यां क्रियमाणायां सिद्धा अस्या इष्टेः कर्तारः । तत्राऽऽनत्या न प्रयोजनम् । श्रूयमाणं तु दानं धर्ममात्रं भवितुमर्हतीति ॥ ४५ ॥

(वैश्वानरेष्टौ द्वेष्यसंप्रदानकदानस्यादृष्टार्थत्वाधिकरणम् ॥ ११ ॥)

[१६] द्वेष्ये चाचोदनाद्दक्षिणापनयः स्यात् ॥४६॥ सि०

दर्शपूर्णमासयोरिदमाम्नायते, यदि पत्नीः संयाजयन् कपालमभिजुहुयात्, वैश्वानरं द्वादशकपालं निर्वपेत् । तस्यैकहायनो गौर्दक्षिणा ।

अत्र ग्रन्थः । न चैतत्सत्रमिति । कोऽभिप्रायः । अस्मिन् सारस्वते सत्रे, श्रावय्यते गो अयुपी यजमानाः पयोग्रहोः शिष्टिः स्वाहा सदर्शपूर्णमासौ, एतत्सारस्वतं सत्रं नात्र कामोऽस्याश्चोदकेन, तस्मादङ्गं तदेतत्सत्रमिति ।

इतरो ब्रवीति, सत्रस्याङ्गं भवति । साङ्गं च सत्रं कर्तव्यम् । तत्र द्वादशाहप्रकरणाच्च सत्रस्य साङ्गस्य, नाङ्गानामिति । कोऽभिप्रायः । द्वादशाहे, आर्त्विज्येषु यजमाना. कर्तारो विधीयन्ते । तेष्वेतत्स्वयं कर्तृकता प्रकरणात्सत्रस्य साङ्गस्य प्रकृतौ येषु कर्तृतोक्ता, इह चोदकेन तेष्वेवाङ्गेषु स्वयं कर्तृकता प्राप्नोति । कामेष्टिरपूर्वमङ्गम् । न च प्राकृतस्य कार्ये वर्तते । यो यूपावटस्तरणन्यायः स इहापि । न ह्यनेन न्यायेन यूपावटस्तरणेऽध्वर्युः कर्ता न प्राप्नोति ।

उच्यते । सोमे साङ्गे प्रत्यक्षेण कर्तारो विधीयन्ते । यत्र चोदकेन, तत्र नियतत्वेन पदार्थेषु नाधिकेषु ॥ ४४ ॥

प्रकृता एव यजमानाः कामेष्टिं करिष्यन्ति, लाघवात् । कामेष्टौ प्रत्यक्षेण वचनेन कर्तारो न प्राप्नुवन्ति । चोदकेनापि न, प्रसङ्गेनात्र प्राप्नुवन्ति ॥ ४५ ॥

तं सं द्वेष्याय दद्यादिति । तत्र संशयः । किं परिक्रयार्थमेकहायनस्य दानमुत धर्ममात्रमिति । किं प्राप्तम् । दक्षिणाशब्दात्परिक्रयार्थमिति । परिक्रयार्थे हि दक्षिणाशब्दो भवति ।

एवं प्राप्ते, ब्रूमः । द्वेष्ये च धर्ममात्रं दानमिति चशब्देनान्वादिश्यते । कुतः । अचोदनाद्द्वेष्यस्य ऋत्विजः । न हि द्वेष्य ऋत्विग् भवति । ऋत्विगाचार्यौ नातिचरितव्याविति । यदा परिक्रेतव्येनैव कर्त्रा प्रयोजनं नास्ति, तदा किं दक्षिणाशब्दः करिष्यति । अपि च, परिक्रयार्थे सति दक्षिणापनयः स्यात् । चोदकप्राप्तोऽन्वाहार्योऽपनीयेत । तत्र चोदको बाध्येत । तस्माद्धर्ममात्रमेकहायनस्य दानमनृत्विजे दातव्यमिति ॥ ४६ ॥

(अस्थियज्ञस्य जीवदधिकारिकत्वाधिकरणम् ॥ १७ ॥)

[१७] अस्थियज्ञोऽविप्रतिषेधादितरेषां स्याद्विप्रतिषेधादस्थ्नाम् ॥ ४७ ॥ सि०

इदमाम्नायते, यदि सत्राय संदीक्षितानां प्रमीयेत, तं दग्ध्वा कृष्णाजिनेऽस्थीन्युपनह्य योऽस्य नेदिष्ठस्तं तस्य स्थाने दीक्षयित्वा तेन सह यजेरन् । ततः संवत्सरेऽस्थीनि याजयेयुरिति । योऽयं संवत्सरे यज्ञः, स संदिह्यते, किमस्थ्नामुत जीवतामिति । किं तावत्प्राप्तम् । सामानाधिकरण्यादस्थ्नामिति । किं सामानाधिकरण्यम् । याजयतेरस्थीनि कर्मभूतानि ।

नन्वस्थीन्यचेतनानि न शक्नुवन्ति स्वयं तन्त्रयितुं, कथं तानि क्रियायां कर्तॄणि भवेयुरिति । उच्यते । प्रयोज्यता तेषां श्रूयते । ततोऽन्ये प्रयोजयितारः । त एतानि क्रियां कारयिष्यन्तीति । आह । न ह्यकुर्वति कारयतीति भवति । कर्तुर्हि प्रयोजको हेतुः । न चैतानि कार्त्स्न्येन क्रियामुपसंहर्तुं शक्नुवन्तीति । उच्यते । वचनप्रामाण्यादाथ-

अपि च परिक्रयार्थे सति दक्षिणाशब्दः स्यात् । चोदकप्राप्तोऽन्वाहार्योऽपनीयेत । तत्र चोदको बाध्येत । इत्ययुक्तोऽयं ग्रन्थः । कथम् । पत्नीसंयाजवेलायामन्वाहार्यो दत्तः । यद्यपि निमित्त इयमिष्टिर्विधीयते तथाऽपि प्रसङ्गेनैव निर्वृत्तत्वादेवान्वाहार्यः प्राप्नोति ॥ ४६ ॥

याजमानं कारयितुं शक्यन्ते तानस्कारयिष्यन्ते, औदुम्बरीसंमानं शुक्रान्वारम्भणमित्येवमादीनि ।

आह प्रधानमेव न शक्नुवन्ति, नाङ्गानि कुर्वन्ति यजमानानि भवन्तीति । अत्रोच्यते । वचनसामर्थ्यात्तच्छवद्रव्यमृत्विजः प्रतिग्रहीष्यन्ति । तद्दक्षिणापरिक्रीतास्तत्त्यक्ष्यन्ति । ईदृशो द्रव्यत्यागो वाचनिको भविष्यतीति । आह । एवं वर्ण्यमाने याजयितॄणामेव कर्तृत्वमुपदिष्टं भवति, नास्थ्नामिति । उच्यते । यष्टॄणामेवैतेन प्रकारेण कर्तृत्वमुपदिश्यते । न ह्यकर्तरि कारयतीति भवति । हेतुकर्तृत्वं चास्थ्नां यागे सति प्राप्तमेवानूद्यते । यथा, ग्रामकाम संयाजयेदिति ग्रामकामो यजेतेति विधीयते । हेतुत्वे च प्राप्तानुवादमात्रम् । तच्च दर्शयति, स्तोत्रेऽस्थिकुम्भमुपदधातीति । अस्थ्नामेव यजमानत्वं दृश्यते । तस्मादस्थ्नां यज्ञो न जीवताम् ।

इति प्राप्ते, ब्रूमः । अस्थियज्ञ इतरेषां जीवतां स्यात् । तेषामविप्रतिषिद्धो यज्ञः । अस्थ्नां विप्रतिषिध्यते । त्यागो नाम मनसा क्रियते, न चास्थ्नामस्ति मनः । यदुक्तम्, ऋत्विजः शवद्रव्यं दक्षिणां प्रतिगृह्य तत्परिक्रीतास्त्यागं कुर्वन्तीति । ईदृशो वाचनिकस्त्यागो भवतीति । नैतदेवम् । न हि यजेतेत्युक्ते, अशक्नुवतस्तु वचनप्रामाण्यादन्यो यज्ञपर्यो भवति । यागं कुर्वीतेति हि तद्वचनं, नान्यो यज्ञपर्थे इति । न च वचनप्रामाण्यादेतद्भवति, यच्छवद्रव्य तद्धूयते । न हि तदृत्विग्निर्दिष्टं भवति । न चासति दाने परित्यागः । न च गौणोऽर्थो विधिशब्दादवगम्यते । अन्येन हि प्रमाणेन परिच्छिन्नेऽर्थे गौणः शब्दः संबध्यते । यथा, गौरनुबन्ध्य इति गोजातिविशिष्टः पशुरनुबध्यते, न वाहीकः । गौरयं वाहीक इति तु संवादे वाहीके गौणः शब्दः प्रवर्तते । तस्मान्न त्यागविधानेऽन्यो यज्ञार्थः स्यात् । न चास्थ्नां द्रव्यं स्व संभवति । यदृत्विजो गृहीत्वा यजमानेन परिक्रीता इति मन्येरन् । तस्मान्न कथंचनास्थीनि यष्टॄणि भवन्ति । अतो न विवक्षितं सामानाधिकरण्यमिति ।

यदि त्वर्थोऽभिप्रेतोऽस्य कश्चन, यमन्तं याजयितुं किमपि भवतीति, न च

---

१ मार्जनानि—पा० । २ तद्दक्षिणापरिक्रीता—पा० ।

आह । असंबद्धवचनादनर्थकं तर्हीदं वाक्यम् । नेति ब्रूमः । न हि गम्यमानेऽर्थेऽनर्थकं भवति । ततः संवत्सरे याजयेयुः, इत्येतावतो वाक्यात्कश्चिदर्थोऽवगम्यते स इह विवक्षितः । अस्थीनि याजयेयुरित्येष संबन्धो न विधीयते । आह । किमस्थीनीति प्रमादपाठः । न च प्रमादपाठ इति ब्रूमः । न हि स एवाप्रमादपाठो यो विधानार्थो मुख्यार्थश्च । अनुवदन्नप्यर्थं लक्षणयाऽपि ब्रुवन् वाक्ये समवायं गच्छति । न च प्रमादपाठो भवति । तत्र, अस्थीनीत्येष शब्दो विदधत्स्वमर्थं मुख्यया वृत्त्या ब्रुवन् वाक्ये न समवैति । अनुवदंस्तु लक्षणया समवेष्यति । ततः संवत्सरे याजयेयुरिति जीवतः प्रकृतान् वक्ष्यति । तत्रास्थिशब्दो वर्तिष्यते लक्षणया । ततः संवत्सरेऽस्थिमतो याजयेयुरिति । के तेऽस्थिमन्तः । ये तेन सह यष्टुं प्रक्रान्ताः । तस्माद्यस्य तान्यस्थीनि, तैरस्थिभिः स शक्यते लक्षयितुम् । *तस्माज्जीवतो यज्ञ इति ॥ ४७ ॥

यावदुक्तमुपयोगः स्यात् ॥ ४८ ॥

अथ यदुक्तमस्थ्ना याजमानं दर्शयति, स्तोत्रेऽस्थिकुम्भमुपदधातीति । नैतद्याजमानम् । न ह्यस्थीनि यजन्त इत्युक्तम् । अतो वचनप्रामाण्यादेतत्कर्म याजमानसरूपं भवति । यावति वचनं तावत्येव कल्पयितुमर्हति, न तत्सर्वं याजमानं शक्नोति लक्षयितुम् । तस्माज्जीवतामेव यज्ञ इति ॥ ४८ ॥

(अस्थियज्ञस्य मृताधिकारित्वपक्षे जपसंस्कारेष्टीनां लोपाधिकरणम् ॥ १८ ॥)

[१८] यदि तु वचनात्तेषां जपसंस्कारमर्थलुप्तं सेष्टि तदर्थत्वात् ॥ ४९ ॥ सि०

इह जपसंस्कारामिष्टिश्च चिन्त्यते । तत्र सूत्रेतरार्धेन जपसंस्कारं

---

*चिद्यष्टुमिच्छेत् । अतो ऽयमर्थोऽनुवादः ॥ ४७ ॥ [४८ ॥

---

१ याजयेत्—पा० । २ *यर्थं इति—' ततोऽस्थीनि याजयेयुः ' इत्यत्रास्थिपदेनास्थ्युपलक्षितैस्तदुपलक्ष्येण जीवतामेव लक्षणयाऽभिधानात्तेषामेव संवत्सरान्ते विधीयमानो यागोऽन्यफलकत्वात्कामोऽस्तीति विचार इति ततोऽस्थिदेशाद्यत्विहृत्याश्रेण्यर्थत्वाद्योऽनुवाद इत्यर्थः ।

चिन्त्यते, शेषेणापीष्टिः । जपाः, यत्र जपतीति चोदनाः । संस्काराः, केशश्मश्रु वपतीत्येवमादयः । किमस्थ्नां जपसंस्कारं कर्तव्यं, नेति संशयः । ननु नैवास्थ्ना यज्ञो, जीवतामसाविदमुक्तम् । अत्रोच्यते । कृत्वा चिन्तैषा । अस्थ्नामिति कृत्वा चिन्त्यते । अनेन प्रकारेण पूर्वाधिकरणस्य प्रयोजनं विचार्यते । यद्यस्थ्नां यज्ञः स्यात्, किं जपसंस्कारं क्रियते, नेति । किं तावत्प्राप्तम् । विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यादित्यनेन न्यायेन कर्तव्यमिति ।

एवं प्राप्ते, ब्रूमः । यदि तु वचनात्तेषामस्थ्नां यज्ञः स्यात् । तेषां जपसंस्कारं लुप्तार्थं निवर्तेत । न तैः शक्यं जपितुं, नापि केशश्मश्रु वप्तुम् । अशक्यं च चोदको न प्रापयति । अथ सूत्रोत्तरार्धं, सेष्टि तदर्थत्वादिति । दीक्षणीयेष्टिः कर्तव्या, नेति विचारः । किं प्राप्तम् । चोदकानुग्रहाय कर्तव्या ।

एवं प्राप्ते, ब्रूमः । सहेष्ट्या जपसंस्कारं न कर्तव्यम् । इष्टिर्लुप्येतेति । कुतः । तदर्था हि सा । यजमानो दीक्षां ग्रहीष्यतीति । दीक्षा च व्रतानि । नियमाश्च मानसं कर्म । न चैषां मनोऽस्ति । दीक्षाग्रहणार्था चेष्टिः संयोगाज्ज्ञायते, आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण इति । तस्मादिष्टिरपि निवर्तेतेति । क्रत्वर्थं तु क्रियेत गुणभूतत्वात् ॥ ४९ ॥

(अस्थियज्ञस्य मृताधिकारिकत्वपक्षे क्रत्वर्थानामनुष्ठानाधिकरणम् ॥ १९ ॥)

[१९] क्रत्वर्थं तु क्रियेत गुणभूतत्वात् ॥ ५० ॥ सि०

अस्थियज्ञ एवेदं संदिह्यते । यजमानेन संमितौदुम्बरी भवति । तथा, शुक्रं यजमानोऽन्वारभत इति । अस्थ्नां यागे सति किमेवंजातीयकं कर्तव्यं, नेति । किं प्राप्तम् । अचेतनानामस्थ्नां सर्वक्रियासु स्वातन्त्र्यं नास्ति । तस्मादौदुम्बरीसंमाने शुक्रान्वारम्भणे च नार्थानि कर्तॄणि भवेयुरिति ।

---

४२ ॥]

---

१ (अ० ३ पा० १ अ० १ सू० १)।

एवं प्राप्ते, ब्रूमः । क्रत्वर्थं तु क्रियेत गुणभूतत्वात् । यत्क्रत्वर्थमेवंजातीयकं तत्क्रियेत । गुणभूतत्वात् । गुणभूतस्तत्र यजमानः । यजमानपरिमाणसंमितयौदुम्बर्या प्रयोजनम् । यजमानान्वारब्धेन च शुक्रेण । अचेतनेनैव च परिमीयते । शुक्रश्चान्वारभ्यते । तस्मादेवंजातीयकं कर्तव्यमिति ॥ ५० ॥

(अग्निष्टुतश्च सत्राधिकारिकर्तृपक्षे गुणकामानामननुष्ठानाधिकरणम् ॥२०॥)

[२०] काम्यानि तु न विद्यन्ते कामाज्ञानाद्यथेतरस्यानुच्यमानानि ॥ ५१ ॥ सि०

अस्ति ज्योतिष्टोमः, तत्र श्रूयते । यदि कामयेत वर्षेत्पर्जन्य इति, नीचैः सदो मिनुयादित्येवमादि । तदिह चोदकेन प्राप्तं काम्यं कर्तव्यं नेति संदिह्यते । चोदकानुग्रहाय, कर्तव्यमिति । नन्वर्थीनि न किंचित्कामयन्ते । यजमानकामनिमित्तकार्थवंजातीयकाः पदार्थाः । अत्रोच्यते । नात्र यजमानेन कामयमानेन प्रयोजनम् । एषोऽत्रार्थो नीचैः सदसि मीयमाने वृष्टिर्भवति । तद्यदि वृष्ट्या प्रयोजनं, नीचैः सदो मातव्यं, वृष्टिः प्रयोजनवती भविष्यतीति ।

एवं प्राप्ते, ब्रूमः । काम्यान्येवंजातीयकानि न कर्तव्यानि । कुतः । यदि यजमानो वृष्टिं कामयेत नीचैः सदसि मीयमाने वृष्टिर्भवति । यजमानफलदं ह्युपग्रहविशेषात्साङ्गं कर्म, नान्येषां कामयितॄणां दातुमर्हतीति । न च वृष्टिर्यजमानस्य फलमिति विज्ञायते । यथेतरस्य जीवतो यजमानस्य विद्यमानोऽपि कामोऽनुच्यमानो न भवति । ऋत्विजां पुनरस्त्रां, येषां काम एव नास्ति । तस्मात्काम्यानि न कर्तव्यानीति ॥ ५१ ॥

(अग्निष्टुतस्य सत्राधिकारिकर्तृपक्षे सूक्तवाकान्तर्गतायुरादिकल्पकाशास्मानामननुष्ठानाधिकरणम् ॥ २१ ॥)

[२१] ईहार्थाभावात्सूक्तवाकवत् ॥ ५२ ॥ सि०

क्रत्वर्थं तु क्रियेत गुणभूतत्वात् ॥ ५० ॥

ननु यजमानपरिदेश एव नास्ति । सत्यम् । 'आसीनाः यजेरन्' इति श्रूयते । तत्र कः पुनर्यजमान इति स्तोत्र इति जिज्ञासोपदाने, नेष्टिः । स च सोमयाग उपदेशेनैतत्, क्रिया घटते । अथवा दृष्टया स्थित्वा ॥ ५१ ॥

सन्ति, अस्मियज्ञे दर्शपूर्णमासप्रकृतिकानि चोदकप्राप्तानि मायणी-यादीनि, तेषु चोदकप्राप्तः सूक्तवाकः। तत्रेमानि, अयं यजमान आयुराशास्ते सुप्रजास्त्वमाशास्ते—विश्वं प्रियमाशास्ते यदनेन हविषाऽऽशास्ते तदश्यात्तदृध्यात्तदस्मै देवा रासन्तामिति। किमिमानि कर्तव्यानि, न कर्तव्यानीत्येषोऽर्थः संदिह्यते। किं तावत्प्राप्तम्। ईहार्था ये कामाः सूक्तवाके श्रूयन्ते, तेऽपि न स्युः। किं कारणम्। अभावात्कामयितुः। न ह्यस्मीनि कामयन्त इत्येतदुक्तम्। तस्मान्न कर्तव्यानि। सूक्तवाके, इति सूत्रयितव्ये, सूक्तवाकवदिति सूत्रितम्। कथमेवं वर्ण्यत इति। उच्यते। ईहार्थाः सूक्तवाकार्हाः। अर्हे वतिर्द्रष्टव्यः। यथा, छन्दोव्यतिक्रमाद्व्यूढे भक्षपवमानपरिधिकपालस्य मन्त्राणां यथोत्पत्तिवचनमूहवत्स्यादिति। तस्मान्न सूत्रोपालम्भः॥ ५२॥

स्युर्वाऽर्थवादत्वात्॥ ५३॥

न चैतदस्ति, यदुक्तं भवताऽस्मामीहार्थाः कामा न कर्तव्या इति। स्युर्वाऽर्थवादत्वात्। स्युर्वा एते कामाः। कस्मात्। अर्थवादत्वात्। अर्थवादा एते, आयुराशास्ते सुप्रजास्त्वमाशास्त इति। नैते विधयः, अर्थवादा एते। अर्थवादत्वाच्च तेषां क्रियां चोदकः प्रापयति। एवं चोदकानुग्रहो भवति। तस्मात्पश्याम ईहार्थाः कामाः कर्तव्या इति॥५३॥

नेच्छाभिधानात्तदभावादितरस्मिन्॥ ५४॥

न चैतदस्ति, यदुक्तं भवता, ईहार्थाः कामाः कर्तव्या इति। कस्मात्। इच्छाभिधानात्। इच्छाभिधाना एते कामाः। आयुराशास्ते सुप्रजास्त्वमाशास्ते दिव्यं धामाऽऽशास्ते, इति। इच्छायामुत्पन्नायां प्रयुज्यन्ते। य एतान् कामानिच्छेत्स चेह यजमानो नास्ति। अचेतनावन्त्येतान्यस्थीनि। अस्मामिच्छा न विद्यते। तदभावात्—अस्मामिच्छाया अभावात्, इतरस्मिन्—जीवति, एते कामा भविष्यन्ति, नास्थिषु। तस्मात्पश्यामोऽस्मामीहार्थाः कामा न कर्तव्या इति। नन्वेतेऽर्थवादा इत्युक्तम्। अत्रोच्यते। नैतेऽर्थवादाः। विधय एते। एवं चेत्परिहृतमेत-

[५२॥ ५३॥

१ (अ० १० पा० ५ अ० २६ सू० ८८)।

ऊर्वति। तस्माद्यदुक्तं भवता, अस्थ्नामीहार्थाः कामाः कर्तव्या इति। मैतदेवम्। न कर्तव्याः। नेच्छाभिधानात्तदभावादितरस्मिन् ॥ ५४ ॥

(अस्थियज्ञे मृताधिकारपक्षे होतृकामनयाऽनुष्ठीयमानानां गुणकामानाम-ननुष्ठानाधिकरणम् ॥ २२ ॥)

[२२] स्युर्वा होतृकामाः ॥ ५५ ॥ पू०

-द्वादशाहप्रभृतीनि सत्राण्युदाहरणम्। तानि प्रकृत्य श्रूयते। ततः संवत्सरेऽस्थीनि याजयेयुरिति। चोदकप्राप्तानि दीक्षाप्रभृतीनि कर्माणि श्रूयन्ते। सन्ति च प्रकृतौ होतृकामाः। य कामयेताऽपशुमान् स्यादिति, पराचीं तस्येडामुपह्वयेत, अपशुमानेव भवति। यं कामयेत प्रमायुकः स्यादिति, तस्योच्चैस्तरां वषट् कुर्यात्। यं कामयेत पापीयान् स्यादिति, नीचैस्तरां तस्य याज्यया वषट् कुर्यात्। य कामयेत वर्षी-यान् स्यादिति, उच्चैस्तरां तस्य याज्यया वषट् कुर्यादिति। एवं तत्र संशयः क्रियते। किमस्थ्नां होतृकामाः कर्तव्याः, अथवा न कर्तव्या इति। ननु जीवता यज्ञ इत्युक्तम्। अत्रोच्यते। अस्थ्नां यज्ञ इत्येवं कृत्वा चिन्ता प्रवर्तते। तत्र सूत्रेणैवोपन्यासः क्रियते। स्युर्होतृकामाः। एतेऽस्थ्नां कर्तव्याः स्यु०। कस्मात्। चोदक० प्रापयति। एवं चोद-कानुग्रहो भविष्यति। तस्मात्पश्यामो होतृकामा कर्तव्या इति ॥ ५५ ॥

न तदाशीष्ट्वात् ॥ ५६ ॥ सि०

न चैतदस्ति, यदुक्तं भवता होतृकामा कर्तव्या इति। न कर्तव्याः। कस्मात्। तदाशीष्ट्वात्। तदाशीरेषा भवति। यजमानाशीरेषा। यां वै काचन यज्ञ ऋत्विज आशिषमाशासते सा सर्वा यजमानस्य, इति यजमानविषयतामाशिषो दर्शयति। स चेह यजमानो नास्ति। अचे-तनान्यस्थीनि। अस्थ्नां कामयितुं सामर्थ्यं नास्ति। अर्थी समर्थश्चाधि-क्रियत इत्युक्तम्। हेतुर्वा श्रुतिसंयोगाद्विधि० कार्त्स्न्येन गम्यत इति। तस्मात्पश्यामोऽस्थ्नां होतृकामा न कर्तव्या इति। क्षीणा कृत्वा चिन्ता। प्रयोजनं नोच्यते। (न तदाशीष्ट्वात्) ॥ ५६ ॥

---

९४ ॥ ९५ ॥ ९६ ॥

---

१ कामयेतेति—पा० १ (अ० १ पा० १ अ० १ सू० ५)।

(यजमानमरणोत्तरमपि सर्वस्वारस्य समापनाधिकरणम् ॥ २३ ॥)

[२३] सर्वस्वारस्य दिष्टगतौ समापनं न विद्यते कर्मणो जीवसंयोगात् ॥ ५७ ॥ पू०

अस्ति सर्वस्वारः क्रतुः, शुन.कर्णोऽग्निष्टोमः[1]। मरणकामो ह्येतेन यजेत, यः कामयेतानामयः स्वर्गं लोकमियामिति। तत्र संशयः। किं दिष्टगते यजमाने तदन्तं कर्मोत्स्रष्टव्यमुत परिसमापयितव्यमिति। किं तावत्प्राप्तम्। सर्वस्वारे दिष्टगतौ यजमानस्य सत्यां तदन्तं कर्मोत्स्रष्टव्यम्। कर्मणो जीवसंयोगात्। जीवता हि शक्यं, नाजीवता। तस्मादिदमर्थादापद्यते, सर्वस्वारेण दिष्टगतस्यन्तं यजेतेति ॥ ५७ ॥

स्याद्वोभयोः प्रत्यक्षशिष्टत्वात् ॥ ५८ ॥ सि०

स्याद्वा तस्य परिसमाप्तिः। उभयं हि प्रत्यक्षशिष्टम्। क्रतुः, परिसमाप्तिश्च। मरणकामो ह्येतेन यजेतेति — आरभ्य परिसमापयितव्यमित्याख्यातार्थः। तेन समाप्तिराख्यातेनैवोक्ता भवति। अपि चेदमाम्नायते, आर्भवे प्रस्तूयमान औदुम्बरीं सदशेन वाससा परिवेष्ट्य ब्राह्मणाः परिसमापयत मे यज्ञमिति संप्रेष्याग्निं विशतीति। यदि प्रैषमात्रं स्यात्, अदृष्टार्थं भवेत्। तस्मात्संप्रैषणद्वारलक्षणया परिसमाप्तिरेव विधीयते। यथा, यदि सोममपहरेयुः, विधावतेच्छतेति ब्रूयादिति। अथ यदुक्तं, जीवन् कर्ता भवति, न मृत इति। नेत्युच्यते। जीवता वचनं प्रोक्तम्। आरब्धं परिसमापयतेति। अतस्तत्कृतैवासौ परिसमाप्तिः। अत्राऽऽह। यदाऽसौ प्रयुक्तवांस्तदा तावत्परिसमाप्तिस्तेन न कृता। यदा परिसमाप्तिस्तदाऽसौ नास्ति। कः परिसमाप्तेः कर्तेति।

अत्रोच्यते। मुक्तसंशयेनैतत्तुल्यम्। यद्भवान् मुक्तसंशयं जीवन्तं कर्तारं मन्यते तेनैतत्तुल्यम्। योऽपि, परिसमापयतेति प्रैष्य परिसमाप्तिकाले जीवति, तस्यापि जीवनं परिसमापनकालेऽनुपकारकं, पूर्वैषा-

---

१७ ॥

---

१ कर्णस्तोम —पा०। शुन० करणस्तोम —इति सोमनाथीये पाठो दृश्यते।

देवास्य कर्तृत्वमुपपद्यत इति । स च पूर्वमेषो जीवतोऽजीवतश्च तुल्यः। तस्माज्जीवन्निवायमपि कर्तेति । अथोच्येत । जीवतः सत्त्वात्कर्तृत्वमुपपद्यत इति । एतदपि तुल्यमेव । जीवतोऽपि, पुरुषः कर्ता, न शरीरम्। स च पतितेऽपि शरीरे पुरुषोऽस्ति । तस्मात्स एव परिसमाप्तौ कर्तेति। अथोच्येत । यजमानासंभवादशक्यं हि दिष्टगतायुत्तरं तन्त्रं कर्तुम्। अतस्तद्वैदक्षो न भावयतीति। नैतदेवम् । याजमानवर्जं भावयिष्यति सः । तस्माददोषः । अथवा, प्रत्यक्षमेव परिसमाप्तेर्वचनं, ब्राह्मणाः संस्थापयत मे यज्ञमिति । तत्सामर्थ्यादेव याजमानं भविष्यति ॥ ५८ ॥

(मृताधिकारपक्षेऽस्थियज्ञ इव, सर्वस्वारेऽपि बाध्याबाध्यविवेकाधिकरणम् ॥ २४ ॥)

[२४] गते कर्मास्थियज्ञवत् ॥ ५९ ॥ सि०

अस्ति सर्वस्वारः क्रतुः, शुनःकर्णोऽग्निष्टोमः । मरणकामो ह्येतेन यजेत, यः कामयेतानामयः स्वर्गं लोकमियामिति । तत्र दिष्टगते यजमानस्य सत्यां किं कर्तव्यमिति प्रश्नः । भवति चादर्शयित्वाऽपि द्वौ पक्षौ, प्रश्नेनोपक्रमः । पक्षद्वयेऽपि प्रतिभाति, भवति संशयः । सर्वाप्रसिद्धावपि भवति । यथा, को नामायं पर्वतः । का नामेयं नदी । किमिदं फलमिति । तदभिधीयते । गते कर्मास्थियज्ञवत् । दिष्टां गतिं गते यजमाने, अस्थियज्ञवत्कर्म भविष्यति । यथा, अस्थियज्ञे क्रत्वर्थं क्रियते, तद्यदस्थिभिः । एवं दिष्टामपि गतिं गते क्रत्वर्थं शवेन कारयितव्यम्। अन्यत् । यथा, शुक्रं यजमानोऽन्वारभते, यजमानेन संमितौदुम्बरी भवतीति ॥ ५९ ॥

(सर्वस्वारे जीवद्दशाया क्रियमाणप्रायणीयादौ सूक्तवाकान्तर्गतायुराशासनादेरनुष्ठानाधिकरणम् ॥ २५ ॥)

[२५] जीवत्यवचनमायुराशिषस्तदर्थत्वात् ॥ ६० ॥ पू०

सर्वस्वार एव जीवति यजमाने भवत्येवं संशयः । आशास्ते यजमान इति किमायुराशीर्वक्तव्या, उत नेति । किं प्राप्तम् । जीवत्यवचनमायुराशिषः । कुतः । तदर्थत्वात् । यत्राऽऽयुराशास्ते यजमानस्तत्र

५८ ॥ ५९ ॥

प्रस्तरं प्रयच्छत एव, एवंकामो यजमान इत्यावेदयितव्यं भवति, तद्यजमानः कथं प्राप्नुयादिति । स चायमत्र यजमानो विपरीतकामो मरणकामः । तस्मादायुराशीस्तत्र न वक्तव्या ॥ ६० ॥

वचनं वा भागित्वात्प्राग्यथोक्तात् ॥ ६१ ॥ सि०

उच्यते । वक्तव्याऽऽयुराशीः । भागी ह्यायुराशीर्वादः । आभवे मैत्रेयमाने यजमानस्य दिष्टा गतिः प्रार्थयितव्या भवति । प्रागाभवकालादायुराशास्ते यजमानः, आभवकालं यावज्जीव्यासमिति । चोदकश्चैवमनुग्रहीष्यते । तस्मादत्राप्यायुराशीर्वक्तव्येति ॥ ६१ ॥

(सत्रे, अदृष्टार्थयोर्ऋतुयाज्यावरणहिरण्यदानयोरनुष्ठानाधिकरणम् ॥२६॥)

[२६] क्रिया स्याद्धर्ममात्राणाम् ॥ ६२ ॥ सि०

अस्ति द्वादशाहः । द्वादशाहमृद्धिकामा उपेयुरिति । अस्ति तत्र चोदकप्राप्तं धर्ममात्रं किंचित् । यथा, ऋतुयाज्यावरणम्, आत्रेयहिरण्यदानं च । तत्र संशयः । किं धर्ममात्रं कार्यं, नेति । किं प्राप्तम् । स्वयंकर्तृकत्वात्सत्त्रस्य, वरणं दानं च निवर्तेत इत्युक्तम् । न चान्यद्वचनमस्ति कर्तव्यमिति । यावानेव श्रुतस्तयोरपवर्गे दोषस्तावानश्रुतयजमानायाम् । तस्मान्न कर्तव्यमिति ।

एवं प्राप्ते, ब्रूमः । क्रिया स्याद्धर्ममात्राणाम् । यद्धि वरणं दानं वा, न भवत्यानर्थक्यं, तत्स्वयंकर्तृकेऽपि न विरोधमुपैति । तस्माच्चोदकानुग्रहाय क्रिया स्यादिति ॥ ६२ ॥

(पवमानेष्टिष्वग्निहोत्रहवणीलोपेऽपि निर्वापानुष्ठानाधिकरणम् ॥ २७ ॥)

[२७] गुणलोपे च मुख्यस्य ॥ ६३ ॥ सि०

सन्ति, अग्न्याधाने पवमानेष्टयः । अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेत्, अग्नये पावकाय, अग्नये शुचये, इति । तत्र चोदकेन प्राप्तम्, अग्निहोत्रहवण्या हवींषि निर्वपेदिति । तत्र तावदग्निहोत्रस्य कालः । तस्मादग्निहोत्रहवणी नास्ति पवमानेष्टिषु । तदभावे

---

६० ॥ ६१ ॥ ६२ ॥]

ननु सर्वाण्या त्रिकालविषया । सत्यम् । तत्र वर्तमानतावत्कालो न संभवति ।

किं निर्वापोऽपि न कर्तव्य उत कर्तव्य इति । किं प्राप्तम् । यथाश्रुतोऽसौ न शक्यते कर्तुम् । न चायथाश्रुतेन कृतेन किंचिदस्ति प्रयोजनम् । तस्माद्विगुणत्वान्न कर्तव्य इति ।

एवं प्राप्ते, ब्रूमः । गुणलोपे च मुख्यस्य क्रिया स्यादिति । गुणोऽग्निहोत्रहवणी । प्रधानं निर्वापः । यदि निर्वापो न संभवेत्, ततस्तदसंभवादग्निहोत्रहवण्यपि न संभवतीति निवर्तेत । न तु गुणलोपे मुख्यं न संभवतीति । तस्मान्निर्वापः कर्तव्यः । अग्निहोत्रहवणीसाधनता च तस्य न संभवतीति निवर्तते ॥ ६३ ॥

(सप्तदशशरावे चरौ मुष्टिलोपेन चतुःसंख्यानुग्रहाधिकरणम् ॥ २८ ॥)

[२८] मुष्टिलोपात्तु संख्यालोपस्तद्गुणत्वात्स्यात् ॥ ६४ ॥ पू०

अस्ति वाजपेयः । शरदि वाजपेयेन स्वाराज्यकामो यजेतेति । तत्र श्रूयते । नैवारः सप्तदशशरावः क्षीरे चरुर्भवतीति । अस्ति तु प्रकृतौ संख्या मुष्टयश्च, चतुरो मुष्टीन्निर्वपतीति । उभयं चोदकेन प्राप्तम् । तत्र संशयः । किं संख्यानुग्रहो मुष्टिलोपः, उत मुष्ट्यनुग्रहः संख्यालोपः, अथवा किं संख्याया मुष्टीनां च लोपः, अथवाऽन्यतरलोप इति । किं प्राप्तम् । अन्यतरलोप इति । यदि वा मुष्टिषु, यदि वा संख्यायाम् । कुतः । नियमकारिणः शब्दस्याभावादनियम इति ।

एवं प्राप्ते, ब्रूमः । मुष्टिलोपः स्यात्, संख्यानुग्रहश्चेति । कुतः ।

भूतो न विद्यते । भविष्यत्कालत्वं तु गृहीतो निर्वापस्य सद्गुणत्वाय । उच्यते । भविष्यत्कालतायास्तु भूतकल्पना न्याय्या । कथम् । अनित्यः संबन्धः । भविष्यति काले कदाचिदस्याभावात् । पुरोडाशकपाले तु भूतस्य कालस्याभाव एव । अग्निहोत्रहवण्यपि न भूतकाला यजमानेष्टिषु । प्रकृतावग्निहोत्रहवणी वचनाद्भवति । सा च भूतकालसंबद्धा, इह चोदकेन तथाभूता प्राप्नोति । न च प्राकृतमानहविष्यग्निहोत्रं संभवति । तस्मान्नास्त्यग्निहोत्रहवणी । यच्च पूर्वाहुतस्तेऽग्निहोत्रं सोऽपूर्व एव होमः ॥ ६३ ॥

---

१ सापनता स्वस्य न—पा० ।

मुख्यत्वात्संख्यायाः । पूर्वं हि संख्या निपतति । सा पूर्वमेवावगम्यते, न तदवगमकाले संख्याविज्ञानस्य परिपन्थि किंचिद्विज्ञानमस्ति । तस्मिन्निष्पविद्धे संख्याविज्ञाने प्राप्ते मुष्टिविज्ञानमापतति । तत्संख्याविज्ञानपरिपन्थितां नाऽऽचरितुमर्हति । तस्माज्जघन्यत्वान्मुष्टीनां लोपः । मुख्यत्वात्संख्यानुग्रहः । तदुक्तं, मुख्यं वा पूर्वचोदनाल्लोकवदिति ।

एवं प्राप्ते, ब्रूमः । मुष्टिलोपेन संख्या लोपमर्हतीति । कुतः । तद्गुणत्वात् । मुष्टिगुणो हि संख्या श्रूयते । चतुरो मुष्टीनिति । चतुःसंख्याविशिष्टा मुष्टयः कथं भवेयुरिति संख्योच्चार्यते, न स्वार्थे । तस्मात्संख्या पूर्वनिर्दिष्टाऽनिर्दिष्टेव । सा हि परविशेषणार्थमेवोच्चार्यते । तेन नैव तस्या अनुग्रहः कार्यः । मुष्टिलोपे सति तदधिकरणा संख्याऽधिकरणाभावान्निवर्तते । अन्याधिकरणायां क्रियमाणायां न प्रकृतिवत्कृता स्यात् । संख्यालोपे पुनर्मुष्टयो निर्वापाधिकरणाः श्रूयमाणा अधिकरणानिवृत्त्या न निवर्तयन्ति । तस्मान्मुष्टिगुणत्वात्संख्या निवर्तेत, न मुष्टयः । तदुक्तम्, अङ्गगुणविरोधे च तादर्थ्यादिति ॥ ६४ ॥

न निर्वापशेषत्वात् ॥ ६५ ॥ सि०

नैतदेवम् । न संख्या मुष्टिषु श्रूयते । यदि मुष्टिषु श्रूयेत, तद्गुणत्वान्निवर्तेत । क तर्हि श्रूयते । निर्वापे । कथम् । नैवमभिसंबन्धः क्रियते, चतुरो मुष्टीनिति । कथं तर्हि । चतुरो निर्वपतीति । मुष्टिगुणः संख्यागुणश्च निर्वापो निर्दिश्यते । क्रियासंबन्धे हि द्वितीयाविभक्तिर्भवति । कथम् । कारकविभक्तिर्हि सा । कारकं क्रियाया एव भवति, न द्रव्यस्य । अतश्चतुःसंख्या श्रुत्याऽवगता निर्वापस्य, वाक्येन मुष्टीनाम् । वाक्याच्च श्रुतिर्बलीयसी । तस्मात्संख्यानुग्रहान्मुष्टिलोप एवेति ॥ ६५ ॥

संख्या तु चोदनां प्रति सामान्यात्तद्विकारः संयोगाच्च परं मुष्टेः ॥ ६६ ॥ पू०

[१४ ॥ १९ ॥

---

१ मुख्यार्थत्वात्—पा० । २ (अ० १२ पा० २ अ० ८ सू० २५) । ३ (अ० १२ पा० १ अ० ९ सू० २७) ।

तुशब्द एनं पक्षं व्यावर्त्तयति, न संख्यानुग्रहो मुष्टिलोप इति । किं तर्हि । संख्यया संख्या निवर्तते, शरावैश्च मुष्टयः । कथम् । सामान्यात् । निर्वापसाधनं द्रव्यं प्रकृतौ मुष्टयः । तासां परिच्छेदिका चतुःसंख्या । इह सप्तदशसंख्याकः शरावद्रव्यकश्चरुर्भवतीति श्रूयते । तत्र मापनार्थं मुष्टिद्रव्यं मापनार्थैः शरावैर्निवर्त्यते । तत्परिच्छेदनार्था चतुःसंख्या परिच्छेदार्थया सप्तदशसंख्यया निवर्त्यते । तद्यथा, इदं दधि घृतं शाकमिमे शालयः, देवदत्तो भोजयितव्यः, देवदत्तश्चयज्ञदत्तस्तैलेनेति, भोजने यद्घृतेन शक्यते कर्तुं तत्तैलेन क्रियते । तस्माद्यद्यपि न श्रूयते तैलेन स्नेहयितव्यमिति, तथाऽपि समानकार्यत्वात्तैलं घृतस्य विनिवर्तकं भवति । एवं संख्या परिच्छेदं कुर्वती परिच्छेदिकाया एव संख्याया निवर्तिका भवितुमर्हति । परं च शरावद्रव्यं मुष्टेर्निवर्तकं, संयोगात् । तस्मात्प्राकृती संख्या प्राकृतं च द्रव्यं निवर्तते ॥ ६६ ॥

न चोदनाभिसंबन्धात्प्रकृतौ संस्कारयोगात् ॥ ६७ ॥सि०

नैतदेवम् । चोदनेति यागं ब्रूमः । यागसंबद्धा हि सप्तदशसंख्या, शरावद्रव्यं च । प्रकृतौ निर्वापसंस्कारसंबद्धा चतुःसंख्या मुष्टिद्रव्यं च । न चान्यत्र क्रियमाणं समानकार्यमप्यन्यत्र निवर्तकं भवति । यस्य हि प्रत्यक्षश्रुतेन चोदकप्राप्तस्य कार्यमभिनिर्वर्त्यते, तत्तेन निवर्त्येत । न च यागे क्रियमाणे निर्वापकार्यं निवर्त्यते । तस्मान्निर्वापप्राप्तं किंचिदप्यनेन न निवर्त्येत इति । विरोधात्तु चतुर्भिर्मुष्टिभिर्निरुप्यमाणं द्रव्यं न सप्तदशशरावं भवति । तस्माद्विरोधादन्यतरन्निवर्त्यते, द्रव्यं संख्या वा । तत्र चतुःसंख्यानुग्रहान्मुष्टिलोपो न्याय्यतर इति ॥ ६७॥

(आज्यग्रहण्यादौ प्रत्यक्षचोदितद्रव्योपदिष्टगोद्रव्येण प्राकृतानद्रव्यस्य बाधाधिकरणम् ॥ २९ ॥)

[२९] औत्पत्तिके तु द्रव्यतो विकारः स्यादकार्यत्वात् ॥ ६८ ॥ सि०

[६ ॥ ६७ ॥]

काचिच्छ्रूयते, द्यावापृथिव्यां धेनुमालभेत, मारुतं वत्समम्, ऐन्द्रमृषभमिति । तदत्र संशयः । किमजा धेनुवत्सर्षभा उत गाव इति । किं प्राप्तम् । चोदकानुग्रहाय, अजा इति । गुणनिमित्तास्ते शब्दाः । स गुणश्चोदकेन प्राप्ते प्राकृते द्रव्य आवेशयितव्यः । ननु गवि गुणमाहुरेते शब्दाः । सत्यं गव्याहुः । न तु गौरत्र प्रत्यक्षेण वचनेन चोदकेन वा । स एष गुणवचनो यद्यपि श्रुत्या गोधिष्ठानं गुणं वदति, वाक्येनाऽऽलम्भद्रव्यमास्कन्दति, तथाऽपि गोद्रव्यस्याभावादालभतिवाक्यमेव गृह्यते, न श्रुतिः ।

अपि च धानवयोवचना एते शब्दाः । गुणाश्चामूर्तत्वान्न क्रियया संबध्यन्ते । द्रव्येणैषां संबन्धो भवति । चोदकप्राप्तं च द्रव्यम् । तेनैषां सामानाधिकरण्यम् । यथा, अश्वौ द्वे धेनू ददाति । तस्य पुरुषी धेनुर्दक्षिणा । तथा, अजर्षभस्याजिनमवस्तृणातीति । धानवयोवचनः शब्दस्तदेकवाक्यगतेनैव द्रव्येण संबध्यते । एवमिहापि चोदकप्राप्तेन द्रव्येण संभन्त्स्यत इति । तस्मादजा धेनुवत्सर्षभा इति ।

एवं प्राप्ते, ब्रूमः । औत्पत्तिक एतस्मिन्नुपस्यैव जातिविशिष्टे गुणशब्दे द्रव्यतो विकारः स्यात् । द्रव्यमपि विकुर्यात्, न गुणमात्रम् । यदेतज्जातिविशिष्टं धानं वयश्च, न तदजपशुषु शक्यं कर्तुम् । गोपशुष्वेव तद्भवति । नन्वत्र यदपि स्याच्छक्यमावेशयितुं, तदावेशयिष्यते । यन्न शक्यं, तत्प्रमादिष्यते । यथा, अजा धेनुवत्सर्षभा इति । उच्यते । विस्पष्टस्तत्राजशब्देन धेन्वादीनामेकवाक्यभावः । इह चोदकेनाजद्रव्यम् । चोदकश्च विरोधे सति नाजद्रव्यं प्रापयति । न च धेन्वादीनां

धेन्वादयः शब्दा उभयोरसाधारणवचना एव । शोणादय इवानपेक्ष्य च पदान्तरमेते पदार्थधर्ममेवासाधारणमर्थं प्रतिपादयन्ति । केचित्पदान्तरमपेक्ष्य साधारणं प्रतिपादयन्ति । यथा शुक्लः पट इति । कथं तर्हि पूर्वः पक्षः । श्रुत्या धेनुरिति शब्दो धान एव वर्तते । गोद्रव्यं त्वस्य न शब्देन, नापि चोदकेन । अजाद्रव्यं त्वस्य चोदकेन प्राप्नोति । तत्र चानुमानिकः शब्दो विद्यते । एवं पूर्वः पक्षः ।

सिद्धान्तस्तु—असाधारणगुणवचनोऽयमधिष्ठानमन्तरेणैव गुणः संपादितो भवति ।

१ प्रकृतद्रव्ये—पा० ।

द्रव्येण संबन्धः। कारकविभक्तिरेषा, आलम्भेन संबन्धं करोति। गति सा च श्रुतिः। द्रव्यसंबन्धो वाक्येन स्यात्। तच्च दुर्बलं श्रुतेः। तस्मिंश्च जातिविशिष्टे गुण आलम्भसंयुक्ते सति न शक्यमजाद्द्रव्येण भवितुम्। न च चोदकापेक्षया प्रत्यक्षा जातिरुत्स्रष्टुं शक्यते। तस्माद्भावो धेन्वादयो भविष्यन्तीति॥ ६८॥

(वायव्यपशावुपदिष्टश्वेतगुणेन प्राकृतानद्रव्यस्याबाधाधिकरणम्॥ ३०॥)

[३०] नैमित्तिके तु कार्यत्वात्प्रकृतेः स्यात्तदापत्तेः॥ ६९॥ सि०

इदमामनन्ति, वायव्यं श्वेतमालभेत भूतिकाम इति। अत्र संशयः। किमिहापि नाजः पशुः कर्तव्य उताजः पशुरिति। उच्यते। औत्पत्तिकोऽयं श्वेतगुणसंबन्धे श्वेतशब्दः। अतो यः कश्चिच्छ्वेतगुणसंबद्धः, स आलभ्य। न हि श्वेतशब्दः प्रत्यक्षः सन् कुतश्चिच्छ्वेतद्रव्याच्चोदकेनाऽऽनुमानिकेन निवर्तयितव्यः। तस्मादजो गौरन्यो वा श्वेत आलब्धव्य इति।

एवं प्राप्ते, ब्रूमः। नैमित्तिक एतस्मिञ्श्वेतगुणनिमित्तके द्रव्ये श्वेतशब्दे सति गुणमात्रं विक्रियते। न ह्यत्र जातिविशिष्टं द्रव्यं प्रतीयते। यदेवाऽऽलम्भसाधनभूतं तदेव परिच्छेत्तव्यमित्येतद्वाक्यादवगम्यते। यच्चास्य चोदकप्राप्तं द्रव्यं साधनमविरुध्यमानं श्रुत्या प्राप्नोति, तदयं श्वेतशब्दः परिच्छेत्स्यति। नन्वजादन्यान्यपि द्रव्याणि परिच्छेत्तुमयं शक्नोति। न ब्रूमो न शक्नोतीति। न तेन परिच्छिन्नेन प्रयोजनमस्ति। तस्मात्प्रत्यक्षोऽपि श्वेतशब्दश्छागमेव परिच्छिन्द्यान्नान्यं पशुमिति॥६९॥

(साद्यस्के खलेवाल्यां प्राकृतयूपादिरस्वनियमस्य, विवेष्टौ तण्डुलेषु प्राकृतव्रीहियवान्यतरनियमस्य चाबाधाधिकरणम्॥ ३१॥)

[३१] विप्रतिषेधे तद्वचनात्प्राकृतगुणलोपः स्यात्तेन च कर्मसंयोगात्॥ ७०॥ सि०

साद्यस्के श्रूयते, खलेवाली यूपो भवतीति। तत्र संदेहः। किं

.. ..। उत्तरमधिकरणमस्यैव प्रत्युदाहरणम्। यत्र साधारणगुणवचनचोदको न बाध्यते॥ ६८॥ [६९॥]

खादिरश्चोदकेन प्राप्यते, स खलेवाली कर्तव्यः, अथ न प्राप्यते, खादिरोऽखादिरो वा खलेवाली स्यादिति । तथा चित्रायां श्रूयते । दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यं भवतीति । तत्रापि संदेहः । किं व्रीहयश्चोदकेन प्राप्यन्ते, व्रैहास्तण्डुलाः कर्तव्या उत न प्राप्यन्ते, व्रैहा अव्रैहा वा तण्डुला उपादातव्या इति ।

किं तावत्प्राप्तम् । खादिरादिः खलेवाली कर्तव्या, व्रैहास्तण्डुलाः कर्तव्याः । चोदकेन खादिरादयो व्रीहयश्च प्राप्नुवन्ति । एवं चोदकानुग्रहो भविष्यति । तेषां प्राप्तानां खलेवालीत्वं विधीयते । यो यूपः स खलेवाली कर्तव्य इति । शक्यते हि यूपः खलेवाली कर्तुं, न खलेवाली केनचित्प्रकारेण यूपो भवति । खादिरादीनां हि काष्ठानां संस्कारैर्यूपः क्रियते छेदनादिभिः, न त्वन्येषाम् । तत्र, यूपो भवतीति यूपकार्ये भवतीत्युक्तं स्यात् । तथा लक्षणाशब्दो भवेत् । व्रीहीणामपि तण्डुलाश्चोदकेन प्राप्ता एव । तेषां तण्डुलानां पिष्टभावं प्रत्यारुणाय देवतासंबन्धः क्रियते । तस्मात्खादिरादयः खलेवालीत्वमापादयितव्याः । व्रीहयश्च तण्डुलभावमापादयितव्या इति ।

एवं प्राप्ते, ब्रूमः । विप्रतिषेध एतस्मिन्, प्राकृतस्य गुणस्य लोपः स्यात् । कथं विप्रतिषेधः । तद्वचनात् । खलेवाल्या यूपता विधीयते, न यूपस्य खलेवालीता । तथा, अव्यवहितेन भवतिना संबन्धात्प्रत्यक्षं वाक्यम् । इतरथा, व्यवहितेन परोक्षं स्यात् । खलेवालीशब्दश्च यः खले वारणे प्रवर्तते तस्य वाचकः । तथाभूतश्च यूपकार्ये विनियुज्यते । या खलेवाली स यूप इति । शक्यते च यूपकार्ये विनियोक्तुम् । यत्तु यूपशब्दः कार्यलक्षणार्थ इति । व्यवधानाल्लक्षणाऽपि ज्यायसी ।

न यूपस्य खलेवालीत्वम् । तथाऽव्यवहितेन भवतिना संबन्धात्प्रत्यक्षं वाक्यम् । इतरथा व्यवहितेन भवतिना परोक्षं स्यात्—इत्ययुक्तमिदं पूर्वपक्षनिराकरणम् । कथम् । शब्दस्य धर्मोऽयं क्रमः । अर्थं प्रति शब्दो गुणभूतः । तस्माद्वाक्य एवं शब्दस्य योऽर्थः स ग्रहीतव्यः । क्रमस्तु शब्दधर्मत्वं दुर्बलः । तस्मात्पूर्वपक्षनिराकरणमिदमकल्प्यमित्यन्यथा वर्ण्यते । यूपानुवादेन खलेवालीत्वे विधीयमानेऽदृष्टार्थता प्राप्नोति । खलेवाल्या यूपकार्ये विधीयमानाया दृष्टमेव पशुनियमनं प्रयोजनम् ।

प्रत्यक्षं हि लक्षणायां, परोक्षं व्यवधाने वाक्यम् । तस्माद्यज्जातीयस्य वृक्षस्य खलेवाली कृता, तज्जातीयस्य यूपकार्ये विनियोक्तव्या । नैनां चोदको विशेषेऽवस्थापयितुं शक्नोति । प्रत्यक्षा श्रुतिस्तया चोदकेन बाधितो स्यात् । तस्मान्न खादिरादिनियम इति ॥ ७० ॥

(खलेवाल्यां तक्षणादीनामननुष्ठानाधिकरणम् ॥ ३१ ॥)

[३१] परेषां प्रतिषेधः स्यात् ॥ ७१ ॥ सि०

खलेवाल्यामेव संशयः । किं तक्षणं जोषणमुच्छ्रयणमित्येवमादयः पदार्थाः कर्तव्याः, नेति । किं प्राप्तम् । चोदकानुग्रहाय कर्तव्या इति । एवं प्राप्ते, ब्रूमः । परेषां प्रतिषेधः स्यादिति । तथाभूतस्य हि यूपकार्ये विनियोगः । खलेवालीभूतस्य हि यूपकार्ये विनियोगे कृते कृतः शास्त्रार्थो भवति । कृते शास्त्रार्थे नापरस्मै गुणाय यतितव्यम् । अपि च तक्षणादीनि यूपकारणानि । न चात्र यूपेन प्रयोजनम् । अयूपो हि यूपकार्ये विनियोजयितव्यः । तस्मात्तक्षणादयो न कर्तव्या इति ॥ ७१ ॥

प्रतिषेधाच्च ॥ ७२ ॥

इतश्च न कर्तव्याः । विप्रतिषेधः[1] कृतो भवेत्, क्रियमाणेषु तस्याः खलेवाल्याः । यत्काष्ठं खले वारणप्रवृत्तं, सा खलेवाली । तादृश्ये-वोपादातव्या तक्षणे क्रियमाणे सा विनश्येत्, द्रव्यान्तरं जायेत । यच्च खले वारणे प्रवृत्तम् । जोषणं तु प्रस्तावसरमेव । जोषितं तद-न्यार्थेनैव । वृक्षाणां हि जोषणं, न तु विकारस्य । उच्छ्रयणं चोच्छ्रि-ताया अप्रयत्नमेव । तस्मात्तक्षणादयो न कर्तव्या इति ॥ ७२ ॥

(खलेवाल्या पर्यूहणादिसंस्काराणामननुष्ठानाधिकरणम् ॥ ३२ ॥)

[३२] अर्थाभावे संस्कारत्वं स्यात् ॥ ७३ ॥ सि०

खलेवाल्यामेव संदेहः । किं मैत्रावरुणदण्डेन भूमेः समक्रिया,

तस्माद्यथाश्रुतमेव वाक्यम् । न तु विहितकल्पनाप्रसङ्गः । कथं तर्हि प्रसङ्गः । उप-चयत्वेन । अथ चापरो गुणः । अन्यहितेन भवतिना सम्बध्यत इति ॥ ७० ॥ [७१ ॥ ७२ ॥

---

[1] प्रत्यक्षा हि श्रुतिः । तथा—पा० ।

अद्भिरवसेचनं बलवदवधानमञ्जनमित्येवमादयः पदार्थाः कर्तव्याः, उत नेति । किं प्राप्तम् । न कर्तव्या इति । परेषां प्रतिषेधः स्यादित्युक्तम् । यादृशः खले वारणे वर्तते, तादृश एव यूपकार्ये विनियोक्तव्योऽयूपः । यूपार्थाश्च चोदकप्राप्ताः संस्कारास्तस्मिन्निवर्तेरन्निति ।

एवं प्राप्ते, ब्रूमः । अर्थाभावे कार्याभावे, यदि खलेवाल्यास्तैः संस्कारैः कार्यं न भवति, ततो यूपत्वमेव तेषां निमित्तं स्यात्, खलेवाल्यां न भवेयुः । इह पुनर्भूमेः समक्रियया, अद्भिरवसेचनेन, बलवदवधानेन च कार्यमस्ति दार्ढ्यम् । शिथिला हि सा खले वारणेन भवति । न च खलेवालीत्वमुपघ्नन्ति । तस्मात्कर्तव्याः । अञ्जनमप्यनुपघातकं चोदकप्राप्तं क्रियमाणमविकाय गुणाय स्यात्, न दोषाय । तस्मात्तदपि कर्तव्यमिति ॥ ७३ ॥

(महापितृयज्ञे धानास्ववघातानुष्ठानाधिकरणम् ॥ ३३ ॥)

[३३] अर्थेन च विपर्यासे तादर्थ्यात्तत्त्वमेव स्यात् ॥७४॥ सि०

अस्ति महापितृयज्ञः, सोमाय पितृमते षट्कपालं, पितृभ्यो बर्हिषद्भ्यो धानाः, पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थमिति । धाना इत्यत्र संदेहः । किं धानासु हन्तिः कर्तव्य उत नेति । किं प्राप्तम् । न कर्तव्य इति । कुतः । विघातात् । क्रियमाणे हन्तौ धानात्वं विहन्येत, सक्तवो हि भवेयुः । तस्मान्न कर्तव्य इति ।

एवं प्राप्ते, ब्रूमः । उक्तमविघातकमविकाय गुणाय कर्तव्यम्, अञ्जनवदिति । आह । अञ्जनमविघातकं, हन्तिस्तु धानात्वं विहन्तीति । अत्रोच्यते । यथा न विघातकं भवति, तथा करिष्यते । विप-

---

७३ ॥]

धाना इत्येतदनुदाहरणम् । द्वेधाऽप्यनुपपद्यमानत्वात् । कथमनुपपत्तिः । चोदकेनापि विपर्यास एव प्राप्यते । पूर्वमवघातः, ततः श्रपणम् । अथ श्रपणादुत्तरकालमवघातः प्राप्यते, तथाऽपि तथैवानुष्ठेयः । तत्र 'अर्थेन विपर्यासे' इत्ययुक्तम् । अथोभयथाऽवघातः प्राप्नोति, तथाऽऽम्नातेन विधीयते । विपर्यासो न युक्तः । अथैवमुच्यते, निष्क्रान्ता यागचोदनायां चोदक इति धानासु निष्क्रान्तेषु तदर्थो दृष्टोऽवघातं श्रपणं च प्रापयति । एवमनुष्ठाने सति 'अर्थेन विपर्यासे' इत्युक्तं, तदप्य-

र्यसिष्यते तथा, न विहनिष्यते। विपर्यासे क्रममात्रं न कृतं भवति, पदार्थस्तु न निवर्तते। तदुक्तं, गुणलोपे च मुख्यक्रिया भवतीति। तस्मात्पूर्वं हन्ति कृत्वा पाकः कार्यः। तत्र हि हन्तिः पाकार्थो भविष्यति, न धानात्वं विहनिष्यत इति ॥ ७४ ॥

इति श्रीशबरस्वामिविरचिते मीमांसाभाष्ये दशमाध्यायस्य द्वितीयः पादः ॥

नुपपन्नम्। यदि निष्पन्नरूपं द्रव्यं गृह्यते सक्तेवाज्यवत्, तदा च धानादीनामक्रियाच्छेदनादीनामिव तद्विपर्यासशङ्कैव नास्ति। अथ नैव निष्पन्नाना ग्रहणं, तत्रापि यथाप्राप्तमेवानुष्ठानं, न विपर्यासः।

किं तर्ह्युदाहरणम्। तत्रैव मन्थः। तस्य श्रपणादुत्तरं पेषणं प्राप्नोति। तत्र धर्मा भवन्ति न भवन्तीति पूर्वपक्षे पेषणान्तरं, व्युत्क्रमादित्यतोऽधर्ममेव पेषणम्। सिद्धान्ते च तदेव पेषणं प्राकृतकार्यत्वात्। क्रममात्रमन्यत्। अर्थकृते विपर्यये धर्मा भवन्त्येव कृष्णलेषु पाकधर्मा भवन्तीति। यथापूर्वोऽयं पाकस्ततः पाकधर्मा न भवन्ति। अथ प्राकृतस्य प्रतिप्रसवस्ततो धर्माः सन्ति। प्रतिप्रसवोऽयम्। कथम्। चोदकेन प्राप्ताः पाकधर्मा अर्थलोपान्निवृत्ता श्रपणविधानात्प्रतिप्रसूयन्ते।

ननु प्रतिप्रसवे श्रपणमात्रमेव विधातव्यम्। घृते विधीयमाने वाक्यं भिद्यते। यथापूर्वविधानं तथा सति विशिष्टविधानान्न दोषः। अप्राप्तत्वात्। उच्यते। अस्मिन्वाक्ये घृतं न विधीयते। कुतः प्राप्तिर्घृतस्य। उत्पत्तिवाक्ये घृतमेवाऽऽधारत्वेन श्रूयते। 'प्राजापत्यं घृते चरुम्' इति सप्तमीविभक्तिसंयोगात्, चरुशब्दसामर्थ्याच्च। यथाऽऽदित्यपयोधिकरणे तथेहाप्युत्पत्तिवाक्ये। तस्माद्गुणवाक्ये घृतमनुवादः ॥ ७४ ॥

इति श्रीभट्टकुमारिलविरचितायां मीमांसाभाष्यव्याख्यायां टुप्टीकायां दशमाध्यायस्य द्वितीयः पादः ॥

---

१ तदुक्तमिति—(अ० १० पा० २ अ० २१ सू० ६२) इत्यत्रेति शेषः। २ मन्थ इति—द्रव्याभिप्रायः सक्तवो मन्थाः। धानाश्चिद्यानि सक्तव। भर्जितयवा धानाः। ३ (अ०१पा०४अ०९)

अथ दशमाऽध्यायस्य तृतीयः पादः ॥

(पश्वादिविकृतावुपदिष्टैरेकादशप्रयाजादिभिरङ्गैः प्राकृताङ्गान्तरबाधाधिकरणम् ॥ १ ॥)

[१] विकृतौ शब्दवत्त्वात्प्रधानस्य गुणानामधिकोत्पत्तिः संनिधानात् ॥ १ ॥ पू०

अस्ति सोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभत इति । तत्रेदं समाम्नायते । एकादश प्रयाजान् यजति, एकादशानुयाजान् यजतीति । तथा चातुर्मास्यानि, चातुर्मास्यैः स्वर्गकामो यजेतेति । तत्राप्याम्नायते, नव प्रयाजान् यजति, नवानुयाजानिति । तथा, वायव्यं श्वेतमालभेत भूतिकाम इति । तत्राप्याम्नायते, हिरण्यगर्भः समवर्तताग्र इत्याघारमाघारयति । तथाऽवभृथे श्रूयते, अप्सु तुणं प्रास्याऽऽघारमाघारयतीति । तदेतेषु संशयः । किं प्राकृतेतिकर्तव्यता न प्राप्यते, अप्राप्ताया कर्मान्तराण्येतानि चोद्यन्ते, अथवा प्राप्यते, प्राप्तायां गुणविधय इति । किं प्राप्तम् । न प्राप्यत इति । विकृतौ तस्या तस्यां शब्दवत्प्रधानं, नाङ्गानि । तस्मादग्नीषोमीयादिषु गुणकर्मणामधिकानामुत्पत्तिः । यजति, आघारमाघारयतीति च कर्मान्तराण्येतानि विधीयन्ते । तथा हि श्रुतिरनुगृहीता भवति । तैरेव च तानि साङ्गानि जायन्ते । तस्मात्प्राकृतीतिकर्तव्यता न प्राप्यते । संनि-

---

अवभृथस्तावदनुदाहरणम् । अपूर्वत्वात् । चिद्याना च विध्यन्तेन धर्माः प्राप्नुवन्ति । कथं संशयः । उच्यते । यत्प्राकृतमङ्गं विकृतौ श्रूयते तदेव विकृतिर्निराकाङ्क्षत्वात्स्वी करोति । यथा गृहमेधीय आज्यभागश्रवणम् । श्रूयते चात्र प्राकृतमङ्गं, ' नव प्रया-

---

१ अपूर्वत्वादिति—ज्योतिष्टोमे ' वारुणेनैककपालेनावभृथं यन्ति ' इत्यनेनावभृथसंज्ञकेष्टिं विधाय पश्चाच्छ्रूयते ' अप्सुमन्तावाज्यभागौ यजति ' इति । तथा चानेन फलस्वोपकारकयोः प्राकृतधर्मेत्वेवाऽऽज्यभागयोर्विधानेन तावत्वेनैव नैराकाङ्क्ष्यादतिदेशाभावेन प्रकृतिवद्विकृत्यपूर्वत्वस्यावभृथे सिद्धान्तेऽपीष्यमाणत्वान्नोदाहरणं प्रकृताधिकरणस्येत्याशयः । २ आज्यभागश्रवणमिति—चातुर्मास्यान्तर्गते साकमेधाख्ये तृतीये पर्वणि ' मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायं चरुम् ' ... निर्वपेदुदीक्षिष्यमाणः ' इत्यनेन दीक्षणीयेष्टिं विधाय पश्चाच्छ्रूयते ' आज्यभागौ यजति ' इति । तावतैव गृहमेधीयस्य नैराकाङ्क्ष्यमित्यर्थः ।

हिता हि सा प्रकृतौ, न प्रकृतिं संनिहितामतिक्रमिष्यतीति ॥ १ ॥

प्रकृतिवत्तस्य चानुपरोधः[1] ॥ २ ॥

एवं च नोपरोधो भविष्यति। क उपरोधः। प्रकृतिवदिति कल्पना। स चोदकशब्दो न दूरे सतीमिमामनेकवाक्यव्यवहितां प्रकृतिमपेक्षिष्यते। तस्मात्कर्मान्तराणि चोद्यन्ते। प्रयाजयागान् करोति, नव करोति, आघारं करोति, हिरण्यगर्भः समवर्तताग्र इति करोतीति ॥ २ ॥

चोदनाप्रभुत्वाच्च ॥ ३ ॥

इदं परिचोदनोत्तरं सूत्रम्। नन्वेषां कर्म चोदयितुं सामर्थ्यं नास्ति। कथमिति। नैतस्माद्वाक्यादिदमवगम्यते यागं करोतीति। कथं तर्हि। याग एकादशसंख्यां करोतीति। यागे गुणसत्तां भावयतीति गुणशब्दश्रवणात्। यागसत्तायां भाव्यमानायां गुणशब्दश्रवणमनर्थकं स्यात्। तस्माद्गुणविधिरूपा एते शब्दा इति।

अत्रोच्यते। अस्त्येवैषां चोदनाप्रभुत्वे सामर्थ्यम्। प्रभवन्त्येते कर्म चोदयितुम्। कुतः। आख्यातशब्दा ह्येते। आख्यातशब्दाश्च कर्मणश्चोदकाः समधिगताः, भावार्थाः कर्मशब्दा इति। त एते सगुणं कर्म चोदयिष्यन्ति। यागः कर्तव्यः, एकादशसंख्या चेति। एवं सर्वत्र। तस्मात्कर्मणश्चोदका एते शब्दाः। इतिकर्तव्यता न प्राप्नोतीति ॥ ३ ॥

प्रधानं त्वङ्गसंयुक्तं तथाभूतमपूर्वं स्यात्तस्य विध्युपलक्षणात्सर्वो हि पूर्ववान् विधिरविशेषात्प्रवर्तितः ॥ ४ ॥ सि०

न त्वेतदस्ति, इतिकर्तव्यता न प्राप्यते, कर्मान्तराणीति। प्रधानं प्राकृतमङ्गसंयुक्तं, तथाभूतमपूर्वमपि वैकृतं स्यात्। उक्तमेतत्, विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्तेत तथा हि लिङ्गदर्शनमिति। तस्य प्राकृतस्य कर्मणो विधिर्वैकृतेषु कर्मसु केषुचिदुपलक्ष्यते। तस्मात्सर्वो

भा॰' इति। तस्मात्तेनैवास्य निराकाङ्क्षत्वं गृहमेधीयवत्। अधिकानामुत्पत्तिरिति प्राकृतानां निवृत्तिरित्यभिप्रायः पक्षयोरनयोः ॥ १ ॥ [२ ॥ ३ ॥

1 प्रकृतिवत्तस्य चानुपरोध—इति मुद्रितपुस्तकेषु पाठः। २ (अ० २ पा० १ अ० १ सू० १)। ३ (अ० ७ पा० ४ अ० १ सू० १०)।

वैकृतो विधिः, पूर्ववान्—प्रकृतिपूर्वकः । अविशेषात्पवर्तितश्चोदकादवगम्यते । तस्मादिहापि प्राकृतीतिकर्तव्यता प्राप्यते । यदुच्यते, प्रयाजादिभिर्निराकाङ्क्षत्वात्प्राकृतीतिकर्तव्यता न प्राप्यत इति । स्यादेतदेवं, यदि यागो विधीयते । यागे हि विधीयमाने, एकादश, नव, हिरण्यगर्भः समवर्तताग्रे, इत्येतानि पदान्यनर्थकानि भवेयुः । न च शक्यते वदितुमेकादशादीन्यनूद्यन्त इति । अपूर्वाणि हि तान्यवश्यं विधातव्यानि । तानि च वाक्येन यागे । अथ यागो विधीयते, यागे च संख्या, तथा वाक्यं भिद्येत । तस्मादितिकर्तव्यतायां प्राप्तायां गुणविधय एव इति ॥ ४ ॥

न चाङ्गविधिरनङ्गे स्यात् ॥ ५ ॥

इतश्च गुणविधय इति । न ह्यनङ्गे कर्मण्यङ्गस्य विशेषविधिः स्यात् । भवति च विशेषविधिः, आश्ववालः प्रस्तर इति । न ह्यसति प्रस्तरे प्रस्तरविशेषः शिष्येत । यथा, यस्य नास्ति पुत्रो न तस्य पुत्रस्य क्रीडनकानि क्रियन्ते । एवमिहापि प्रस्तरस्याऽऽश्ववालता न विधीयेत । तस्माद्गुणविधय इति ॥ ५ ॥

कर्मणश्चैकशब्द्यात्संनिधाने विधेराख्यासंयोगो गुणेन तद्विकारः स्याच्छब्दस्य विधिगामित्वाद्गुणस्य चोपदेश्यत्वात् ॥ ६ ॥

अयं स्वपरो विशेषः, प्रधानकर्मणो गुणकर्मणश्चैकशब्द्यात् । प्रयोगवचनेन ह्येकेन शब्देनाङ्गप्रधानान्युच्यन्ते । तस्मात्प्रधानवचनेन संनिहितान्यङ्गानि । तेषु संनिहितेषु गुणविधेर्नोप गृहीत्वाऽभिसंबन्धो भवति । यः प्रयाजसंज्ञको यागः, तत्र गुण इति । एवं सर्वत्र यागे गुणेन तद्विकारः स्यात् । संख्यया मन्त्रेण च संख्यान्तरं मन्त्रान्तरं च विक्रियेत । प्रयाजादिविधिगामी हि शब्दः । गुणश्चोपदेष्टव्यः । नानर्थकं पुनर्वचनम् । तस्मादितिकर्तव्यता प्राप्यते । प्राप्तायां गुणविधय इति ॥ ६ ॥

---

४ ॥ १ ॥ ६ ॥

अकार्यत्वाच्च नाम्नः ॥ ७ ॥

न च शक्यते वदितुं, नामनामिसंबन्धोऽयं विधीयत इति । अन्या हि वचनव्यक्तिः शब्दार्थसंबन्धे विधीयमाने भवति । एकादश यागान् करोति। ते च प्रयाजानुयाजसंज्ञका भवन्तीति । वाक्यं ह्यस्यां वचनव्यक्तौ भिद्येत । अथ पुनरेषा प्रसिद्धनामकानामुच्चारणं, गुणविधानार्थम् । तस्मादपीतिकर्तव्यता प्राप्यते, गुणविधयश्चैव इति ॥ ७ ॥

तुल्या च प्रभुता गुणे ॥ ८ ॥

इदं पदेभ्यः केभ्यश्चिदुत्तरं सूत्रम् । कानि तानि पदानि । यदुक्तं प्रयाजानुयाजा असंनिहिताः, न शक्यते तेषां गुणो विधातुमिति । तत्परिहर्तव्यम् । अत्रोच्यते । तुल्या ह्येषा प्रभुता गुणान् प्रति चोदकस्य प्राकृतान् गुणानिह प्रापयिष्यति । ते च प्राप्ता गुणविधानपरे वाक्य इह संकीर्त्यन्ते। यद्वा, उत्पाद्य प्रापयिष्यति । ते गुणवचनेन संभन्त्स्यन्त इति । तत्रोत्पन्नानां प्राप्तिर्लघीयसी। प्राकृतान् प्राप्य कृतार्थः शब्दो नापूर्वानुत्पादयितुं शक्नोति । इदमधुनातनं वचनमुत्पादकमिति चेत् । नैवदेवम् । गुणसंबन्धार्थमेव तत् । गुणवचनस्य श्रवणात् । तस्मादपि प्राप्तेषु गुणविधय इति ।

अथ यदुक्तम्, आख्यातशब्दा एते कर्मणो विधायकाः, भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत, इति । तुल्यैषां प्रभुताऽऽख्यातशब्दानाम् । ये हि शक्नुवन्ति गुणवचनसहिता गुणं कर्म च विधातुं, शक्नुवन्तितरां ते केवलं गुणं विधातुम् । यो हि पाषाणान् भक्षयति, ईषत्करास्तस्य मुद्गशष्कुल्य इति । तस्मादपि गुणविधय इति ॥ ८ ॥

सर्वमेवं प्रधानमिति चेत् ॥ ९ ॥

इति चेत्पश्यसि, आख्यातशब्दोऽयं गुणं विधास्यतीति । एवं सति सर्वं प्रधानम् । आख्यातशब्दवाच्यत्वादिति ॥ ९ ॥

तथाभूतेन संयोगादयथार्थविधयः स्युः ॥ १० ॥

---

७ ॥ ८ ॥ ९ ॥

---

१ (अ० १ पा० १ अ० १ सू० १) । २ पश्यति—पा० । ३ योगात्—पा० ।

न ह्याख्यातशब्दाभिधानेन प्रधानभूतो गुणभूतो वाऽर्थो भवति । यः स्वभावतो गुणभूतोऽर्थः, नासावाख्यातशब्दाभिधानेन प्रधानभूतो भवति । तथाभूतेन संयोगे सति, आख्याशब्दभूतेन यथार्थविषयो भवेयुः । यत्प्रधानं तत्प्रधानमेव । यद्गुणभूतं तद्गुणभूतमेवेति ॥ १० ॥

विधित्वं चाविशिष्टमेवं प्राकृतानां वैकृतैः कर्मणा योगात्तस्मात्सर्वं प्रधानार्थम् ॥ ११ ॥

इतश्च पश्यामो गुणविषय इति । कुतः । विधित्वं चाविशिष्टम् । प्राकृतानां वैकृतैरर्थवादकर्मणा योगो न विशिष्यते । अग्निं स्विष्टकृतं यजति, यज्ञस्य प्रतिष्ठित्यै, इति प्रकृतौ य एव, स एव विकृतावर्थवादो भवति । अग्निं स्विष्टकृतं यजति, यज्ञमेव प्रतिष्ठापयतीति । तथा, चक्षुषी वा एते यज्ञस्य यदाज्यभागौ, इति प्रकृतौ । आज्यभागौ यजति, चक्षुषी एव नान्तरेति विकृतौ । तस्मात्सर्वमेवंजातीयकं प्रधानीय विकृतौ गुणभूतमिति ॥ ११ ॥

समत्वाच्च तदुत्पत्तेः संस्कारैरधिकारः स्यात् ॥ १२ ॥

इतश्च पश्यामो न सर्वं प्रधानं, प्रधानार्थमपि किंचिदस्तीति । समा ह्युत्पत्तिक्रमता प्रयाजानुयाजानाम् । येनैव क्रमेण प्रकृतौ प्रयाजानुयाजानां संस्काराणामधिकारस्तेनैव क्रमेण विकृतौ दृश्यते । कथम् । प्रजापतिर्यज्ञमसृजत, स आज्यं पुरस्तादसृजत, पशुं मध्यतः, पृषदाज्यं पश्चादिति । तस्मादाज्येन पुरस्तात्प्रयाजा वर्तन्ते, पशुना मध्यतः, पृषदाज्येन पश्चादनुयाजा वर्तन्त इति प्रयाजानुयाजानां स्वक्रमाणां दर्शनं प्रधानार्थत्वे सत्युपपद्यते, न प्रधानत्वे । तस्मान्न सर्वं प्रधानं प्रधानार्थमपि किंचिदस्तीति ॥ १२ ॥

(वायव्यपशौ हिरण्यगर्भमन्त्रस्यौत्तराघारे निवेशाधिकरणम् ॥ २ ॥)

[२] हिरण्यगर्भः पूर्वस्य मन्त्रलिङ्गात् ॥ १३ ॥ पू०

अस्ति वायव्यः पशुः, वायव्यं श्वेतमालभेत भूतिकाम इति । तत्र श्रूयते । हिरण्यगर्भः समवर्तताग्र इत्याघारमाघारयतीति । तत्रायमर्थः

---

१० ॥ ११ ॥ १२ ॥

४ मोगे सति—पा० ।

समधिगतः, मास्तु एवाऽऽघारे गुणविधिरयमिति । इदं तु चिन्त्यते । किं पूर्वस्मिन्नाघारे गुणविधिरुतोत्तरस्मिन्निति । किं प्राप्तम् । हिरण्यगर्भः पूर्वस्य मन्त्रलिङ्गात् । पूर्वस्याऽऽघारस्य गुणविधिरयम् । कुतः । मन्त्रलिङ्गात् । एवं मन्त्रार्थो भवति । हिरण्यगर्भः समवर्तताग्र इत्याघारमाघारयतीत्यत्र मन्त्रे, इदमस्ति वचनं, भूतस्य जातः पतिरेक आसीदिति । एक इति च प्रजापतेरभिधानमिति । स हि प्रजोत्पत्तेः संभवात्प्राक्, प्रजोत्पत्तेरेकसंख्यायुक्त इति गम्यते । स एष मन्त्रः प्रजापतिमभिवदितुं शक्नोति । प्राजापत्यश्च पूर्व आघारः । तत्रायं समर्थः कार्यं निर्वर्तयितुं, नोत्तरस्मिन् । अतः पूर्वस्य गुणविधिरिति ॥ १३ ॥

प्रकृत्यनुपरोधाच्च ॥ १४ ॥

प्रकृतिवदिति चोदकस्यानुपरोधो भविष्यति । उत्तरस्याऽऽघारस्य मन्त्रानपनयात् । इतरथा, अपनीयेत, ऊर्ध्वोऽध्वर इति मन्त्रः । तस्मादपि पूर्वस्य गुणविधिरिति ॥ १४ ॥

उत्तरस्य वा मन्त्रार्थित्वात् ॥ १५ ॥ सि०

वाशब्दः पक्षं व्यावर्तयति । न पूर्वस्य गुणविधिरिति । किं तर्हि । उत्तरस्य गुणो विधीयते । तस्य मन्त्रेणार्थो, न पूर्वस्य । कथम् । एवमाम्नायते । हिरण्यगर्भः समवर्तताग्र इत्याघारमाघारयतीति । कोऽर्थः । आघार एवामृचमुघारयतीति । सोच्चारिता विशिष्टं श्रौतं विज्ञानमङ्गभूतं करोति । कस्मै देवाय हविषा विधेम, इति । एकस्मै देवायेत्यर्थः । एकारलोपेनैतच्छन्दविज्ञानादेतदर्थप्रत्ययो भवति, एकस्मै देवाय हवि-

---

१३ ॥ १४ ॥]

वाक्यं च लिङ्गवचनप्रमाणेन न्यायेन तुल्यमेव । ततः किम् । प्रकृतौ पदार्थस्य स्मरणे, सर्वस्योपपद्यमानत्वं प्रसक्तम् । आम्नायपदमन्त्रमूलेषु प्रदृष्टाः । तत उत्तरस्मिन्नाघारे मन्त्राम्नानसामर्थ्यादितरेषां निवृत्तिः । पूर्वस्मिन्नाघारे मन्त्रो नास्ति । अतस्तत एवाभ्युपायाः प्राप्नुवन्ति । विकृतावपि तथैव प्राप्तिपूर्वो मन्त्रक इत्येवं विशेषमात्रं विधास्यते । इतरथा पूर्वस्मिन्नाघारे मन्त्रसामान्यं मन्त्रविशेषश्च विधातव्यः । तत्र वाक्यं भिद्येत । तस्मादुत्तरस्य गुणविधिरिति ।

---

१ ऋ० सं० (अष्ट० ८ अ० ७ व० ३)।

दीतव्यमिति । न च पूर्वस्मिन्नाघारे श्रौतं विज्ञानमङ्गभूतमस्ति । तत्र कल्पयितव्यं स्यात् । श्रौतं विज्ञानमङ्गभूतं भवतीति । तच्च, हिरण्यगर्भः समवर्तताग्रे इत्येतेन कर्तव्यमिति । कल्पनायां न प्रमाणमस्ति । इदं हि वाक्यं मन्त्रकार्यविशेषस्य विधायकं, न मन्त्रकार्यसामान्यस्य नियामकम् । सामान्यं मन्त्रकार्यं पाक्षिकम् । तस्मिन् पाक्षिके मन्त्रकार्ये विशेषविधानमिति चेत् । आनर्थक्यम्, अस्मत्पक्षपरिग्रहश्च, उपदेशस्य चार्थवत्त्वम् । जीहवाघारविषयत्वात् । तस्मादुत्तरस्य गुणविधिरिति ।

यदुक्तं, प्रजापतिवचनोऽयं मन्त्र इन्द्रमभिवदितुमशक्तो भविष्यतीति । नैतदेवम् । यथा हि प्रजापतिरेक इति संस्तुतः, प्रजापतिशब्दत्वात् । एकोऽसौ प्राक् प्रजोत्पत्तेरिति प्रजापतिरेक आसीदित्युच्यते । एवमिन्द्रोऽपि, ऐश्वर्यवचनत्वादिन्द्रशब्दस्य, सर्वमुत्पादयितुमयमक्षमिति संस्तूयते । [1]क ईं स्तवत्कः पृणात्को यजाते यदुग्रमिन्मघवा विश्वहावेत् । पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्वमपरं शचीभिः, इति । तथा, [2]क उ नु ते महिमनः समस्यास्मत्पूर्व ऋषयोऽन्तमापुः । यन्मातरं च पितरं च साकमजनयथास्तन्वः स्वायाः, इति ।

क ईं स्तवत्कः पृणात्को यजात इति, ऐन्द्रे सूक्ते वचनादैन्द्री ऋक् । क एनं शक्नोति स्तोतुं, को वाऽस्मै ददाति, को वा यजतीति सर्वत्रानवक्लृप्तिः । अयमेव सर्वमिदं करोति । यथा, गच्छन् कश्चित्पूर्वं पादमपरं करोति, अपरं च पूर्वम् । एवमयमिदं सर्वं करोतीति । अयं

अत्र ग्रन्थः । इदं हि वाक्यं मन्त्रकार्ये विशेषविधायकं मन्त्रस्य स्मरणम् । तत्र विशिष्टस्मरणोत्पत्त्यर्थमेवेदं, न मन्त्रकार्यस्य सामान्यस्य नियामकं, नोपायान्तराणां निवर्तकम् । अथोच्येत, विशिष्टमेवेदं स्मरणं विधीयते, न सामान्यम् । सामान्यं च मन्त्रकार्यं पाक्षिकम् । तत्र नियमो युक्तो न विधिः । अस्मिन्पाक्षिके मन्त्रकार्ये विशेषविधानमिति चेत् । यदा मन्त्रप्राप्तिस्तदा विशेष इत्यानर्थक्यं, कदाचिद्वाक्यो मन्त्रस्य कदाचिन्न । अस्मत्पक्षपरिग्रहश्चेति—प्रथाऽपि सामान्ये प्राप्ते विशेषो विधीयते । तत्र नियमेन मन्त्रस्य प्रयोगो भविष्यति । इतरथा पाक्षिकः स्यात् । उपदेशस्यार्थवत्त्वमिति । यदि नित्यमाम्नातं न स्यात्ततोऽन्य-

---

१ ऋ० सं० (अष्ट० ४ अ० ५ व० १२)। २ ऋ० सं० (अष्ट० ८ अ० १ व १५)।

चेत्सर्गं करोतीति, माकृकरणादेकः। तथा, क उ नु ते महिमनः समस्येति, केऽस्य सकलस्य महिम्नोऽस्मत्पूर्वेऽप्यूपयोऽन्तं माप्तुं शक्नुवन्ति, यन्मातापितरावपि स्वस्माच्छरीराज्जनयसीति, मातापितृभ्यामपि पूर्वः, किमुतान्यस्माज्जनादिति सिद्धमेकत्वमस्येति। सोऽपि माकसर्वोत्पत्तेरेक एव। अत इन्द्राभिधायिन्येषा ऋक्। तस्माद॰ विरोधः ॥ १५ ॥

विध्यतिदेशात्तच्छ्रुतौ विकारः स्याद्गुणानामुपदेश्यत्वात् ॥ १६ ॥

गुणविधिरयमुपदिश्यत आघारश्रुतौ। स तन्मन्त्रस्य विकारः स्यात्। उपदेश्यो हि मन्त्रविशेषोऽत्रोत्तरस्मिन्नाघारे। अन्यच्छ्रौतं मन्त्रविशेषविज्ञानम्, ऊर्ध्वोऽध्वरो दिविस्पृशमह्रुतो यज्ञो यज्ञपतेरिन्द्रावान् बृहद्भावी हि मघोर्घृतस्य स्वाहा, इति। तदङ्गभूतमुपकारकस्य विज्ञानस्य साधनमितीन्द्राय हविर्दातव्यम्। इह तु, हिरण्यगर्भ इति विज्ञानं श्रौतं, श्रौतस्य प्राकृतस्य विज्ञानस्य कार्ये विधातुमर्हति, सामर्थ्यात्। इदं दधि घृतं शाकमिमे शालयः, देवदत्तो भोजयितव्यः। देवदत्तयज्ञदत्तस्तैलेनेति भोजने तैलमुपकारकं श्रूयमाणं, यस्य प्राकृतस्य कार्यमभिनिर्वर्तयितुं शक्नोति, तस्य कार्ये विनियुज्यते, घृतस्य। सामान्यं ह्यस्य स्नेहनसामर्थ्यं घृतेनेति। इहापि मन्त्र उच्चार्यमाणः प्राकृते श्रौतविज्ञाने विशेषमुत्पादयति। तच्चोत्तरस्मिन्नङ्गभूतं तदर्थविज्ञानस्य साधकं, न पूर्वस्मिन्। तस्मादुत्तरस्य गुणविधिरिति ॥ १६ ॥

पूर्वस्मिंश्चामन्त्रत्वदर्शनात् ॥ १७ ॥

पूर्वस्मिंश्चाऽऽघारेऽमन्त्रत्वमेव दर्शयति, न स्वाहेति करोति, मन्त्रं च नाऽऽहेति। तस्मादप्युत्तरस्य गुणविधिरिति ॥ १७ ॥

मानुपपरया पालिशोऽपि वक्तव्येन। अस्ति चोत्तरस्मिन्नित्यममाम्नानम्। तस्मादुत्तरे मन्त्र.। उत्तरसूत्रे कार्यापत्ति प्रतिपादयति। विविद्द तनेति सामान्ये प्राप्ते (त्रिन)॰मन्त्रस्य प्रयोगो विशेषो विधीयते। तत्र नियमेन मन्त्रप्रयोगः ॥ १९ ॥ [११ ॥ १७ ॥]

(सौमिकचातुर्मास्येषु प्राकृतासादननियोजनानुवादेन विहिताभ्यामुत्कर-परिधिभ्यां प्राकृतयोर्वेदियूपयोर्बाधाधिकरणम् ॥ ३ ॥)

[३] संस्कारे तु क्रियान्तरं तस्य विधायकत्वात् ॥१८॥ पू०

सन्ति चातुर्मास्याः सोमाः । तत्र श्रूयते, उत्करे वाजिनमासादयन्ति, परिधौ पशुं नियुञ्जन्तीति । तत्रैषोऽर्थः सांशयिकः । किमेतदासादनान्तरं, नियोजनान्तरं च, उत प्राकृतयोरासादननियोजनयोर्गुणविधिः, इतरथेतरथेति । तत्रैतं तावन्नः परीक्ष्यम् । किं धर्ममात्रमासादनं नियोजनं च, उत दृष्टकार्यमिति । यदि धर्ममात्रं, ततः क्रियान्तरम् । अथ दृष्टकार्यं, ततो गुणविधिरिति । तत उभयं संदिग्धमित्युभयं संहृत्य परीक्ष्यते । किं धर्ममात्रमितरथेतरच्च क्रियान्तरमुत दृष्टकार्यं गुणविधिरिति ।

किं प्राप्तम् । तुङ्गत्वात्तीक्ष्णाग्रत्वाच्चोत्करस्य दृष्टकार्यमासादनं न शक्यं कर्तुम् । तथा, उपशयत्वात्परिधेर्दृष्टकार्यकं नियोजनमशक्यं कर्तुम् । तस्माद्धर्ममात्रम् । यथा सौत्रामणीप्रकरणे, ब्राह्मणस्य मूर्धन्यासादयतीति धर्ममात्रमासादनम् । एवमिहापि धर्ममात्रं चेत्क्रियान्तरम् । तथा च सति, आसादनं नियोजनं च विधास्यते । तत्र श्रुत्या विहितं भविष्यति । इतरथा वाक्यं विधायकं स्यात् । अपि च, अस्मत्पक्षे आसादननियोजने गुणविधिलक्षणार्थे न भविष्यतः । भवत्पक्षे तु गुणविधिं लक्षयेयाताम् । तस्मात्क्रियान्तरमितरदितरच्च । तस्य विधायकत्वात् । स्वपदगतस्य भावशब्दस्य पदोत्तरस्य । न यथाऽऽधारे गुणविधिस्तथाऽस्मिन् संस्कारे आसादननियोजनारूपे ॥ १८ ॥

प्रकृत्यनुपरोधाच्च ॥ १९ ॥

एवं च प्राकृतस्य धर्मस्य प्रापकश्चोदको नोपरोत्स्यते । वेद्यां हवीं-

---

ननु वाजिने विशिष्टानुवादो वाक्यभेदो वा । उच्यते । 'वाजिनं निषिच्याभिघार्य' इति प्रकृत्यानन्तरं श्रूयते 'वाजिनमुत्करेणाऽऽसादयति' इति । तत्रोत्कर एव विधीयते । वाजिनं तु प्रकरणाल्लभ्यते । यन्नियुञ्जन्ति तत्पशुः, इति पशुः सामर्थ्याल्लभ्यते ॥ १८ ॥

---

१ 'उत्करे वाजिनमासादयति' 'परिधौ पशुं नियुञ्जीत' इत्येवं चन्द्रेदादिपुस्तकपाठः । २ तत एतत्—पा० ।

प्यासादयति, यूपे पशुं नियुङ्क्तीति। तस्मादपि क्रियान्तरमिति॥ १९॥

विधेस्तु तत्र भावात्संदेहे यस्य शब्दस्तदर्थः स्यात् ॥ २० ॥ सि०

तुशब्दः पक्षं व्यावर्तयति। नाऽऽसादनान्तरं नियोजनान्तरं चेति। किं तर्हि। प्राकृतयोरासादननियोजनयोर्गुणविधिः। तत्रैतद्दृष्टं ते। दृष्टकार्यके आसादननियोजने इति। कुतः। कार्यस्य दृष्टत्वात्। आसादनं समीपानयनम्। तस्य होमनिर्वृत्तिर्दृष्टं प्रयोजनम्। नियोजनस्यापि पश्चनपगमः। एवं चेत्, तस्माद्गुणविधिरितरश्चेतरश्च। कुतः। विधेस्तत्र भावात्। आसादननियोजनविधेस्तत्र दृष्टत्वात्। चोदकेन तत्र प्राप्तत्वात्। संदेहे—तत्र गुणविधिः कर्मान्तरमिति। न कर्मान्तरविधानं युक्तम्। अज्ञातस्य हि ज्ञापनं विधिः। ज्ञाते च चोदकेनाऽऽसादननियोजने। तस्माद्यस्य गुणस्य चोदकः शब्दस्तदर्थतयोच्चारणं स्यात्। तस्माद्गुणविधिरिति। अथ यदुक्तं, श्रुतिरेवं विधायिका, स्वपक्षे तु वाक्यमिति। उच्यते। यद्यपि वाक्यं, तथाऽप्यल्पीयस्यदृष्टानुमानकल्पना भविष्यतीति। यावती केवलस्य गुणस्य विधीयमानस्य, न गुणस्य कर्मसहितस्येति॥ २०॥

संस्कारसामर्थ्याद्गुणसंयोगाच्च ॥ २१ ॥

अथ यदुक्तं, तीक्ष्णाग्रत्वादुत्करस्य, उपशयत्वाच्च परिधेः, दृष्टकार्ये आसादननियोजने न शक्येते कर्तुमिति। अत्रोच्यते। यथा शक्येते उत्करे च परिधौ चाऽऽसादननियोजने कर्तुं, तथा करिष्येते। पृथ्वग्रमुत्करं करिष्यामः। महान्तं च परिधिम्। अतः पृथ्वग्रतया स्थविम्ना च गुणेन संयोगादासादननियोजनसंस्कारसामर्थ्यं भविष्यति। तस्माच्च कर्मान्तरमिति॥ २१॥

विप्रतिषेधात्क्रिया प्रकरणे स्यात् ॥ २२ ॥

अथ यदुक्तं, यथा सौत्रामणीप्रकरणे घर्मपात्रमासादनम्, एवमि-

[१९ ॥ २० ॥ २१ ॥

हापीति । तत्परिहर्तव्यम् । अत्रोच्यते । सौत्रामणीप्रकरणे विप्रतिषेधान्न शक्यं दृष्टकार्यैकमासादनं कर्तुम् । तस्यात्क्रियामात्रमदृष्टकार्यकं सौत्रामणीप्रकरणे स्यात् । नत्विह दृष्टकार्यैकमशक्यम् । तस्माद्गुणाविधिः ॥ २२ ॥

(अग्निचयनप्रकरणे श्रुतानां दीक्षाहुतिमन्त्राणां सौमिकदीक्षाहुतिमन्त्रैः समुच्चयाधिकरणम् ॥ ४ ॥)

[४] षड्भिर्दीक्षयतीति तासां मन्त्रविकारः श्रुतिसंयोगात् ॥ २३ ॥ पू०

अस्त्यग्निः, य एवं विद्वानग्निं चिनुत इति । तत्र दीक्षाहुतयः प्राकृत्यो वैकृत्यश्च । आकूतिमग्निं प्रयुजं स्वाहा, मनो मेधामग्निं प्रयुजं स्वाहा, चित्तं विज्ञातमग्निं प्रयुजं स्वाहा, वाचो विधृतिमग्निं प्रयुजं स्वाहा, प्रजापतये मनवे स्वाहा, अग्नये वैश्वानराय स्वाहा, इति प्राकृत्यः । तथा वैकृत्यः, आकूत्यै प्रयुजेऽग्नये स्वाहा, मेधायै मनसेऽग्नये स्वाहा, दीक्षायै तपसेऽग्नये स्वाहा, सरस्वत्यै पूष्णेऽग्नये स्वाहा, आपो देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पतिर्नो हविषा विधातु स्वाहा, विश्वे देवस्य नेतुर्मर्त्तो वृणीत सख्यं विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहा, इति । एताः प्रकृत्य समामनन्ति, षड्भिर्दीक्षयतीति । तत्र संशयः । किं वैकृतीनां प्रयोगः, प्राकृतीनां निवृत्तिः । अथवा समुच्चयः प्राकृतीनां वैकृतीनां चेति । किं प्राप्तम् । षड्भिर्दीक्षयतीति तासां प्राकृतीनामाहुतीनां मन्त्रविकारः स्यात् । वैकृतैर्मन्त्रैः प्राकृता निवर्तेरन् । श्रुतिसंयोगात् । प्रत्यक्षश्रुतिसंयोगो वैकृतीनाम् । षट् वैकृता मन्त्राः षट्शब्देन वैकृता गृह्यन्ते । तस्मात्प्राकृतानां बाधो न समुच्चय इति ॥ २३ ॥

अभ्यासात्तु प्रधानस्य ॥ २४ ॥ सि०

तुशब्दः पक्षं व्यावर्तयति, प्राकृतानां बाध इति । न बाधः । समुच्चयः । कुतः । संभवात् । यत्र हि प्राकृतवैकृतयोर्युगपच्च संभवः, तत्र वैकृतेन प्राकृतं बाध्यते । समुच्चये द्याहुतिः स्यात्प्रधानस्येति । यत्र

२२ ॥ २३ ॥

पुनरावृत्तिः श्रुता कर्तव्यैव, तत्र नैष दोषो भवति, आवृत्तिः प्राप्नोतीति । इह चाऽऽवृत्तिः श्रूयते प्रधानस्य होमस्य, द्वादश जुहोतीति । अतः संभवात्समुच्चय इति ॥ २४ ॥

आवृत्त्या मन्त्रकर्म स्यात् ॥ २५ ॥

नैतदस्ति, समुच्चय इति । प्रत्यक्षश्रुतैर्वैकृतैश्चोदकप्राप्ताः प्राकृता बाध्येरन् । अथ यदुक्तं, संभवे सति न बाधितव्या इति । अत्रोच्यते । नास्ति संभवः । कथम् । वैकृताः षड् मन्त्रा अग्नौ प्राकृतेषु होमेषु प्रत्यक्षेण श्रवणेन विधीयन्ते । ते चेद्धोमा वैकृतैर्मन्त्रैर्भवितव्यम् । तस्मादावृत्त्या मन्त्रकर्म स्यात् । अतः प्राकृता बाध्येरन्नेवेति ॥ २५ ॥

अपि वा प्रतिमन्त्रत्वात्प्राकृतानामहानिः स्याद्-न्यायश्च कृतेऽभ्यासः ॥ २६ ॥

अपि वेति पक्षव्यावृत्तिः । प्रतिमन्त्रमाहुतयो भवन्ति । अभ्यासाच्च द्वादशता । प्राकृता अपि मन्त्राश्चोदकेन प्राप्ताः । वैकृता अपि श्रवणेन । सर्वाङ्गग्राही च प्रयोगवचन उभयान् संगृह्णाति । समुच्चयासंभवे च बाधविकल्पौ, न संभवति समुच्चये । बाधे हि चोदकप्राप्तिरपह्नूयेत । न च होमनिवृत्तौ निष्कृष्टा वैकृताः श्रूयन्ते । तेन होमश्चेदापतितस्ततो वैकृताश्च साधका इत्यध्यवसेयम् । दीक्षणे हि ते वैकृताः श्रूयन्ते, षड्भिर्दीक्षयतीति । होमप्रयोगवचनस्तु प्रदानार्थान् स्वाहाकारान्तान् सामर्थ्येन संनिहितान् गृह्णाति । उभये च प्राकृता वैकृताश्च संनिहिताः । तस्माच्च विनिगमनायां हेतुरस्ति, इमान् गृह्णाति, इमांश्चेति । न च प्रधानावृत्तिरिह दोषो भवतीत्युक्तमेव । तस्मात्प्राकृतानां मन्त्राणामहानम् । अपि चान्यायः कृतेऽभ्यासः । सकृद्वैकृता मन्त्राः पठ्यन्ते । तैर्दीक्षितः संपादयितव्य इति । सकृत्संपादिते वैर्दीक्षिते कृतेऽर्थे पुनरभ्यासो न न्याय्यः । तस्मादपि प्राकृतानामहानमिति ॥ २६ ॥

---

२४ ॥ २५ ॥ २६ ॥

---

१ भवितव्यम् । अन्यासे सति पुनस्त एव होमा भवन्ति । ते चेद्धोमा वैकृतैरेव भवितव्यम्—इति क्वचिदधिकः पाठः । २ इत्यवसेयम्—पा० ।

पौर्वापर्यं चाभ्यासे नोपपद्यते नैमित्तिकत्वात् ॥ २७ ॥

अपि च पूर्वापरशब्दौ भवतः । यद् पूर्वाम्जुहोति यदुत्तराञ्जुहोतीति । न च वैकृतानां केवलानामभ्यस्यमानानां पूर्वापरतोपपद्यते । नैमित्तिकत्वात् । पूर्वनिमित्तो ह्युत्तरशब्दः, उत्तरनिमित्तश्च पूर्वशब्दः । तस्मादपि प्राकृतानामहानमिति ॥ २७ ॥

तत्पृथक्त्वं च दर्शयति ॥ २८ ॥

इतश्च पश्यामो न निवृत्तिः, समुच्चय इति । कुतः । तासामाहुतीनां पृथक्त्वं दर्शयति । उभयीर्जुहोति, आग्निकीश्चाऽऽध्वरिकीश्चेति । यद्युभयेषां मन्त्राणां समुच्चयस्ततस्तेषामाग्निकत्वादाध्वरिकत्वाच्च भवत्येष निर्देशः । इतरथा सर्वा एवाऽऽग्निक्यो भवेयुः । तत्र पृथक्त्वं नोपपद्येत । भवति च पृथक्त्वम् । तस्मादनिवृत्तिः, समुच्चय इति ॥ २८ ॥

न चाविशेषाद्व्यपदेशः स्यात् ॥ २९ ॥

इतश्चानिवृत्तिः, समुच्चय इति । कुतः । व्यपदेशात् । व्यपदेशो भवति । अध्वरस्य पूर्वमथाग्नेः उपाग्नि ह्रितरकर्म यदग्निकर्म, इति । पूर्वमध्वरस्य, अथाग्नेरिति व्यपदेशः समुच्चयेऽवकल्पते, नासति विशेषे । तस्मात्समुच्चय इति ॥ २९ ॥

(नैमित्तिके पुनराधाने श्रुतदक्षिणया सामान्यविहितैकादिदक्षिणाया बाधाधिकरणम् ॥ ९ ॥)

[५] अग्न्याधेयस्य नैमित्तिके गुणविकारे दक्षिणादानमधिकं स्याद्वाक्यसंयोगात् ॥ ३० ॥ पू०

अस्ति पुनराधानं, निमित्ते श्रूयते । भाग्ययशःश्रीकामानां पुनरादधीत । योऽग्नीनाधाय भाग्यज्यानिं पुत्रज्यानिं वा जीयेत स पुनरादधीतेति । तत्र श्रूयते, पुनरुत्स्यूतं वासो दक्षिणा, पुनरुत्सृष्टोऽनड्वानिति । तथा, आधाने दक्षिणा—एका देया षड् देया द्वादश देयाश्चतुर्विंशतिर्देयाः शतं देयं सहस्रं देयमपरिमितं देयमिति । तत्र संशयः । किं पुनराधानेऽग्न्याधानदक्षिणानामनिवृत्तिः, समुच्चयः । अथाग्न्याधेयदक्षिणानां निवृत्तिरिति । किं प्राप्तम् । अग्न्याधेयस्य नैमि-

---

२७ ॥ २८ ॥ २९ ॥

चिके पुनराधेये दक्षिणादानमधिकं स्यात् । प्राकृतीनामनिवृत्तिः, समुच्चय इति । कुतः । एकस्मिन् वाक्ये उभय्यो दृश्यन्ते । उभयीर्ददाति, आग्न्याधेयिकीश्च पुनराधेयिकीश्चेति । तस्मादनिवृत्तिः, समुच्चय इति ॥ ३० ॥

शिष्टत्वाच्चेतरासां यथास्थानम् ॥ ३१ ॥

इदं पदोत्तरं सूत्रम् । कथं चोदकप्राप्तस्य प्रत्यक्षश्रुतस्य समुच्चयो भविष्यति । अत्रोच्यते । शिष्टत्वादितरासां, प्राकृतीनां वचनप्रामाण्यात् यथास्थानं समुच्चयो भविष्यतीति । प्रत्यक्षं हीदं शासनम्, आग्न्याधेयिकीर्दत्वा पुनराधेयिकीर्ददातीति । तस्मान्न बाधः प्राकृतीनां समुच्चय इति ॥ ३१ ॥

विकारस्त्वप्रकरणे हि काम्यानि ॥ ३२ ॥ सि०

तुशब्दः पक्षं व्यावर्तयति, न समुच्चयः, विकार इति । कुतः । काम्यं ह्येतत्पुनराधेयं श्रूयते । तदसति प्राकृते प्रकरणे, आम्नानमवकल्पते, न सति । यत्तत्रोच्यते वैकृतं, तत्प्राकृतं बाधत इत्यर्थः । काम्यो वा नैमित्तिको वाऽर्थो नित्यमर्थं विकृत्य निविशते । यथा, अस्यामये मुद्गौदनभोजनं निवातशय्या चेति, नि यं शय्यासनं भोजनं च विकरोति । प्रत्यक्षं हि वैकृतम् । आनुमानिकं च प्राकृतम् । तस्माद्वैकृतेन बाध्यते । अथ यदुक्तं, वचनप्रामाण्यात्प्राकृत्यो भविष्यन्तीति । अत्रोच्यते । ता उभयीर्ददातीति नात्र विधिविभक्तिरस्ति । वर्तमानापदेशोऽयम् । प्रमाणान्तरप्रादायायमर्थः प्रावितः । उभयीर्दक्षिणा ददाति, आग्न्याधेयिकीः पौनराधेयिकीश्च । आग्न्याधेयेऽग्न्याधेयिकीः, पुनरा-

२० ॥ ३१ ॥]

प्रकरणे हि ' पुनरुत्सृष्टोऽनड्वान् ' इत्येतस्माद्वाक्यात्समुच्चयो न गम्यते । समुच्चयशब्दाभावात् । ननु ' ता उभयीर्ददाति ' इति समुच्चयः श्रूयते । उच्यते । अर्थवादोऽयम् । ' अप्रकरणे हि काम्यानि ' इत्यस्य सूत्रावयवस्यायं ग्रन्थः । तदसति प्राकृते प्रकरणे पुनरुत्सृष्टाम्नानं यदि भवेत्ततो न बाधेताऽऽधानदक्षिणाम् । प्रकरणान्तराभावाद्दक्षिणान्तराभावाद्दक्षिणान्तरत्वात् । सति त्वाधानप्रकरणाम्नाने

१ पुनराधेयकीय—इति ग्रन्थदेवादिपुस्तः पाठः ।

धेये पौनराधेयिकी । तदेतद्भूतानुवादमात्रम् । तस्मात्प्राकृतीनां निवृत्तिरिति ॥ ३२ ॥

शङ्कते च निवृत्तेरुभयत्वं हि श्रूयते ॥ ३३ ॥

इतश्च प्राकृतीनां निवृत्तिः । कुतः । निवृत्त्याशङ्कादर्शनात्, शङ्कते हि निवृत्तेरिति गम्यते । कथम् । उभयत्वं हि श्रूयते । यद्वैकसीदेदावि दक्षिणा उभय्योऽपि तेन दक्षिणाः प्रत्ता भवन्ति । नैनूभय्योऽपि प्रदीयन्ते, यत उभय्योऽपि प्रत्ता भवन्तीत्याह । अग्न्याधेयिकी अग्न्याधेये, पुनराधेयिकयः पुनराधेये । तस्मात्प्राकृतीनां निवृत्तिरिति ॥३३॥

(आग्रयणे, उपदिष्टवासोवत्सदक्षिणया प्राकृतान्वाहार्यदक्षिणाया बाधाधिकरणम् ॥ ६ ॥)

[६] वासोवत्सं च सामान्यात् ॥ ३४ ॥ सि०

आग्रयणं भवति, हुत्वाधाय यजमानस्यापराभवाय नवानामिन्द्राग्नः, पुराणानामाग्नेयः, सौम्यः श्यामाकः, वैश्वदेवः पयसि चरुः, द्यावापृथिव्य एककपाल इति । तत्र श्रूयते, वासो दक्षिणा, वत्सः प्रथमजो दक्षिणा, इति । अस्ति तु प्रकृतौ, अन्वाहार्यो दक्षिणेति । स इह चोदकेन प्राप्यते । तदत्र संशयः । किं वासोवत्समन्वाहार्यस्य निवर्तकमुतानिवर्तकमिति । किं प्राप्तम् । चोदकानुग्रहाद्विरोधाभावाच्चानिवर्तकमिति ।

एवं प्राप्ते, ब्रूमः । वासोवत्सं च सामान्यात् । उक्तमपरस्तादाधानदक्षिणानां पुनराधेये निवृत्तिरिति । चशब्देनान्वादेशः क्रियते । अन्वाहार्यस्य निवृत्तिः । कुतः । कार्यसामान्यात् । दक्षिणाकार्येऽन्वाहार्यः प्रकृतौ । इह वासोवत्सं तस्मिन् कार्ये । दक्षिणाशब्दश्रवणात् । तस्मान्न समुच्चयः । निवृत्तिरिति । प्राप्तिर्वोत्तरविवक्षया क्रियत इति ॥३४॥

(आग्रयणे वासोवत्सयोः प्राकृतान्वाहार्यधर्मानुष्ठानाधिकरणम् ॥७॥)

[७] अर्थापत्तेस्तद्धर्मा स्यान्निमित्ताख्याभिसंयोगात् ॥ ३५ ॥ सि०

यन्नैमित्तिकं पुनरुत्सृष्टादि विधीयते तत्प्राकृतं बाधमानमेव निविशते काम्यवाऽऽम्नानम् ॥ ३२ ॥ [११ ॥ १४ ॥

---

१ म तूभय्योऽपि—पा० । २ वाजापिनीदः—पा० । ३ निमित्तख्याभिसंयोगादिति—दक्षिणाकार्यपीठ्यनिमित्तदक्षिणाशब्दसंयोगादित्यर्थः ।

तत्रैव वाससि वत्से च संशयः। अन्वाहार्यधर्माः कर्तव्या उत नेति। किं प्राप्तम्। न वाऽन्न्याय उच्यते कर्तव्या इति। तेनाकर्तव्या इति मन्यामह इति।

एवं प्राप्ते, ब्रूमः। अर्थापत्तेस्तद्धर्मा वत्सः स्यात्। तद्धर्मकं च वासः। साधनविशेषनिबन्धना हि ते धर्माः, नान्वाहार्यनिबन्धनाः। तस्माद-न्यस्मिन्नपि तत्कार्यापन्ने भवितुमर्हन्तीति। कथं पुनर्वासोवत्सं तत्का-र्यापन्नमिति। निमित्ततयाऽऽख्याय परिक्रयेण दक्षिणेति, तयाऽभि-संयोगो भवति। वासो दक्षिणा, वत्सः प्रथमजो दक्षिणा, इति। तस्माद्वासोवत्सावन्वाहार्यधर्मकौ स्यातामिति ॥ ३५ ॥

(आग्रयणे, अन्वाहार्यस्थानापन्नेऽपि वत्से पाकाननुष्ठानाधिकरणम् ॥ ८ ॥)

[८] दाने पाकोऽर्थलक्षणः ॥ ३६ ॥ सि०

तत्रैव, वत्सः प्रथमजो दक्षिणा, इति। तत्रैतत्समधिगतं, अन्वाहार्य-धर्माः कर्तव्या इति। तदत्र संशयः। किं वत्से पाकः कर्तव्य उत नेति। किं प्राप्तम्। चोदकानुग्रहाच्छक्यत्वाच्च कर्तव्य इति।

एवं प्राप्ते, ब्रूमः। वत्सस्य दाने पाको न कर्तव्यः। अपक्वो हि वत्सो वत्स एव। वत्सश्च श्रूयते, न मांसम्। परिक्रयाय च श्रूयते, न पुरुषसंस्काराय। तस्माच्चोदकः पाकं न प्रापयति। तद्यदि पाकः क्रियेत, अश्रुतः प्राणिवध आचारविरुद्धोऽनुष्ठीयेत। तस्मात्पाको न कार्यः ॥ ३६ ॥

(आग्रयणे, अन्वाहार्यस्थानापन्ने वाससि पाकाननुष्ठानाधिकरणम् ॥ ९ ॥)

[९] पाकस्य चान्नकारितत्वात् ॥ ३७ ॥ सि०

तत्रैव श्रूयते, वासो दक्षिणा, इति। तत्रायमर्थः समधिगतः। अ-न्वाहार्यधर्माः कर्तव्या इति। अथ पाकः कर्तव्यो नेति संशयः। अर्थापत्तेः कर्तव्यः।

इति प्राप्ते, ब्रूमः। न कर्तव्यः। अन्नकारितत्वादिति। अन्नका-रितो हि पाकः। न च वासोऽन्नम्। न तत्र पाकः शक्यते कर्तुम्। तस्मात्तत्र पाको न कर्तव्य इति ॥ ३७ ॥

---

३५ ॥ ३६ ॥ ३७ ॥

(आग्रयणे वासोवत्सयोरभिघारणाननुष्ठानाधिकरणम् ॥ १० ॥)

[१०] तथाऽभिघारणस्य ॥ ३८ ॥ सि०

आग्रयणे श्रूयते, वासो दक्षिणा, वत्सः प्रथमजो दक्षिणा, इति । तत्रायमर्थः समधिगतः । अन्वाहार्यधर्मा वाससि वत्से च कर्तव्या इति । अथायमर्थः सांशयिकः । किमभिघारणं कर्तव्यं, नेति । किं तावत्प्राप्तम् । अर्थापत्तेः कर्तव्यमिति ।

एवं प्राप्ते, ब्रूमः । तथाऽभिघारणस्य । किम् । अक्रियेति । अभिघारणं ह्यन्वाहार्ये स्वादिम्ने क्रियते । स्वादिमा ह्योदनस्य परिक्रय उपकरोति । न च वाससि वत्से च स्वादिम्ना प्रयोजनम् । तस्मात्तत्राभिघारणं न स्यादिति ॥ ३८ ॥

(ज्योतिष्टोमे दक्षिणान्तर्गतगोष्वेव द्वादशशतसंख्यानिवेशाधिकरणम् ॥ ११ ॥)

[११] द्रव्यविधिसंनिधौ संख्या तेषां गुणत्वात्स्यात् ॥ ३९ ॥ पू०

अस्ति ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्रैवमाम्नायते, गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा, इति । तत्र संशयः । किमेकैकस्य गवादेर्द्रव्यस्य द्वादशशतमुतैकस्य द्रव्यस्य । यद्येकस्य, तदा किमनियमो यस्य कस्यचित्, उत माषाणाम् । अथवा, सर्वसंपादनीया संख्या, उतैकजातीयस्य । यद्येकजातीयस्य, तदा किमनियमो यस्य कस्यचित्, उत पशूनाम् । यदा पशूनां, तदा किमनियमो येषां केषांचित्, उत गवामित्येते पक्षा भविष्यन्ति ।

किं तावत्प्राप्तम् । द्रव्याणां विधीयमानानां संनिधौ । केषां द्रव्याणाम् । गवादीनाम् । क्व विधीयमानानाम् । दक्षिणासंबन्धे । संख्या समाम्नाता, तस्य द्वादशशतं दक्षिणा, इति । तेषां गवादीनामेकैकस्य संख्या स्यात् । कुतः । गुणतः संख्या विधीयते, गवादीनि प्रधानतः । कथम्[1] । नैवमभिसंबन्धः क्रियते, द्वादशशतं स्यादिति । कथं तर्हि । द्वादशशतं तस्येति । एवं तस्य ग्रहणमर्थवद्भवति । इतरथा तदनर्थकं वाऽनुवादो वा स्यात् । एकवचनमपि प्रकृतापेक्षं लक्षणयाऽनूमेत । प्रधानसंनिधौ च गुणः शिष्यमाणः प्रतिप्रधानं भिद्येतेति । अस्ति चैतया संख्यया प्रयोजनम् । गवादीनि द्रव्याणि तत्संख्यानि कर्तव्यानि[2] । तत्र न गम्यते विशेषः । किमेतत्संख्यं कर्तव्यं, किं नेति । यदेव द्रव्यं नैतत्संख्यं स्यात् । तत्प्रति श्रुतिर्बाध्येत । तस्मादेकैकमेतया संबद्धव्यमिति ॥ ३९ ॥

समत्वात्तु गुणानामेकस्य श्रुतिसंयोगात् ॥ ४० ॥

तुशब्दः पक्षं व्यावर्तयति[3] । तस्य तस्य द्वादशशतमिति, नैतदेवम् ।

यास्ता गवादिभिः स्तूयन्ते । तस्मादर्थवादत्वादनुदाहरणम्[1] । आध्वर्यवेऽपीदृशं वाक्यं द्रष्टव्यम् । कृत्वा चिन्ता वा ।

अथवोदाहरणमेवेदं, ‘तस्य द्वादशशतम्’ इति । यदि ‘तस्य’ इति क्रतुविशेषणं स्यादप्रवृत्तिविशेषकरमनर्थकमेव स्यात् । गवादयस्तु यद्यप्यर्थवादत्वेनोपयुक्तास्तथाऽपि विपरिवर्तमानास्त एव तस्यशब्देन संबध्यन्ते । तेनैकैकस्य गवादिद्रव्यस्य संख्यया संबन्धः । कुतः । तच्छब्देन गवादयः परामृश्यन्ते । प्राप्त्यां तेषामेव गुणभूता संख्या विधीयते । ननु गवादिभिः संबन्धे ‘तेषाम्’ इति बहुवचनं प्राप्नोति । उच्यते । गवादयोऽत्र संख्यां प्रति प्रधानभूताः । उद्दिश्यमानस्य च संख्या न विवक्ष्यते ग्रहस्येव[3] ।

अथवा तन्त्रसंबन्धोऽयं तस्येति । ‘तस्य द्वादशशतम्’ इत्येवमपि संख्या गुणभूता द्रव्याणि प्रति, तस्यशब्दसामर्थ्यात् ॥ ३९ ॥

---

१ अनुदाहरणमिति—‘यो वा अध्वर्यवः स्वताया—’ इत्यादिना भाष्योदाहृतमन्त्रस्योपरतेन दक्षिणाविधायकत्वाभावादनुदाहरणमित्यर्थः । २ करणन—पा० । ३ ग्रहस्येवेति—(अ० ३ पा० १ अ० ४) ग्रहसम्न्यायेनेति शेषः ।

एकस्य कस्यचिद्द्वादशशतं स्यात् । कुतः । समत्वाद्गुणानाम् । गवादयोऽपि हि दक्षिणासंबद्धाः । संख्याऽपि । न गवादीनां संख्या विधीयते । दक्षिणा तु संख्याविशिष्टा चोद्यते, न गवादयः । कुतः । संख्याया दाक्षिण्येनानभिसंबन्धे सत्यनियतसंख्यानां गवादीनां दक्षिणासंबन्धेनाऽऽनर्थक्यमेव संख्यायाः स्यात् । संख्येयसामानाधिकरण्याच्च तच्छब्दस्य बहुवचनं प्रसज्येत । गवादिषु, तस्य द्वादशशतमिति चैकवचनं न स्यात् । तस्माद्यस्य कस्यचित्परिक्रयसाधनस्य द्रव्यस्यैतस्यां संख्यायां कृतायामेतत्संख्यः परिक्रयः कृतो भवति । तस्मादेकस्य संख्या, नैकैकस्य । एवमेकवचनश्रवणं युक्तरूपं भविष्यति ।

ननु लक्षणत्वात्तस्य शब्दस्याविवक्षितं वचनम् । उच्यते । अविवक्षितेऽपि वचने या संख्याऽनूद्यते, तेन वचनेन भवितव्यम् । यथा लक्षणत्वेनाप्युच्यमाने ब्राह्मणजातीयो न हन्तव्य इति, न द्विवचनान्तेन निर्देशो भवति, ब्राह्मणौ न हन्तव्याविति । आह । जात्याख्यायामेकस्मिन् बहुवचनं भवति । बहुषु चैकवचनं भवति, न त्वेकस्मिन् बहुषु च द्विवचनं भवति । तेनात्र बहुवचनान्तेन निर्देशः, एकवचनान्तेन वा बहुषु निर्देशो भवति । अत्रोच्यते । जात्याख्यायामिदंदेवं भवति । न च तच्छब्देन जातिरभिधीयते । संनिहितव्यक्तिवचन एष

समत्वाद्गुणानाम्—संख्या द्रव्याणि प्रति । कुतः । वाक्यभेदप्रसङ्गात् । सकृदुच्चरितस्तस्येति शब्दो यदि दक्षिणायां विधीयते, तं प्रति संख्या विधीयते, ततो वाक्यभेदः । अथापि वाक्यभेदमङ्गीकृत्य तच्छब्दस्य संख्या विधीयते, तथाऽपि दक्षिणायाः संख्याऽनवगता, तां प्रति विधीयमानत्वात् । 'तत्रैकत्वमयज्ञाङ्गभूतम्' इति चेत् । तत्रसंबन्धेऽपि । गवादयः संख्यानुरक्ता न संख्याया दक्षिणा विधीयते ।

अथापि दक्षिणयाऽनुरक्ता गवादयः संख्यया संबध्यन्ते, तत्र वाक्यभेदादयो ये दोषास्त इहापि । तस्माद्गवादयः संख्या तच्छब्दश्चेति त्रयमपि दक्षिणां प्रति विधीयते । तच्छब्दसामर्थ्याच्चैकजातीयस्य द्रव्यस्य परिच्छेदिका संख्या । यस्य कस्यचिद्द्रव्यस्योच्यमानेऽपि तच्छब्दे तेषामिति वचनं प्राप्नोति । तच्छब्दस्य द्रव्यप-

१ प्रसज्येत गवादिषु । तस्य—पा० । २ अत्र ग्रन्थस्त्रुटित इति भाति । ३ (अ० ४ पा० १ अ० ५ सू० ११)

भवति । तस्मादेकस्य कस्यचित्संख्येति ॥ ४० ॥

यस्य वा संनिधाने स्याद्वाक्यतो ह्यभिसंबन्धः ॥ ४१ ॥

इदं पदोत्तरं सूत्रम् । यदेकस्य संख्यासंबन्धः, तदाऽनियमः, यः कश्चित्, विशेषाश्रवणादिति । एवं प्राप्ते, ब्रूमः । यस्य वा संनिधाने स्यात् । यस्य शब्दस्य संनिधाने संख्याशब्द उच्चरितः, सोऽर्थः संख्याविशिष्टः प्रतीयेत । अनन्तरमुच्चारितेन हि सहैकवाक्यता भवति । कुतः । अनन्तरसंबद्धं हि विशेषणं विज्ञानं विशेष्टुं शक्नोति । न हि व्यवहितम् । व्यवहिताश्च गवादयो माषैः । वाक्यं च प्रकरणाद्बलीयः । तस्मान्माषाः संख्यया संबध्येरन्निति ॥ ४१ ॥

असंयुक्ता तु तुल्यवदितराभिर्विधीयन्ते तस्मात्सर्वाधिकारः स्यात् ॥ ४२ ॥

तुशब्दः पक्षं व्यावर्तयति । माषाः संख्यायुक्ता इति, नैतदेवम् । सर्वव्यापिनी संख्या स्यात् । सर्वैर्गवादिभिः संपाद्येत । असंयुक्ता केवलैर्माषैः संख्या । तुल्यवदितराभिर्द्रव्यश्रुतिभिर्माषाः श्रूयन्ते । कथम् । तिलाश्च माषाश्चेति, चशब्देन तिलैः सहिता माषा इति गम्यते । गवादिभिः सहितानां संख्यासंबन्धः । चशब्दश्रुतिरर्थान्तरसंबन्धमेषामाह । चशब्दश्रवणस्यैतत्सामर्थ्यम् । यस्माच्चशब्दः पर उच्चार्यते, तस्यार्थान्तरसंबन्धं श्रुत्यैवाऽऽह, न वाक्येन । यदि हि वाक्येन स्यात् । पुरस्तादप्युच्चार्यमाण एतमर्थं कुर्यात् । संख्या तु वाक्येन संबध्यते ।

रत्वाज्ज्ञात्याख्यमिति, तदपि न लभ्यते ॥ ४० ॥

यस्य वा संनिधाने—(यस्य कस्यचिदिति) । तत्कुतः । माषा दक्षिणाया अनन्तरं विपरिवर्तन्ते त एव ग्राह्याः । गवादयस्तु न विपरिवर्तन्ते । व्यवहितत्वात् ॥ ४१ ॥

असंयुक्ता—सर्वसंपादिनी संख्या । कुतः । चशब्दश्रवणात् । चशब्दो माषाणां परः श्रूयमाणो द्रव्यान्तरसहितान्माषान् गमयति । यथा प्रकृतिप्रत्ययार्थयोर्भिन्नार्थयोरपि सतोः पूर्वप्रत्ययोच्चारणं प्रकृतेर्यस्मान्न किंचित्प्रत्यायितं भवेत् विशिष्टरूपके तु प्रत्याय्येत । एवमिह चशब्दोऽपि परस्ताच्छ्रूयमाणः श्रुत्यैव स्वार्थं

यदि च पूर्वं न चार्योऽवकल्पेत, चशब्दश्रवणमनर्थकं स्यात्। न ह्यसा-वुत्तरकाले संबध्यते संख्यासंबन्धेऽभिनिर्वृत्ते। तस्य द्वादशशतं चेति, अन्य एवावगम्येत, द्वादशशतमन्यच्च किंचिदिति। न च तदन्यत्किंचि-दुच्चार्यते। तस्मात्पूर्वं चयोगः, पश्चात्संख्यासंबन्धः। समर्थतराणि समानविभक्तीनि, दुर्बलो विविभक्तिः।

अपि च, समानविभक्तीनि समर्थतराणि। तेषां ह्याशुतरा वृत्तिः। विलम्बिता विविभक्तीनाम्। स्वार्थे समानविभक्तीनि समर्थतराणि प्रथमान्तानि भवन्ति। परपदार्थं पठ्यन्तो विशिनष्टि। तस्मात्समुच्चि-तानि चेतरेतरयुक्तानि वा संख्येयानि संख्यया संबध्यन्ते। समाहारो वेषां संख्यया युक्तः। तस्मात्सर्वैः संख्या संपादयितव्या। किमेवं भविष्यति। संख्यासंबन्धे न कश्चिद्वर्जितो भविष्यति। विनिगमनायां हेत्वभावे यमेव संख्यासंबन्धो वर्जयेत्, तमेव प्रत्ययो बाध्येत। तस्मा-द्गवादिराशिः संख्ययैतया संबध्येतेति ॥ ४२ ॥

असंयोगाद्विधिश्रुतावेकजाताधिकारः स्याच्छ्रुत्या-कोपात्क्रतोः ॥ ४३ ॥

नैतदस्ति, सर्वसंपादनीया संख्येति। असंयोगाद्विधिश्रुतौ, सर्वसं-पादने संबन्धो नास्ति। न श्रूयते गवादिराशेः संख्या भवतीति। न गवादिराशिः शब्देन निर्दिश्यते, यः सर्वनाम्ना प्रतिनिर्दिश्येत। गवा-दयस्तु शब्देनोक्ताः। तेन ते सर्वनाम्ना प्रतिनिर्देशमर्हन्ति। न चात्र

मर्थान्तरसंबन्धित्वेन प्रतिपादयति। वाक्यसंबन्धे हि पुरस्तादुच्चार्यमाण एवमर्थं कुर्यात्।

अपि च प्रथमाविभक्तिप्रयुक्तानि गवादीनि स्वार्थ एवोच्चार्यमाणानि सामाना-धिकरण्यं प्रतिपद्यन्ते। विभक्तानि तु तस्यशब्दनिर्दिष्टानि व्यधिकरणलक्षणया संबध्येरन्। तस्माच्चशब्दश्रुतेः सामानाधिकरण्याच्च मिथः संयुक्तानां संख्यायोग इति सर्वसंपादिनी ॥ ४२ ॥

एकेन द्रव्येण संख्या संबध्यते। कुतः। संख्या दक्षिणां प्रति विधीयते, गवा-दयस्तच्छब्दश्च। ततः किम्। तस्यशब्देन प्रकृतसंबन्धः। अत एकजातीयमेक-संख्याविशिष्टं द्रव्यं दक्षिणां प्रति विधीयते। तेन द्वादशशतविशिष्टमेकजातिविशि-

गवादीनां प्राधान्यमित्युक्तम् । दाक्षिण्येन हि संख्या संबध्यत इति, संख्याविशेषणं सर्वनामशब्दः संख्यां विशेष्टुमुपादीयते । तत्रैकवचनं विवक्षितमेव । तत्रैषां नानाजातीयानां निर्दिष्टानामन्यतममेकं प्रतिनिर्देशेन संख्याविशेषणमुपादीयते । तस्मान्नानाजातीयानां निर्दिष्टानामेकं स्यात् । स एकजातीय एव भवति । तस्मात्, एकजाताधिकारः इति सूत्रितम् । किमेवं भविष्यति । एवमेकश्रुतिर्न कोपिता भविष्यति । इतरथा वाक्येन द्रव्यस्य भवन्ती प्रवृत्तिविशेषमकुर्वती, अप्रवृत्तिविशेषकरा प्रकरणवचनेन क्रतोः कल्पिता भविष्यति, तस्य क्रतोर्द्वादशशतं दक्षिणा, इति । तस्मादेकजातीयस्य द्वादशशतं दक्षिणेति ॥ ४३ ॥

शब्दार्थश्चापि लोकवत् ॥ ४४ ॥

अपि च लोकवदेतद्द्रष्टव्यम् । लोके हि निर्विशेषिते संख्याशब्द उच्चरिते, एकजातीये प्रत्ययो भवति । कुतः । अन्यथा व्यवहारानुपपत्तेः । असत्येकस्मिन् जातिविशेषे, सर्वत्रान्यैः सह परार्धसंख्या निविष्टा । परार्धस्य चावान्तरसंख्याभिः संव्यवहारः क्रियते । येषामेकेन केनचित्संबन्धस्तेषां तमेकं संबन्धिनमपेक्ष्य संख्या निविशते । स तत्रैकः संबन्धी वक्तव्यः । प्रकृतो वा ग्रहीतव्यः । अर्थाद्वा य आपद्येत, स उपादेयः । इह च प्रकृता नानाजातीयाः । तेषामन्यतमः संख्यया संबद्धः स्यादिति । यथा, शतमार्थ्यां दीयतामिति, एकजातीयानां शतं, न भिन्नजातीयानाम् । यथा द्रव्यं गुणः कर्मावयव इत्येवमादीनाम् ॥ ४४ ॥

सा पशूनामुत्पत्तितो विभागात् ॥ ४५ ॥

एकजातीयस्य संख्येत्येतत्समधिगतम् । सा पशूनामुत प्राणा-

द्यनेकसंख्याविशिष्टं च नियमेन ग्रहीतव्यम् । न च गवादीनां वस्त्वन्तरभूतं विद्यते, यत्सर्वनाम्ना प्रतिनिर्दिश्यते । तस्मात्प्रकृतानां गवादीनां परामर्शः ।

ननु विद्यत एव समुदायः । भवत्वसौ वस्तु । तथाऽपि गवादीनां समुदायशब्देनोच्यते । गवादिव्यतिरेके नास्ति शब्दः, यः सर्वनाम्ना प्रतिनिर्दिश्यते ॥ ४३ ॥ [४४]॥

---

१ नाप्रवृत्तिविशेष—पा० ।

मिति, अनियमे मात्र उच्यते । सा पशूनामिति । कुतः । उत्पत्तितो विभागात् । औत्पत्तिकेन विभागेन पशवः संव्यवहारेषु संख्यायन्ते । पञ्चभिरश्वैः क्रीतः, पञ्चभिर्गोभिः क्रीत इति । न व्रीह्यादीनामौत्पत्तिकेन विभागेन संव्यवहारेषु संख्या संकीर्त्यते । निगदाभिप्राया मानाभिप्राया वा भवति । न हि भवति पञ्चभिर्माषैः क्रीत इति । पञ्चभिर्माषाणामाढकैर्द्रोणैर्वा कुडवैर्वा खारीभिर्वेति भवति । तत्र, आढकादिभिरनुच्चार्यमाणैः साकाङ्क्षमेवं वाक्यमपरिपूर्णमप्रमाणमर्थस्य कस्यचित् ।

अथ माषाणामप्यौत्पत्तिकेन विभागेन कस्मादिह परिक्रयो न क्रियत इति । अत्रोच्यते । मूल्यस्य सतः परिक्रये विशेष उच्यते, द्वादशशतं दक्षिणेति । न च द्वादशशतं व्रीह्यादिबीजानां भृतित्वेन ऋत्विजामवकल्पते । त्रिभिः प्रकारैर्भृतिर्भवति, व्यापारतः फलतो वचनत इति । व्यापारतस्तावन्न माषबीजानां द्वादशशतं भृतिः । कर्म कुर्वाणा हि कर्मकराः पादिकमप्यहर्लभन्ते । फलानुरूप्यं नैव ज्ञायते । वचनं तु भृतौ सत्यां परिमाणविशेषपरं भवति । [1]यत्र हि पादिकमप्यहर्न लभ्यते, न सा दक्षिणा भवति । न हि सा तस्मिन् कर्मणि दक्षं करोति । स्नेहाद्वाऽन्येन वा प्रकारेण कृत्स्नमहः कर्म कुर्यात्, न व्रीहीणां द्वादशशतेन प्रोत्साहितः ।

आह । यः कश्चित्कस्यांचिदवस्थायां व्रीहीणां द्वादशशतेन प्रोत्साह्यते, तस्य किं सा दक्षिणा भवेत् । नेति ब्रूमः । दक्षकरणी हि दक्षिणा । दक्षश्च बलम् । या नाऽऽशितंभवं करोति, नासौ बलकरणी । तस्माद्या नाऽऽशितंभवा, नासौ दक्षिणा । आशितंभवाया ओधिपयं वचनस्य विषयः । आह । व्रीहिबीजानामपि द्वादशशतं यां च यावतीं बलमात्रां करोति ।

अत्रोच्यते । आपेक्षिकमिदं बलं नाम । स एव हि पुरुषः कंचित्प्रति बलीयान्, कंचित्प्रत्यबलः । तत्र यावदाशितंभवं नास्ति, तावदबलता । बलवत्तरो ह्याशितेन भवतीत्याशितंभवादूर्ध्वं बलकरणम् ।

---

१ अधिकं—पा० ।

तस्मादाश्रितमत्वं यद्द्रव्यं, सा भृतिः, सा दक्षिणा । ततोऽधिकं दक्षिणात्वे सिद्धे वचनप्रामाण्याद्भवति । विकृतौ ऋनपेये वचनप्रामाण्याद्लपबलकरणमपि दक्षिणायाः स्थाने विधीयते सोमचमसः । स आश्रयात्सिध्यति । पशवस्तु सर्वे मुख्यबलकरणे समर्थाः । तेषु सत्सु न व्रीह्यादिबीजानि संख्यया संमन्तव्यन्त इति ॥ ४५ ॥

अनियमोऽविशेषात् ॥ ४६ ॥

यदा पशूनां द्वादशशतं, तदाऽनियमः, गवादीनामन्यतमस्य कस्यचिद्द्वादशशतम् । एवमनियमे लाघवं भविष्यति । प्रयोगप्राशुभावश्च । तत्राधिकारशास्त्रं महाविषयं भविष्यतीति ॥ ४६ ॥

भागित्वाद्वा गवां स्यात् ॥ ४७ ॥ सि०

वाशब्दोऽनियमं व्यावर्तयति । गवा द्वादशशतं स्यात् । कुतः । भागित्वात् । भागवत्यो हि गावो महाभागाः । महत्युपकारे वर्तन्त इत्यर्थः । एवमृत्विजामुपकारभूयस्त्वं भविष्यति । ऋत्विजा चोपकारः कर्तव्यः । महत्तमे हि त उपकारे वर्तन्ते । उपकुर्वता चोपकर्तव्यमिति. सदाचारः । एवं सदाचारोऽनुगृहीतो भविष्यति, यदि महाभागानां भूयसी संख्या दीयते । गावश्च महाभागाः । तस्मात्तासां द्वादशशतम् । अश्वा उपकारकतरा भवेयुः, यद्येषां दानप्रतिग्रहविक्रया न प्रतिषिध्येरन् । न केसरिणो ददाति, नोभयतोदतः प्रतिगृह्णातीति श्रुतिः । स्मर्यते च, नाश्वं विक्रीणीत इति । तस्माद्द्वादशशतं गवां स्यात् ॥ ४७ ॥

प्रत्ययात् ॥ ४८ ॥

अतश्च गवा संख्या । कुतः । प्रत्ययात् । संख्यासंपादनार्थमुपादीयमानेषु प्रकृतेषु ग्रन्थेनोपायेन स्मर्यमाणेषु पूर्वं गावः प्रतीयन्ते । अतस्ताः संख्यया संबध्यन्ते । न च तत्र विरोधः कश्चिदस्ति । गोषु संपन्नासु न पुनरश्वादयः संबध्यन्ते । एकजातीयो हि संपद्द्रव्यः । स च संपद् इति । तस्माद्गवां संख्या ॥ ४८ ॥

---

४१ ॥ ४६ ॥ ४७ ॥ ४८ ॥

लिङ्गदर्शनाच ॥ ४९ ॥

लिङ्गं खल्वेतमर्थं दर्शयति । किं लिङ्गं भवति । एवमाह । सहस्रं दक्षिणाः, सहस्रं स्तोत्रीयाः, यावदस्य सहस्रस्योत्तराधरा गौर्गवि प्रतिष्ठिता तावदस्माल्लोकादसौ लोक इति, गाः मात्रा दर्शयति । तथा, तां वा एतां शवर्लीं समामनन्ति । इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतिरदिति सरस्वति महि विश्रुति, एता ते अघ्न्ये नामानि देवेभ्यो मा सुकृतं कृतादिति गवामेतानि नामानि । सहस्रतमी च दक्षिणामेवमाह । एतानि ते नामानीति, यदि सा गौः, एवमेतदवकल्पते । तस्मादपि गवां संख्येति ॥ ४९ ॥

(ज्योतिष्टोमे द्वादशोत्तरशतगोदक्षिणाया विभज्य दानाधिकरणम् ॥ १२ ॥)

[१२] तत्र दानं विभागेन प्रदानानां पृथक्त्वात् ॥ ५० ॥ सि०

ज्योतिष्टोमे गवादयो दक्षिणा । तत्रैषोऽर्थः समधिगतः । गवां संख्येति । अथेदानीमिदं संदिह्यते । किं यस्य यावान् भाग आभजति, स्वयमेव यजमानेन विभज्य तस्य तावान् कल्पयितव्यः, उत परिपदेव विभज्यत इति । किं प्राप्तम् । अनियमः, विभज्याविभज्य वा दातव्यम् । एतावद्धि श्रूयते दातव्यमिति । न विभज्याविभज्य वेति । तस्मादनियम इति ।

एवं प्राप्ते, ब्रूमः । विभज्य दातव्यमिति । दातव्यस्यैव तद्रूपं, यत्स्वस्वपरित्यागेन परस्वत्वापादनम् । तच यजमानेन स्वयं कर्तव्यम् । तस्मात्स्वयं प्रयोगे स्यादिति । यो यस्यांश आभजति, स तस्मा अनिर्दिष्टो न शक्यते तेन संबन्धयितुम् । तेन यस्तं निर्दिशति स दानमभिनिर्वर्तयति । यजमानेन च दानं निर्वर्तयितव्यम् । तस्मा-

---

४९ ॥]

तत्र दानं विभागेन । इदमप्युत्तरविवक्षार्थम् । स्थित एतस्मिन्विभागेऽनियमादयो विचारा भविष्यन्ति । 'ऋत्विग्भ्यो दक्षिणा ददाति '. इति सर्वविशेषणविशिष्टो ददातिर्विधीयते । ऋत्विग्भ्य इति चतुर्थ्यन्तः शब्दः । चतुर्थी च संप्रदाने । संप्रदानं च कारकम् । कारकं च क्रियां प्रति गुणभूतम् । तत्राविभज्य दानं प्राप्नोति । विभागस्याचोदितत्वात् ।

उच्यते । ददातिरयम् । ददातिश्च स्वस्वत्वनिवृत्तिपरस्वत्वापादनरूपम् । तच्चै-

यजमानो विभज्य निर्दिशेत् । प्रदानानां पृथक्त्वात् । असति विभागे न शक्यः स्वेन भागेन संबन्धः कर्तुम् । तस्माद्विभज्य दक्षिणा दातव्येति ॥ ५० ॥

परिक्रयाच्च लोकवत् ॥ ५१ ॥

अस्ति च परिक्रयार्थं दानं, न धर्ममात्रम् । परिक्रयार्थं च भर्त्रा भृत्येन सह पणितव्यम् । यदि च परिषदं प्रत्युच्येत, परिषच्च विभजेत न स्वामिना सहापणिष्यत । तत्र परिक्रय एव नाभविष्यत् । यथा, लोके काष्ठवाहप्रभृतिभ्यो यद्दीयते, तत्र काष्ठवाहाः स्वामिना सह पणन्ते । तेभ्यः स्वामी विभज्य निर्दिशति, इदं तुभ्यमिदं तुभ्यमिति । तद्वदिहापि द्रष्टव्यम् । तस्माद्विभज्य दक्षिणा दातव्येति । ५१॥

विभागं चापि दर्शयति ॥ ५२ ॥

अपि च दर्शयति विभागं, यद्विभागाभिधायिनं मन्त्रमामनन्ति । तुथो वो विश्ववेदा विभजतु, इति । कृष्णाजिनेन विश्रास्य दक्षिणां ददातीति । तथा, अग्नीधेऽग्रे ददाति, अग्निमुखानेव पितॄन् प्रीणाति । ब्रह्मणे ददाति, प्रसृतेभ्यो ददाति प्रसृत्यै । होत्रे ददाति । नेष्ट्रे ददाति । हविर्धान आसीनेभ्य अध्वर्युभ्यो ददाति । उद्गातृभ्यो ददाति । अन्तःसदस्यासीनेभ्यो यथाश्रद्धं प्रासर्पकेभ्यो ददातीति । एवं विभागदर्शनमुपपद्यते । तस्माद्विभज्य दातव्यमिति ॥ ५२ ॥

(ज्योतिष्टोमे द्वादशशतदक्षिणाया अर्ध्यादिसमाख्यानुरोधेन विभागाधिकरणम् ॥ १३ ॥)

[१३] समं स्यादश्रुतित्वात् ॥ ५३ ॥ पू०

ज्योतिष्टोमे समाम्नायते, गौश्चाश्वश्चाश्वतरश्चेति । तत्रायमर्थः समधिगतः । विभज्य दातव्यमिति । इदमिदानीं सांशयिकम् । किं समो विभाग उत धर्मकृतं वैषम्यम्, उत शब्दकृतमिति । किं प्राप्तम् । समो भागः स्यात्, अश्रुतित्वाद्वैषम्यस्य । यत्र विशेषो न श्रूयते, तत्र समो विभागो भवितुमर्हति । कथमिव । एकस्मै सर्वं दातव्यं प्राप्नोति, यद्यपरस्मै दातव्यं न भवति । तत्र यावत्येकस्मै दीयमाने नान्यः संवि-

---

मैकं प्रति कर्तव्यम् । यदि समुदायमङ्गीकृत्य परिक्रयेत्तथा सति त्याग एव स्यात् पृथक्त्वेन ददातिः । तस्मात्प्रविभज्य दानम् ॥ ५० ॥ [५१ ॥ ५२ ॥]

भज्यते, तावत्तस्मा एकस्मै न दातव्यम् । अविशिष्टं दातव्यम् । एवमेकैकस्मै । तस्माद्विशेषाश्रवणात्समं देयमिति ॥ ५३ ॥

अपि वा कर्मवैषम्यात् ॥ ५४ ॥

अपि वेति पक्षव्यावृत्तिः । न समं स्यात् । कर्मकृतं वैषम्यं भवेत् । यो बहु कर्म करोति, तस्मै बह्वी भृतिर्दीयते । तस्मात्कर्मानुरूप्येण वैषम्यमिति ॥ ५४ ॥

अतुल्याः स्युः परिक्रये विषमाख्या विधिश्रुतौ परिक्रयान्न कर्मण्युपपद्यते दर्शनाद्विशेषस्य तथाऽभ्युदये ॥ ५५ ॥ सि०

न चैतदस्ति, कर्मकृतं वैषम्यमिति । किं तर्हि । उपकारकृतम् । स उपकारः श्रुत्या विज्ञायते । तस्माच्छ्रुतिकृतं वैषम्यम् । तेन, अतुल्याः परिक्रये भवेयुः । विषमा ह्येषामाख्या । केचिदर्धिनः, केचित्तृतीयिनः, केचित्पादिनः । येषामर्धं तेऽर्धिनः । कथं च तेषामर्धं भवति । यदि तेभ्योऽर्धं दीयते । एवं, तृतीयिनः, पादिन इति च दीक्षाविधिश्रुतौ समाख्यायन्ते । सा परिक्रयात्कर्मकृते वैषम्ये नोपपद्यते । क्व पुनरयं विशेषो दृश्यते । अभ्युदये । अभ्युदय इति, अभ्युदयफलम् । ऋद्धिफलं द्वादशाहं ब्रूमः ।

अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारं, ततो होतारम् । ततस्तं प्रतिप्रस्थाता दीक्षयित्वाऽर्धिनो दीक्षयति । ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारमुद्गातुः, मैत्रावरुणं होतुः । ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति । अग्नीधं ब्रह्मणः, प्रतिहर्तारमुद्गातुः, अच्छावाकं होतुः । ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति । पोतारं ब्रह्मणः, सुब्रह्मण्यमुद्गातुः, ग्रावस्तुतं होतुः । ततस्तमन्यो दीक्षयति, ब्रह्मचारी वाऽऽचार्यप्रेषित इति[1] । अर्धिनः, तृतीयिनः, पादिन इति द्वादशाहेऽनुवादः । यदि प्रकृतौ 'यथासमाख्यममीषामिमे भागास्ततो

समं स्यादश्रुतत्वादिति—प्रसक्तानुप्रसक्तेन विभागोपोद्बलकं च ॥५३॥[५४]

---

१ ततस्तमन्यो ब्राह्मणो दीक्षयति—इति खण्डदेवादिधृतः पाठः ।

द्वादशाहे दर्शनमुपपद्यते । तस्मादध्वर्य्वादिभिः समाख्यानात्समाख्याश्रुतिकृतं वैषम्यं भवितुमर्हतीति ॥ ५५ ॥

(भूसंज्ञकैकाहे, औपदेशिकधेनुदक्षिणयाऽऽतिदेशिककृत्स्नक्रतुदक्षिणाया बाधाधिकरणम् ॥ १४ ॥)

[१४] तस्य धेनुरिति गवां प्रकृतौ विभक्तचोदितत्वात्सामान्यात्तद्विकारः स्यायथेष्टिर्गुणशब्देन ॥ ५६ ॥ पू०

इदमामनन्ति, अथैष भूर्वैश्वदेवास्त्रिवृदेव सर्वस्तस्य विश्ववत्यस्तोत्रीया धेनुर्दक्षिणा, इति । अत्र संदेहः । किं धेनुर्गवां निवर्तिका, उत कृत्स्नाया दक्षिणाया इति । तत्रेदं तावत्परीक्ष्यम् । किं प्रकृतौ विभक्तं दाक्षिण्यमुत समस्तमिति । तत इदं तच्च संदेहस्याधिकरणं क्रियते । किं प्रकृतौ विभक्तं दाक्षिण्यं, धेनुर्गवां निवर्तिका, उताविभक्तं, कृत्स्नाया दक्षिणाया निवर्तिकेति । किं प्राप्तम् । तस्य धेनुरिति श्रूयमाणे ब्रूमः । धेनुर्गवां निवर्तिकेति ।

तत एतत्तावद्विचार्यते । प्रकृतौ विभक्तं दाक्षिण्यमिति । किमिदं विभक्तमिति । गवादीनामेकैकं द्रव्यं दक्षिणेति । कथम् । गौश्चाश्वश्चाश्वतरश्च दक्षिणा, इति प्रकृतौ गवादिभिर्दक्षिणाशब्दः प्रत्येकं परिसमाप्यते । निर्दिष्टा हि गवादयो न तेषां समुदायः । चशब्दः समुच्चयार्थो भवति, न तु समुच्चयस्य निर्देशकः । परपदविशेषणार्थं तु समुच्चयमुपादत्ते । यदि हि निर्दिशेत्, क्रियागुणैः समुच्चयः संबध्येत । समुच्चयः शोभनः, समुच्चयो द्रष्टव्य इति यथा भवति, एवं, च शोभनः, च द्रष्टव्य इति वा भविष्यति ।

---

११ ॥]

तस्य धेनुरिति—विकृतिसिद्ध्यर्थं प्रकृतिं तावन्निरूपयामः । यदि गवादयः प्रधानभूतास्तत एकद्रव्यनिवर्तिका धेनुः । अथ दक्षिणा, कृत्स्नस्य दाक्षिण्यस्य निवर्तिका धेनुः । गवादयोऽत्र प्रधानभूतास्तेऽत्र निर्दिश्यन्ते । दक्षिणा तान्प्रति विधीयते । न च शब्दः समुदायार्थो भवति । न तु समुच्चयनिर्देशक इति—कोऽभिप्रायः ।

---

१ अथ दक्षिणेति-प्रधानभूता, तत इत्यध्याहारः ।

तथा, यथेह समुच्चेययोः षष्ठी भवति, धवखदिरयोः समुच्चय इति । एवं धवः खदिरश्चेत्यत्राप्यभविष्यत् । न तु भवति । तस्मान्न चशब्दः समुच्चयं निर्दिशति । श्रुत्या निर्दिष्टेन चैकवाक्यता न्याय्या, न गवादिलक्षितेन समुदायेन । तस्मात्, गौर्दक्षिणा, अश्वो दक्षिणा, इत्येवं संबन्धः । लक्षयित्वा हि गवादींस्तेषां दक्षिणात्वं विधीयते । तच्च गुणभूतं प्रतिप्रधानं भिद्येत । चशब्दश्चैवं समर्थितो भविष्यति, गौर्दक्षिणा, अश्वश्च दक्षिणा, इति । न गौरश्वादिसहितो गवादीनां वा समाहार इति।

यदा विभक्तं दाक्षिण्यं, तदा प्राप्ता गौर्दाक्षिण्ये । पुनर्विशेषार्थमुच्चार्यते, धेनुर्दक्षिणा, इति । याऽसौ गौर्दक्षिणा सा धेनुरिति । अन्यासां दक्षिणानामविकारेण यथाप्रकृतिभावेन चोदकानुग्रहो भविष्यति । शब्देनैव गव्येष गुण उच्यते, धेनुत्वं नाम । गौरेव हि धेनुर्नान्या । यथेष्टिर्गुणशब्देन । सौर्यं निर्वपेदिति सूर्यसंबन्धं कुर्याद्द्रव्यस्येति विवक्षिते निर्वपणाश्रय एव प्रयोगः शब्देन निर्दिश्यत इति, सनिर्वपणका-

---

शब्दास्तावद्द्विप्रकाराः । केचिद्वाच्यं स्वप्रधानमाहुः, नोपसर्जनत्वेन । यथा, वृक्षाविति वृक्षशब्दः स्वार्थप्रधान उच्चार्यते । केचिद्वाच्यमर्थमन्यथोपसर्जनीभूतं ब्रुवते, न स्वप्रधानभूतम् । यथाऽत्रैव वृक्षाविति द्विवचनं प्रातिपदिकोपसर्जनमात्मानं[1] ब्रवीति । न द्विवचनार्थमेव जहाति । एवं चशब्दः समुच्चयं ब्रुवन्नुपसर्जनत्वेन ब्रवीति, न स्वं प्राधान्येन । तस्माद्यस्योपसर्जनं चशब्द सोऽत्र क्रियागुणाभ्यां संबध्यते । प्रधाने कार्यसंप्रत्ययात्सिद्धमिति । ते च गवादयः । न च चशब्दः समुच्चयस्य पर्यायवचनः । समुच्चयशब्दः प्राधान्येन निर्दिशति, नान्यत्र गुणभावेन । गवादयः स्वार्थस्य वक्तारो न द्योतकाः । कथम् । शब्दस्तावददृष्टया शक्त्याऽर्थमभिधत्ते, स एव । नाद्यः । एवं चशब्दः । कथम् । एकशक्तिकल्पनात् । अन्यथा शब्दान्तरस्य तदभिधायिता, चशब्दस्य च द्योतकत्वमिति शक्तिद्वयं स्यात् ।

अपि च-वृक्षशब्द उच्चरिते वृक्षार्थ एव मनसि विपरिवर्तते, नान्यसहितः । (प्रकाशशब्दोच्चारणात्) । उच्चरिते तु चशब्द इतरेतरयोगः प्रतीयते । स तस्यार्थः ।

---

१ आत्मानमिति–द्वित्वमित्यर्थः । २ 'स एव' इत्यारभ्य कियानपि ग्रन्थस्त्रुटित इति भाति । ३ स तस्येति–यच्च यस्मात्प्रतीयते तत्तस्य वाच्यमिति नियमादिति शेषः ।

स्वप्रयोगादनेन निर्वपणशब्देनैष्टिको विध्यन्तो नियम्यते । एवमिहापि गोर्गुणवचनेन धेनुशब्देन गोदक्षिणाविकारः क्रियते, नान्या[1] दक्षिणा विक्रियत इति ॥ ५६ ॥

सर्वस्य वा क्रतुसंयोगादेकत्वं दक्षिणार्थस्य गुणानां कार्यैकत्वादर्थे विकृतौ श्रुतिभूतं स्यात्तस्मा- त्समवायाद्धि कर्मभिः ॥ ५७ ॥ सि०

वाशब्दः पक्षं व्यावर्तयति । सर्वस्य क्रतुदाक्षिण्यस्य निवर्तिका धेनुरिति प्रतिज्ञायते । तन्नैतद्वर्ण्यते समस्तं दाक्षिण्यमिति । किमिदं समस्तं दाक्षिण्यमिति न प्रतिद्रव्यं दक्षिणाशब्दः संबध्यते, गौर्दक्षिणा, अश्वो दक्षिणा, अश्वतरो दक्षिणा, इति । कथं तर्हि । गवादयो दक्षिणेति । न हि गवादीनुद्दिश्य दक्षिणासंबन्धो विधीयते, ये गवादयस्ते दक्षिणेति । तथा हि दक्षिणाशब्दो गवादीनां दक्षिणासंबन्धविधानार्थं यौगपद्येनान्तर्णीतसंबन्धमभिवदन् बहुवचनान्तः स्यात्, गवादयो दक्षिणा इति । यथा, अग्नीषोमौ देवते प्राणापानावभिसम्भवतामिति । गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति ।

कथं तर्हि । दक्षिणामुद्दिश्य गवादयो विधीयन्ते । का दक्षिणा । गवादय इति । दक्षिणा नाम दक्षतेरुत्साहकर्मण. । दक्षिणा—उत्साहिका, इति । एकः स गुणः । स च प्राधान्येन विवक्षितः । तद्विशेषणत्वेन गवादयः। गुणवचनानां च शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति, न द्रव्यवचनानामाश्रितगुणवशेन । यथा, विश्वे देवा देवतेति । का पुनर्दक्षिणा । गौश्चाश्वश्चाश्वतरश्चेति । दक्षिणाशब्दो दाने संबध्यते,

---

गवादीनामुद्दिश्यमानानां विशेषणमविवक्षितम् । तस्मादेकैकस्य दक्षिणासंबन्ध. । उद्दिश्यमानप्राधान्यात् । प्राधान्यं च द्रव्यत्वात् ॥ ९६ ॥

इतरेतरयुक्ता दक्षिणा प्रतिविधीयते । कुतः । सहयासामर्थ्यात् । यदि गवादीनुद्दिश्य दक्षिणा विधीयते, न सह्या दक्षिणा प्रति विधीयते । वाक्यभेदप्रसङ्गात् । यदि च गवादय. प्रधानभूतास्तथा सति तेषामिति प्राप्नोति । गवादीनां प्राधान्येऽदृष्टकल्पना प्राप्नोति । अन्यत्र शेषभावादृगवादीनाम् । दक्षिणाप्राधान्ये तु नादृष्ट.

---

[1] नान्यदक्षिणा—पा० ।

ऋत्विग्भ्यो दक्षिणां ददातीति, न गवादयः। एको हि दक्षिणानामर्थः, ऋत्विजामानमनम्। सकृच्चाऽऽनतास्ते भवन्ति, भूय आनमनेनार्थो नास्ति, गवादीनामपि गुणानामेकं कार्यं दक्षिणात्वम्।

यदा समस्तं दाक्षिण्यं तदा विकृतौ भुवि तस्मिन् प्राकृतेऽर्थे धेनुः श्रुतिभूता। सा च प्राकृतं कार्यमभिनिर्वर्तयति। क्रतुसंयोगेन हि श्रूयते तस्य क्रतोर्धेनुर्दक्षिणा, इति। तस्मिन्निर्वृत्ते सर्वं चोदकप्राप्तमानुमानिकं निवर्तते। तया समवायाद्धि कर्मभिर्ऋत्विजः संबध्यन्ते श्रुतिभूतया। अपि च चशब्दश्रुत्या ससहायं गोद्रव्यमिति प्रतीयते। दक्षिणासंबन्धोऽस्य वाक्येन। श्रुतिश्च वाक्याद्बलीयसी। तस्मात्पूर्वं चयोगः, पश्चाद्दक्षिणासंबन्धः। इतरेतरयुक्ता दक्षिणात्वेन संबध्यन्ते गवादयोऽर्थाः। तस्मात्कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तिका धेनुरिति ॥५७॥

चोदनानामनाश्रयाल्लिङ्गेन नियमः स्यात् ॥ ५८ ॥

यदुक्तं, यथेष्टि गुणशब्देनेति। अत्रोच्यते। आग्नेयोपांशुयाजाग्नीषोमीयानां प्राकृतानां, सौर्यार्यमणप्राजापत्यनैर्ऋतीनां चोदनानां न किंचिदेकं कार्यं, यद्विकृतौ चोदनाऽऽश्रयेत्। तत्र वक्ष्यते, एकस्य कर्मणो वैकृतं कर्म विध्यन्तं गृह्णातीति। तत्र कस्य ग्रहीष्यतीति संदेहे युक्तो लिङ्गेन नियमः। इह त्वपदिष्टो हेतुः। गवादीनामेकं कार्यं दक्षिणात्वम्। तस्मिंश्च धेनुः श्रुतिभूता चोदकप्राप्तान् निवर्तयितुमर्हतीति ॥५८॥

(ज्योतिष्टोमे नैमित्तिकैकादिगोदक्षिणया नित्यप्रयोगीयगोगतद्वादशशत-
संख्यामात्रबाधाधिकरणम् ॥ १६ ॥)

[१५] एका पञ्चेति धेनुवत् ॥ ५९ ॥ पू०

यस्य सोममपहरेयुरेकां गां दक्षिणां दद्यात्, अभिदग्धे पञ्च गा इति। अत्र संदेहः। एका पञ्च च गावः श्रूयमाणाः किं कृत्स्नस्य

---

[1] 'ऋत्विग्भ्यो दक्षिणां ददाति' इति। अपि च गुणवचनोऽयं दक्षिणाशब्दो यदा द्रव्य उपसर्जनीभूतस्तदा द्रव्यस्यैव यल्लिङ्गसंख्यं, तदेव लभते। इह च बहूनि द्रव्याणि। तस्माद्बहुवचनेन भवितव्यम्। अनुपपन्नस्य सत्यां गतावन्याय्यत्वात्। यदा तु स्वप्राधान्येन विवक्ष्यते गुणस्तदा, द्रव्यस्य यल्लिङ्गसंख्यं तन्न लभते। भवितव्यं च गुणस्यापि वचनेन। तस्मादेकवचनान्तं युक्तम् ॥ १७ ॥ [१८ ॥

क्रतुद्राक्षिण्यस्य निवर्तिका, उत गवामिति । किं प्राप्तम् । एवां पञ्चेति धेनुवत् । यथा धेनुः कृत्स्नस्य निवर्तिका एवमेका पञ्च च भवेयुः । दक्षिणासंबन्धो हि तासां प्रत्यक्षः श्रूयते । तेन ताः प्राकृतीनां कार्यमभिनिर्वर्तयन्ति । प्राकृत्यश्चाऽऽनुमानिक्यो निवर्तन्त इति ॥ ५९ ॥

*(साद्यस्क्रे सोमक्रयार्थं विहितेन त्रैवार्षिकेण पुंगवेन, प्राकृतसर्वक्रयद्रव्यबाधाधिकरणम् ॥ १६ ॥)

इदं तावदपर्यवसितं तिष्ठतु । अथाधिकरणान्तरं प्रस्तूयते—

[१६] त्रिवत्सश्च ॥ ६० ॥ सि०

अस्ति साद्यस्क्रे, साण्डस्त्रिवत्सः सोमक्रयणः स्पर्धमानानामिति । सन्ति क्रयार्थानि द्रव्याणि चोदकप्राप्तानि । अजया क्रीणाति, हिरण्येन क्रीणाति, ऋषभेण क्रीणाति, अश्वशफेन क्रीणाति, वाससा क्रीणाति, इत्येवमादीनि । तत्र संशयः । किं त्रिवत्स ऋषभस्य निवर्तकः, अथवा सर्वेषां क्रयार्थानां द्रव्याणामिति । किं प्राप्तम् । ऋषभस्य निवर्तक इति । कुतः । पुंगवत्वात् । पुंगवत्वेन सामान्येन, पुंगवोऽसौ विधीयते । कुतः पुंगवत्वम् । साण्डश्रवणात् । तस्मादृषभस्य निवर्तक इति ।

एवं प्राप्ते, ब्रूमः । त्रिवत्सश्च । किम् । कृत्स्नस्य क्रयार्थस्य निवर्तक इति । प्रत्यक्षः स क्रीणातिना संबध्यते, तेन चोदकप्राप्तं निवर्तयति । तस्मात्कृत्स्नस्य क्रयार्थस्य निवर्तक इति ॥ ६० ॥

तथा च लिङ्गदर्शनम् ॥ ६१ ॥

एवं च कृत्वा लिङ्गं दर्शयति । किं लिङ्गं भवति । एवमाह । अपरस्मिन् साद्यस्क्रे, स्त्री गौः सोमक्रयणी व्याख्या धेवा स्पर्धा, इति । यदि सर्वस्य क्रयार्थस्य निवर्तिका स्त्री गौः, ततः सैवैकाकिनी केन सह स्पर्धिष्यत इति । इतरथा सर्वस्यानिवर्तिकायां संघस्य स्पर्धा भवेत् । तत्रास्यां वर्तमानायां स्पर्धायां, व्याख्या धेवा स्पर्धा, इति नोपपद्यते । तस्मात्सर्वस्य निवर्तिकेति । त्रिवत्सोऽपि तत्समानश्रुतिः । सोऽपि च सर्वस्य निवर्तक इति ।

---

१९ ॥ ६० ॥

एवं वा ॥ यदि त्रिवत्सः सर्वेषां निवर्तकस्तदा तमपवाधमाना साद्यस्कान्तरे स्त्रीगवी श्रूयमाणा केवला स्यात् । तत्र, व्यावृत्ता शेषां स्यर्षा, इति दर्शनमुपपद्यते । इतरथा हि केवलस्य ऋषभस्यापवाधितारं त्रिवत्सं निवर्तयन्ती संघमध्यपतिता स्यर्षेतापि । तत्र, व्यावृत्ता शेषां स्यर्षा, इति वचनं नावकल्पते । अतः कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकस्त्रिवत्स इति ।

तत्रैवमन्तरागर्भिणीन्यायो भवतीत्यन्यथा सूत्रं वर्ण्यते । इतश्च, एका पञ्च च कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तिकाः, त्रिवत्सश्च । तथा च लिङ्गदर्शनम् । एवमेतत्समानश्रुतिस्त्रिवत्सोऽपि सर्वस्य निवर्तकः प्राप्नोति । तदेतद्दर्शनमुपपद्यते । व्यावृत्ता शेषां स्यर्षा, इति ॥ ६१ ॥

एके तु श्रुतिभूतत्वात्संख्यया गवां लिङ्गविशेषेण ॥ ६२ ॥ सि०

रिंयतादुत्तरम् । यदुक्तम्, एका पञ्च च कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तिकेति । एवन्न । एके रथा निवर्तन्ते, एके गावो निवर्तन्ते, अश्वादयो न निवर्तन्ते । एका देया, पञ्च देया इति य एष नियमः, स गोविषयः । कुतः । गोविशिष्टया संख्यया संबन्धात् । यदेतत्, एकां ददाति, पञ्च ददातीति । नैवमभिसंबन्धः क्रियते, एकां दक्षिणा ददातीति । कथं तर्हि । एकां गामिति । गोसंबन्धो हि मुख्यत्वाद्बलीयान् ।

अपि च गोशब्देन सह संख्यायाः प्रत्यक्षः संबन्धः । गोशब्दव्यवधानात्परोक्षो दक्षिणाशब्देन । गोशब्दश्चैवं मुख्यार्थो भवति । इतरथा लक्षणा स्यात्, एका गावदद्यादि चेति । तेन गवां लिङ्गविशेषेण संख्या गोषु निविशते । एवं च सर्वेषामनिवृत्तावश्वादीनां यथाप्रकृतिभावे चोदकानुग्रहो भविष्यति । तस्मादेका पञ्च च गवां निवर्तिका इति ॥ ६२ ॥

(अश्वमेधे विहिताभ्यां प्राकाशाभ्यां प्राकृतस्याध्वर्युमात्रस्य बाध०-)

धिकरणम् ॥ १७ ॥

[१७] प्राकाशौ तथेति चेत् ॥ ६३ ॥ पू०

अश्ववेधे श्रूयते, हिरण्मयौ प्राकाशावध्वर्यवे ददातीति । तत्रैषोऽर्थः सांशयिकः । किं प्राकाशौ कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकावुताध्वर्युभागस्य निवर्तकाविति । कुतः संशयः । इह प्राकाशाविति यदि ददातिना संबध्यते, ततः कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकः । अथाध्वर्युणा, तदाऽध्वर्युभागस्य । किं प्राप्तम् । कृत्स्नस्येति । तत्रैवदुच्यते, प्राकाशाविति शब्दो ददातिना संबध्यत इति । कुतः । एवं ददातिसंबन्धविधाने श्रुतिरनुगृहीता । अध्वर्युणा संबन्धे वाक्यम् ।

अपि च प्राकाशाविति द्वितीया कारकविभक्तिः सामर्थ्यादेवाऽऽख्यातेन संबध्यते, न नाम्ना । तस्माद्ददातिना संबन्धः । अध्वर्युसंबन्धे चाध्वर्युशब्दात्षष्ठ्यभविष्यत् । तस्मादपि ददातिना संबन्धः । ददातिं लक्षयित्वा प्राकाशौ विधीयेते । तत्र न शक्यो ददातिरध्वर्युणा विशेष्टुम् । वाक्यं हि तदा भिद्येत । अपि च विशेषणे सत्यपि यदि ददातिरविशिष्टः पदान्तरेण संबध्यते, अविशिष्ट एव कार्ये प्राप्नोति । प्रयुज्य-

---

ददातिमनूद्य प्राकाशौ विधीयेते 'हिरण्मयौ' इति न विधीयेते । कुतः । 'प्राकाशौ' इति हिरण्मयावेवोच्येते, नान्यद्द्रव्यमयौ, धेनुशब्दवत् । यदि प्राकाशाध्वर्युसंबन्धो भवेत्तथा सत्यन्तं वाक्यमेव स्यात् । न धात्वर्थो विधीयते । न धात्वर्थेऽन्यदितिकर्तव्यविधिरिति । कारकविभक्तिश्च श्रुत्यैव प्राकाशयोर्ददातिना संबन्धं ब्रवीति । अध्वर्युसंबन्धे षष्ठ्यभविष्यत् ।

अत्र ग्रन्थः । अपि च विशेषणे सत्यपि यदि ददातिरविशिष्टः पदान्तरेण संबध्यते, अविशिष्ट एव कार्ये प्राप्नोतीति । कोऽभिप्रायः । अभिन्नवाक्ये ददातिमनूद्य प्राकाशौ विधीयेते । (एतस्यां) ददातेर्विशेषणमविवक्षितम् । वाक्यभेदप्रसङ्गात् । प्रयुज्यमानमपि विशेषणपदं विशेष्यं न विशिनष्टि । कथम् । प्रधानभूतोऽत्र ददातिः । तत्र गुणभूतस्य च लिङ्गसंख्यमविवक्षितम् । कथम् । प्रत्ययः क्रियां विधत्ते । क्रिया विधीयमाना कारकैर्विना न भवति । कारकाणि च स्वविशेषणैर्विना न भवन्ति । तस्मात्क्रियाकारकाणि कारकविशेषणानि प्रत्ययेन परामृश्यन्ते । तत्र यः क्रियां प्रत्युद्दिश्यते स प्रधानभूतः क्रिया भाति, न तु स क्रियाङ्गम् । विधेय द्रव्यौ । तस्य प्रधानभूतस्य यल्लिङ्गसंख्यं तदनङ्गत्वात्क्रियायाः प्रत्ययेन न परामृश्यते । तस्मात्क्रियार्थे प्रातिपदिकमुपादीयते, तस्य यल्लिङ्गसंख्यं तदविवक्षितम् ।

---

१ भेद्—पा० । २ कार्ये—पा० ।

मानमपि हि विशेषणमशक्तं न विशेष्यं विशिनष्टि । तस्मात्, योऽध्वरं युनक्ति, सोऽध्वर्युरिहाभिप्रेतः । अतः कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकौ प्राकाशाविति ॥ ६३ ॥

अपि त्ववयवार्थत्वाद्विभक्तप्रकृतित्वाद्-गुणेदन्ताविकारः स्यात् ॥ ६४ ॥ सि०

अपि त्विति पक्षव्यावृत्तिः । दक्षिणावयवकार्यार्थौ प्राकाशौ, न, कृत्स्नदक्षिणाकार्यार्थौ । विभक्ता हि तेषां भागा अध्वर्य्वादीनाम् । अयमध्वर्योर्भागः, इमेऽन्येषामिति । तस्मात्, गुणेदन्ताविकारः स्यात् । किमिदं गुणेदन्ताविकार इति । गुणस्येदन्ता गुणेदन्ता । इदंभाव इदन्ता । गुणेदन्ताया विकारो गुणेदन्ताविकारः । अध्वर्योर्भागस्य निवर्तकौ प्राकाशौ । कथमिव । एकमिदं हि वाक्यम् । हिरण्मयौ प्राकाशौ, इति । नेयं प्रथमा । नापि दक्षिणाशब्देन संबन्धः । येन दक्षिणाकार्ये वर्तेयाताम् । का तर्ह्येषा । द्वितीया । ददातिनैव संबध्यते । तदेकं वाक्यं, हिरण्मयौ प्राकाशावध्वर्यवे ददातीति । अध्वर्युसंप्रदानकेन ददातिनैतयोः संबन्धः । तस्मात्तावध्वर्युददातिभागं निवर्तयतः । यद्वा सर्वविशेषणविशिष्टो ददातिरपूर्वो विधीयते । दृष्टार्थत्वादध्वर्योरन्यानानस्यर्थान् प्रत्याख्यास्यति ।

क्रियाङ्गत्वात् । प्रधानस्य तु विशेषणमध्वर्युर्न विवक्षितम् । तस्मात्कृत्स्नविकारौ प्राकाशौ । अध्वर्युशब्दस्त्ववयुत्यानुवाद इति ॥ ६३ ॥

न कृत्स्नस्य दाक्षिण्यस्य निवर्तकौ प्राकाशौ । कुतः । यदि दाक्षिण्यमनूद्य प्राकाशौ विधीयेयातां, प्राकाशौ दक्षिणा, तौ चाध्वर्यव इति । यथा 'औदुम्बरः सोमचमसो दक्षिणा, स ब्रह्मणे देयः' इति । एक चेदं वाक्यं, 'प्राकाशावध्वर्यवे ददाति' इति । प्राकाशाविति न चेयं प्रथमा । यथा 'सोमचमसः' इति । किं तर्हि । द्वितीया । सा (अध्वर्यवे) ददातिना संबध्यते । एकवाक्यत्वात् । अध्वर्युप्राकाशयोर्ददातिना संबन्धो विधीयते, न ददातिमध्वर्युविशिष्टमुद्दिश्य । नापि ददातिमुद्दिश्य, अध्वर्युशब्दस्यावयुत्यानुवाददोषात्, व्यवहितसंबन्धाच्च । किं त्वध्वर्युमेवोद्दिश्येति । तत्र चतुर्थ्यन्तोऽध्वर्युः संप्रदानभूतः । प्राकाशप्रातिपदिकं च द्वितीयान्तमध्वर्युं प्रति गुणभावेन, तयोः प्रातिपदिकयोः संबन्धाच्चतुर्थी लभ्यत इति ।

अथ यदुक्तं, शाकाशयोर्ददातिसंबन्धो विधीयत इति । तथा हि श्रुतिरनुगृहीता भविष्यतीति । नासौ वाक्यानपेक्षिणी श्रुतिः । असति ददातिनाऽऽनन्तर्ये नावकल्पते । यदप्युच्यते, कारकविभक्तिराख्यातेन संबन्धयोग्येति । योग्यत्वं दर्शनेन बाध्यते । दृश्यते ह्यानन्तर्यं शाकाशयोरध्वर्युशब्देन । यदप्युक्तं, तत्संबन्धे षष्ठ्यभविष्यदिति । सत्यं प्राप्नोति षष्ठी, न तु तदभावे संबन्धो नास्त्यध्वर्युणा । गम्यते हि स वाक्येन । आह चतुर्थीश्रुतिरत्र या, सा वाक्यमपबाधिष्यत इति । नाविधीयमाना बाधितुमुत्सहते । कथं तर्हि विधित्सिते संप्रदाने श्रूयत इति । सामर्थ्यप्राप्तस्यानुवादेनेति तस्माददोषः । उक्तं वा सर्वविशेषणविशिष्टं दानं विधीयत इति । एवमन्येषामनिवृत्तौ यथाप्रकृतिभावे चोदकानुग्रहो भविष्यति । तस्मादध्वर्युभागस्य निवर्तकौ शाकाशाविति ॥ ६४ ॥

(उपहव्ये क्रतावौपदेशिकाश्वदक्षिणया प्राकृतकृत्स्नक्रतुदक्षिणाया बाधाधिकरणम् ॥ १८ ॥)

[१८] धेनुवच्चाश्वदक्षिणा स ब्रह्मण इति पुरुषापनयो यथा हिरण्यस्य ॥ ६५ ॥ सि०

अस्त्युपहव्यः, उपहव्योऽनिरुक्तः। तेनाभिशस्यमानं याजयेत्। अग्निष्टोमो यज्ञः पञ्चदशस्तोमो रथंतरसामा, अश्वः श्वेतो दक्षिणा। उपहव्योऽनिरुक्तः। तेनाभिशस्यमानं याजयेत्। उक्थ्यो यज्ञः सप्तदशस्तोमो बृहत्पृष्ठः, अश्वः श्यावो रुक्मललाटो दक्षिणा तत्र श्रूयते, स ह्यनिरुक्तः, स ब्रह्मणे देय इति। तत्र संदेहः। किमश्वो ब्रह्मभागस्य निवर्तक उत कृत्स्नस्य क्रतुदाक्षिण्यस्येति। किं प्राप्तम्। ब्रह्मभागस्य निवर्तक इति। कुतः। कर्तृसंबन्धात्, अवयवार्थत्वाद्विभक्तप्रकृतित्वाच्च गुणेदन्ताविकारः स्यात्। स्रग्वत्। यथा, स्रजमुद्गात्रे ददाति, इत्युद्गातृभागस्य निवर्तिका स्रक्, न कृत्स्नस्य क्रतुदाक्षिण्यस्य। एवमिहापीति।

एवं प्राप्ते, ब्रूमः। धेनुवदश्वदक्षिणा स्यात्। कृत्स्नस्य निवर्तिकेति। कुतः। दक्षिणाशब्दसंबन्धात्। अश्वः श्यावो रुक्मललाटो दक्षिणा, इति प्रत्यक्षश्रुतेनाश्वेनाऽऽनमनं कर्तव्यम्। एवं चेत्, आनुमानिकं निवर्तितुमर्हति। ननु कर्तृसंबन्धोऽस्य श्रूयते, स ह्यनिरुक्तः स ब्रह्मणे देय इति। उच्यते। एकेन वाक्येन देशकमाम्नानां निवृत्तिः। द्वितीयेन वाक्येन निवृत्तौ सत्यां पुरुषापनयः क्रियते। यथा हिरण्यस्य, सर्वं ब्रह्मणे परिहरतीति। तस्मात्कृत्स्नस्य निवर्तकोऽश्व इति॥६५॥

एके तु कर्तृसंयोगात्स्रग्वत्तस्य लिङ्गविशेषेण ॥ ६६ ॥

अथ यदुक्तम्, एके अर्था निवर्तन्ते, कर्तृसंयोगाल्लिङ्गविशेषेण स्रग्वदिति। तत्परिहर्तव्यम् ॥ ६६ ॥

द्वितीयमधिकरणं कृत्स्नस्य। तृतीयमपि कृत्स्नस्यैव, लिङ्गाशङ्कानिवृत्त्यर्थमारभ्यते। चतुर्थमपि तत्कृत्स्ने विकारः, तदन्ताविकारोऽध्वर्युभागे नियमार्थः ॥ ६५ ॥ [६६॥

---

१ विनिवृत्तौ—गा०। २ द्वितीयमिति—'धेनुवच्चाश्वदक्षिणा' (अ० १० पा० ४ अ० १८ सू० ६५) इत्यधिकरणं कृत्स्नस्य विकारार्थमारभ्यत इत्यर्थः। ३ तृतीयमिति—'तथा च सोमचमसः' (अ० १० पा० ४ अ० १९ सू० ६८) इत्यधिकरणमपि कृत्स्नविकारार्थमेवाधिकाशङ्कयाऽऽरभ्यत इत्यर्थः। ४ चतुर्थमपीति—'यजुर्युक्ते त्वध्वर्यो' इत्यधिकरणमपि (अ० १० पा० ४ अ० २१ सू० ७०) कृत्स्नविकारार्थ एव दक्षिणापुनःश्रवणे सति कृत्स्नाध्वर्युभागविकारापवादतयाऽध्वर्युभागे नियमार्थमारब्धमित्यर्थः।

अपि वा तदधिकाराद्धिरण्यवद्विकारः स्यात् ॥ ६७ ॥

अपि वेति पक्षव्यावृत्तिः । तदधिकारात्, दक्षिणाधिकारात् । दक्षिणाशब्देन दक्षिणामधिकृत्याऽयसंबन्धः कृतः । तस्मात्कृत्स्नदक्षिणाविकारोऽयः । अतो हिरण्यवदेव भवति, न स्रग्वत् ॥ ६७ ॥

(ऋतपेये विहितसोमचमसदक्षिणया प्राकृतकृत्स्नक्रतुदक्षिणाया बाधाधिकरणम् ॥ १९ ॥)

[१९] तथा च सोमचमसः ॥ ६८ ॥ पू०

ऋतपेये श्रूयते, औदुम्बरः सोमचमसो दक्षिणा । स प्रियाय सगोत्राय ब्रह्मणे देय इति । तत्र संदेहः । किं ब्रह्मभागस्य निवर्तकः सोमचमसः, उत कृत्स्नस्य क्रतुदाक्षिण्यस्य । किं प्राप्तम् । तथा सोमचमसः स्यात् । यथा, स्रग् उद्गात्रे तद्भागस्य निवर्तिका, उद्गातृसंयोगात् । एवं ब्रह्मसंयोगाद्ब्रह्मभागस्य निवर्तकः सोमचमसः ॥ ६८ ॥

सर्वविकारो वा क्रत्वर्थे प्रतिषेधात्पशूनाम् ॥ ६९ ॥ सि०

वाशब्दः पक्षं व्यावर्तयति, न ब्रह्मभागस्य निवर्तकः । किं तर्हि । कृत्स्नस्य क्रतुदाक्षिण्यस्य । कथमवगम्यते । पशुप्रतिषेधानुवादात् । एवमाम्नायते, ऋतं वै सोमोऽनृतं पशवो यत्पशून् दद्यात्सोऽनृतं कुर्यात्, औदुम्बरः सोमचमसो दक्षिणा, इति । पशुदानमपोद्य सोमचमसो विधीयते । यः पशून् दद्यात्तस्यैष दोषो भवेत् । एतस्मान्न पशवो दातव्या इति वक्तव्ये तमेवार्थमुक्तं मन्यमानः, सोमचमसो दक्षिणा, इत्याह । सोमचमसदानेन पशवो न दीयन्त इति गम्यते । तदेवं कृत्स्नस्य निवर्तकोऽवकल्पते । ब्रह्मदानस्य निवर्तके सत्यन्येभ्यः पशवो दीयेरन् । तस्मात्कृत्स्नस्य निवर्तक इति ॥ ६९ ॥

ब्रह्मदानेऽविशिष्टमिति चेत् ॥ ७० ॥

इति चेत्पश्यसि । पशुदानविप्रतिषेधात्कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तक इति । ब्रह्मदानेऽप्येतदवकल्पते । ब्रह्मणे सोमचमसो देयः । यः पशून् दद्याद्ब्रह्मणे, इति गम्यते । तस्मान्न नियोगतः कृत्स्नस्यैव क्रतु-

---

॥ ६७ ॥ ६८ ॥ ६९ ॥

---

१ दद्यात् ब्रह्मणे—पा० ।

दाक्षिण्यस्य निवर्तके पशुप्रतिषेधानुवादोऽवकल्पते । ब्रह्मणे दानेऽपि तदुपपद्यत इति ॥ ७० ॥

उत्सर्गस्य क्रत्वर्थत्वात्प्रतिषिद्धस्य कर्म स्यात्र च गौणः प्रयोजनमर्थः स दक्षिणानां स्यात् ॥ ७१ ॥

न चैतदस्ति, ब्रह्मभागस्य निवर्तकः सोमचमस इति । कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकः स्यात् । अस्य सोमचमसस्य य उत्सर्गः, स क्रत्वर्थः स्यात् । दक्षिणाशब्देन हि संबध्यते, सोमचमसो दक्षिणा, इति । न च प्रकृतावेकैको गवादिर्दक्षिणा । उक्तमेवैतं, गवादीनां समुदाये दक्षिणाशब्द इति । तदेवं सोमचमसदानेन प्रतिषिद्धेषु पशुषु यदि ब्रह्मदानेऽप्येतदविशिष्टमिति कृत्वाऽन्येभ्यः पशवो दीयेरन्, प्रतिषिद्धं क्रियेत । यो हि ब्रह्मभागो न सा दक्षिणा । दक्षिणावयवो हि सः । दक्षिणावयवे दक्षिणाशब्दो निविशमानो गौणः स्यात् । न च विद्यमाने मुख्ये गौण उपादीयते । सोमचमसस्य हि प्रयोजनं दक्षिणानिवृत्तिः[1] । सर्वेषामृत्विजामानमनं प्रयोजनं दक्षिणानां, न ब्रह्मदानम् । तस्मात्कृत्स्नस्य क्रतुदाक्षिण्यस्य निवर्तकः सोमचमस इति ॥ ७१ ॥

(पूर्वाधिकरणपूर्वोत्तरपक्षयोः प्रयोजनप्रतिपादनम् ॥)

यदि तु ब्रह्मणस्तदूनं तद्विकारः स्यात् ॥ ७२ ॥

सर्वं वा पुरुषापनयात्तासां क्रतुप्रधानत्वात् ॥ ७३ ॥

प्रयोजनसूत्रद्वयमिदम् । यदि तु ब्रह्मभागस्य निवर्तकः सोमचमसः, ततो ब्रह्मभागोना सा दक्षिणा । एतेन विकारेणान्या दीयेरन्, यथा पूर्वः पक्षः । यदा तर्हि सिद्धान्तः, तदा सर्वं निवर्तते । तस्मिन् निवर्तिते, ततः पुरुषापनयः क्रियते, स ब्रह्मणे देय इति । तासां दक्षिणानां क्रतुप्रधानत्वं भवति । सर्वर्त्विगानमनेन हि क्रतुः सिध्यति, न ब्रह्मानत्या केवलया । सोमचमसेन च सा सर्वानतिः कृतेति नान्यत्किंचन दीयेत । एतत्प्रयोजनं भवत्येव पक्षोक्तं यथोपवर्णितमिति ॥ ७२ ॥ ७३ ॥

---

७० ॥ ७१ ॥ ७२॥ ७३ ॥

---

१ दक्षिणानिवृत्तिः—पा० ।

(अथवा—ऋतपेये सोमचमसेन कृत्स्नक्रतुदक्षिणायाः पुरुषान्तरस्य च निवृत्त्यधिकरणम् ॥ २० ॥)

एवं वा—

[२०] यदि तु ब्रह्मणस्तदूनं तद्विकारः स्यात् ॥ ७२ ॥ पू०

ऋतपेये श्रूयते, औदुम्बरः सोमचमसो दक्षिणा। स प्रियाय सगोत्राय ब्रह्मणे देय इति। तत्रैषोऽर्थः सांशयिकः। किं ब्रह्मभागेनोनं दातव्यमुत सोमचमस एव केवलो दातव्य इति। ननु सोमचमसो दक्षिणेत्येष संबन्ध इत्युक्तम्। तथोच्यते। सोमचमसो ब्रह्मण इत्येष संबन्ध इति कृत्वा चिन्ता। यद्येवं, ब्रह्मणः सोमचमस इति संबन्धो विवक्षितः, सोमचमसेन ब्रह्मभागो निवर्तितः। अवशिष्टं दातव्यं तदूनो विकारः स्यादिति ॥ ७२ ॥

सर्वं वा पुरुषापनयात्तासां क्रतुप्रधानत्वात् ॥ ७३ सि०

सर्वं वा सोमचमसेन निवर्त्यैत। कुतः। सोमचमसो दक्षिणा, इत्येष संबन्धः प्रत्यक्षः। तेन निवर्तिते सर्वस्मिन् दाक्षिण्ये पुरुषापनय एव क्रियते। तासां क्रतुप्रधानत्वात्। दक्षिणानां सोमचमसो यः क्रतुदक्षिणा, स सर्वं क्रतुदाक्षिण्यं निवर्तयतीति ॥ ७३ ॥

(वाजपेये श्रुतेन यजुर्युक्तरथेनाध्वर्योर्दक्षिणादिभागान्तरस्यानिवृत्त्यधिकरणम् ॥ २१ ॥)

[२१] यजुर्युक्ते त्वध्वर्योर्दक्षिणा विकारः स्यात् ॥ ७४ ॥ पू०

गम्यते । कुतः । प्रकृतो हि वाजपेयः । अध्वर्युः पुनर्वाक्येन श्रूयते । वाक्यं पुनः प्रकरणाद्बलीयः । तस्मादध्वर्युभागस्य निवर्तको रथ इति ॥ ७४ ॥

अपि वा श्रुतिभूतत्वात्सर्वासां तस्य भागो नियम्यते ॥ ७५ ॥ सि०

अपि वेति पक्षव्यावृत्तिः । श्रुतिभूता हि सर्वे रथाः सामान्येन वचनेन, सप्त सप्तदशकानि ददातीति । सप्तदश रथाः, सप्तदश निष्काः, सप्तदश दास्यः, सप्तदश युग्मानि, सप्तदश गवा शतानि, वयसो वयस्यश्च सप्तदश, इति । तेनाविशेषेण सप्तदश रथाः सर्वेषां प्राप्ता विभक्तव्याः । तत्र न ज्ञायते कस्य को रथः । तत्राध्वर्योर्यजुर्युक्तः पक्षे प्राप्तः स नियम्यते । यजुर्युक्तमध्वर्यवे ददाति, नान्यं, न चान्यस्मै । एवम्, ऋग्भिर्युक्तं होत्रे, नान्यं, न चान्यस्मै । सामभिर्युक्तमुद्गात्रे नान्यं, न चान्यस्मै । तत्र पक्षे विधानार्थं यजुर्युक्तग्रहणं, नाध्वर्योर्भागं निवर्तयितुमुत्सहते । तस्यानिवृत्तौ चोदकानुग्रहो भविष्यति । तस्मादध्वर्योर्भागे रथो नियम्यते, न तद्भागं निवर्तयतीति ॥ ७५ ॥

इति श्रीशबरस्वामिविरचिते मीमांसाभाष्ये दशमाध्यायस्य तृतीयः पादः ॥

---

७४ ॥ ७५ ॥]

इति श्रीमट्टकुमारिलविरचितायां मीमांसाभाष्यव्याख्यायां टुप्टीकायां दशमाध्यायस्य तृतीयः पादः ॥

---

१ सप्तदश वयसो वयस्यश्च—इति खण्डदेवपुस्त० पाठः ।

अथ दशमाध्यायस्य चतुर्थः पादः ॥

(नक्षत्रेष्ट्याद्यावुपदिष्टोपहोमादिभिरातिदेशिकानां नारिष्ठहोमादीनां बाधाभावाधिकरणम् ॥ १ ॥

[१] प्रकृतिलिङ्गासंयोगात्कर्मसंस्कारं विकृतावधिकं स्यात्॥ १ ॥ सि०

आरत्यग्निः, य एवं विद्वानग्निं चिनुत इति । तत्र नक्षत्रेष्टिः, अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत् । सोऽत्र जुहोति । अग्नये स्वाहा, कृत्तिकाभ्यः स्वाहा, अम्बायै स्वाहा, नितत्न्यै स्वाहा, अभ्रयन्त्यै स्वाहा, मेघयन्त्यै स्वाहा, वर्षयन्त्यै स्वाहा, चुपुणीकायै स्वाहा, इति । सन्ति तु प्रकृतौ नारिष्ठहोमाः, नारिष्ठान् होमाञ्जुहोतीति । तत्र संशयः । किं नारिष्ठहोमानां निवृत्तिः, अथवाऽनिवृत्तिः, समुच्चय इति । तथा श्येने श्रूयते, लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रचरन्तीति । अस्ति प्रकृतौ, निवीतं मनुष्याणां, प्राचीनावीतं पितॄणाम्, उपवीतं देवानाम्, उपव्ययते देवलक्ष्ममेव तत्कुरुत इति । तदिह चोदकेन प्राप्तम् । तत्र संशयः । किमुपवीतस्य निवृत्तिः, उतानिवृत्तिः, समुच्चय इति । तथा पृष्ठ्ये षडहे श्रूयते, मध्वाशयेत्, घृतं वेति । अस्ति तु प्रकृतौ, पयो व्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्येति । तदिह चोदकेन प्राप्तम् । तत्र संशयः । किं तस्य निवृत्तिः, उतानिवृत्तिः, समुच्चय इति ।

किं प्राप्तम् । तस्य निवृत्तिरिति । प्रत्यक्षश्रुता उपहोमादयोऽप्रमा-

स्नानानुमानिकानां निवर्तका इति । अपि च प्रकृतिलिङ्गसंयोगो भवति, जुहोति, निवीताः प्रचरन्ति, आशयेदिति । यथा शरमयं बर्हिर्भवतीति, शराः कुशान्निवर्तयन्ति ।

एवं प्राप्ते, ब्रूमः । अनिवृत्तिः, समुच्चय इति । कुतः । प्रकृतिलिङ्गासंयोगात् । प्राकृतेन लिङ्गेन कार्येण संयोग एषामुपहोमादीनां नास्ति । स हि प्रत्यक्षदर्शनेन वा भवति । यथा, नैवारश्चरुरिति । अभावे विधानेन वा भवति । यथा, जुहूपा वा एतर्हि बाग्भवति, यर्हि पृष्ठ्यः षडहः संतिष्ठते । न वहु वदेन्नान्यं पृच्छेन्नान्यस्मै प्रतिब्रूयात्, मध्वाशयेत्, घृतं वा, इति । विकारेण वा । यथा, नैर्ऋतश्चरुर्नखाव-

---

प्रत्यक्षविधानाचोदक एव नास्ति नक्षत्रेष्टौ । यथा गृहमेधीयस्याऽऽज्यभागयोः प्रत्यक्षाम्नानात् । यथा सोमस्य प्रत्यक्षविधानात् ।

उच्यते । सर्वास्वेव विकृतिषूपमानेन धर्मप्राप्तिः । न च सोमस्य केनचित्साद-श्यमस्ति । दार्शपूर्णमासकैर्विहितधर्मकैस्तौ व्यक्तचोदनौ । सोमस्त्वव्यक्तचोदनः । तस्मात्सोमे य एव धर्मा विधीयन्ते त एव भवन्ति, नान्ये । नक्षत्रेष्ट्यामपि प्रथमं तावदुपकारापेक्षा भवति, ततः सादृश्येन धर्मप्राप्तिः । न चापूर्वमङ्गमुपकारवद्दृष्टम् । सादृश्यं चास्याऽऽग्नेयेन । तस्य च प्रकारा अनन्तरिता आग्नेये विधीयन्ते । ते नोप-कारमन्तरेण संभवन्तीति तत्सद्भावः । तस्माद्यत्प्रकारान्तरमुपकारो विद्यते तद्गृह्णाति विकृतिः । इमे चोपहोमा नोपकारपूर्वका दृष्टाः । तस्मात्प्राकृतमङ्गजातं प्रवर्तते ।

गृहमेधीये तु दृष्टोपकारावाज्यभागौ पुनः । श्रुतौ, शक्नुवतो गुणावेकैकस्याम् । तस्यां गिरापदस्य प्रतिषिध्यमानस्य यत्कार्यं दृश्यते तन्नेरापदं विधीयते । तस्मात्का-र्येलक्षणार्थं गिरापदमुच्चार्यते, न प्रतिषेधार्थम् । वाक्यभेदादिदोषप्रसङ्गात् । न चापि लक्षणया कार्योपत्तिः । यथा, पृष्ठ्यः षडहः संतिष्ठत इति । अभावः-संख्या, अभावेन प्रतिषेधो लक्ष्यते । प्रतिषेधेन लक्षणया कार्यं गम्यम् । देवग्रहणं यत्र, यत्रापि संदंशाभावः, तत्रापि क्रमादेवाङ्गत्वमिति । तस्मात्समुच्चयः ।

---

१ अद्यांतुस्तदेभारि एमीचीनः पाठो नोपलब्ध इति यथाभुत एव प्रकाशितः । २ लक्षणया इति—यत्राभावे तत्प्रदानविधिना तत्तत्प्रतिषेधमनुमाय प्रतिषेधेन च तत्तत्कार्यमनुमीयत इति तात्पर्यम् । ३ अत्र एमीचीनः पाठो नोपलब्धः ।

पूतानामिति । स्वशब्देन वा भवति । यथा, 'परिधौ पशुं नियुञ्जीतेति । प्रतिषेधेन वा भवति । यथा, न गिरा गिरेति ब्रूयात् । यद्गिरा गिरेति ब्रूयादात्मानं तदुद्गाता गिरेत्, ऐरं कृत्वोद्गेयमिति । अन्येन वा, येनावगम्यते प्राकृतं कार्यमभिनिर्वर्तयन्तीति । तदिह न किंचिदप्यस्ति । न चैतावता निवृत्तिः, इदं प्रत्यक्षश्रुतमिदं चोदकेन प्राप्तमिति । प्रकृतिलिङ्गसंयोगे निवृत्तिर्भवति, नान्यथा ।

नन्विदानीमेवोक्तं, भवतीह प्रकृतिलिङ्गसंयोगः–जुहोति, निवीताः प्रचरन्ति, प्राश्नोदिति । उच्यते । प्राकृतानां जुहोत्यादीनां जुहोत्याद्यन्तराणीमानि विधीयन्ते । तत्र तावज्जुहोतिरदृष्टार्थः । कथमसौ गम्येत प्राकृतस्यार्थे वर्तत इति । तथा, उपवीतमदृष्टार्थे, कथं तस्य कार्ये निवीतं वर्तत इति गम्यते । तथा, घृतं तृप्त्यर्थम् । मध्वशनं

जुहोतिशब्दसामान्यात्स्थानसामान्याच्चपूर्वबाधः । उच्यते । नात्र बाधः । कुतः । कार्यापत्त्यभावात् । प्रत्यक्षेण तावत्कार्यापत्तिर्यथा ' नैवारश्चरुर्भवति ' इति व्रीहीणां कार्ये नीवारा वर्तन्ते । ननु शब्देनेयं कार्यापत्तिः । न हि । नीवारप्रातिपदिकं नीवारान्ब्रवीति । तद्धितो विकारम् । चरुशब्दश्चरुम् । बृहस्पतिशब्दस्तस्य विकारस्य देवतासंबन्धम् । न हि शब्देन कार्यापत्तिर्गम्यते । प्रत्यक्षेण त्ववगम्यते । व्रीहयः पुरोडाशं निर्वर्तयन्ति । पुरोडाशो यागम् । एवं नीवाराश्चरुं, चरुर्यागमित्युपयेषामपि हविर्निर्वर्तकत्वं प्रत्यक्षम् । न चैवमुपहोमानाम् । अदृष्टार्थत्वात् । न चानुमानेन कार्यापत्तिः । यथा, ' नखावपूतानां चरुः ' इति । तत्र तुषकणविमोकं दृष्ट्वा फलं, नूनमवघातकार्ये वर्तते नखावपनमिति । न च प्रतिषेधेन कार्यापत्तिरनुमीयते । यथा, ' न गिरा गिरेति ब्रूयात् ' इति ।

ननु परस्परनिराकाङ्क्षमेवेदं वाक्यद्वयम्, विधायकद्वयसद्भावात्, ब्रूयात्–उद्गेयमिति चेत् । उच्यते । एवं सति वाक्यभेदः प्राप्नोति । विधायकशक्तिकल्पना चैकैकस्य स्यात् । तस्माद्गिरापदस्य प्रतिषिध्यमानस्य यत्कार्यं लक्ष्यते तत्रैरापदं विधीयते । तस्मात्कार्यलक्षणार्थं गिरापदमुच्चार्यते, न प्रतिषेधार्थम् । वाक्यभेदादिदोषात् । न चापि लक्षितलक्षणया कार्यापत्तिः । यथा 'परिधौ पशुं नियुञ्जीत ' । तस्मात्सर्वप्रकारेणापि कार्यापत्तिर्नास्त्युपहोमानां, येन बाधेरन् । प्राकृतं येन वा केनचिदन्येन, येनावगम्यते । कार्यापत्तिरिति निरूपयन्तीति कोऽयं ग्रन्थः । न

---

१ विधायकद्वयसद्भावात्—पा० । २ नियुञ्जन्ति—पा० ।

घृताशनं च तस्मिन्नर्थे वर्तेत इत्यतेन ज्ञायत एव। तस्मान्नास्ति प्रकृतिलिङ्गसंयोगः।

अथोच्यते, नैवोपहोमा जुहोत्यन्तरं, प्राकृते होमे मन्त्रो विधीयत इति। तच्च न। विधायकस्याभावात्। सोऽत्र जुहोतीति परिसमाप्ते वाक्ये केवलस्य मन्त्रस्याऽऽम्नानम्। नास्ति वचनम्, एवं जुहोतीति। भिन्नान्येतानि वाक्यानि। सोऽत्रं जुहोतीति विधिवाक्यम्। अग्नये स्वाहा, कृत्तिकाभ्यः स्वाहा, इत्येवमादीनि मन्त्रवाक्यानि। तस्माच्च मन्त्रविधानार्थं जुहोतेः पुन श्रवणम्। होमविधानार्थं श्रुतिर्विधायिका भवति, मन्त्रविधाने वाक्यम्। तस्मादपि न मन्त्रविधानम्। अतः समुच्चयः। उभयमपि प्रमाणेन प्राप्तम्। प्रत्यक्षश्रवणं प्रमाणं, चोदकोऽपि प्रमाणम्। नानाकार्यत्वाच्चैतयोर्विरोधः। तस्माद्यथा, प्रयाजादीन् बाधन्ते, एवं नारिष्ठहोमानपि न बाधेरन्। अत एवंजातीयकं कर्मसंस्कारं विकृतावधिकं स्यादिति ॥ १ ॥

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसंनिधानात् ॥ २ ॥

अथ यदुक्तं, शरमयं बर्हिर्भवतीति। यथा शराः कुशान् निवर्तयन्ति,[1] एवमिहापीति। अत्रोच्यते। युक्तं शरमये। भवति हि तत्र प्रकृतिलिङ्गेन संयोगः। बर्हिःशब्देनैवविशिष्टं वा बर्हिर्भवति, शरा वा बर्हिषः कार्ये वर्तन्त इति। इह तु प्रकृतिलिङ्गासंयोगः। तस्माद्विषमं बर्हिषेति ॥ २ ॥

(अथवा—सौमारौद्रयाग उपदिष्टैः शरैरातिदेशिकाना कुशानां बाधनिरूपणम् ॥ १ ॥)

एवं वा—

[१] प्रकृतिलिङ्गासंयोगात्कर्मसंस्कारं विकृतावधिकं स्यात् ॥ १ ॥ पू०

होमानुवादेन मन्त्रविधानम्। शुद्ध एव होमो विधीयते, तेन वाक्येन 'सोऽत्र जुहोति' इति। द्वितीयेन मन्त्र',[2] 'अग्नये कृत्तिकाभ्यः' इत्येवमादिना। तयोर्होममन्त्रयोः संबन्धः प्रकरणेन वाक्येन। तस्मान्नारिष्ठोपहोमयोः समुच्चयः ॥ १ ॥ [२ ॥]

१ वर्तेत—पा०। २ सोऽनु जुहोति—पा०।

इदमाम्नायते, सोमारौद्रं चरुं निर्वपेत्कृष्णानां व्रीहीणामभिचरन् इति। तत्रेदं श्रूयते, शरमयं बर्हिर्भवतीति। तत्र संशयः। किं कौशं निवर्तते, नेति। किं प्राप्तम्। उभयस्य प्रमाणावगतत्वात्समुच्चयः ॥ १ ॥

एवं प्राप्ते, ब्रूमः —

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसंनिधानात् ॥ २ ॥ सि०

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेतेति। अस्ति हि तत्र प्रकृतिलिङ्गेन बर्हिःशब्देन संयोगः। तस्मात्प्राकृतस्य निवृत्तिरिति ॥ २ ॥

(अथवा—वाजपेये माहेन्द्रस्तोत्रोपाकरणसाधनतया विहितरथघोषादिना प्राकृतदर्भमन्त्रयोर्बाधनिरूपणम् ॥ १ ॥)

एवं वा—

[१] प्रकृतिलिङ्गासंयोगात्कर्मसंस्कारं विकृतावधिकं स्यात् ॥ १ ॥ पू०

अस्ति वाजपेयः, शरदि वाजपेयेन स्वाराज्यकामो यजेतेति। तत्र श्रूयते, रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति। दुंदुभिघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोतीति। अस्ति च प्रकृतौ, उपावर्तध्वमिति दर्भाभ्यां स्तोत्रमुपाकरोतीति। तदिह चोदकेन प्राप्तम्। तत्र संशयः। किं रथघोषेण दुंदुभिघोषेण यो नादः स मन्त्रस्य निवर्तकः, यद्द्रव्यं तद्दर्भयोः, उतोभयमुभयस्य निवर्तकमिति। किं प्राप्तम्। शब्दत्वेन सामान्येन नादो मन्त्रस्य निवर्तकः, द्रव्यत्वेन द्रव्यं दर्भयोः। ननु तत्पुरुषनिर्देशोऽयम्। तेन परार्थेन रथस्य घोषविशेषणत्वेनोच्चारणं, न स्वकार्येण निर्देशः।

'रथघोषेण' इति रथो दर्भयोर्निवर्तकः, घोषो मन्त्रस्य। कुतः। एवं[१] स्वार्थे रथशब्दो भविष्यति। इतरथा[२] परविशेषणमिति लक्षणा स्यादिति। (श्रुतं स्वार्थे इतरथा रथशब्दो रथमेव ब्रवीति। घोषशब्दो घोषमेव। तत्पुरुषे तु रथः परार्थ-

१ एवमिति—'रथघोषेण' इति पदे, रथश्च घोषश्चेति द्वंद्वसमासपक्ष इत्यर्थः। २ इतरथेति—रथस्य घोष इति षष्ठीतत्पुरुषपक्ष इत्यर्थः।

अत्रोच्यते । द्वंद्वनिर्देशोऽपीदृशो भवति । तत्रायमप्यर्थः, न रथः परार्थ उच्चरिष्यते । श्रुतिर्हि तथा हीयेत, लक्षणा च स्यात् । चोदनालिङ्गसंयोगश्च बाध्येत । तस्माद्घोषो मन्त्रस्य निवर्तको द्रव्यं दर्भयोरिति ॥ १ ॥

एवं प्राप्ते, ब्रूमः—

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसंनिधानात् ॥ २ ॥ सि०

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत, उभयस्य चोदनालिङ्गसंयोगो नैकैकस्य । रथघोषेणेति श्रूयते, न रथेन घोषेण चेति । रथविशिष्टो घोषो लक्षणं स्तोत्रोपाकरणस्य । प्रकृतौ दर्भौ लक्षणं, मन्त्रश्च । नन्विदानीमेवोक्तं द्वंद्वनिर्देशो भविष्यतीति । नैतदेवम् । द्विवचनं हि तथा स्यात् । एकवचनेन च निर्देशः । तेनैको लक्षणं, स च घोषः । तेन हि समभिव्याहारस्तृतीयायाः । ननु समुदायेन समभिव्याहारो भविष्यति । न हि । समुदायस्याशब्दार्थत्वात् । अथ समुदायो निर्दिश्येत, ततोऽभ्युपगतमुभयस्य निवर्तकमिति ।

ननु मन्त्रो वाचक एव, उपावर्तध्वमिति । नेत्युच्यते । उपावर्तनमात्रस्याभिधायको मन्त्रः । न चोपावर्तनमात्रं स्तोत्रोपाकरणम् । अथाप्यभिधानं स्यात्, तथाऽपि तस्य निवर्तकः । लक्षणेनोपाकर्तव्यमिति प्रत्यक्षा श्रुतिः । अभिधानेनोपाकर्तव्यमिति चोदकः । श्रुतिश्च चोदकाद्बलीयसी । तस्मादुभयस्य निवर्तको रथघोषो दुंदुभिघोषश्चेति । किं भविष्यति प्रयोजनम् । यदि रथो न घोषविशेषणम्, अरथावि-

मुच्चार्येते)। तस्माद्द्वंद्वोऽयम् । ननु द्वंद्वे सति द्विवचनं प्राप्नोति । उच्यते । 'सर्वो द्वंद्वो विभाषयैकवद्भवति ' इत्येकवचनं भवेत्येव ॥ १ ॥

एवं तर्हि तत्पुरुषादयं पाठीयान् प्राप्नोति । कथम् । अत्र धवखदिरयोर्थः समाहारः स प्रधानभूतस्तं प्रति धवखदिरावत्यन्तगुणभूतावुच्चार्येते । स च समुदायः केनचिच्छब्देन नोच्यते । तत्र द्वावपि रथघोषौ परार्थौ भवेताम् । तस्मात्तत्पुरुष एव

१ भवत्येव—इत्यनन्तरं, एवं तर्हि—इत्यस्य प्राक्कियाधिदृमन्यो ग्रन्थ इति भाति ।

शिष्टेऽपि घोषः स्तोत्रोपाकरणं लक्षयेदिति ॥ २ ॥

(बृहस्पतिसवादिविकृतावौपदेशिकैर्ग्रहणैरातिदेशिकानामैन्द्रवायवादि-
ग्रहणानां समुच्चयाधिकरणम् ॥ २ ॥)

[२] सर्वत्र तु ग्रहाम्नानमधिकं स्यात्प्रकृतिवत् ॥ ३ ॥ सि०

बृहस्पतिसवे श्रूयते, बार्हस्पत्यं ग्रहं गृह्णाति । विषुवति, अर्कं ग्रहं गृह्णातीति । महाव्रते, शुक्रं ग्रहं गृह्णातीति । अश्वमेधे, सौवर्णराजताभ्यां महिमानौ ग्रहौ गृह्णातीति । सन्ति तु प्राकृतावैन्द्रवायवादयो ग्रहाः । त इह चोदकेन प्राप्ताः । तत्र संशयः । वैकृतास्ते निवर्तयेयुरुताहो नेति, समुच्चय इति । किं प्राप्तम् । प्रत्यक्षश्रुता वैकृताश्चोदकप्राप्तान् प्राकृतान् निवर्तयितुमर्हन्ति । अस्ति हि तेषां प्रकृतिलिङ्गेन ग्रहशब्देन संयोग इति ।

एवं प्राप्ते, ब्रूमः । तत्र तत्र सर्वत्र ग्रहाम्नानमधिकं भवितुमर्हति । प्राकृतस्यानिवृत्तिरिति । कुतः । उभयेषां प्रमाणावगतत्वात् । चोदकोऽपि प्रमाणं, प्रत्यक्षश्रवणमपि । ग्रहशब्दः प्रकृतिलिङ्गमिति चेत् । नैवम् ।

शेषान् । प्रयोजनं, यदि रथो घोषविशेषणमेवं नियमो भवति । ननु पूर्वपक्षेऽपि नियम एव । उच्यते । साधारणगुणवचनोऽयं शब्द एवोपपद्यते । अरुणगुणस्तु साधारणोऽपि भवति । तत्र च क्रयेन द्रव्यनियमो भवति ॥ २ ॥

प्रकृतिं तावन्निरूपयामः । 'ऐन्द्रवायवं गृह्णाति' 'मैत्रावरुणं गृह्णाति' इत्येवमादीनि वाक्यानि प्रकृतौ श्रूयन्ते, ऐन्द्रवायवेन यजेत, मैत्रावरुणेन यजेतेति । यद्येवं श्रूयेत, तथा सतीतरेतरनिरपेक्षाः स्यात् ।

---

१ घोषस्तत्रोपाकरणम्—पा० । २ शुक्रग्रहं—पा० । ३ ध्येयादिति—परिच्छेद्यादित्यर्थः । ४ नियमो भवतीति—रथस्यैव घोषो नान्यस्येति नियमो भवतीत्यर्थः । ५ ननु द्वंद्व इति पूर्वपक्षेऽपि तेन रथघोषयोः परस्परसाहित्यावगतेरश्वशकटन्यायेन परस्परनियमात्कथं घोषो रथस्यैवेति नियमो न सिध्येदिति शङ्कते—ननु पूर्वपक्षेऽपीति । ६ अत्र उच्यते—पा० । उच्यत इति समाधान-[illegible] । [illegible] परस्परं नियमः । 'रथघोषेण' इति द्वंद्वपक्षे तु द्वंद्वेन परस्परसापेक्षत्वेनान्वय-[illegible] प्रतीयमानत्वेऽपि [illegible] घोषो रथस्यैवेति नियमो [illegible] इति । ८ इत्यादिवत्—पा० । [illegible] इति पाठः [illegible] ।

यदि ग्रहशब्दमुच्चार्य गुणो विधीयते, ततः प्राकृता एव ग्रहा गुणविकृता भवेयुः । अथ ग्रहसंबन्धेनाग्रहो विधीयते, ततो ग्रहकार्ये वर्तेत इति प्राकृतं निवर्तयेत् । यथा, खलेवाली यूप इति । अन्यः पुनरेष ग्रहशब्दो ग्रहणवचनः । अर्कं नाम ग्रहं गृह्णाति, महिमानौ नाम ग्रहौ गृह्णातीति । अत्रापूर्वा ग्रहणक्रिया विधीयते । तस्मान्न ग्रहशब्दश्चोदनालिङ्गम् । एकार्थानां हि विकल्पो वा बाधो वा भवति । न चैषा वैकृतैरेकार्थता ।

ननु यागनिर्वृत्त्यर्थाः सर्वे । तेनैषामेकार्थतेति । उच्यते । यागं प्रति संहत्यकारिण एते, न निरपेक्ष एकैक एषां साधकः । न ह्येषां पृथक्त्वेन यागसंबन्धः, अर्केण यजेत, शुक्रेण यजेतेति । कथं तर्हि । प्रयोगवचन एषां ग्राहकः । स च संनिहितानाम् । न च संनिधाने विशेषोऽस्ति । तस्मात्सर्वेषां प्राकृतानां वैकृतानां च संग्राहकः प्रकृतिवत् । यथा प्रकृतावैन्द्रवायवग्रहणं चोदितं, मैत्रावरुणग्रहणं पुनश्चोद्यते । विभागश्चादृष्टार्थः संस्कारो देवतोद्देशश्च । अदृष्टत्वात्कार्यस्य, न ज्ञायते पूर्वं उत्तरस्य कार्ये भवतीति । प्रयोगवचनग्रहणाच्च समुच्चयः, न केवलं मैत्रावरुणादिभिः सह, अप्रकरणाधीताभ्यामर्कमहद्भ्यामपि । एवं विकृतावपि समुच्चयो भवितुमर्हति ।

किं तर्हि । इन्द्रवायू देवताऽस्येति तद्धितो देवता द्रव्योपसर्जनीभूता ब्रवीति । तच्च द्रव्यं द्वितीयया गृह्णातिं प्रति गुणभूतम् । गृह्णातिश्च द्रव्यस्य पृथक्प्रकल्पनम् । तच्चादृष्टार्थम् । योऽत्र देवतानिर्देशोऽदृष्टार्थः । अन्यत्र देवताया अचोदितत्वात् । तस्माद्द्वितीयादिष्वपि ग्रहणेष्वयमेव न्यायः । न चैन्द्रवायवोऽयं मैत्रावरुणस्य कार्ये वर्तेत इति प्रमाणमस्ति । तस्माद्भिन्नार्थान्येतानि ग्रहणानि ।

यागोऽत्र देवतामपेक्षते । देवताश्च यागमन्तरेण न संभवन्तीति यागमपेक्षन्ते । तयोः संनिधानेन प्रमाणेन संबन्धो भवति । तच्च संनिधानं सर्वेषां ग्रहणानामविशिष्टम् । ईदृशी तावती प्रकृतिः । यागः प्रधानभूतः । फले चोदितत्वात् । (प्रधानभूत) देवतावाक्यानि तदर्थानि । तस्मात्प्रधानभूत एव यागोऽर्थादभ्यस्यते । विकृतौ तु 'ऐन्द्रवायवं गृह्णाति' इति चोदकेन प्राप्तानि । संनिहितानीतराणि । आम्नान-

१ उपसर्जनभूता—पा० । २ स च स्थार्थः—तच्च स्थार्थ—इति च, पा० । ३ स्थार्थ इत्येतत्—पा० । योऽपीति पूर्वे छेदः । ४ ततः—पा० । ५ चोदकप्राप्तानि—पा० ।

आह। ननु ग्रहं संकीर्त्य गुणो विधीयते—अश्वमेधे, सौवर्णराजताभ्यामिति। अत्रोच्यते। न तौ प्राकृतौ ग्रहौ। संज्ञा चोत्पत्तिसंयोगादिति ग्रहकर्मणी भिद्येते। आह। इह तर्हि, बार्हस्पत्यं गृह्णातीति देवताविधानार्थं स्यात्। उच्यते। ग्रहे विधीयमाने श्रुतिरनुगृहीता। देवतायां वाक्यम्। श्रुतिश्च वाक्याद्बलीयसी।

आह। आग्नेयवत्। यथा, अग्निष्टुति—आग्नेया ग्रहा भवन्तीति देवताविधानं भवति, एवमेकवचनान्तेनापि। तस्याविवक्षितत्वात्। यथा, ग्रहं संमार्ष्टीति सर्वग्रहाणां संमार्गोऽभिधीयते। एवमिहापि सर्वग्रहाणां देवता विधीयते। अत्रोच्यते। उक्तमेतच्छ्रुतेर्बलीयस्त्वादिति। आग्नेया ग्रहा भवन्तीति तु वाक्यमविरुद्धं श्रुत्या। न हि तत्रास्ति, आग्नेयं ग्रहं गृह्णातीति। आग्नेयसत्ता तत्र वाक्येन श्रुत्यवि-

---

सामर्थ्यात्। संनिहितान्येव तेन सर्वाणि, युगपद्गृह्णातिप्रयोगवचनः। संनिधानाद्यविशेषात्।

ननु बृहस्पतिर्देवता चोदकप्राप्तेषु ग्रहेषु विधीयते। उच्यते। न संभवति देवताविधानम्। कथम्। यद्देवताविधानं तस्योपसर्जनार्थो विधीयते। यथा दण्डीति पुरुषोपसर्जनीभूतो दण्ड एव विधीयते, पुरुषस्य प्राप्तत्वात्। एवमिहापि। कथं द्रव्यदेवतासंबन्धे चोदकप्राप्तमनूद्य बृहस्पतिर्देवता विधीयते।

उच्यते। उपसर्जनार्थो न चोदकप्राप्ते ग्रहे शक्यते विधातुम्। असामर्थ्यात्। कथमसामर्थ्यम्। यदाऽस्य देवतासंबन्धः, तदाऽस्यशब्दो देवताविशेषणत्वेनोच्चार्येत। तदा परार्थमुच्चारणं, न स्वार्थम्। यदा बृहस्पतिरस्येति, तदा स्वार्थमुच्चारणं, न परार्थम्। सकृदुच्चारणेन स्वार्थवत्परार्थवच्चोच्चारणं विरुध्यते। यदा तु न देवताविशेषणत्वेनोच्चार्यते, तदाऽस्यशब्दः प्रधानभूतः, देवताप्रातिपदिकं तदर्थम्। तस्माद्द्वाभ्यां विशेषणाभ्यां विशिष्टस्तद्धितार्थो विधीयते, नोपसर्जनम्। तस्मात् 'बार्हस्पत्यं गृह्णाति' इति श्रुत्यैव विधानमित्यनेनैवाभिप्रायेणोच्यते।

न चैतत् 'व्रीहीन्प्रोक्षति' इत्यनेन तुल्यम्। तत्र प्रकरणान्तरेण व्रीहयो यागसाधनत्वेनावगताः। तेषां स्वरूपमपि विद्यते। लक्षणयाऽपूर्वसाधनत्वमपि। तत्र द्विती-

---

१ (अ० २ पा० २ अ० ८ सू० २२)। २ तानि—पा०। ३ संनिधानादिविशेषात्—पा०। ४ न विधीयत इति पाठ आदर्शक इति भाति। ५ चोदकप्राप्ते ग्रहेषु शक्यते—पा०।

शब्देन चोद्यमाना युक्तैवेति । तस्मात्प्राकृतेभ्यो व्यतिरिक्तो बार्हस्पत्यः समुच्चीयते । यथा प्रकृतौ, अंशुं गृह्णाति, अदाभ्यं गृह्णातीत्यप्राकरणिको प्राकरणिकैः समुच्चीयेते, एवमिहापि वैकृताः समुच्चीयेरन्निति ॥ ३ ॥

अधिकैश्चैकवाक्यत्वात् ॥ ४ ॥

इतश्च पश्यामः समुच्चय इति । कुतः । निःसंदिग्धैश्चाधिकैः सुराग्रहैरेकवाक्यत्वं भवति । कथम् । सप्तदशैते ग्रहा गृह्यन्ते, द्वयें प्राजापत्याः सोमग्रहाः सुराग्रहाश्च । अत्र व्यक्तमधिकाः सुराग्रहाः । तेषु, गृह्यन्त इति ग्रहणं चोद्यते, नानूद्यते । सकृदुच्चरितो गृह्यन्त इति शब्दः सोमग्रहैरपि संबध्यते । तस्माच्चोदनान्तरं ग्रहाणाम् । अनेनासंदिग्धेनान्यदप्येवमेवावगम्यते ॥ ४ ॥

या प्रोक्षणस्य गुणभावं ब्रवीति व्रीहिलक्षितापूर्वं प्रति । न त्विहैन्द्रवायवद्रव्यं प्रमाणान्तरेण यागसाधनं निर्ज्ञातं, येन गृह्णातिक्रियाऽपूर्वांशेन संबध्येत, प्रोक्षणक्रियेव । तस्मादैन्द्रवायवं गृह्णातिक्रिया प्रति प्रधानभूतम् । द्वितीयाविभक्तिसामर्थ्यात् ।

न च प्रयाजादिवाक्यतुल्यम् । तत्र द्रव्यदेवतेन क्रिया निर्वर्त्यते । सा तदुपकारिका । इह तु विपरीतम् । न चाऽऽग्नेयतुल्यम् । तत्र 'आग्नेयोऽष्टाकपालो भवति' इति साकाङ्क्षमेतद्वाक्यम् । तच्च यागमन्तरेण निराकाङ्क्षं न भवति । परिपूर्णं वाक्यान्तरेण संबध्यते । प्राक् च यागात्परिपूर्णमेव न भवति । न च यागमन्तरेणान्येन प्रकारेण पूर्यते । तत्र 'आग्नेयोऽष्टाकपालो भवति' इति यागात्तुल्यम् । 'दर्शपूर्णमासाभ्याम्' इत्यनेन प्रकृता एव फले विधीयन्त आग्नेयादयः । न चेह तथा । ऐन्द्रवायवादीनां यागविधानाभावात् । अन्यथानुपपत्त्या यागकल्पना । परिपूर्णं वाक्यम् 'ऐन्द्रवायवं गृह्णाति' इत्यनेन । न त्वाग्नेयादिवाक्यं परिपूर्णम् । तत्र साकाङ्क्षत्वाद्यागकल्पना । इह तु परिपूर्णेऽन्यथानुपपत्तिर्यथा 'सोमेन यजेत' इति विद्यते यागः । स च यागो देवतामात्मसिद्ध्यर्थमपेक्षते । ऐन्द्रवायवादीन्यपि यागमपेक्षन्ते । तयोर्द्वयोः साकाङ्क्षयोरेकाङ्गविकल्पयोः संबन्धो भवति । तस्मान्न प्रकरणेनैन्द्रवायवादीनां संबन्धः । न चैतैर्दैवतावाक्यैः पूर्वमसंबध्यमानः फलेन संबध्यते । अपि च 'ऐन्द्रवायवं गृह्णाति' इत्येतदपरिपूर्णं वाक्यं सोमयागिना सह शीघ्रं संबध्यते प्रकरणेन ॥ ३ ॥ [४ ॥

---

१ यागसाधने निर्ज्ञाते वा न गृह्णाति । क्रियापूर्वांशेन संबध्येत । प्रोक्षणं क्रियेत । तस्माद्— पा० । २ यागकल्पना—इति पाठ आवश्यक इति भाति । ३ परिपूर्णस्यार्थानुपपत्ति—पा० ।

लिङ्गदर्शनाच्च ॥ ५ ॥

लिङ्गमप्येतमर्थं दर्शयति । किम् । विरण्वी वा एष यज्ञक्रतुर्यद्वाजपेयः । अतीव ह्यग्निष्टोमं क्रामत्युक्थ्यमतिषोडशिनं नातिरात्रमाप्नोतीति । विरण्वशब्दो विस्तीर्णे भवति । यथा, विरण्वान्यरण्यानि, विस्तीर्णानीति गम्यते । यदि समुच्चयः, एवं विस्तीर्णता । बाधायां नोपपद्यते । तस्मादपि समुच्चय इति ॥ ५ ॥

(वाजपेये—उपदिष्टैः प्राजापत्यैः पशुभिरातिदेशिकानां क्रतुपशूनां समुच्चयाधिकरणम् ॥ ३ ॥)

[३] प्राजापत्येषु चाऽऽम्नानात् ॥ ६ ॥ सि०

अस्ति वाजपेयः, वाजपेयेन स्वाराज्यकामो यजेतेति । तत्र प्राजापत्याः पशवः, सप्तदश प्राजापत्यान् पशूनालभत इति । सन्ति तु प्रकृतौ क्रतुपशवः । त इह चोदकेन प्राप्ताः । तत्र संशयः । किं ते प्राजापत्यैः क्रतुपशवो बाध्यन्ते, उत समुच्चीयन्त इति । किं प्राप्तम् । प्रत्यक्षाः प्राजापत्याश्चोदकप्राप्तान् क्रतुपशून् बाधेरन्निति ।

एवं प्राप्ते, ब्रूमः । प्राजापत्येषु च समुच्चयः स्यात् । चशब्दोऽन्वाचयार्थः । आम्नायन्ते हि क्रतुपशवः । ब्रह्मवादिनो वदन्ति, नाग्निष्टोमो नोक्थ्यो न षोडशी नातिरात्र इति । अथ कस्माद्वाजपेयेन सर्वे यज्ञक्रतवोऽवरुध्यन्ते, पशुभिरिति ब्रूयात् । यदाग्नेयं पशुमालभतेऽग्निष्टोमं तेनावरुन्धे, ऐन्द्राग्नेनोक्थ्यम्, ऐन्द्रेण षोडशिनं, सारस्वत्याऽतिरात्रं, मारुत्या बृहत्स्तोत्रम् । एतावन्तो वै यज्ञक्रतवस्तान् पशुभिरेवावरुन्धे, इति समुच्चयं दर्शयति । ननु दर्शनमिदमुपदिश्यते, कोऽत्र न्याय इति । उच्यते । प्रकृतिलिङ्गासंयोगः । ननु पशुशब्दः प्रकृतिलिङ्गम् । नेत्याह । नात्र पशुमनूद्य देवता विधीयते, संख्याश्रवणात् । संख्यादेवताश्रवणात्कर्मान्तरं चेदमुक्तम्, पृथक्त्वनिवेशात्संख्यया कर्मभेदः स्यादिति । अतो प्रदानामिव समुच्चयो भवितुमर्हतीति ॥ ६ ॥

---

१ ॥ ६ ॥

---

१ (अ० २ पा० २ अ० ५ सू० २१)

(सांग्रहणेष्टावुपदिष्टैरामनहोमैरातिदेशिकानां समुच्चयाधिकरणम् ॥ ४ ॥)

[४] आमने लिङ्गदर्शनात् ॥ ७ ॥ सि०

अस्ति सांग्रहणीष्टिः, वैश्वदेवीं सांग्रहणीं निर्वपेद्ग्रामकाम इति । तत्र श्रूयते । आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोतीति । सन्ति तु प्रकृतौ त्रयोऽनुयाजाः । तेऽत्र चोदकेन प्राप्ताः । तत्र संशयः । किमामनहोमैरनुयाजा निवर्तेरन्त उत तैः समुच्चीयन्त इति । किं प्राप्तम् । प्रत्यक्षश्रुतैरामनहोमैरानुमानिका अनुयाजा निवर्त्येरन् । अपि च त्रित्वं प्रकृतिलिङ्गसंयोगो भवति ।

एवं प्राप्ते, ब्रूमः । आमने समुच्चयः स्यात् । कुतः । लिङ्गदर्शनात् । लिङ्गं हीममर्थं दर्शयति । किं लिङ्गम् । यहिरात्मा वै प्रयाजानुयाजा आत्मा देवता, यत्प्रयाजानुयाजानां पुरस्ताद्वोपरिष्टाद्वा जुहुयाद्बहिरात्मानं सजातानामादधीत, अथ यन्मध्यतो जुहोति मध्यत एव सजातानामात्मानं धत्ते, इत्यनुयाजानामनिवृत्तिं दर्शयति । आह ।

ननु त्रित्वं प्रकृतिलिङ्गसंयोगः । नेत्याह । न हि संख्यामात्रमनूद्य शक्यते गुणो विधातुम् । न हि कस्यचित्काचित्संख्या न भवति । तस्मान्न संख्या प्रकृतिलिङ्गसंयोगः । लिङ्गदर्शनं त्विदमपदिष्टं, प्राप्तिस्त्र वक्तव्येति । उच्यते । आहुतीर्जुहोतीति श्रुत्याऽऽहुतिसत्ता, वाक्येन मन्त्रविधानम् । त्रिसंख्या चानुवादत्वेनावकल्पते । संख्यामन्त्रवन्ति तु यागान्तराणि विधीयन्ते । तेषां चोभयप्रमाणावगतत्वात्समुच्चयो न्याय्य इति ॥ ७ ॥

(गवामयनान्तर्गते महाव्रत उपगानान्तरकर्त्रीभिः पत्नीभिरातिदेशिकोपगानकर्तृणामृत्विजामबाधाधिकरणम् ॥ ५ ॥)

[५] उपगेषु शरवत्स्यात्प्रकृतिलिङ्गसंयोगात् ॥ ८ ॥ पू०

महाव्रते श्रूयते, पत्न्य उपगायन्ति, पिच्छोलाभिरुपगायन्ति, काण्डवीणादिभिरुपगायन्ति, आपाटलिकाभिरुपगायन्तीति । अस्ति तु प्रकृतौ ऋत्विज उपगायन्तीति । तदिह चोदकेन प्राप्यते । तत्रायमर्थः

---

७ ॥

सांशयिको भवति । किं पत्नीभि', उपगायन्तीति ऋत्विज उपगायन्तो निवर्त्यन्त उत न निवर्त्यन्त इति । तत्रैतत्तावच्चिन्त्यते । किं गानोपगानमेतदुत वादित्रोपगानमिति । तत्रापि द्वैतं, किं गानस्योपगानं गानोपगानमुत गानमेवोपगानं गानोपगानमिति । किं तावत्प्राप्तम् । प्राकृतं निवर्त्येत इति । तत इदं वर्ण्यते । गानस्योपगानमिति । पत्न्यो गायतां गानमुपचिन्वन्तीति, गानं प्राप्तमेव प्राकृतम् । उपचय उपसर्गार्थो विधीयते । तस्माद्गानस्योपगानमिति ।

अथवा, गानमेवोपगानं, गानशब्दो हि शारीर्यां गीतौ प्रसिद्धः । तस्माद्गानमेतदुपगानम् । गानस्य चोपगानमिति । यदैतयोरन्यतरत्तदा ऋत्विक्कार्ये पत्न्यो वर्तन्ते । अतः प्रकृतिलिङ्गसंयोगात्प्रत्यक्षश्रुतेन चोदकप्राप्तं निवर्त्यते, शरवत् । यथा, शरमयं बर्हिर्भवतीति शराः प्रत्यक्षश्रुताश्चोदकप्राप्तान् दर्भान् निवर्तयन्ति, एवमिहापीति ॥ ८ ॥

आनर्थक्यात्त्वधिकं स्यात् ॥ ९ ॥

तुशब्दः पक्षं व्यावर्तयति, न निवृत्तिरिति । समुच्चयः स्यात् । तत एतदिन्त्यते । वादित्रस्यैतदुपगानम् । अस्ति ह्यत्र वादित्रम् । दिक्षु दुंदुभयो नदन्तीत्येवमादि । तस्योपगानं वादित्रस्योपगानम् । कथम् । प्रत्ययेन हि श्रुत्या धात्वर्थस्य सत्तोच्यते । विप्रकृष्टोपसर्गार्थस्य सत्ता, अर्थविप्रकर्षाद्दुर्बला भवति । तस्मादुपसर्गार्थसत्ताविधानं धात्वर्थसत्ताविधानेन बाध्यते ।

अथवा, वादित्रमिदमुपगानम् । एवं ह्याह । पत्न्य उपगायन्ति, काण्डवीणादिभिरुपगायन्तीति । काण्डवीणादिभिर्वादित्रमुपगानं भवति । भवति च तन्त्रीगाने गानशब्दः । तस्माद्वादित्रमुपगानम् । तत्र यद्येवं वादित्रस्योपगानं, यदि वा वादित्रमुपगानम्, उभयथा प्राकृतादर्थान्तरे प्रवृत्ति । तस्मात्समुच्चयः । कुतः । आनर्थक्यात् । एवं चोदकानर्थक्यं न भविष्यति । चोदकोऽनुग्रहीष्यतीत्यर्थः । तस्मात्समुच्चय इति ॥ ९ ॥

(अञ्जनाभ्यञ्जनादये सत्रे समाम्नातेन गौग्गुलवाभ्यञ्जनादिना प्राकृतनवनीताभ्यञ्जनस्य समुच्चयाधिकरणम् ॥ ६ ॥)

[६] संस्कारे चान्यसंयोगात् ॥ १० ॥ सि०

---

८ ॥ ९ ॥

अस्ति, अञ्जनाभ्यञ्जने नामैकोनपञ्चाशद्रात्रः । तत्रेदं समाम्नायते । गौग्गुलवेन प्रातःसवने समञ्जते, अभि वाऽञ्जते । पैतुदारवेण माध्यंदिने सवने, सौगन्धिकेन तृतीयसवन इति । अस्ति तु प्रकृतौ नवनीतेनाभ्यञ्जनम् । तदिह चोदकेन प्राप्तम् । तत्र संशयः । किं वैकृतेन बाध्यत उत नेति । किं प्राप्तम् । प्रत्यक्षश्रुतत्वाद्वैकृतेषु, अञ्जते, अभि वाऽञ्जते, इति च प्रकृतिलिङ्गसंयोगाद्बाध्यत इति । आह । ननु सुत्याकालमञ्जनमभ्यञ्जनं च सत्रे, दीक्षाकाले नवनीतेनाभ्यञ्जनं प्रकृतौ, अन्यकालत्वात्प्रयोजनान्तरे वर्तेत इति बाधो न स्यात् । उच्यते । प्रयाजवदन्यकालमपि तत्कार्यमेव द्रष्टव्यम् । कालमात्रमन्यत् । पदार्थस्तु स एव । यथा, तिष्ठन्तं पशुं प्रयजन्तीति तिष्ठति पशौ प्रयाजा वर्तमानाः प्राकृतकार्यका एव भवन्ति, एवमिहापि द्रष्टव्यम् ।

एवं प्राप्ते, ब्रूमः । संस्कारे–अञ्जनेऽभ्यञ्जने च प्राकृतेन सह समुच्चयः स्यात् । कुतः । अन्यसंयोगात् । अन्यकालमिदं कार्यान्तरे वर्तते । एवं चोदकोऽनुग्रहीष्यते । तस्मात्समुच्चय इति ॥ १० ॥

प्रयाजवदिति चेत् ॥ ११ ॥

इति यदुक्तं तत्परिहर्तव्यम् ॥ ११ ॥

नार्थान्यत्वात् ॥ १२ ॥

न च प्रयाजवद्भवितुमर्हतीति । कुतः । अर्थान्यत्वात् । स्नेहनार्थमादौ नवनीतं सुखप्रचाराय । प्रदत्ते कार्ये सुत्याकालं गौग्गुलवेनाभ्यञ्जनं विरूक्षीकरणार्थं, प्रत्यक्षं कार्यान्तरं वर्तत इति न प्राकृतं निवर्तयितुमर्हति ॥ १२ ॥

(महाग्ने–तार्प्यादिभिः प्राकृताहतवासस. समुच्चयाधिकरणम् ॥ ७ ॥)

[७] आच्छादने त्वैकार्थ्यात्प्राकृतस्य विकारः स्यात् ॥ १३ ॥ पू०

महाग्ने श्रूयते, तार्प्यं यजमानः परिधत्ते, दर्भमयं पत्नी, इति । अस्ति तु प्रकृतौ, अहतं वासः परिधत्त इति । तदिह चोदकेन प्राप्तम् ।

---

१० ॥ ११ ॥ १२ ॥

---

१ तार्प्ये—गा० ।

तत्र संशयः। किमहतस्य वाससो निवृत्तिः, नेति। किं प्राप्तम्। आच्छादने तु प्राकृतस्य विकारः स्यात्। कुतः। ऐकार्थ्यात्। एको ह्यर्थः प्राकृतस्य वैकृतस्य च। कौपीनमाच्छादयितुं, प्रकृतौ विकृतौ च प्रच्छादनं क्रियते। तस्मात्प्रत्यक्षश्रुतेन चोदकप्राप्तं निवर्तेत ॥ १३॥

आधिकं वाऽन्यार्थत्वात् ॥ १४ ॥ सि०

वाशब्दः पक्षं व्यावर्तयति। अधिकमिदं प्राकृताद्वाससो भवितुमर्हतीति। कुतः। तद्धि निवर्तकं भवति, यदनिवर्त्य न शक्नोति निवेष्टुम्। यस्त्वनिवर्त्यापि शक्नोति भवितुं, न तन्निवर्तयति। तद्धि निवर्तयदप्रतिषेधकं सच्चोदकं प्राप्तं बाधेत। ननु कौपीनप्रच्छादने, परिधत्त इति भवति, नान्यकार्यके। उच्यते। नैतदेवम्। उपरिवाससोऽपि कार्ये परिधत्त इति भवति। तद्यथा, कम्बलं परिधत्ते, रौरवं परिधत्त इति। सर्वतो धत्ते—परिधत्त इत्यवयवप्रसिद्ध्या भवति। तस्मादहतस्य वाससो न निवृत्तिः, समुच्चय इति ॥ १४ ॥

समुच्चयं च दर्शयति ॥ १५ ॥

समुच्चयं च वासःशब्देन बहुवचनान्तेन दर्शयति, वासांसि वाराही चोपानहौ विमुञ्चतीति। कृष्णविषाणया वासांसि विस्रंसयति, ततोऽध्वर्युः परिधत्ते, इति। तस्मादपि पश्यामोऽनिवृत्तिः, समुच्चय इति ॥ १५ ॥

(महाव्रते स्तोत्रान्तरसाधनीभूतैः श्लोकादिसामभिः प्राकृतसाम्नां समुच्चयाधिकरणम् ॥ ८ ॥)

[८] सामस्वर्थान्तरश्रुतेरविकारः प्रतीयेत ॥१६॥ सि०

महाव्रते श्रूयते, श्लोकेन पुरस्तात्सदसः स्तुवते, अनुश्लोकेन पश्चात्सदसः श्लोकेन चात्वालमवेक्षमाण इति। सन्ति तु प्राकृतानि सामानीह चोदकेन प्राप्तानि। तत्र संशयः। किं प्राकृतानां साम्नां निवृत्तिरुतानिवृत्तिः, समुच्चय इति। किं प्राप्तम्। स्तुवत इति प्रकृतिलिङ्गसंयोगे प्रत्यक्षश्रुते चोदकप्राप्तानि सामानि निवर्त्येरन् इति।

१३ ॥ १४ ॥ १५ ॥

१ तद्धिनिवर्तयेत्, यदप्रतिषिद्धं सच्चोदकं प्राप्तं बाधेत—पा०।

यथा कौत्सं भवति, काण्वं भवति, वसिष्ठस्य जनित्रे भवतः, शुद्धाशुद्धीये भवतः, भर्गयशसी भवतः, क्रौञ्चानि भवन्तीति श्रुतेषु चोदकमाप्तानि निवर्त्यन्ते, एवमिहापि द्रष्टव्यम् ।

एवं प्राप्ते ब्रूमः । सामसु श्लोकेन पुरस्तात्स्तुवत इत्येवमादिश्रूयमाणेषु प्राकृतानामविकारः प्रतीयेत । कुतः । अर्थान्तरश्रुतेः । अर्थान्तरेण हि संबन्धः श्रूयते, पुरस्तात्सदसः स्तुवत इत्येवमादि । यच्च पदं केनचित्पदेन संबध्यते विशेषणत्वेन, न तत्पदान्तरेण सह संबन्धमर्हति सकृदुच्चरितम् । यथा, भार्या राज्ञः, पुरुषो देवदत्तस्येति भार्याविशेषणत्वेनोच्चार्यमाणो राज्ञ इति शब्दो न पुनः पुरुषशब्देन संबध्यत इति । एवं, पुरस्तात्सदसः स्तुवत इत्यनेन संबध्यमानो न पुनः श्लोकेन स्तुवत इति संबन्धमर्हति ।

यदि स्तुतौ देशसत्ता विधीयते, श्लोकेन चेत्यनूद्येत तत उपपद्येतैकं वाक्यमिति । यदा तु पुनर्देशसत्ता विहिता तदा परिपूर्णं वाक्यम् । श्लोकेन चेत्येतदपि विधातव्यं, तदा पुनर्विधिप्रत्ययो हृदयमानेतव्यः । हृदयमानेतुमुच्चारयितव्यः । न चोच्चारितः । तस्मादनुच्चारितो वा कल्पयितव्यः । उच्चारणं वा कल्पयितव्यम् । कल्पनायां च शब्दो बाध्येत । तस्मान्नैवम् । कथं तर्हि । देशसामविशिष्टा स्तुतिः श्रुत्या विधीयते । न चैकेन केनचित्संबन्धे विहिते, परिपूर्णे वाक्ये पुनरपरं वाक्यं कल्पयितव्यं भवति । उभयविशेषणविशिष्टा हि स्तुतिः श्रुत्या यदा विहिता तदा परिपूर्णं वाक्यम् । न तदा पुनरपरेण केनचित्संबन्धः कल्पयितव्यो भवति, यदर्थं किंचिद्द्विरुच्चार्येत । तस्मात्स्तुत्यन्तरमिदं विधीयते, न प्राकृतं निवर्त्यते, समुच्चय इति ॥ १६ ॥

अर्थे त्वश्रूयमाणे शेषत्वात्प्राकृतस्य विकारः स्यात् ॥ १७ ॥

अथ यदुपवर्णितं, यथा कौत्सं भवति, काण्वं भवति, वशिष्ठस्य जनित्रे भवत इत्येवमादिभिरिव प्राकृतानां निवृत्तिरिति । तत्परिहर्तव्यम् । अत्रोच्यते । युक्तमत्र यत्प्राकृतं निवर्त्यते । अत्र ह्यर्थान्तरं न श्रूयते,

१६ ॥

१ इत्येवमादिषु-पा० ।

प्राकृतस्यैव शेषः श्रूयते । तस्मात्तत्र वैकृतेन प्रत्यक्षश्रुतेन प्राकृतस्य निवृत्तिरिति । इह स्वर्थान्तरश्रवणाद्वाक्यभेदप्रसङ्गादनिवृत्तिरित्युक्तम् ॥ १७ ॥

(अथवा—विकृतिविशेषे केवलं श्रूयमाणैः कौत्सादिसामभिः प्राकृतसाम्नां बाधाधिकरणम् ॥ ८ ॥)

एवं वा—

[८] अर्थे त्वश्रूयमाणे शेषत्वात्प्राकृतस्य विकारः स्यात् ॥ १७ ॥ सि०

कचिच्छ्रूयते, कौत्सं भवति, काण्वं भवति, वशिष्ठस्य जनित्रे भवतः, शुद्धाशुद्धीये भवतः, भर्गयशसी भवतः, क्रौश्चानि भवन्तीति । सन्ति तु प्रकृतौ सामानि । तत्र चोदकेन प्राप्तानि । किं तानि निवर्त्यन्ते, नेत्येषोऽर्थः संदिह्यते। किं प्राप्तम्। अनिवृत्तिः। समुच्चय इति। कुतः। साममात्रं विधीयते । न, स्तुवत इति प्रकृतिलिङ्गसंयोगोऽस्ति । तस्माद्धिकमिति ।

एवं प्राप्ते, ब्रूमः । अर्थे त्वश्रूयमाणे शेषत्वात्प्राकृतस्य विकारः स्यात् । तुशब्दः पक्षं व्यावर्तयति, अश्रूयमाणेऽप्यर्थे प्राकृतस्य विकारः स्यात् । शेषभूतं हि प्रकृतौ साम । इदमपि साम श्रूयते । तत्सामत्वेन सामान्येन साम्नः कार्ये भवितुमर्हति। तद्यथा, दधि घृतं शाकं शालयः, देवदत्तो भोजयितव्यः, देवदत्तवद्यज्ञदत्तस्तैलेनेति, यद्यपि तैलेन स्नेहयितव्य इति न श्रूयते, तथाऽपि स्नेहन एव तैलं भवति । तत्समर्थत्वात् । एवं यद्यपि साम्ना ऋक् संस्कर्तव्येति न श्रूयते, एवमपि तत्समर्थत्वात्साम ऋक्संस्कार एव भवितुमर्हति ॥ १७ ॥

(विकृतिविशेषे श्रूयमाणैः कौत्सादिसामभिस्तत्समसंख्यप्राकृतसामनबाधाधिकरणम् ॥ ९ ॥)

[९] सर्वेषामविशेषात् ॥ १८ ॥ पू०

कचिच्छ्रूयते—कौत्सं भवति, काण्वं भवति, वशिष्ठस्य जनित्रे भवतः, शुद्धाशुद्धीये भवतः, भर्गयशसी भवतः, क्रौश्चानि भवन्तीति ।

---

१७ ॥

सन्ति तु प्राकृतानि सामानि । तत्र चोदकेन प्राप्तानि । तानि प्राकृतानां निवर्तकानीत्येतत्समधिगतम् । अथैषोऽर्थः संदिह्यते । किं सर्वाणि सर्वेषां निवर्तकानि, अथ किमेकमेकस्य, द्वे द्वयोः, बहूनि बहूनामिति । किं तावत्प्राप्तम् । सर्वाणि सर्वेषामिति । कुतः । विशेषाभावात् । न हि विशेषः कश्चिदस्ति, येनावगम्यत इदमस्य निवर्तकं, नान्यस्येति । तस्मात्सर्वं सर्वस्य निवर्तकमिति ॥ १८ ॥

एकस्य वा श्रुतिसामर्थ्यात्प्रकृतेश्चाविकारात् ॥ १९ ॥ सि०

न चैतदस्ति, सर्वाणि सर्वेषां निवर्तकानीति । एकमेकस्य, द्वे द्वयोः, बहूनि बहूनामिति । कुतः । श्रुतिसामर्थ्यात् । कौत्सं भवति, काण्वं भवतीत्येकैकस्य निवृत्तिं कृत्वा श्रुतिः समर्था—अर्थवतीति । एवं, वाशिष्ठस्य जनित्रे भवतः, शुद्धाशुद्धीये भवतः, भर्गयशसी भवत इति द्वयोर्निवृत्तौ कृतायां श्रुतिसामर्थ्यमनुगृहीतं भवति । तथा, क्रौञ्चानि भवन्तीति त्रिभिस्त्रीणि[1] निवर्त्य कृतसामर्थ्या श्रुतिर्भवति । यद्येकस्मिन् श्रुत एकमेव निवर्त्यते, ततो यावत्येवासावङ्गीकृता प्राकृती सामसंख्या तावत्येव भवति । एवं सर्वत्र । किमेवं भविष्यति । प्रकृतेरविकारः, प्राकृतानामवशिष्टानां साम्नां ग्रहणं भविष्यति । तत्र चोदकोऽनुग्रहीष्यते । तस्मादेकमेकस्य निवर्तकं, द्वे द्वयोः, बहूनि बहूनामिति ॥ १९ ॥

(विवृद्धस्तोमकक्रतूपदिष्टैः सामभिः प्राकृतसाम्नामबाधस्य—अविवृद्धस्तोमकक्रतूपदिष्टैः सामभिः प्राकृतसाम्नां बाधस्य च निरूपणाधिकरणम् ॥ १० ॥)

[१०] स्तोमविवृद्धौ त्वधिकं स्यादविवृद्धौ द्रव्यविकारः स्यादितरस्याश्रुतित्वाच्च ॥ २० ॥ सि०

सन्ति विवृद्धस्तोमका अविवृद्धस्तोमकाश्च क्रतवः । एकविंशेनातिरात्रेण प्रजाकामं याजयेत्, त्रिणवेनौजस्कामं, त्रयस्त्रिंशेन प्रतिष्ठाका-

१८ ॥ १९ ॥

१ त्रीणि त्रिभिर्निवर्त्य—पा० ।

मामिति । तथा, द्वात्रिंशः पवमाना अभिषेचनीयस्य । तत्र, नव राजसामानि, एकादश राजसामानि, यज्ञोघश्रवसे वशिष्ठस्य जनिजनित्रे च सार्कं प्रवेदनान्याहुः । शुद्धाशुद्धीये च संश्रवोपपदे चोभे । तथा, रथहविर्धाने पुनःस्तोमस्य यज्ञस्य । तथा, अपचितिवरयः पुनस्तोमस्य यज्ञस्य ।

पुनःस्तोमस्य सवनं मध्यमं द्वादशं स्मृतम् ।
कार्यौ नवदशस्तोमावभितः सवने उभे ॥ इति ।

यदत्र क्वचित्प्राकृती स्तोत्रसंख्या विवृद्धा, क्वचिद्धीना । तत्र संदेहः । किं विकृतौ विवृद्धौ हानौ च प्राकृतानां साम्नां निवृत्तिः, उत हानौ निवृत्तिः, विवृद्धावनिवृत्तिरिति । किं प्राप्तम् । उभयत्र निवृत्तिः । प्रत्यक्षश्रुतेन हि चोदकप्राप्तं निवर्त्यते । साम्नां चोत्पत्तिरर्थवती भविष्यति, अपूर्वेषु क्रियमाणेष्विति ।

एवं प्राप्ते, ब्रूमः । स्तोमविवृद्धौ—अनिवृत्तिराधिक्यं स्यात् । कुतः । आगमेन हि साम्नां संख्यापूरणं वक्ष्यते । आगमेन वाऽभ्यासस्याश्रुतित्वादिति । एवं चोदकानुग्रहो भविष्यति । अविवृद्धौ तु प्राकृतं निवर्त्येत। यावता निवृत्तेन सा संख्या पूर्यते, तावत्प्राकृतं बाधितव्यम्। अन्यत्प्राकृतमेव स्यात् । कुतः । इतरस्याश्रुतित्वात् । इतरच्च श्रूयते, आगमः कर्तव्य इति । संख्यामात्रं श्रूयते । तस्माद्विवृद्धस्तोमकेष्वनिवृत्तिः । हीनस्तोमकेषु यावदर्थं निवर्तयितव्यम् । अथ यदुक्तं, साम्नामुत्पत्तिरर्थवती भविष्यतीति । उच्यते । बाध्यतामार्षं चोदकेन । गुणमात्रमार्षं, विशिष्टगुणश्चोदक इति ॥ २० ॥

(विवृद्धाविवृद्धस्तोमकक्रतुषु माध्यंदिनामेवपवमानस्तोत्रयोरेव साम्नामावापोद्वापाधिकरणम् ॥ ११ ॥)

[११] पवमाने स्यातां तस्मिन्नावापोद्वापदर्शनात् ॥ २१ ॥ सि०

इह विवृद्धस्तोमका अविवृद्धस्तोमकाश्च क्रतव उदाहरणम् । त एव

---

२० ॥

---

१ (अ० १० पा० ५ अ० ६ सू० १६) । २ आर्षंचोदकेन—पा० ।

ये-पूर्वस्मिन्नधिकरण उदाहृताः। तत्रैपोऽर्थः समधिगतः। विवृद्धस्तोमकेष्वनिवृत्तिरविवृद्धस्तोमकेषु निवृत्तिरिति। अथेदानीमिदं संदिह्यते। किं यस्मिन् कस्मिंश्चिदावापो यतः कुतश्चिदुद्वाप उत पवमानेष्वेवाऽऽवापोद्वापाविति। किं प्राप्तम्। अविशेषादनियम इति।

एवं प्राप्ते, ब्रूमः। पवमाने, आवापोद्वापौ स्यातामिति। कुतः। अस्मिन्नेव हि तौ दृश्येते, त्रीणि ह वै यज्ञस्योदराणि, गायत्री बृहत्यनुष्टुप्। अत्र ह्येनाऽऽवपन्ति, अत एवोद्वपन्तीति॥ २१॥

ननु दर्शनमिदं, प्राप्तिरुच्यताम्। उच्यते—

वचनानि त्वपूर्वत्वात्॥ २२॥

असति न्याये वचनान्येवैतानि कल्प्यन्ते। तस्मात्पवमान एवाऽऽवापोद्वापस्थानमिति॥ २२॥

(त्यागादौ विधिगतस्यैव देवताशब्दस्योच्चारणनियमाधिकरणम्॥१२॥)

[१२] विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदना॥ २३॥ सि०

स्तो दर्शपूर्णमासौ, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, इति। तत्रेदमाम्नायते। यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीति। सन्ति चाग्नेरभिधानानि, अग्निः शुचिः पावकः, धूमकेतुः कृशानुर्वैश्वानरः शाण्डिल्य इत्येवमादीनि। तत्र संदेहः। याविषु निगमेषु किं येन केनचिदग्नेः शब्देनाभिधानं कर्तव्यमुत विधिशब्देनाग्निशब्दे-

---

[२१॥ २२॥]

अस्याधिकरणस्य बाधसंबन्धो वक्तव्यः। पूर्वपक्षे न किंचिद्बाध्यते। सिद्धान्ते पर्यायशब्दो बाध्यते। इन्द्रादीनां यद्यर्थो विद्यते लोकव्यवहारे, यथा गवादीनां, ततः पर्यायशब्दानामवकाशो भवेत्। न त्वर्थो विद्यते। इन्द्रादीनामप्रत्यक्षत्वात्।

उच्यते। इन्द्रशब्द उच्चरिते किमपि प्रतीयते सामान्येन। तत्रोपपदाद्व्यवहारास्मरणाच्चेन्द्रादीनामर्थो विद्यते। यथा, प्राची दिगिति न प्रत्यक्षेण प्रतीयते, नानुमानेन। शब्दादेव प्रतीयते। इन्द्रशब्देन च यदुच्यते, शक्रशब्देन च तदेवोच्यत इति लोकस्मरणम्। अनादि च स्मरणं न शक्यं पर्यनुयोक्तुम्। यथा प्रत्यक्षेण रूपमवबुध्यमानं न शक्यते पर्यनुयोक्तुं, किमर्थमवबुध्यत इति। एवमिहापीत्यु-

नेति । किं प्राप्तम् । येन केनचिदिति । कुतः । अग्न्यर्थनिर्देशात् । अग्न्यर्थेन पुरोडाशः संबद्धव्यः । अग्न्यर्था देवता कर्तव्या । त्यागकाल उद्देष्टव्या । सा येन शब्देन शक्यत उद्देष्टुं, तेनोद्देशनीया । सैषा शब्दानामन्यतमेन शक्योद्देष्टुम् । तस्माद्येन केनचिद्वाचिषु निगमेषूद्देशः कर्तव्य इति ।

नयोरर्थ एव देवता । तस्य च वाचकः शब्दः । स हविषा संबध्यमानोऽर्थस्य देवतात्वं प्रतिपादयति, नान्यथा ।

पूर्वपक्षस्तु—शब्दोऽर्थं प्रत्यत्यन्तगुणभूतः । अर्थ एव कार्ययोगी, प्रधानत्वात् । अग्निशब्दो न स्वयं कार्येण द्रव्येण सह संबध्यते । किं तर्हि । अर्थेन संबध्यते । अर्थपरत्वाच्च निर्देशस्य पर्यायशब्दानामनिवृत्तिः । न चाग्निशब्दपदार्थक एव द्रव्येण संबध्यते (लिङ्गबलात्तद्धित एव वर्तते । वाक्येन पुरोडाशेन । न चेतिकरणेन निष्कृष्य निर्दिश्यते । येन लिङ्गं बाध्यते । यदि निष्कृष्य पुरोडाशेन संबध्यते) तथा सति तद्धितानुत्पत्तिः । अपि च वाक्यार्थे पदानिर्वचनम् । वाक्यार्थश्च पदार्थपूर्वको भवति । यदि शब्द एव देवता भवेत्तथा सति देवतापदमर्थशून्यं स्यात् । अर्थशून्ये च तस्मिन्, अग्निशब्देन योऽर्थ उच्यते, स एव केवलः स्यात् । तत्र साकाङ्क्षत्वादनिराकाङ्क्षीकृतत्वाच्च वाक्यमेव न स्यात् ।

नन्वेवमपि पर्यायशब्दानामप्रसङ्ग एव । कथम् । अग्निशब्दः स्वमर्थं पुरोडाशं प्रति देवतात्वेन प्रतिपादयति । तत्तु देवतात्वं, यदि वाचिका श्रुतिमुद्दिश्य परित्यजति द्रव्यं, ततः संपादितं भवति, नान्येन प्रकारेण । अस्यां चावस्थायामग्निशब्द एव मनसि विपरिवर्तते, नान्यः । तस्माद्विपरिवर्तमानः स एव ग्रहीतव्यो नान्ये । स च शब्दः । तस्मात्स एवोच्चारयितव्यो वाचकश्रुतिवेलायाम् ।

अत्रोच्यते । अग्निशब्दः स्वमर्थं पुरोडाशस्य देवतात्वेन प्रतिपाद्य कृतार्थः । उच्चारणवेलाया शब्देन प्रयोजनम् । नान्यथा यागो भवतीति । एतस्यामवस्थायामग्निशब्दो न विद्यते । येन केनचिच्छब्देनोच्चारणं कर्तव्यम् । अग्निशब्दस्य व्यवहितत्वात् । तस्मादग्निशब्दो न शक्यो नियन्तुमिति ।

चिह्नितभागान्तर्गतः पाठः क पुस्तके नास्ति । २ नान्य—पा० । ३ शब्द—पा० । ४ न विद्यत इति—विधिवाक्यस्थाग्निशब्दस्य यागानुष्ठानात्प्रागेवार्थसमर्पकत्वेन चरितार्थस्य न पुनरनुष्ठानकाले व्यापारः संभवतीति विपरिवर्तमानतयाऽग्निशब्दो न विद्यत इत्यर्थः ।

एवं प्राप्ते, ब्रूमः । विधिशब्देनैव—अग्निशब्देनोद्देष्टव्या, नान्येन सूक्तादिनेति । कुतः । तेन चोदना । तेन—विधिशब्देनास्य हविषः संबन्धचोदना भवति । कथमिव । आग्नेयः कर्तव्य इत्यग्निरस्य देवता कर्तव्येत्यर्थः ।

का पुनरियं देवता नाम । एकं तावन्मतं, या एता इतिहासपुराणेष्वग्न्याद्याः संकीर्त्यन्ते नाकसदः, ता देवता इति । उच्यते । तासु देवतासु, अहरादीनां शार्दूलादीना वा न संग्रहः । स्मर्यते च कालवाचिनां देवतात्वं, कालेभ्यो भवति, मासो देवता, संवत्सरो देवता, इति ।

अपरं मतं, येषु देवताशब्दो मन्त्रब्राह्मणे श्रूयते, अग्निर्देवता, वातो देवता, सूर्यो देवता, चन्द्रमा देवता, इत्येवमादिषु, तेऽत्र देवताशब्देनोच्यन्त इति । तत्राप्यहरादीनामनुपसंग्रह एव । किंच सामान्यवचनस्य शब्दस्य लौकिके व्यवहारेऽभावादर्थस्याप्रसिद्धिः स्यात् । तस्मात्सूक्तभाजो हविर्भाजश्च देवताः । काः सूक्तभाजः । इमं स्तोममर्हते जातवेदसे रथमिव संमहेमा मनीषया । भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव, इति[1] । हविर्भाजा, आग्नेयमष्टाकपालं निर्वपेत्, अग्नीषोमीयमेकादशकपालमिति ।

आह । यदि हविर्भाजो देवताः, कपालानामपि देवतात्वं प्राप्नोति । तान्यपि हविर्भाञ्जि । एवं तर्हि सा हविर्भाग् देवता, यां प्रति तादर्थ्यं हविषः । सूक्तस्याप्येवमेव । अत्र हि देवताशब्दः स्मर्यते । अग्निदेवत्यं सूक्तम्, अग्निदेवत्यं हविरिति । तथा, अतिथिदेवत्यं, पितृदेवत्यमिति । एवं मूर्तानाममूर्तानां चेतनानामचेतनानां श्रुत्या कंचिदर्थं प्रति तादर्थ्येन संकल्पनीयानां देवतात्वं भविष्यति । सामान्यवचनं चोपपत्स्यते । क्रियतो यथैवम् । यस्या वाचकं शब्दमुद्दिश्य स्मृत्वा वा हविस्त्यक्ष्यामीति संकल्पः क्रियते, सा देवता भवति तत्र ।

नन्वेवं सति सुतरां येन केनचिदग्नेः शब्देन निर्देशः करणीयः । अत्रोच्यते । भवेदेतदेवं, यद्यग्निशब्दोऽर्थप्रत्यायनार्थमुच्चार्येत । अर्थोऽपि हविःसंबन्धार्थं प्रत्याय्येत । न त्वत्राग्निशब्दोऽर्थप्रत्यायनार्थमुच्चा-

[1] ऋ० सं० (अष्ट० १ अ० ६ व० ३०) ।

र्थते । यत्र ह्यर्थे कार्यमासाद्यते, तत्र शब्दोऽर्थप्रत्यायनार्थो भवति, यत्रार्थेन प्रयोजनम् । यत्र पुनः शब्द एव कार्यं, तत्र कार्यसंबन्धार्थः शब्द एव प्रत्याययितव्यः । देवतायाश्च यज्ञसाधनभावो न रूपेण भवति । केन तर्हि । संबन्धिना शब्देन । यथा, अध्वर्युर्हस्ताभ्यामुपकरोति, एवं देवता शब्देनोपकरोति । यथा, होतुः पाणी द्विर्लेपेनोपस्तृणातीति पाणिसंबन्धेऽपि होतैवोपकरोति, एवं संबन्धिना शब्देनोपकुर्वती देवतोपकारिणी गम्यते । देवतायामप्युपकारिण्यां चोदितायां शब्दस्यैव यज्ञे समवायः । तस्मान्न शब्दोऽर्थप्रत्यायनार्थमुच्चारितः । स चार्थः पुनः शब्दं प्रत्याययेदिति लक्षितलक्षणा हि तथा स्यात् । किं तर्हि । शब्द एव हविषा संबध्यते । तत्संबन्धादर्थोऽपि देवता भविष्यति । यस्य हि शब्दो हविषा तादर्थ्येन संबध्यते, सा देवता । शब्दे कार्यस्यासंभवादर्थे कार्यं विज्ञायते । इह तु शब्द एव कार्यं संभवति । तस्मान्नार्थप्रत्यायनार्थः शब्द इति ।

यदुक्तं हविकारेण । न वा शब्दपूर्वको ह्यर्थसंप्रत्ययस्तस्मादर्थनिष्पत्तिरिति । एवं चेदग्निशब्देन हविषः संबन्धः । नास्ति प्रसङ्गः शुच्यादीनां शब्दानामिति । तस्मान्मन्त्रत्वे विधिशब्द उपादातव्य इति । उच्यते । नन्वेवं शब्द एव देवता प्राप्नोति । अत्रोच्यते । नैतदस्माभिः परिहर्तव्यम् । न हीदमुच्यमानमस्मत्पक्षं बाधते । सुतरां शुच्यादीनामप्रसङ्ग इति ॥ २३ ॥

सिद्धान्तरहस्यम्—अग्निशब्द एवाष्टाकपालेन संबध्यमानोऽर्थोपस्य देवतात्वं प्रतिपादयति । यथा 'वैश्वदेवीमनुब्रूयात्' इति ऋगुच्यमाना ऋगर्थं प्रतिपादयति । न च विवक्षित ऋगर्थः कार्ययोगेन । एवमिहाप्यग्न्यर्थो न कार्ययोगेन विवक्षितः । कापि च योऽर्थमष्टाकपालेन संबन्धयितुमिच्छति, तस्यापि वाचिका श्रुतिरुच्चारयितव्या । तद्द्वारेण देवता क्रियया संबध्यते । तत्र प्रथममर्थस्य देवतात्वम् । पश्चाच्च शब्दोच्चारणं विधीयत इति श्रुत्यर्थाभ्यामर्थद्वयं बोध्यते । यस्य पुनरग्निश्रुतिरेवाष्टाकपालेन संबध्यते, तदुच्चारणमेव विधीयते, अग्नय इत्युपार्थाष्टाकपालं स्यादिति, तदर्थाभ्यर्थो देवतेत्यनुवाद एव । यथा 'पूर्णिमामविगृह्णान्' इति यागोऽवगम्यते ॥ २३ ॥

१ एवं तर्हि—पा० । २ तस्मादनर्थे—पा० । ३ एव—पा० ।

शेषाणां चोदनैकत्वात्तस्मात्सर्वत्र श्रूयते ॥ २४ ॥

इतश्च विधिशब्देन वाचिषु वचनं कर्तव्यम् । कुतः । शेषाणां मन्त्राणामेकः शब्दः । य एवासौ विधिशब्दः, स एव सर्वत्र श्रूयते, अयाड्कारे–उज्जित्यां–स्वाहाकारे च । अयाळग्निरग्नेः प्रिया धामान्ययाट्, सोमस्य प्रिया धामान्ययाळग्निः प्रिया धामानि, इत्ययाड्कारे । अग्नेरुज्जितिमनूज्जेषं, सोमस्योज्जितिमनूज्जेषमित्युज्जित्याम् । स्वाहाऽग्निं स्वाहा सोममित्येवमादि स्वाहाकारे । एवं च नित्यवच्छ्रूयमाणा अपासिका भविष्यन्ति, यथाऽस्माभिर्न्यायोऽपदिष्टः । तस्माद्विधिशब्दस्य मन्त्रत्वे भावः स्यादिति ॥ २४ ॥

(सौर्यादिविकृतावध्यावाहनादिमन्त्रेषु विधिगतशब्देनैव देवताप्रकाशनाधिकरणम् ॥ १३ ॥)

[१३] तथोत्तरस्यां ततौ तत्प्रकृतित्वात् ॥ २५ ॥ सि०

अस्ति चरुः, सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति । सन्ति सूर्यस्याभिधानानि । सूर्य आदित्यो भास्करः सविता दिवाकर इति । तत्र किं वाचिषु निगमेषु येन केनचिच्छब्देनाभिधानं कर्तव्यमुत विधिशब्देन सूर्यशब्देनेति । किं प्राप्तम् । अग्निशब्दसंयुक्तास्ते प्रकृतौ निगमा इह चोदकेन प्राप्ताः, न सूर्यशब्देनेति । सूर्यशब्दो हि चरौ, नोज्जित्यादिषु । ते यथार्थं विपरिणमयितव्याः । सूर्यार्थश्च तेषु संकीर्तयितव्यः । स च येन केनचित्सूर्यवाचिना शब्देन संकीर्त्यते । तस्मादनियमः । ये च प्रकृतावग्निशब्दसंयुक्ता निगमास्त इहोदाहरणं, नासंयुक्ताः ।

एवं प्राप्ते, ब्रूमः । तथोत्तरस्यां ततौ तत्प्रकृतित्वादिति । यथा प्रकृतौ, तथोत्तरस्यां ततौ विकृतौ कर्तव्याः । तत्प्रकृतित्वाच्चैषां, चोद-

[२५ ॥]

ननु नेदमधिकरणमारब्धव्यम् । य एव शब्दश्चोदितः स एवान्यत्राप्युपार्थः । नत्र शब्दो नाऽऽपद्यते उत्पन्ने । यत्र शब्दो विधीने तत्रैव पर्यायशब्दानामनवकाशः । तथार्थः प्रत्यायितव्यः । स च येन केनचित्प्रत्याय्यत इति पूर्वः पक्षः । सिद्धान्तस्तु—सूर्यशब्दो यागानुमितप्रयोगभावनया संबध्यते । अन्यः शब्दो

१ धामान्ययाळग्निरस्त—ग० । २ चोदकेन—ग० ।

कानुग्रहाय। प्रकृतौ च त्रिविधशब्दाभिप्रायोऽग्निशब्दः प्रयुक्तो नाग्न्यभिधानपरः। इहापि तत्प्रकृतित्वाद्द्विविधशब्दाभिप्रायेणैव निगमाः प्रयोक्तव्याः। न चायं चरुणा सूर्यशब्दस्य संबन्धः। किं तर्हि। प्रयोगेण। सौर्यं निर्वर्तयेदिति प्रयोगेण संबन्धो न सौर्यश्चरुरिति। कारकविभक्तिर्हि द्वितीया। साऽऽख्यातेन संबध्यते। तस्मात्तत्रापि सूर्यशब्देन संयुक्ताः कर्तव्या इति ॥ २५ ॥

(विकृतौ देवतानिष्ठगुणवाचिपदस्यापि त्यागादौ प्रयोगाधिकरणम् ॥ १४ ॥)

[१४] प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यात् ॥ २६ ॥ सि०

अस्त्याधानं, य एवं विद्वानग्निमाधत्त इति। तत्र पवमानहवींषि श्रूयन्ते। अग्नये पवमानायाष्टाकपालं निर्वपेत्, अग्नये पावकाय, अग्नये शुचय इति। तत्र संशयः क्रियते। किं सगुणमग्नेरभिधानं कर्तव्यमुत निर्गुणमिति। किं प्राप्तम्। प्राकृतस्य निर्गुणस्य सगुणेनाभिधानं कर्तव्यमिति ॥ २६ ॥

अविकारो वाऽर्थशब्दानपायात्स्याद्द्रव्यवत् ॥ २७ ॥ पू०

अविकारो वा स्यात्, निर्गुणमभिधानम्। कुतः। अर्थशब्दानपायात्। एवं शब्दोऽर्थश्चानपेतो भवति। य एवासावग्निः, स एव पवमानः, पावकः, शुचिश्च। या देवता निर्देष्टव्या, सा निर्दिष्टैव भवति, असत्यपि गुणवचने। द्रव्यवत्। यथा, सा वा एषा सर्वदेवत्या यदजा वशा, वायव्यामालभेत भूतिकाम इति। अजावशाशब्देन चोदिते कर्मणि छागशब्देन वाचिनो निगमा भवन्ति। अर्थः शब्दोऽन-

---

पद्युदार्येन तथा सति शब्दः प्रयोगेऽश्रुत एवोच्चार्येण। एवं प्रकृतावपि ॥ २६ ॥ [२६ ॥

---

१ छाग—प०। छागशब्दवति पाठे तु पशुप्रकरणे ' छागस्य वपाया मेदस ' इति चोदितत्वाच्छागशब्दस्य छागशब्देनेत्यर्थः ।

पेत इति कृत्वा । एवमिहापि द्रष्टव्यम् । तस्मान्निर्गुणेनाभिधानं कर्तव्य-मिति ॥ २७ ॥

तथाऽऽरम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशास्त्रमनर्थकं स्यात् ॥ २८ ॥ सि०

अथवा, चोदितेन सगुणेनाभिधीयेत । कुतः । आरम्भासमवायात् । न ह्यारम्भेण देवता कर्मणि समवैति । न स्वेन रूपेण देवतायाः कर्मणि साधनभाव इत्युक्तम् । यदि हि रूपेण समवेयात्तया सत्यग्निशब्देन पवमानोऽपि प्रत्याय्यत इति गुणाभिधानं न क्रियेत । कथं तर्हि साधनभावः । श्रुतिसमवायित्वाद्देवतार्थस्य । देवताशब्दस्य च हविषश्च संबन्धः साक्षादुच्यते । यस्य शब्दस्य संबन्धः स शब्दो वदितव्यः । एवमसौ संबन्धः कृतो भवति । यदि च गुणाभिधानं न क्रियते, गुणशासनमनर्थकं स्यात् । एवमर्थं हि तत्र शब्द उच्चार्यते, कथमसौ कर्मणि संबध्येतेति । तत्र यदि गुणो न संबध्नीयात्, गुणवचनवैयर्थ्यं स्यात् । तस्मात्सगुणेनाभिधानं कर्तव्यमिति ॥ २८ ॥

द्रव्येष्वारम्भगामित्वादर्थेऽविकारः सामर्थ्यात् ॥ २९ ॥

अथ यदुक्तं द्रव्यवदिति, सा वा एषा सर्वदेवत्या यदजा वशा, वायव्यामालभेत भूतिकाम इति । अजावशाशब्देन चोदिते कर्मणि छागाशब्देन निगमा बाचिषु भवन्तीति (यदुक्तं), तत्परिहर्तव्यम् । अत्रोच्यते । युक्तं द्रव्येष्वारम्भसमवायः । रूपेण समवायं गच्छति द्रव्यम् । तत्र छागाशब्देन याऽसावालब्धा यदि वशा पशुवशा, तत्र साऽभिधीयत इति गम्यते । तस्मादर्थे साधने सत्यविकारेऽप्यर्थे वचनसामर्थ्यमुपपद्यत इति विना गुणवचनेनाभिधानं स्याच्चोदकानुग्रहाय । इह श्रुतिसमवायित्वादवश्यं चोदकप्राप्तस्य विकारः कर्तव्य इति ॥२९॥

---

२७ ॥ २८ ॥ २९ ॥

---

१ तया—इति क्वचित्पाठः । २ विकार इति सर्वत्र पाठः ।

(पवमानेष्टिष्वाज्यभागयोर्निर्गुणस्यैव देवतापदस्याभिधानाधिकरणम् ॥ १९ ॥)

[१५] बुधन्वान् पवमानवद्विशेषनिर्देशात् ॥ ३० ॥ पू०

अस्त्याधानं, य एवं विद्वानाग्निमाधत्त इति । तत्र पवमानेष्टयः । अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेत्, अग्नये पावकाय, अग्नये शुचय इति । तत्राऽऽज्यभागौ प्रकृत्य श्रूयते, बुधन्वानाग्नेयः कार्यः, पावकवान् सौम्य इति । तत्रायमर्थः सांशयिकः । किं सगुणमग्नेरभिधानं कर्तव्यमुत निर्गुणमिति । तत्रैवं तावत्परीक्ष्यते । किं देवतानिर्देशोऽयं, मन्त्रनिर्देश इति । देवतानिर्देशे सति सगुणमभिधानं, मन्त्रनिर्देशे निर्गुणमिति । किं तावत्प्राप्तम् । सगुणमभिधानमिति । तत्रैतद्वर्ण्यते, देवतानिर्देश इति । कुतः । रूपत एव मन्त्राणां प्राप्तत्वाद्विधानमनर्थकं, देवता पुनर्न प्राप्नोति । तस्या विधानमर्थवद्भवति । बुधन्वानाग्नेयः कर्तव्य इति । देवतया बुधन्वद्गुणयुक्तया भवति बुधन्वानाग्नेयः । तस्मात्सगुणमभिधानम् । यथा पावमानेष्टिषु, अग्निः पवमान इति । एवमत्रापि, अग्निर्बुधन्वानिति विशेषनिर्देशोऽर्थवान् भविष्यति । तस्मात्सगुणमभिधानमिति ॥ ३० ॥

मन्त्रविशेषनिर्देशान्न देवताविकारः स्यात् ॥ ३१ ॥ सि०

न चैतदेवं, सगुणमभिधानमिति, निर्गुणं कर्तव्यम् । तत्रैतद्वर्णयन्ति, मन्त्रविशेषनिर्देशोऽयमिति । कुतः । मन्त्रविशेषसरूपोऽयं शब्दः । आग्नेयो यो विशिष्टाग्निविशिष्टः स बुधन्वान् कर्तव्यः, नाग्निः । अथाग्निर्बुधन्वान् क्रियते, तत्र बुधन्वानग्निर्देवता स्यात् । तत्राऽऽग्नेय इति सापेक्षे तद्धितनिर्देशो न स्यात् । न हि सविशेषणानां वृत्तिर्भवति । *न खल्वपि वृत्तस्य विशेषणं प्रयुज्यते । तस्मान्नाग्नेर्विशेषणं बुधन्वत्ता ।* कस्तर्हि बुधन्वत्तया विशेष्यते । आग्नेयः । तस्य बुधो मन्त्रः, तेनासौ

---

३० ॥

---

१ वृधन्वान्—इति खण्डदेवघृत पाठः । एवं भाष्येऽपि यत्र यत्र बुधशब्दः प्रयुक्तस्तत्र खण्डदेवादिमन्थे वृधशब्दपाठो दृश्यते ।

बुध्नवान् भवति यागः । अग्निं स्तोमेन बोधय समिधानो अमर्त्यमिति । अथवा, मन्त्र एवाभिसंबध्यते, बुधन्वानाग्नेय इति ।

अथ यदुक्तं, रूपादेव मन्त्रः प्राप्नोति, न विधातव्य इति । उच्यते । बुध-
यः कश्चिदग्न्यभिधानो मन्त्रः प्राप्नोति । तन्निषेधार्थमिदमुच्यते । बुधन्वान् कर्तव्यः, अग्निं स्तोमेन बोधयेति । एवं चेत्, न देवताविशेषणम् । तस्मान्निर्गुणमभिधानं देवतायाः कर्तव्यम् । एवं चोदकानुग्रहो भविष्यति ॥ २१ ॥

(आनुबन्ध्यवनस्पतियागयोर्निगमेषु विधिगतोस्त्रावनस्पतिशब्दाभ्यामेव द्रव्यदेवतयोरभिधानाधिकरणम् ॥ १६ ॥)

[१६] विधिनिगमभेदात्प्रकृतौ तत्प्रकृतित्वाद्विकृतावपि भेदः स्यात् ॥ ३२ ॥ पू०

अस्ति ज्योतिष्टोमः । तत्र श्रूयते, गौरनुबन्ध्यः, अजोऽग्नीषोमीय इति । सन्ति तु गोरभिधानानि—उस्रा, उस्रिया, अह्नी, मही, अदितिः, इला, इति । तत्र संशयः । किं निगमेषु केनचिदेव शब्देन गोरभिधानं कर्तव्यम्, अथवा विधिशब्देन कर्तव्यमिति । तथा, पृषदाज्येन वनस्पतिं यजतीति । सन्ति वनस्पतेरभिधानानि, वृक्षः पादपो द्रुमो नग इति । तत्र संशयः । किं निगमेषु केनचिदेव शब्देन वनस्पतेरभिधानं कर्तव्यम्, अथवा विधिशब्देनेति । किं प्राप्तम् । केनचिदेवेति । कुतः । विधिनिगमभेदात्प्रकृतौ, विधिनिगमभेदः कृतः । यो दीक्षितो यदग्नीषोमीयं पशुमालभेत इति विधौ । मन्त्रे, छागस्य वपाया मेदसोऽनुब्रूहीति । इहापि चोदकेन, यत्प्राकृतं तत्प्राप्यते । विधिनिगमभेदश्च प्रकृतावस्ति । तस्मात्स प्राप्यते । छागशब्दः प्रकृतौ कृतः, स न शक्यते गवि कर्तुम् । विधिनिगमभेदस्तु शक्यते । तस्मादुस्रादीनामन्यतमेन

२१ ॥]

ननु 'उस्रायै वपायै मेदस.' इति मन्त्राम्नानादनियमो नैव प्राप्नोति, विधिशब्दो वा । उच्यते । सत्यम् । समीपे मन्त्रः श्रूयते, न त्वनेन कर्तव्यमिति विधीयते । चोदकस्तु विधिशब्दादन्येन प्रकाशनं प्रापयति । तस्य सं नियमः । मन्त्रानुबन्ध्यायां भवेदपि । वनस्पतौ तु विधिशब्द एव प्राप्नोति, उक्तेन न्यायेन । उच्यते । विवृद्धिकारो वनस्पतिः । विवृद्धि च विधिशब्दादन्येन

१ बुधन्वद्—पा० । २ अनियम—पा० । ३ उक्तेनेति—पूर्वाधिकरणोक्तेन न्यायेनेत्यर्थः ।

वाचिषु वचनं कर्तव्यम् । तथा, अग्निं स्विष्टकृतं यजतीति विधौ । निगमेऽपि—

> पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँ ऋतुपते यजेह ।
> ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्यायजिष्ठ, इति ।

विधिनिगमभेदः प्रकृतौ कृतः। स्विष्टकृद्विकारश्च वनस्पतिरिति संकर्षे वक्ष्यते । तस्मात्तत्रापि विधिनिगमभेदः कर्तव्यः । अतो येन केनचिद्वनस्पत्यभिधानेन निर्देशः कर्तव्यः । तत्प्रकृतित्वादिति ॥ ३२ ॥

यथोक्तं वा विप्रतिपत्तेर्न चोदना ॥ ३३ ॥ सि०

यथोक्तेन वा शब्देन वचनं कर्तव्यं, गोरुस्राशब्देन । स हि तत्राऽऽम्नातः । उस्रायै वपायै मेदसोऽनुब्रूहीति । आह । मन्त्राम्नानमेतद्, न वचनमस्ति । अनेन कर्तव्यमिति । वचनं पुनश्चोदको विधिभिन्नेन वक्तव्यमिति । नैतदेवम् । न विप्रतिपत्तिं चोदकः प्रापयति । न हि यत्प्रकृतावस्ति तद्विकृतौ कर्तव्यमिति केनचित्प्राप्यते । किं तु यत्प्रकृतौ चिकीर्षितं शब्देनाभिहितं, नार्थात्प्राप्तं, तच्चोदकः प्रापयति। न च प्रकृतौ विधिनिगमभेदो विवक्षितः । छागस्य वपायै मेदसोऽनुब्रूहीत्येतद्वक्तव्यमिति विधीयते । तत्रार्थाद्विधिनिगमभेदो जातः । छागशब्दविधानं श्रुत्या गम्यते । विधिनिगमभेदो लक्षणया । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या, न लक्षणा । तस्मान्न येन केनचिदभिधानम्। आम्नानसामर्थ्यादुस्राशब्देन। तथा, पृषदाज्ये देवतायां यो विधिशब्द उक्तः, तेन वचनं कर्तव्यम् । विधिनिगमविप्रतिपत्तिर्न चोद्यते । तस्माद्वनस्पतिशब्देन निर्देशः कर्तव्य इति ॥ ३३ ॥

प्रकाशनम्, विकृतौ चोदकेन तथैव प्राप्नोति । न चेह गुणलोपः । निर्गुणत्वादाम्नानस्य । अन्यत्वं कर्तव्यं विधिशब्दात् । अतः पर्यायशब्दप्रसङ्गः ॥ ३२ ॥

सिद्धान्तस्तु समान इति कृत्वा वनस्पतिरुदाहृतः ॥ ३३ ॥

---

१ (अ० १४ पा० ४ सू० २१) इत्यत्र संकर्षकाण्डे वक्ष्यत इत्यर्थः । २ प्रकाशनमिति—इत्यमिति शेषः ।

(अवभृथे स्विष्टकृद्यागीयनिगमादिषु स्विष्टकृद्गुणकयोरग्नीवरुणयोर-
भिधानाधिकरणम् ॥ १७ ॥)

[१७] स्विष्टकृद्देवतान्यत्वे तच्छब्दत्वान्निवर्तेत ॥ ३४ ॥ पू०

अस्त्यवभृथः, वारुणेनैककपालेनावभृथं यन्तीति। तत्रेदमाम्नायते, अग्नीवरुणौ स्विष्टकृतौ यजतीति। तत्रायमर्थः सांशयिकः। किं निगमेऽस्विष्टकृच्छब्दकं वचनं कर्तव्यमुत सस्विष्टकृच्छब्दकमिति। तत्रैवं तावत्परीक्ष्यते। किं सांविज्ञायिकः स्विष्टकृच्छब्द उत स्विष्टं करोतीत्येतेन गुणेन प्रवृत्त इति गौणो न रूढ इति। यदि रूढः, अस्विष्टकृच्छब्दकं वचनं कर्तव्यम्। अथ व्युत्पाद्यते, ततः सस्विष्टकृच्छब्दकम्। किं प्राप्तम्। सांविज्ञायिकः, न व्युत्पाद्यत इति। कुतः। न तावत्स्विष्टं कृतवान्। अथ च तस्मिन्नेव काले स्विष्टकृदित्युच्यते, स्विष्टकृतं यजतीति। न ह्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ भवतः। अग्निरेव स्विष्टकृच्छब्देनोच्यते, न योऽर्थः स्विष्टं कृतवान्। यदा सांविज्ञायिकः, तदाऽस्विष्टकृच्छब्दकं वचनं कर्तव्यम्। कुतः। अग्नेर्हि देवताया असौ वाचकः, नाग्नीवरुणयोः। विकृतावग्नेर्देवताया अभावादग्नी- कर्तव्यमिति॥३४॥
वरुणाभ्यां निवर्तेत। तस्मादस्विष्टकृच्छब्दकं वचनं

संयोगो वाऽर्थापत्तेरभिधानस्य कर्मजत्वात् ॥ ३५ ॥ सि०

न चैतदस्ति, अस्विष्टकृच्छब्दकं वचनं कर्तव्यमिति। किं तर्हि। सस्विष्टकृच्छब्दकं वचनं कर्तव्यमिति। तत एतद्गम्यते। गौणमिदमभिधानमिति। स्विष्टकरणात्स्विष्टकृदिति गम्यते। गम्यमाने न न्याय्यमविवक्षितं कल्पयितुम्। क्रियानिमित्तत्वमवयवशब्देभ्यो गम्यते। समुदायस्य चाभावप्रयोगाल्लोकेऽन्याभिधानत्वं नाध्यवसीयते। तस्मान्न सांविज्ञायिकः। एवं चेत्सस्विष्टकृच्छब्दकं वचनं कर्तव्यम्। अर्थापत्तेः। क्रियार्थेऽग्नीवरुणौ श्रूयेते। अग्नीवरुणौ स्विष्टकृतौ यजतीति। क्रियासंयोगित्वाच्च शक्नोति स्विष्टकृच्छब्दोऽग्नीवरुणौ वक्तुम्। तस्मात्सस्विष्ट-

कृच्छब्दकं वचनं कर्तव्यमिति । अथ यदुक्तं, स्विष्टं कृतवति चैष शब्दः । न चाग्निः स्विष्टं कृतवानिति । अत्र ब्रूमः। मत्पक्षे भूतकालता हीयेत । त्वत्पक्षे सा च सोपपदश्च धात्वर्थः । अपि च ततः पूर्वान् यागानपेक्ष्य स्विष्टं कृतवानग्निः ॥ ३५ ॥

(अग्नीषोमीयपशौ पशुपुरोडाशाङ्गस्विष्टकृद्यागीयत्यागकाले निगमेषु च निर्गुणस्यैवाग्नेरभिधानाधिकरणम् ॥ १८ ॥)

[१८] सगुणस्य गुणलोपे[1] निगमेषु यावदुक्तं स्यात् ॥ ३६ ॥ पू०

अस्ति सोमे पशुरग्नीषोमीयः । तत्र श्रूयते । अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमनुनिर्वपतीति । तत्र स्विष्टकृति गुणलोपः श्रूयते, अग्निं यजतीति । तदत्र संशयः । किं याग एव स्विष्टकृतो गुणलोपः, अथाग्निष्टेषु[2] निगमेषु यथाप्रकृतिभाव उत सर्वत्रैव गुणलोप इति । किं प्राप्तम् । स्विष्टकृतोऽग्नेः सगुणस्य गुणलोपे श्रूयमाणे ब्रूमः । यत्रैवोच्यते, गुणलोपस्तत्रैव स्यात् । यागे चोच्यते, अग्निं यजतीति । यागे गुणलोप उच्यमाने यदि सर्वनिगमेषु गुणलोपोऽध्यवसीयेत, अश्रुतं कल्प्येत । यावाश्च श्रुतयोरसर्गे दोषः, तावानश्रुतकल्पनायाम् । तस्माद्याग एव लोपः स्यात्, न सर्वेषु निगमेष्विति ॥ ३६ ॥

सर्वस्य वैककर्म्यात् ॥ ३७ ॥ सि०

सर्वस्य वा निगमस्थस्यापि स्विष्टकृतोऽग्निशब्दस्य गुणो लुप्येत । कुतः । ऐककर्म्यात् । नैव स्विष्टकृद्याग एव गुणो लुप्येत । किं तर्हि । यागप्रयोगे । कथम् । अग्निं यजतीति प्रयोगवचन एष शब्दः । सर्वस्मिन् स्विष्टकृद्यागप्रयोगे लुप्येत । अन्येऽपि हि स्विष्टकृन्निगदाः स्विष्टकृद्याग एव । तस्मात्सर्वत्र लोप इति ॥ ३७ ॥

---

३५ ॥ ३६ ॥ ३७ ॥

---

1 'सगुणस्य गुणलोपे निगमेषु गुणस्थाने यावदुक्तं स्यात्' इति लिखितपुस्तकेषु पाठः ।
2 निगमस्थापि—पा० ।

(दर्शपूर्णमासयोरग्निस्विष्टकृद्देवत्यस्य तृतीयानुयाजस्य शेषसंस्कारार्थावापिकस्विष्टकृद्देवतासंस्कारकतया संनिपत्योपकारकत्वाधिकरणम् ॥ १९ ॥)

[१९] स्विष्टकृदावापिकोऽनुयाजे स्यात्प्रयोजनवदङ्गानामर्थसंयोगात् ॥ ३८ ॥ सि०

स्तो दर्शपूर्णमासौ। तत्र स्विष्टकृदनुयाजेषु, अग्निं स्विष्टकृतं यजतीति। तत्र संदेहः। किं स्विष्टकृद्यागोऽनुयाजेष्वारादुपकारक उत संस्कारक इति। किं प्राप्तम्। आरादुपकारक इति। कुतः। एतद्धि कर्मणा प्रसिद्धं कार्यं, यदारादुपक्रिया। तथा हि भूतस्य भव्यार्थता भविष्यति। श्रुत्या च विधानम्। इतरथा भव्यस्य भूतार्थता स्यात्। वाक्येन च विधानम्। तस्मादारादुपक्रियेति।

एवं प्राप्ते, ब्रूमः। स्विष्टकृदावापिकः स्यात्, न बाह्यः। किमिदमावापिक इति। आज्यभागस्विष्टकृतावन्तराऽऽवापस्थानम्। तत्र भव आवापिकः। बहिरावापादनुयाजस्तान्त्रिकः। या तु स्विष्टकृद्देवता तत्र, सैवासौ प्रधानदेवताऽऽवापिकी। तस्मादावापिक इत्युच्यते। यदा चैवं, तदा संस्कारकर्म स्यात्। तथा प्रयोजनवद्भवति, प्रयोजनवतोऽग्नेरुपकरोतीति। अपि च द्विविधान्यङ्गानि। आरादुपकारकाणि, सामवायिकानि च। आरादुपकारकेभ्यः सामवायिकानि गरीयांसि। तत्र हि साक्षाद्भावनम्। आरादुपकारकेषु प्रकृतेन परोक्षेणैकवाक्यता स्यात्। तस्मात्संस्कारकर्मेति ॥ ३८ ॥

(याज्यापुरोनुवाक्यानुवचनयोः संस्कारकर्मत्वाधिकरणम् ॥ २० ॥)

[२०] अन्वाहेति च शब्दवत्कर्म स्याच्चोदनान्तरात् ॥ ३९ ॥ पू०

दर्शपूर्णमासयोः श्रूयते, याज्यामन्वाह पुरोनुवाक्यामन्वाह, इति। तत्र संशयः। किं याज्यापुरोनुवाक्यानुवचनं प्रधानकर्म, उत संस्कारकर्मेति। किं प्राप्तम्। अन्वाहेति प्रधानकर्म स्यात्। कुतः। चोदनान्तरात्। यदि संस्कारकर्म ततो रूपादेव तयोर्वचनं प्राप्नोति। पुनरन्वा-

३८ ॥

इति वचनमनर्थकम् । प्रधानकर्मत्वे तु वक्तव्यम् । न ह्यन्यथा तस्य कर्तव्यता गम्यत इति । अतः श्रुत्या कर्तव्यतावगमात्प्रधानकर्मेति । ग्रहवत् । यथा स्तोत्रशस्त्रे, स्तौति शंसतीति कर्तव्यतावगमात्प्रधानकर्मणी एवमिहापि द्रष्टव्यम् ॥ ३९ ॥

संस्कारो वा चोदितस्य शब्दवचनार्थत्वात् ॥ ४० ॥ सि०

संस्कारकर्म वा स्यात् । कुतः । चोदितस्यार्थस्य यः शब्दः, स तद्वचनार्थो भवति । स तस्य दृष्टोऽर्थः । तस्मिन् सत्यदृष्टकल्पनायां हेतुर्नास्ति । तस्मात्संस्कारकर्मेति ॥ ४० ॥

अवाच्यत्वाच्चेति चेदिति यदुक्तं, तत्परिहर्तव्यम्—

स्याद्गुणार्थत्वात् ॥ ४१ ॥

स्यादुपपद्येत, अन्वाहेति वचनम् । कुतः । गुणार्थत्वात् । तिष्ठन् याज्यामन्वाह, आसीनः पुरोनुवाक्याम॰वाहेति स्थानासनगुणार्थं पुनर्वचनमुपपद्यते । तस्मात्संस्कारकर्मणी याज्यापुरोनुवाक्ये इति ॥४१॥

(मनोतामन्त्रस्य वायव्यादिपशावनूहाधिकरणम् ॥ २१ ॥)

[२१] मनोतायां तु वचनादविकारः स्यात् ॥ ४२ ॥ सि०

अस्ति वायव्यः पशुः, वायव्यं श्वेतमालभेत भूतिकाम इति । अस्ति तु प्रकृतावग्नीषोमीये पशौ मनोतामन्त्रः । त्वं ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म होता, इति । स इह चोदकेन प्राप्यते । तत्र संदेहः । किं यथादेवतमूहितव्यो मनोतामन्त्रः, अथवाऽविकारेण प्रयोक्तव्य इति । उच्यते । ननु प्रकृतावन्याय्यनिगदोऽयम् । अग्नीषोमौ हि प्रकृतौ देवता । अयमप्याग्नेयः । असमवेताभिधानादविकारेण प्रयो-

---

३९ ॥ ४० ॥ ४१ ॥]

'यदभ्यन्यदेवत्यः पशुः' इत्येतद्वचनं चिन्त्यते । किं प्रकृतावुपपद्यत उत विकृताविति । पूर्वपक्षः प्रकृताविति । अग्निलिङ्गा मनोता प्रकृतौ नाग्नीषोमावभिधातुं शक्नोतीत्याशङ्का भवति । तस्याश्चोत्कर्षे प्राप्ते विकृतावनाम्नानात्तस्यामपि न भवति । श्रुतिलिङ्गाद्यभावात् । ननु लिङ्गेन प्राप्नोति । उच्यते । सामान्यसंबन्धे

---

१ ऋ० सं० (अष्ट० ४ अ० ४ व० ३५) । २ सा धोरदर्पे-पा० ।

क्तव्यः । अत्रोच्यते । सत्यमग्नीषोमौ देवता प्रकृतौ । तौ तु—आग्निश्च सोमश्च । तत्राग्निर्देवता, न स्वंसमवेतः । अग्निप्रत्ययेन याऽत्र देवता सा प्रतीयते । अयमिह वायुर्देवताकार्ये श्रूयते । स देवताकार्ये श्रूयमाणोऽग्निकार्यमपि करोति देवताप्रत्ययम् । तस्मात्तदर्थापत्तेस्तद्धर्मा स्यात् । तस्माद्यथादेवतं मनोतामन्त्रः प्रयोक्तव्य इति ।

एवं प्राप्ते, ब्रूमः । मनोतायां तु वचनादविकारः स्यादिति । वचनमिदं भवति । यद्यप्यन्यदेवत्यः पशुः, आग्नेय्येव मनोता कार्या, इति । किमिव वचनं न कुर्यात् । नास्ति वचनस्यातिभारः । तस्मादविकारेण मनोतामन्त्रः प्रयोक्तव्य इति ॥ ४२ ॥

सति लिङ्गमवकाशं लभते । न च सामान्यसंबन्धोऽस्ति । तस्मात्प्रकृतौ निवेशो मनोतायाः ।

न चादृष्टार्था मनोता प्रकृतौ । अग्निं तावच्छब्दैवाभिधत्ते । तत्संबद्धं सोमं लक्षणया शक्नोति वक्तुम्, उभयोर्यागसाधनत्वात् । इतरेतरयुक्तौ हि तौ देवतात्वं प्रतिपद्येते । यथा पुष्करं खनन्तं दृष्ट्वा महेश्वरोऽपि खनन्निव लक्ष्यते, एककार्यत्वात् । एवमिहापि । इदं वचनमर्थवादत्वेन स्तुवन्मन्त्रं प्रकृतावेव निवेशयति । अथवा—उत्कर्षाशङ्कायामिदं वचनमनुत्कर्षं करोति । लक्षणया च सोमं प्रत्याययतीत्युक्तमेव पुष्करवन्महेश्वरम् ।

सिद्धान्तस्तु—एवकारकरणमनर्थकं प्रकृतौ भवति । अवधारणाभावात् । विकृतौ चावधारणं विद्यते । तत्र चोदकेन यद्देवत्यः पशुस्तद्देवत्यैव मनोता प्राप्नोत्यूहेन । एवं प्राप्तेऽवधारणं क्रियते । आग्नेय्येवेति । न चार्थवादत्वेनोपपद्यते । अन्यत्रैव मनोता श्रूयते । मनोतामन्वाहेति । अन्यत्र 'यद्यप्यन्यदेवत्यः पशुः' इति । अपि चार्थवादत्वेऽप्येवकारस्य पर्युदसितव्याभावो भवत्येव यथा विधौ । वृशमसंबन्धो बाधसामान्येन, ऊहबाध इति ॥ ४२ ॥

---

१ स्यादिति—(अ० १० पा० ३ अ० ७ सू० ३५) अनत्यन्यायेनेति शेषः । २ समस्त इति—सर्वेषामेव मन्त्राणां 'सर्वा ऋचः सर्वाणि सामानि सर्वाणि यजूंषि वाचस्तोमे पारिप्लवं शंसति' इति ब्राह्मणवाक्येन वाचस्तोमे विनियोगान्मन्त्रगतस्वार्थस्मृत्या आकाङ्क्षाया निवृत्तेः पुनराकाङ्क्षोत्थापकसामान्यसंबन्धबोधकप्रमाणाभावे न लिङ्गमात्रं मन्त्रविनियोजकं संभवति । अतः सामान्यसंबन्धबोधकप्रमाणसत्त्व एव लिङ्गं मन्त्रविनियोजकं, नान्यथेत्याशयः । ३ महेश्वर इत्येव लिखितपुस्तकेष्वपि दृश्यते, परंतु 'गजेश्वरः' इति पाठ आवश्यक इव भाति । ४ अर्थवादत्वेनैवकारस्य—पा० ।

(वैश्यस्तोमे पृष्ठस्तोत्रसाधनतया विहितस्य कण्वरथंतरस्य स्वयोनौ गानाधिकरणम् ॥ १२ ॥)

[१२] पृष्ठार्थेऽन्यद्रथंतरात्तद्योनिपूर्वत्वात्स्यादृचां प्रविभक्तत्वात् ॥ ४३ ॥ पू०

अस्ति वैश्यस्तोमः, वैश्यो वैश्यस्तोमेन यजेतेति । तत्र श्रूयते, कण्वरथंतरं पृष्ठं भवतीति । उभयविकारः कण्वरथंतरमित्युक्तम्, अर्भाकृते तद्विकाराद्विरोधाद्बृहत्यतिष्ठिरश्चेति । तत्र संशयः । किं रथंतरयोनौ बृहद्योनौ वाऽनियमेन कण्वरथंतरं गेयमुत रथंतरयोनौ, अथवा स्वयोनाविति । किं प्राप्तम् । चोदकेनानियमः । लाघवं हि तथा भवति । ततः प्रयोगप्राशुभावः ।

एवं प्राप्ते ब्रूमः । पृष्ठार्थे यदेतदन्यद्रथंतरात्कण्वरथंतरं श्रूयते, तद्रथंतरयोनौ स्यात् । ज्योतिष्टोमपूर्वको हि वैश्यस्तोमः । ज्योतिष्टोमे रथंतरयोनौ पृष्ठं कृतम् । ननु बृहद्योनावपि तत्र कृतम् । नैवम् । ऋचां प्रविभक्तत्वात् । ऋचां प्रविभाग इह गम्यते । यथा रथंतरयोनिर्भवतीति । कुतः । कण्वरथंतरे रथंतरशब्दः श्रूयते । तेन गम्यते रथंतरविशेषः कण्वरथंतरमिति । अर्थान्तरे कण्वरथंतरशब्दो भवेद्यदि, रथंतरधर्मा न भवेयुः । तेषु सत्सु यूपवदुपपद्यते । यथा, औदुम्बरो यूपो भवतीति । न ह्युदुम्बरो यूपद्रव्यं प्रकृतौ संकीर्तितम् । धर्मनिमित्तत्वयं शब्द उपपद्यते । एवमिहापि धर्मनिमित्त कण्वरथतरे रथंतरशब्दो भवति, नान्यथेति ॥ ४३ ॥

स्वयोनौ वा सर्वाख्यत्वात् ॥ ४४ ॥ सि०

न चैतदस्ति, रथंतरयोनौ गीयेतेति । किं तर्हि । स्वयोनौ । कुतः । सर्वाख्यत्वात् । सर्वविशेषणविशिष्टस्य हि रथंतरशब्दो वाचकः । -प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनवतः सर्वस्य मध्यमस्वरकाद्याख्यासस्य कण्वरथंतरमित्याख्या भवति । तस्माद्योनिरपि विशेषणम् ।

[४१ ॥]

---

१ (अ० ९ पा० २ अ० १६ सू० २८) ।

अपि चार्थान्तरे कण्वरथंतरे रथंतरशब्दः कल्प्यः स्यात् । तस्मात्स्वयोनौ गेयमिति ॥ ४४ ॥

यूपवदिति चेत् ॥ ४५ ॥

इति चेत्पश्यसि स्वयोनौ गेयमिति, रथंतरशब्दस्तेनोपपद्यते । स हि रथंतरधर्मेषु सत्सु यूपवदुपपद्यत इति ॥ ४५ ॥

न कर्मसंयोगात् ॥ ४६ ॥

नैतदेवम् । कर्मसंयोगात्काष्ठस्य यूपता । न हि लोके यूप इति संज्ञातः कश्चिद्वृक्षोऽस्ति । यत्र ते संस्काराः स यूपः । तस्मात्, औदुम्बरो यूपो भवतीति संस्कारनिमित्तः । इह पुनरेवंविशेषणविशिष्टः कण्वरथंतरशब्दो लोक एवास्ति । नासौ कण्वानां रथंतरं कण्वरथंतरमित्येवं कृत्वोच्यते । रथंतरत्वे कण्वसंबन्धे वाऽस्य विधीयमाने वाक्यभेदः प्रसज्येत । तस्मात्संज्ञाधिकः कण्वरथंतरशब्दः । अत एव स्वयोनौ गीयते ॥ ४६ ॥

(वैश्यस्तोमे पृष्ठस्तोत्रसाधनतया विहितस्य कण्वरथंतरस्य स्वयोन्युत्तरयोर्गानाधिकरणम् ॥ २२ ॥)

[२३] कार्यत्वादुत्तरयोर्यथाप्रकृति ॥ ४७ ॥ पू०

भाष्यकारेण यदिदं व्याख्यानं कृतं, प्रस्तावोद्गीथादौ कण्वरथंतरशब्द इति । तदयुक्तम् । 'गीतिषु सामाख्या' इति कण्वरथंतरशब्देन सामोच्यते, नर्क् । प्रकृतौ चर्गक्षराणि संस्कुर्वती रथंतरगीतिः पृष्ठस्य साधनभावेनावगता । एवं बृहद्गीतिरपि । इह तु बृहद्रथंतरानुवादेनान्यद्गीत्यन्तरं विधीयते पृष्ठसाधनत्वेन । तस्माद्गीतिर्गीतेरेव कार्ये वर्तते, न ऋक्कार्ये । ऋक्च चोदकेन प्राकृती प्राप्नोति । सा न बाध्याऽङ्गभूता । वाक्यस्य तावदपदार्थः । न चापदार्थसामर्थ्याच्चोदकप्राप्ताया ऋचो बाधः । यथा धेनुशब्देन च्छागबाधः । धेनुशब्दो गोद्रव्यमन्तरेण नैव दृष्टः प्रयुज्यमानः । कण्वरथंतरगीतिस्तु ऋगन्तरेऽपि दृष्टैव प्रयुज्यमाना । न च गौणी सा गीतिरन्येन क्रियमाणा । तस्माच्चोदकेन ऋक्प्राप्नोतीति ॥ ४४ ॥ [४५ ॥ ४६ ॥

१ (अ० २ पा० १ अ० ११ सू० ३६) । २ प्राप्नोतीति–अतः कण्वरथंतरसाम्नः स्वयोनावेव गानमिति सिद्धान्तो भाष्यकृद्व्याख्यानरीत्या दुःसाध इत्याशयः । कथं तर्हि सिद्धान्तः समर्थनीय इति चेत् । अयमाशयः । सत्यं, सामशब्दो गीतिमात्रवाची । तथाऽपि वैश्यस्तोमक्रमे कण्वरथंतरयोनेस्तदुत्तरयोश्चोत्तराग्रन्थे पाठात्तासामपि वैश्यस्तोमाङ्गत्वावगतेरौपदेशिकर्भिरातिदेशिकानामृचां बाधात्स्वयोनावेव गानमिति ।

कण्वरथंतर एव भवति संशयः । उत्तरयोर्गायतीति, किं रथंतरयोन्युत्तरयोः, बृहद्योन्युत्तरयोर्वा गेयमुत स्वयोन्युत्तरयोरिति । किं मांप्तम्। बृहद्योन्युत्तरयोर्वा रथंतरयोन्युत्तरयोर्वेति । कुतः । चोदकानुग्रहात् । न तत्रैव दोषो भवति, स्वयोनिविशिष्टं कण्वरथंतरमिति । उत्तरयोर्हि परकार्यं, तत्र स्वयोनिरवश्यं ज्ञातव्या भवति । तस्मात्प्रकरणमपेक्षितव्यमिति ॥ ४७ ॥

समानदेवते वा तृचस्याविभागात् ॥ ४८ ॥ सि०

न चैतदस्ति, बृहद्योन्युत्तरयोः, रथंतरयोन्युत्तरयोर्वा गेयमिति । किं तर्हि । स्वयोन्युत्तरयोः । कुतः । तृचशब्दात् । समानच्छन्दसि समानदेवताके चाविशेषितस्तृचशब्दो भवतीत्युक्तम् । अतः श्रुत्या चोदको बाध्यत इति स्वयोन्युत्तरयोर्गेयमिति ॥ ४८ ॥

(अग्निष्टुद्यागे स्तोत्रशस्त्रमन्त्राणां प्राकृतानामेवाविकारेण प्रयोगाधिकरणम् ॥ २४ ॥)

[२४] ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात् ॥ ४९ ॥ सि०

अस्ति, अग्निष्टुदेकाहः । तत्र श्रूयते, आग्नेया ग्रहा भवन्तीति । तत्र संदेहः । किं प्राकृतयोः स्तोत्रशस्त्रयोर्यथादेवतमूहः, उताविकार इति । ऊहबुद्धिं व्यावर्तयितुमिदमभिधीयते । ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात् । प्रधानकर्मत्वादिति । कस्य पुनरेषा बुद्धिः स्यात् । यं निवर्तयेत् । यो मन्दधीर्मन्यतेऽभिधानं सेत्स्यतीति । मन्दधियामपि चोपदेशः क्रियमाणः फलवान् भवति । आपि च कंचिदपेक्ष्य सर्वे मन्दधियः ।

अथ तु न परितोष एवं, ततोऽन्यथा वर्ण्यते । यत्तदुक्तमधिकरणं द्वितीयेऽध्याये । तस्येदं प्रयोजनसूत्रं, ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यादिति । यदि संस्कारकर्मणी स्तोत्रशस्त्रे, किं भवति प्रयोजनम् । अग्निष्टुदेकाहे यथादेवतमूहः । अथ प्रधानकर्मणी, ततो ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यादिति ॥ ४९ ॥

---

४७ ॥ ४८ ॥ ४९ ॥

---

१ (अ० २ पा० १ अ० ५) ।

(चातुर्मास्येषु—अनुयाजीयदेवताप्रकाशनार्थं प्राकृतावाहन-
मन्त्रस्याविकारेणैव प्रयोगाधिकरणम् ॥ २५ ॥)

[२५] उभयपानात्पृषदाज्ये दध्नः स्यादुपलक्षणं निगमेषु पातव्यस्योपलक्षणात् ॥ ५० ॥ पू०

सन्ति चातुर्मास्यानि, चातुर्मास्यैः स्वर्गकामो यजेतेति । तत्रानुयाजान् प्रकृत्य समामनन्ति, पृषदाज्येनानुयाजान् यजतीति । अस्ति तु प्रकृतावावाहनं, देवानाज्यपानावह, इति । तदिह चोदकेन प्राप्तम् । तत्र संशयः । किमविकारेणाऽऽवाहनं कर्तव्यमुतोहेनेति । यद्योहेन, तदा किम्, आज्यपान् दधिपानिति कर्तव्यमुत दधिपानिति, अथवा पृषदाज्यपानिति । किं प्राप्तम् । दध्नोऽप्युपलक्षणं स्यादाज्यस्यापि । कस्मात् । उभयपानात् । उभयं हि तद्देवताभ्रुद्दिश्य स्यज्यते । यच्च स्यज्यते, तत्पीयत इति मन्त्रेणोक्तम् । यच्च पातव्यं तदुपलक्षितं प्रकृताबाज्यपानिति । इह, आज्यस्यार्थे दधिसर्पिषी श्रूयेते । अथ पृषदाज्यं गृह्णाति, द्वयं वा इदं सर्पिश्चैव दधि च, द्वंद्वं वै मिथुनं प्रजननं, मिथुनमेवैतत्प्रजननं क्रियत इति । तुल्यं दध्याज्येनोचार्यते । तस्मादुभयमप्युपलक्षयितव्यं, दधि चाऽऽज्यं चेति ॥ ५० ॥

न वा परार्थत्वाद्यज्ञपतिवत् ॥ ५१ ॥

न वैतदेवं, दध्युपलक्षयितव्यमिति । कुतः । परार्थत्वात् । परार्थं हि पातव्यं द्रव्यं, पातृणामुपलक्षणम् । तत्राऽऽज्येन चेदुपलक्ष्यते, कृतोऽर्थ इति न पुनर्दध्नोपलक्षयितव्यम् । यज्ञपतिवत् । यथा, य इमं यज्ञमवान्ये च यज्ञपतिं वर्धानिति, यज्ञपतिर्मनुष्याणां होतृणां प्रशंसार्थो न स्वार्थं कीर्त्यत इत्यविकारेण प्रयुज्यते । न सर्वान् यजमानान् प्रत्यादरः । एवमिहापि पातव्यं पातुर्लक्षणार्थं प्रयुज्यते, न स्वार्थम् । तत्रैकेनापि येन केनचिल्लक्षिताः पातार इति कृत्वा न द्वितीयः प्रयोक्तव्य इति ॥ ५१ ॥

---

५० ॥ ५१ ॥

स्याद्वाऽऽज्ञाहनस्य तादर्थ्यात् ॥ ५२ ॥

स्याद्वध्न उपलक्षणम् । न यज्ञपतिवत्स्यात् । यज्ञपतिशब्दो हि न स्वार्थमुच्चार्यते । इडास्तुत्यर्थेन स उच्यते । आज्ञाहनं पुनः स्मरणार्थम् । तत्र पाताऽपि स्मर्तव्य, पेयमपि । तस्माच्चोदकानुग्रहाय पेयान्तरमुपलक्षयितव्यमिति ॥ ५२ ॥

न वा संस्कारशब्दत्वात् ॥ ५३ ॥

न वा दध्युपलक्षयितव्यम् । संस्कारशब्दोऽत्र विद्यत आज्यस्य, पृषदाज्येनानुयाजान् यजतीति । पृषदाज्येन—चित्रेणेत्यर्थः । संस्कारेण हि मिश्रणे संस्कृतं चित्रमाज्यं भवति । सा च चित्रतामस्य मत्यक्षतो दध्युत्पादयति । तस्मात्परार्थं चित्रतासजननार्थं न पातव्यम् । अतो नोपलक्षयितव्यमिति ॥ ५३ ॥

स्याद्वा द्रव्याभिधानात् ॥ ५४ ॥

स्याद्वा दध्युपलक्षणम् । द्रव्यं हि दधि तुल्यमाज्येन प्रधानभूतमुपदिश्यत इत्युक्तमस्माभिः । अथ पृषदाज्यं गृह्णाति, द्वय वा इदं सर्पिश्चैव दधि च, द्वन्द्वं वै मिथुनं प्रजननं, मिथुनमेवैतत्प्रजननं क्रियत इति । किं पृषदाज्य गृह्यते, सर्पिश्चैव दधि चेति । सर्पिषा दध्ना च यागः कर्तव्य इत्यर्थः । पृषदाज्यमिति न द्रव्यान्तरमुच्यते । तस्माद्दध्युपलक्षयितव्यमिति ॥ ५४ ॥

दध्नस्तु गुणभूतत्वादाज्यपा निगमाः स्युर्गुणत्वं श्रुतेराज्यप्रधानत्वात् ॥ ५५ ॥ सि०

न चैतदस्ति, तुल्यं दध्याज्येन, प्रधानभूतमिति । ग्रहणे हि तत्तुल्यमाज्येन, न याग । यागो ह्याज्येन चित्रेण श्रूयते । तस्माच्छ्रुतेराज्यप्रधानत्वाद्यागं प्रति गुणभूतं दधि स्यात् । न हि ग्रहणे श्रूयमाणं यागे श्रुतं भवतीति । दधि ग्रहणे श्रूयमाणं न यागार्थं भवति । तत्र श्रुत्याऽऽज्य करणं, दधि वाक्येनेति । किमर्थं तर्हि तत्र दधिग्रहणम् । गृह्यमाणेन प्रत्यक्षतश्चित्रमाज्यं भवतीति । तस्मादाज्यपा निगमाः स्युः । न दध्न उपलक्षणं कर्तव्यमिति ॥ ५५ ॥

---

५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥

---

१ स्वार्थं उच्चार्यते—पा० ।

दधि वा स्यात्प्रधानमाज्ये प्रथमान्त्य-संयोगात् ॥ ५६ ॥

न चैतदस्ति, आज्यया निगमा भवेयुरिति, न दध्न उपलक्षणं कर्तव्यमिति । दधिधानिरस्यैव कर्तव्यं, दध्येवात्र प्रधानम् । कुतः । आज्ये प्रथमान्त्यसंयोगात् । प्रथमसंयोग उपस्तरणम् । अन्त्यसंयोगोऽभिघारणम् । यदि पशुकामो यजेत, द्विरुपस्तृणीयात् । सकृदभिघारयेत् । ओषधयो वै पिषङ्क्त ओषधिष्वेव पशून् प्रतिष्ठापयतीति । यदि प्रावृषि यजेत, सकृदुपस्तृणीयात्, द्विरभिघारयेत् । वृष्ट्येव पशूनभिजिघर्तीति, उपस्तरणमन्यत्र निधापयितुं क्रियते । परार्थेनैव तत्र शब्दार्थो न ग्रहणमात्रम् । ग्रहणेनान्यस्याधिकरणसंस्कारे, उपस्तृणातीति शब्दो वर्तते । तथा, अभिघारयतीति, न ग्रहणमात्रमभिघारणम् । अन्यस्याऽऽभिमुख्येनाभिघारयतीति गम्यते । सोऽन्यः आज्यसंयुक्तः कथं स्यादिति । तदुपस्तरणाभिघारणशब्दाभ्यां दधिप्रधानभूतं गम्यते । आज्यमपि तस्य गुणभूतम् । तस्माद्दध्न एवोपलक्षणं कर्तव्यं, नाऽऽज्यस्येति ॥ ५६ ॥

अपि वाऽऽज्यप्रधानत्वाद्गुणार्थे व्यपदेशे भक्त्या संस्कारशब्दः स्यात् ॥ ५७ ॥

अपि वा–नैतदेवं, दधिप्रधानं तदुपलक्षयितव्यमिति । आज्यमेव प्रधानं, तद्धि प्रयोजनवत् । यागसंबन्धात्, पृषदाज्येनानुयाजान् यजतीति । यत्तेनोपस्तीर्यते, तत्र द्रव्यं निष्पद्यते । तथैवावत्तं भवति, दधि चोपस्तीर्णम् । तत्र शब्दादाधेयस्याऽऽधारसंस्कारोऽवगम्यते दधिसंस्कारः, न तु संस्कृतस्य प्रयोजनं दध्नः । प्रत्यक्षा तु चित्रता निर्वर्त्यमाना लक्ष्यते । तथा च प्रयोजनम् । पृषद्धि तदाज्यं श्रूयते । न च यागे दधि करणं भवितुमर्हति वाक्यमात्रम्, आज्ये श्रुतिप्राप्ते प्रत्यर्थिनि । तस्मादुपस्तरणमाज्यग्रहणार्थमेव । ततो दधिग्रहणं भविष्यतीति । अर्थादाधेयाधारसंबन्धे, उपस्तरणमिव तद्भवतीति भाक्त उपस्तृणातिः प्रयुक्तः । तथाऽभिघारयतिः । तस्मात्सकृद्द्विरित्येतस्य गुण-

---

५९ ॥

इत्यर्थे व्यपदेशे भवत्येव संस्कारशब्दः उपस्तृणाति, अभिघारयति, ओषधिष्वेव पशून् प्रतिष्ठापयति, इहैव पशूनभिजिघर्तीति च । तस्मात्, आज्यपा निगमा एव भवेयुरिति ॥ ५७ ॥

अपि वाऽऽज्याविकारत्वात्तेन स्यादुपलक्षणम् ॥ ५८ ॥

अपि वेति पक्षव्यावृत्तिः । न, आज्यपा निगमा भवेयुः, पृषदाज्यपानिति वक्तव्यम् । कुतः । आज्याविकार एव भवति । दधिसर्पिषोरत्र संसर्गः क्रियते । तत्र यो गुण उपजायते तद्गुणयुक्तस्य संसृष्टस्याऽऽज्याविशेषो भवति पृषदाज्यमिति । यथा, रागः खाण्डवः सुरा, इति । तत्र ह्युपचरितमेकं शब्दमुपलक्षयामः । उपचाराच्चाभिधानाभिधेयसम्बन्धो गम्यते । तेन च यागनिर्वृत्तिः श्रूयते, पृषदाज्येनानुयाजान् यजतीति । तस्मादेवमुपलक्षयितव्यं, पृषदाज्यपानिति ॥ ५८ ॥

नैव वा स्याद्गुणशास्त्रत्वात् ॥ ५९ ॥

नैतदेवं स्यात् । संसृष्टस्य रागवत्पृषदाज्यशब्दो वाचकः, उपचारादिति । सत्यमुपचारितोऽयं तत्र । स तूपचारो लोकादेवावगतः । स गुण आज्ये भवतीति गम्यते । कुतः । आज्यशब्दः सर्पिषो वाचकः । पृषच्छब्दश्चित्रस्य । तद्यथा, पृषद्रज्जुः पृषन्मणिः पृषन्मृग इति । तयोरुच्चरितयोश्चित्राज्याभिधानं गम्यते । तस्मात्तत्रैव स उपचार उपपन्नः । अतश्चाऽऽज्यस्यैवोपलक्षणं, चित्रमचित्रं वाऽऽज्यमाज्यशब्देनाभिधीयत इति ॥ ५९ ॥

इति श्रीशबरस्वामिविरचिते मीमांसाभाष्ये दशमस्याध्यायस्य चतुर्थः पादः ॥

---

१७ ॥ १८ ॥ १९ ॥]

इति श्रीमद्भट्टकुमारिलविरचितायां मीमांसाभाष्यव्याख्यायां टुप्टीकायां दशमाध्यायस्य चतुर्थः पादः ॥